Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

KÂVYAMÂLÂ. 8.

# THE DHARMAS'ARMÂBHYUDAYA

OF

# HARICHANDRA.

EDITED BY

PANDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

THE "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1888.

*Price 1 Rupee.*

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

*( Registered according to act XXV of 1867. )*

*( All rights reserved by the publisher. )*

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काव्यमाला. ८.

महाकविश्रीहरिचन्द्रविरचितं

# धर्मशर्माभ्युदयम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम् ।

तच्च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८८८

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा जावजी दादाजी इत्यस्यैवाधिकारः ।)

मूल्यमेको रूप्यकः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# धर्मशर्माभ्युदयस्य विषयानुक्रमः ।


१ सर्गः—मङ्गलाचरणानि । सज्जनदुर्जनादिवर्णनम् । जम्बुद्वीपवर्णनम् । कनकाद्रिवर्णनम् । भारतवर्षवर्णनम् । आर्यावर्तवर्णनम् । उत्तरकोशलाख्यदेशवर्णनम् । तत्र रत्नपुराख्यनगरवर्णनम् ।

२ सर्गः—रत्नपुराधिपतेरिक्ष्वाकुवंशोद्भवस्य महासेननरपतेर्वर्णनम् । तन्महिष्याः सुव्रताया वर्णनम् । राज्ञः सुतप्राप्तिचिन्तावर्णनम् । तदैव प्रचेतसाख्यस्य दिव्यमुनेरुद्यानपालमुखादागमनश्रवणम् ।

३ सर्गः—परिकरसमेतस्य राज्ञो मुनिदर्शनार्थं गमनवर्णनम् । वनालीवर्णनम् । उद्यानप्राप्तिवर्णनम् । तत्र मुनिवर्णनम् । मुनिमहीपालयोः समागमवर्णनम् । मुनिसमीपे राज्ञः पुत्रप्राप्तिचिन्तानिवेदनवर्णनम् । 'त्वद्गृहे पञ्चदशस्तीर्थकरो धर्मनाथः पुत्रत्वेनावतरिष्यति' इत्यादिमुनिवाक्यवर्णनम् । धर्मनाथस्य पूर्वजन्मविषये मुनिं प्रति राज्ञः प्रश्नस्य वर्णनम् ।

४ सर्गः—धर्मनाथस्य प्राग्जन्मवृत्तान्तवर्णनोपक्रमः । धातकीखण्डाख्यद्वीपे वत्साख्यदेशवर्णनम् । तत्र सुसीमाख्यनगरीवर्णनम् । तत्र दशरथाख्यमहीपतिवर्णनम् । एकदा रात्रौ महीपतिना उपरक्तश्चन्द्रो दृष्टः, तं विलोक्य 'जगति कस्यापि श्रीः स्थिरा नास्ति' इति विचारयतो महीपतेर्वैराग्योदयस्य वर्णनम् । तृणवद्राज्यं परित्यज्य तपसे यियासुं राजानं प्रति सुमन्त्राख्यस्य तन्मन्त्रिणश्चार्वाकमतानुकूल उपदेशः । राजकृतं तत्खण्डनं च । ततोऽतिरथाख्याय स्वपुत्राय राज्यभारं दत्त्वा नरपतिस्तपसे वनं ययावित्यादि वर्णनम् । महीपतेस्तीव्रतपोवर्णनम् । तपःप्रभावात्स दिव्यतां प्राप्त इति वर्णनम् । 'षण्मासानन्तरं स एव तव महिष्या गर्भेऽवतरिष्यति' इति मुनिवाक्यवर्णनम् ।

५ सर्गः—महासेननृपतिसभायामम्बरात्काञ्चन लक्ष्मीसमेता दिव्याङ्गना अवतीर्णास्तासां वर्णनम् । 'किमर्थं युष्माकमागमनम्' इति ताः प्रति


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृपतेः प्रश्नः । "महासेननृपतिमहिष्यां धर्मनाथोऽवतरिष्यति, तत्सेवार्थं यूयं यात' इति महेन्द्रेणादिष्टा वयमागताः, स्वयं महेन्द्रोऽपि समागमिष्यति" इत्यादि तद्वाक्यवर्णनम् । तासां नृपमहिषीसमीपे गमनवर्णनम् । तत्कृतं नृपमहिष्याः सेवनवर्णनम् । नृपमहिष्याः स्वप्नविलोकनवर्णनम् । प्रातरुत्थाय महिष्या नृपसमीपे स्वप्ने विलोकितं सर्वं कथितम्, नृपेणाप्यतिसंतुष्टेन 'तीर्थकरस्तव पुत्रतामेष्यति' इति तत्फलं कथितमित्यादिवर्णनम् । महिषीगर्भे धर्मनाथोऽवतीर्ण इति वर्णनम् ।

६ **सर्गः**—सगर्भाया महिष्या वर्णनम् । माघशुक्लत्रयोदश्यां पुष्पनक्षत्रे धर्मनाथस्य जन्माभूदिति वर्णनम् । इन्द्रादिकृतस्य महीपतिकृतस्य च तज्जन्मोत्सवस्य वर्णनम् ।

७ **सर्गः**—जातवेश्मनि स्थिताया महिष्या अङ्के मायानिर्मितमेकं शिशुं निधाय धर्मनाथमपहृत्य शची शक्राय समर्पितवती, शक्रोऽपि तमादाय सुरगजमारुह्य देवसेनासमेतो व्योमवर्त्मना सुमेरुपर्वतं जगामेत्यादि वर्णनम् । सुमेरुपर्वतवर्णनम् । तत्र देवसेनासंनिवेशवर्णनं गजाश्वादिवर्णनं च ।

८ **सर्गः**—सुमेरौ मणिसिंहासने शक्रो धर्मनाथमुपवेशितवानित्यादिवर्णनम् । धर्मनाथाभिषेकोपक्रमवर्णनम् । क्षीरसमुद्रवर्णनम् । धर्मनाथाभिषेकवर्णनम् । इन्द्रादिदेवकृता तत्स्तुतिः । अभिषेकानन्तरं पुनरपि धर्मनाथं तन्मातुर्नृपमहिष्या अङ्के प्रापय्य देवाः स्वानि धामानि जग्मुरिति वर्णनम् ।

९ **सर्गः**—धर्मनाथस्य बाल्यवर्णनं यौवनवर्णनं यौवराज्यप्राप्तिवर्णनं च । विदर्भाधिनाथेन प्रतापराजेन स्वदुहितुः स्वयंवरे धर्मनाथानयनार्थं प्रेषितस्य दूतस्यागमनवर्णनम् । पित्राज्ञया ससैन्यस्य धर्मनाथस्य विदर्भान्प्रति गमनवर्णनम् । मार्गे प्राप्ताया गङ्गाया वर्णनम् ।

१० **सर्गः**—विन्ध्याचलवर्णनम् ।

११ **सर्गः**—षड्ऋतुवर्णनम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**१२ सर्गः**—पुष्पावचयवर्णनम् ।
**१३ सर्गः**—नर्मदायां जलक्रीडावर्णनम् ।
**१४ सर्गः**—सायंकालवर्णनम् । अन्धकारवर्णनम् । चन्द्रोदयवर्णनम् । नायिकानां प्रसाधनवर्णनम् । दूतीप्रेषणादिवर्णनम् ।
**१५ सर्गः**—पानगोष्ठीवर्णनम् । रात्रिक्रीडावर्णनम् ।
**१६ सर्गः**—प्रभातवर्णनम् । पुनर्धर्मनाथस्य यात्रावर्णनम् । नर्मदामुत्तीर्य विदर्भदेशं प्राप्त इति वर्णनम् । विदर्भदेशवर्णनम् । तत्र कुण्डिनपुराधिपतिना प्रतापराजेन समागमवर्णनम् ।
**१७ सर्गः**—स्वयंवरवर्णनम् । तत्र राजकन्यया धर्मनाथो वृत इति वर्णनम् । धर्मनाथस्य कुण्डिनपुरप्रवेशवर्णनम् । नगरनारीचेष्टावर्णनम् । धर्मनाथस्य विवाहवर्णनम् । पितुः सकाशादाह्वानार्थं दूतः समागत इति निखिलमपि कटकं सेनापतेः सुषेणास्याधीनं विधाय धर्मनाथः स्वयं कुबेरोपढौकितं विमानमारुह्य वध्वा समेतो नभसा स्वपुरं जगामेति वर्णनम् ।
**१८ सर्गः**—रत्नपुरे धर्मनाथप्राप्तिवर्णनं महोत्सववर्णनं च । धर्मनाथपितुर्महासेनस्य वैराग्यवर्णनम् । धर्मनाथं प्रति तत्कृतस्य नीत्युपदेशस्य वर्णनम् । धर्मनाथस्य राज्याभिषेकवर्णनम् । महासेननृपतेर्वनगमनवर्णनम् । धर्मनाथस्य राज्यस्थितिवर्णनम् ।
**१९ सर्गः**—अनेकमहीपतिभिः सह सुषेणस्य चित्रयुद्धवर्णनम् ।
**२० सर्गः**—पञ्चलक्षवर्षपर्यन्तं सम्यक्प्रजापालनं विधाय, एकदा रात्रौ स्फाटिके सौधशृङ्गे स्थितो धर्मनाथो गगनात्पतन्तीमुल्कामपश्यदिति वर्णनम् । उल्कावर्णनम् । धर्मनाथस्य वैराग्यप्राप्तिवर्णनम् । राज्यं परित्यज्य वने गतस्य धर्मनाथस्य तपश्चर्यावर्णनम् । ज्ञानप्राप्तिवर्णनम् । धर्मनाथार्थमिन्द्राज्ञया कुबेरेण निर्मिताया दिव्यसभाया वर्णनम् । तत्र सिंहासने स्थितस्य धर्मनाथस्य दिव्यैश्वर्यवर्णनम् ।
**२१ सर्गः**—धर्मनाथकृतं संक्षेपेण जिनसिद्धान्तवर्णनम् ।
० —ग्रन्थकर्तुः प्रशस्तिः ।

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# काव्यमाला।

## महाकविश्रीहरिचन्द्रकृतं[1]
## धर्मशर्माभ्युदयम्।

### प्रथमः सर्गः।

श्रीनाभिसूनोश्चिरमङ्घ्रियुग्मनखेन्दवः कौ[2] मुदमेधयन्तु।
यत्रानमन्नाकिनरेन्द्रचक्रचूडाश्मगर्भप्रतिबिम्बमेणः॥ १॥
चन्द्रप्रभं[4] नौमि यदीयभासा नूनं जिता चान्द्रमसी प्रभा सा।
नो चेत्कथं तर्हि तदङ्घ्रिलग्नं नखच्छलादिन्दुकुटुम्बमासीत्॥ २॥
दुरक्षरक्षोदधियेव धात्र्यां मुहुर्मुहुर्घृष्टललाटपट्टाः।
यं स्वर्गिणोऽनल्पगुणं प्रणेमुस्तनोतु नः शर्म स धर्मनाथः॥ ३॥
संप्रत्यपापाः स्म इति प्रतीत्यै वह्नाविवाह्नाय मिथः प्रविष्टाः।
यत्कायकान्तौ कनकोज्ज्वलायां सुरा विरेजुस्तमुपैमि शान्तिम्[5]॥ ४॥
भूयादगाधः स विबोधवार्धिर्वीरस्य[6] रत्नत्रय[7]लब्धये वः।
स्फुरत्पयोबुद्बुदबिन्दुमुद्रामिदं यदन्तस्त्रिजगत्तनोति॥ ५॥

---

१. अस्य कायस्थवंशमुक्तामणेर्दिगम्बरजैनमतानुयायिन आर्द्रदेवसूनोः श्रीहरिचन्द्रमहाकवेः समयः सम्यङ् न ज्ञायते. हरिचन्द्रद्वयं तावत्प्रसिद्धम्—'पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः। भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते॥' इति हर्षचरितारम्भे बाणभट्टेन वर्णितः प्रथमः, विश्वप्रकाशकोषकर्तुर्महेश्वरस्य पूर्वपुरुषश्चरकसंहिताटीकाकारः साहसाङ्कनृपतेः प्रधानवैद्यो द्वितीयः. अनयोरेवायमप्येकतरस्तृतीयो वेति संदेहः. किं त्वयमपि (धर्मशर्माभ्युदयकर्ता) स्वकवित्वप्रौढ्या माघादिप्राचीनमहाकविकक्षामारोहति, तस्मान्नार्वाचीनः. कर्पूरमञ्जर्यां प्रथमे जवनिकान्तर एकत्र विदूषकोक्तिव्याजेन राजशेखरोऽपि हरिचन्द्रकविं स्मरति. एकविंशतिसर्गात्मके चास्मिन्महाकाव्ये नगरार्णवशैलर्तुपुष्पावचयजलविहारादिकाव्यवर्णनीयवस्तुवर्णनपुरःसरं चतुर्विंशतिजैनतीर्थकरेषु पञ्चदशतीर्थंकरस्य धर्मनाथस्य जन्मप्रभृति निर्वाणान्तं चरितं वर्णितमस्ति. २. कौ पृथिव्याम्, मुदं हर्षम्; (अथ च) कौमुदं कुमुदसमूहम्. ३. वर्तत इति शेषः. ४. अष्टमं तीर्थंकरम्. ५. षोडशं तीर्थंकरम्. ६. चतुर्विंशतितमं तीर्थंकरम्. ७. सम्यग्दर्शनम्, सम्यग्ज्ञानम्, सम्यक्चारित्रं चेति जिनमते रत्नत्रयमुच्यते. रत्नलब्धये समुद्रसेवा समुचितैव.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्मार्जिते यत्पदपङ्कजानां रजोभिरन्तः प्रतिबिम्बितानि ।
जनाः स्वचेतोमुकुरे जगन्ति पश्यन्ति तान्नौमि मुदे जिनेन्द्रान् ॥ ६ ॥
रत्नत्रयं तज्जननार्तिमृत्युसर्पत्रयीदर्पहरं नमामि ।
यद्भूषणं प्राप्य भवन्ति शिष्टा मुक्तेर्विरूपाकृतयोऽप्यभीष्टाः ॥ ७ ॥
त्वद्भक्तिनम्रं जनमाश्रयावः साक्षादिति प्रष्टुमिवोपकर्णम् ।
चन्द्राश्मताटङ्कपदात्पदार्थौ यस्याः स्थितौ ध्यायत भारतीं ताम् ॥८॥
जयन्ति ते केऽपि महाकवीनां स्वर्गप्रदेशा इव वाग्विलासाः ।
पीयूषनिष्यन्दिषु येषु हर्षं केषां न धत्ते सुरसार्थलीला ॥ ९ ॥
लब्धात्मलाभा बहुधान्यवृद्ध्यै निर्मूलयन्ती घननीरसत्वम् ।
सा मेघसंघातमपेतपङ्का शरत्सतां संसदपि क्षिणोतु ॥ १० ॥
वियत्पथप्रान्तपरीक्षणाद्वा तदेतदम्भोनिधिलङ्घनाद्वा ।
मात्राधिकं मन्दधिया मयापि यद्वर्ण्यते जैनचरित्रमत्र ॥ ११ ॥
पुराणपारीणमुनीन्द्रवाग्भिर्यद्वा ममाप्यत्र गतिर्भवित्री ।
तुङ्गेऽपि सिध्यत्यधिरोहिणीभिर्यद्वामनस्यापि मनोभिलाषः ॥ १२ ॥
श्रीधर्मनाथस्य ततः स्वशक्त्या किंचिच्चरित्रं तरलोऽपि वक्ष्ये ।
वक्तुं पुनः सम्यगिदं जिनस्य क्षमेत नो वागधिदेवतापि ॥ १३ ॥
अर्थे हृदिस्थेऽपि कविर्न कश्चिन्निर्ग्रन्थिगीर्गुम्फविचक्षणः स्यात् ।
जिह्वाञ्चलस्पर्शमपास्य पातुं श्वा नान्यथाम्भो घनमप्यवैति ॥ १४ ॥
हृद्यार्थवन्ध्या पदबन्धुरापि वाणी बुधानां न मनो धिनोति ।
न रोचते लोचनवल्लभापि स्नुहीक्षरत्क्षीरसरिन्नरेभ्यः ॥ १५ ॥
वाणी भवेत्कस्यचिदेव पुण्यैः शब्दार्थसंदर्भविशेषगर्भा ।
इन्दुं विनान्यस्य न दृश्यते द्युत्तमोधुनाना च सुधाधुनी च ॥ १६ ॥

---

१. चन्द्रकान्तमणिनिर्मितकर्णभूषणविशेषव्याजात्. २. सुर-सार्थलीला देवसमूहक्रीडा; (पक्षे) सुरसा अर्थलीला. ३ बहुधा अन्यवृद्धैः; (पक्षे) बहु-धान्यवृद्धैः. ४. घननीरसत्वमत्यन्तरसशून्यत्वम्; (पक्षे) घन-नीर-सत्त्वं मेघजलास्तित्वम्. ५. मे अघसंघातं पापसमूहम्; (पक्षे) मेघ-संघातम्. ६. निष्पापा; विगतकर्दमा च. ७. किंचिदधिकम्. ८. 'निःश्रेणिस्त्वधिरोहिणी' इत्यमरः. ९. 'द्युत्'शब्दः किरणवाचकः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रव्येऽपि काव्ये रचिते विपश्चित्कश्चित्सचेताः परितोषमेति ।
उत्कोरकः स्यात्तिलकश्चलाक्ष्याः कटाक्षभावैरपरे न वृक्षाः ॥ १७ ॥
परस्य तुच्छेऽपि परोऽनुरागो महत्यपि स्वस्य गुणे न तोषः ।
एवंविधो यस्य मनोविवेकः किं प्रार्थ्यते सोऽत्र हिताय साधुः ॥१८॥
साधोर्विनिर्माणविधौ विधातुश्च्युताः कथंचित्परमाणवो ये ।
मन्ये कृतास्तैरुपकारिणोऽन्ये पाथोदचन्द्रद्रुमचन्दनाद्याः ॥ १९ ॥
पराङ्मुखोऽप्येष परोपकारव्यापारभारक्षम एव साधुः ।
किं दत्तपृष्ठोऽपि गरिष्ठधात्रीप्रोद्धारकर्मप्रवणो न कूर्मः ॥ २० ॥
निसर्गशुद्धस्य सतो न कश्चिच्चेतोविकाराय भवत्युपाधिः ।
त्यक्तस्वभावोऽपि विवर्णयोगात्कथं तदस्य स्फटिकोऽस्तु तुल्यः ॥२१॥
खलं विधात्रा सृजता प्रयत्नात्किं सज्जनस्योपकृतं न तेन ।
ऋते तमांसि द्युमणिर्मणिर्वा विना न काचैः स्वगुणं व्यनक्ति ॥ २२ ॥
दोषानुरक्तस्य खलस्य कस्याप्युलूकपोतस्य च को विशेषः ।
अह्नीव सत्कान्तिमति प्रबन्धे मलीमसं केवलमीक्षते यः ॥ २३ ॥
न प्रेम नम्रेऽपि जने विधत्से मित्रेऽपि मैत्रीं खल नातनोषि ।
तदेष किं नेष्यति न प्रदोषस्त्वामञ्जसा सायमिवावसानम् ॥ २४ ॥
श्रव्यं भवेत्काव्यमदूषणं यन्न निर्गुणं क्वापि कदापि मन्ये ।
गुणार्थिनो दूषणमाददानस्तत्सज्जनाद्दुर्जन एव साधुः ॥ २५ ॥
अहो खलस्यापि महोपयोगः स्नेहद्रुहो यत्परिशीलनेन ।
आ कर्णमापूरितपात्रमेताः क्षीरं क्षरन्त्यक्षतमेव गावः ॥ २६ ॥
आः कोमलालापपरेऽपि मा गाः प्रमादमन्तःकठिने खलेऽस्मिन् ।
शेवालशालिन्युपले छलेन पातो भवेत्केवलदुःखहेतुः ॥ २७ ॥
आदाय शब्दार्थमलीमसानि यद्दुर्जनोऽसौ वदने दधाति ।
तेनैव तस्याननमेव कृष्णं सतां प्रबन्धः पुनरुज्ज्वलोऽभूत् ॥ २८ ॥

१. दोषः; (पक्षे) रात्रिः. २. प्रकृष्टो दोषः; रजनीमुखं च. ३. दुर्जनः; तैलरहितस्तिलसर्षपादिपिण्याकश्च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणानधस्तान्नयतोऽप्यसाधुपद्मस्य यावद्दिनमस्तु लक्ष्मीः।
दिनावसाने तु भवेद्गतश्री[1] राज्ञः सभासंनिधिमुद्रितास्यः॥ २९॥
उच्चासनस्थोऽपि सतां न किंचिन्नीचः स चित्तेषु चमत्करोति।
स्वर्णाद्रिशृङ्गाग्रमधिष्ठितोऽपि काको वराकः खलु काक एव॥ ३०॥
वृत्तिर्मरुद्द्वीपवतीव[2] साधोः खलस्य वैवस्वतसोदरीव[3]।
तयोः प्रयागे[4] कृतमज्जनो नः प्रबन्धबन्धुर्लभतां विशुद्धिम्॥ ३१॥
अथास्ति जम्बूपपदः पृथिव्यां द्वीपप्रभान्यकृतनाकिलोकः।
यो वृद्धया मध्यगतोऽपि लक्ष्म्या द्वीपान्तराणामुपरीव तस्थौ॥ ३२॥
क्षेत्रच्छदैः पूर्वविदेहमुख्यैरधःस्थितस्फारफणीन्द्रदण्डः।
चकास्ति रुक्माचलकर्णिको यः सद्म श्रियः पद्म इवाब्धिमध्ये॥३३॥
द्वीपेषु यः कोऽपि करोति गर्वं मयि स्थितेऽप्यस्तु स मे पुरस्तात्।
इतीव येन ग्रहकङ्कणाङ्को हस्तो व्युदस्तस्त्रिदशाद्रिदम्भात्॥ ३४॥
पश्यन्तु संसारतमस्यपारे सन्तश्चतुर्वर्गफलानि सर्वे।
इतीव यो द्विर्द्विदिवाकरेन्दुव्याजेन[5] धत्ते चतुरः प्रदीपान्॥ ३५॥
अवाप्य सर्पाधिपमौलिमैत्रीं छत्रद्युतिं तन्वति यत्र वृत्ते।
धत्ते समुत्तेजितशातकुम्भकुम्भप्रभां कांचन काञ्चनाद्रिः॥ ३६॥
सम्यक्त्वपाथेयमवाप्यते चेदृजुस्तदस्मादपवर्गमार्गः।
इतीव लोके निगदत्युदस्तशैलेन्द्रहस्ताङ्गुलिसंज्ञया यः॥ ३७॥
पातुं बहिर्मारुतमङ्कसुप्तलक्ष्मीलसत्कुङ्कुमपङ्कपीतः।
यदन्तरुद्भिद्य महीमहीनामभ्युत्थितो नाथ इवास्ति मेरुः॥ ३८॥
चकास्ति पर्यन्तपतत्पतंगे यत्राम्बरं दीप इवोपरिष्टात्।
कयापि शृङ्गाग्रवनाङ्गनानां जिघृक्षया पात्रमिव प्रदत्तम्॥ ३९॥
द्यावापृथिव्योः पृथुरन्तरे यः कृतस्थितिः स्थूलरथाङ्गकान्त्योः।
युगानुकारिध्रुवमण्डलश्रीरूर्ध्वो रथस्याक्ष इवावभाति॥ ४०॥

---

१. चन्द्रस्य च. २. मरुतां देवानां द्वीपवती नदी (गङ्गा). ३. यमुना. ४. गङ्गायमुनासंगमरूपे तीर्थविशेषे. ५. जैनमते सूर्यचन्द्रौ नक्षत्राणि च द्विगुणानि सन्ति. 'द्वौ द्वौ रवीन्दू भगणौ च तद्वदेकान्तरौ तावुदयं व्रजेताम्। यदब्रुवन्नेवमनम्बराद्या ब्रवीम्यतस्तान्प्रति युक्तियुक्तम्॥' इति सिद्धान्तशिरोमणौ गोलाध्याये श्रीभास्कराचार्यः.

For Private and Personal Use Only

तद्दक्षिणं भारतमस्ति तस्य क्षेत्रं जिनेन्द्रागमवारिसेकात् ।
स्वर्गादिसंपत्फलशालि यत्र निष्पद्यते पुण्यविशेषसस्यम् ॥ ४१ ॥
यस्मिन्धुगङ्गान्तरवर्तिनोच्चैः शैलेन भिन्नं विजयार्धनाम्ना ।
भारेण लक्ष्म्या इव दुर्वहेन बभूव षट्खण्डमखण्डशोभम् ॥ ४२ ॥
तत्रार्यखण्डं त्रिदिवात्कथंचिच्च्युतं निरालम्बतयेव खण्डम् ।
ललामवन्मण्डयति स्वकान्त्या देशो महानुत्तरकोशलाख्यः ॥ ४३ ॥
[1]अनेकपद्माप्सरसः समन्ताद्यस्मिन्न[2]संख्यातहिरण्यगर्भाः ।
अनन्त[3]पीताम्बरधामरम्या ग्रामा जयन्ति त्रिदिवप्रदेशान् ॥ ४४ ॥
यन्त्रप्रणालीचषकैरजस्रमापीय पुण्ड्रेक्षुरसासवौघम् ।
मन्दानिलान्दोलितशालिपूर्णा विघूर्णते यत्र मदादिवोर्वी ॥ ४५ ॥
विस्तार्य तारा रभसान्निशि द्यौः पुनः पुनर्यद्दिवसे प्रमार्ष्टि ।
उत्पुण्डरीकैः किल यत्सरोभिः स्वं लब्धसाम्यं तदमन्यमाना ॥ ४६ ॥
[4]उत्पालिकाभ्रूस्तिमितैस्तडागचक्षुःसहस्रैरिव विस्मयेन ।
यद्वैभवं भूरपि वीक्ष्य धत्ते रोमाञ्चमुद्यत्कलमच्छलेन ॥ ४७ ॥
जनैः प्रतिग्रामसमीपमुच्चैः कृता [5]वृषाढ्यैर्वरधान्यकूटाः ।
यत्रोदयास्ताचलमध्यगस्य विश्रामशैला इव भान्ति भानोः ॥ ४८ ॥
नीरान्तरात्तप्रतिमावतारास्तरङ्गिणीनां तरवस्तटेषु ।
विभान्ति यत्रोर्ध्वगतार्कतापात्कृतप्रयत्ना इव मज्जनाय ॥ ४९ ॥
सस्यस्थलीपालकबालिकानामुल्लोलगीतश्रुतिनिश्चलाङ्गम् ।
यत्रैणयूथं पथि पान्थसार्थाः सल्लेप्यलीलामयमामनन्ति ॥ ५० ॥
आस्कन्धमृज्वी तदनल्पपत्रप्रसूनशाखावलया द्रुमाली ।
मयूरपत्रग्रथितातपत्रश्रीर्यस्य देशाधिपतित्वमाह ॥ ५१ ॥

---

१. अनेकानि पद्मयुक्तानि जलतडागानि येषु. स्वर्गे च पद्मा लक्ष्मीः, अप्सरसो रम्भाद्याः. २. असंख्यातं हिरण्यं सुवर्णं गर्भे येषाम्. हिरण्यगर्भश्च ब्रह्मा. ३. पीतमम्बरं यैस्तादृशैर्धामभी रम्याः. असंख्यैरभ्रंकषप्रासादैः शोभमाना इत्यर्थः. स्वर्गे च पीताम्बरस्य विष्णोर्धाम. ४. तडागस्य समन्ताज्जलबन्धनार्थं निर्मितो मृत्कूटः. ५. वृषो धर्मस्तद्युक्ताः पुरुषा मार्गमध्ये पान्थविश्रमार्थं स्थलानि कुर्वन्ति.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्रालिमाला स्थलपङ्कजानां सौरभ्यलोभादभितो भ्रमन्ती ।
बिभर्ति लोलाध्वगलोचनानां बन्धाय सिद्धायसशृङ्खलेव ॥ ५२ ॥
यं तादृशं देशमपास्य रम्यं यत्क्षारमब्धिं सरितः समीयुः ।
बभूव तेनैव जडाशयानां तासां प्रसिद्धं किल निम्नगात्वम् ॥ ५३ ॥
भूकण्ठलोठन्नवपुण्डरीकस्रग्बन्धुरा गोधनधोरणी या ।
सा यस्य दिङ्मण्डलमण्डनाय विस्तारिणी कीर्तिरिवावभाति ॥ ५४ ॥
कल्पद्रुमान्कल्पितदानशीलाञ्जेतुं किलोत्तालपतत्रिनादैः ।
आहूय दूराद्वितरन्ति वृक्षा फलान्यचिन्त्यानि जनाय यत्र ॥ ५५ ॥
तत्रास्ति तद्रत्नपुरं पुरं यद्द्वारस्थलीतोरणवेदिमध्यम् ।
अलंकरोत्यर्कतुरंगपङ्क्तिः कदाचिदिन्दीवरमालिकेव ॥ ५६ ॥
मुक्तामया[1] एव जनाः समस्तास्तास्ताः स्त्रियो या नवपुष्परागाः[2] ।
वज्रं[3] द्विषां मूर्ध्नि नृपोऽपि यस्य वितन्वते नाम विनिश्चितार्थम् ॥५७॥
भोगीन्द्रवेश्मेदमिति प्रसिद्ध्या यद्वप्रवेषः किल पाति शेषः ।
तथाहि दीर्घान्तिकदीर्घिकास्य निर्मुक्तनिर्मोकनिभा विभाति ॥ ५८ ॥
समेत्य यस्मिन्मणिबद्धभूमौ पौराङ्गनानां प्रतिबिम्बदम्भात् ।
मन्ये न रूपामृतलोलुपाक्ष्यः पातालकन्याः सविधं त्यजन्ति ॥ ५९ ॥
प्रासादशृङ्गेषु निजप्रियार्त्या हेमाण्डकप्रान्तमुपेत्य रात्रौ ।
कुर्वन्ति यत्रापरहेमकुम्भभ्रमं द्युगङ्गाजलचक्रवाकाः ॥ ६० ॥
शुभ्रा यदभ्रंलिहमन्दिराणां लग्ना ध्वजाग्रेषु न ताः पताकाः ।
किं तु त्वचो घट्टनतः सितांशोर्नो चेत्किमन्तर्व्रणकालिकास्य ॥ ६१ ॥
कृताप्यधो भोगिपुरी कुतोऽभूर्दहीनभूषेत्यतिकोपकम्प्रम् ।
यज्जेतुमेतामिव खातिका[5]म्भश्छायाछलात्क्रामति नागलोकम् ॥ ६२ ॥
संक्रान्तबिम्बः स्रवदिन्दुकान्ते नृपालये प्राहरिकैः परीते ।
हृताननश्रीः सुदृशां चकास्ति काराधृतो यत्र रुदन्निवेन्दुः ॥ ६३ ॥

---

१. नीरोगाः; मौक्तिकप्रचुराश्च. २. पुष्परागो मणिभेदः; (स्त्रीपक्षे तु) वपुषि शरीरेऽरागा रागरहिता न. ३. वज्रमशनिः; हीरकश्च. ४. बहुभूषणयुक्ता; (पक्षे) अहीनामिनः सर्पराजः, ५. परिखा.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विभाति रात्रौ मणिकुट्टिमोर्वी संजातताराप्रतिमावतारा ।
दिदृक्षया यत्र विचित्रभूतेरुत्तानिताक्षीव कुतूहलेन ॥ ६४ ॥

दृग्भिर्निमेषा द्युसदां पतन्ती दोषाय मा भूदिति यस्य रात्र्या ।
उत्तार्यते मूर्ध्नि जितामरस्य नीराजनापात्रमिवेन्दुबिम्बम् ॥ ६५ ॥

दन्दह्यमानागुरुधूमवर्तिप्रवर्तिते व्योम्नि घनान्धकारे ।
सौधेषु यत्रोर्ध्वनिविष्टहेमकुम्भप्रभा भाति तडिल्लतेव ॥ ६६ ॥

यत्रोच्चकैश्चैत्यनिकेतनानां कूटस्थलीकृत्रिमकेसरिभ्यः ।
रात्रिंदिवं भीत इवान्तरिक्षे भ्राम्यत्युपात्तैकमृगो मृगाङ्कः ॥ ६७ ॥

यत्रोच्चहर्म्येषु पतत्सपद्मव्योमापगापूरसहस्रशङ्काम् ।
वितन्वते काञ्चनकुम्भशोभासंभाव्यमानाः सितवैजयन्त्यः ॥ ६८ ॥

यत्रा[1]श्मगर्भोज्ज्वलवेश्मभित्तिप्रभाभिराक्रान्तनभस्तलाभिः ।
दिवापि वापीपुलिने वराकी रात्रिभ्रमात्ताम्यति चक्रवाकी ॥ ६९ ॥

मरुच्चलत्केतुकराङ्गुलीभिः संतर्जितानीव सिषेविरे यत् ।
अतुच्छशाखानगरच्छलेन चतुर्दिगन्ताधिपपत्तनानि ॥ ७० ॥

रत्नाण्डकैः शुभ्रसहस्रकूटान्याभान्ति यस्मिञ्जिनमन्दिराणि ।
तद्दृष्टुमुर्वीतलनिर्गताहिभर्त्रा कृतानीव वपूंषि हर्षात् ॥ ७१ ॥

उदेति पातालतलात्सुधायाः सिरासहस्रं सरसीषु यत्र ।
मन्ये ततस्तासु रसाधिकत्वं मुञ्चत्युपान्तं न च भोगिवर्गः ॥ ७२ ॥

मन्थाचलामूलविलोडितान्तर्लब्धैकसत्कौस्तुभदृष्टसारः ।
रत्नाकरः स्याज्जलधिः कुतस्तत्सेवेत नैतत्परिखामिषाच्चेत् ॥ ७३ ॥
इतीव भाःस्तम्भितकौस्तुभानां स्तूपान्निरूप्य ज्वलतां मणीनाम् ।
आक्रीडशैलानिव यत्र लक्ष्म्याः प्रत्येति दूरापणिकोऽपि लोकः॥७४॥(युग्मम्)

पदे पदे यत्र परार्थनिष्ठा रसस्थितिं कामपि नाटयन्त्यः ।
वाचः कवीनामिव कस्य नोच्चैश्चेतोमुदं कन्दलयन्ति वेश्याः ॥ ७५ ॥

---

१. अश्मगर्भो हरिन्मणिः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संगीतकारम्भरसन्मृदङ्गाः कैलासभासो वलभीनिवेशाः ।
वृन्दानि यत्र ध्वनदम्बुदानामनम्बुशुभ्राणि विडम्बयन्ति ॥ ७६ ॥
रणज्झणत्किङ्किणिकारवेण संभाष्य यत्राम्बरमार्गखिन्नम् ।
मरुच्चलत्केतनतालवृन्तैर्हर्म्यावली वीजयतीव मित्रम् ॥ ७७ ॥
हारावलीनिर्झरहारि तुङ्गमवाप्य कान्तास्तनशैलदुर्गम् ।
यत्र त्रिनेत्रादपि निर्विशङ्कः शङ्के स्मरो भूत्रयदुर्धरोऽभूत् ॥ ७८ ॥
केशेषु भङ्गस्तरलत्वमक्ष्णोः सरागता केवलमोष्ठयोश्च ।
मुक्त्वा तदास्यं सुदृशां न यत्र दोषाकरच्छायमवैमि किंचित् ॥७९॥
रात्रौ तमःपीतसितेतराश्मवेश्माग्रभाजामसितांशुकानाम् ।
स्त्रीणां मुखैर्यत्र नवोदितेन्दुमालाकुलेव क्रियते नभःश्रीः ॥ ८० ॥
मद्वाजिनो नोर्ध्वधुरा रथेन प्राकारमारोढुममुं क्षमन्ते ।
इतीव यल्लङ्घयितुं दिनेशः श्रयत्यवाचीमथ चाप्युदीचीम् ॥ ८१ ॥
नीलाश्मलीलावलभीषु जालव्यालम्बमानैर्निशि चन्द्रपादैः ।
प्रतारिता यत्र न मुग्धवध्वो हारावचूलेष्वपि विश्वसन्ति ॥ ८२ ॥
उपर्युपारूढवधूमुखेन्दूनुदीक्ष्य मन्दाक्षमुपैति नूनम् ।
यत्रोच्चसौधोच्चयचूलिकाभ्यो नम्रीभवन्निन्दुरतः प्रयाति ॥ ८३ ॥
प्रालेयशैलेन्द्रविशालशालश्रोणीसमालम्बितवारिवाहम् ।
विराजते निर्जरराजधानीमुड्डीय यज्जेतुमिवात्तपक्षम् ॥ ८४ ॥

अगुरुरिति सुगन्धिद्रव्यभेदे प्रसिद्धिः
सततमविभवोऽपि प्रेक्ष्यते मेष एव ।
फलसमयविरुद्धा यत्र वृक्षानपास्य
क्वचिदपि न कदाचित्केनचित्केऽपि दृष्टाः ॥ ८५ ॥
अन्तःस्थितप्रथितराजविराजमानो
यः प्रान्तभूवलयिता पृथुसालबन्धः ।

१. लोकत्रयजित्वरः. २. श्रोणी मध्यभागः. ३. अविभवो विभवरहितः; (पक्षे) अविर्मेषस्तदुत्पन्नः. ४. वृक्षपक्षे विभिः पक्षिभी रुद्धाः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यर्थिनाशापिशुनः परिपूर्णमूर्ते-
रिन्दोरुदारपरिवेष इवावभाति ॥ ८६ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये प्रथमः सर्गः ।

---

द्वितीयः सर्गः ।

अभूदथेक्ष्वाकुविशालवंशभूः स तत्र मुक्तामयविग्रहः पुरे ।
नृपो महासेन इति स्वमेव यः कुलं द्विषन्मूर्धमदोऽप्यभूषयत् ॥ १ ॥
गतेऽपि दृग्गोचरमत्र शात्रवः स्त्रियोऽपि कंदर्पमपत्रपा दधुः ।
किमद्भुतं तद्धतपक्षसायके यदद्रवन्संगरसंगताः क्षणात् ॥ २ ॥
न केवलं दिग्विजये चलच्चमूभरभ्रमद्भूवलयेऽस्य जङ्गमैः ।
श्रिताहितत्राणकलङ्कशङ्कितैरिव स्थिरैरप्युदकम्पि भूधरैः ॥ ३ ॥
तदङ्गरूपामृतमक्षिभाजनैर्यदृच्छयासेचनकं पपुः स्त्रियः ।
प्रमातुमन्तस्तदपारयन्मनाग्मुदश्रुदम्भान्निरगादिवाङ्गतः ॥ ४ ॥
कुलेऽपि किं तात तवेदृशी स्थितिर्यदात्मजा श्रीर्न सभास्वपि त्यजेत् ।
तदङ्कलीलामिति कीर्तिरीर्ष्यया ययावुपालब्धुमिवास्य वारिधिम् ॥ ५ ॥
तदा तदुत्तुङ्गतुरंगमक्रमप्रहारमज्जन्मणिशङ्कुसंहताम् ।
न भूरिबाधाविधुरोऽप्यपोहितुं प्रगल्भतेऽद्यापि महीमहीश्वरः ॥ ६ ॥
विभान्त्यमी शात्रुनिमज्जनोत्थितास्तदादि तस्यासिजलस्य बिन्दवः ।
न तारका व्योम्नि कुतोऽन्यथा भवेज्झषः कुलीरो मकरश्च तास्वपि ॥ ७ ॥
वितीर्णमस्मभ्यमनेन संयुगे पुनः कुतो लब्धमितीव कौतुकात् ।
स कस्य पृष्ठं न नतारिभूभुजः कराग्रसंस्पर्शमिषाद्व्यलोकयत् ॥ ८ ॥
न मन्त्रिणस्तन्त्रजुषोऽपि रक्षितुं क्षमाः स्वमेतद्भुजगादसेः क्वचित् ।
इतीव भीताः शिरसि द्विषो दधुस्तदङ्घ्रिचञ्चन्नखरत्नमण्डलम् ॥ ९ ॥

---

१. शात्रवः कं दर्पमभिमानम्. पत्रं वाहनं पान्तीति पत्रपाः, न पत्रपाः अपत्रपाः. वाहनरहिता इत्यर्थः; स्त्रियश्चापगतत्रपाः सत्यः कंदर्पं कामं दधुः. २ सङ्गरसं गताः; संगर-संगताः. ३. 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्'. ४. भुजं प्राप्तात्; (पक्षे) सर्पात्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतुच्छमच्छाद्यमहो महस्विनां पयोदकाले तदसौ समुद्यते ।
नवाम्बुधाराविनिपातजर्जरैर्न राजहंसैर्न पलायितं जवात् ॥ १० ॥
समुल्लसत्खड्गलतापहस्तितक्षमं धरित्री समवाप्य तद्भुजम् ।
विषाग्निगर्भैः श्वसितैरिवाकुला मुमोच मैत्रीं फणिचक्रवर्तिनः ॥ ११ ॥
नियोज्य कर्णोत्पलवज्जयश्रिया कृपाणमस्योपगमे समिद्गृहे ।
प्रतापदीपाः शमिता विरोधिनामहो सलज्जा नवसंगमे स्त्रियः ॥ १२ ॥
असक्तमाकारनिरीक्षणादपि क्षणादभीष्टार्थकृतार्थितार्थिनः ।
कुतश्चिदातिथ्यमियाय कर्णयोर्न तस्य देहीति दुरक्षरद्वयम् ॥ १३ ॥
उपासनायास्य बलाभियोगतः प्रकम्पमानाः कुलपर्वता इव ।
समाययुर्द्वारि मदाम्बुनिर्झराः क्षितीश्वरोपायनमत्तदन्तिनः ॥ १४ ॥
निपीतमातङ्गघटाग्रशोणिता हठावगूढा सुरतार्थिभिर्भटैः ।
किल प्रतापानलमासदत्समित्समृद्धमस्यासिलतात्मशुद्धये ॥ १५ ॥
ततः श्रुताम्भोनिधिपारदृश्वनो विशङ्कमानेव पराभवं तदा ।
विशेषपाठाय विधृत्य पुस्तकं करान्न मुञ्चत्यधुनापि भारती ॥ १६ ॥
बभुस्तदस्त्राहतदन्तमण्डलात्समुच्छलन्तो हुतभुक्कणाः क्षणम् ।
सरक्तवान्ता वरवैरिवारणव्रजस्य जीवा इव संगराजिरे ॥ १७ ॥
श्रुतं च शीलं च बलं च यत्त्रयं स सर्वदौदार्यगुणेन संदधत् ।
चतुष्कमापूरयति स्म दिग्जयप्रवृत्तकीर्तेः प्रथमं सुमङ्गलम् ॥ १८ ॥
तदीयनिस्त्रिंशलसद्विधुंतुदे बलाद्गिलत्युद्यतराजमण्डलम् ।
निमज्ज्य धारासलिले स्वमुच्चकैर्ददुर्द्विजेभ्यः प्रविभज्य विद्विषः ॥ १९ ॥
उदर्कवक्रां वनितास्वभावतो विभाव्य विस्रम्भमधारयन्निव ।
व्यशिश्रणद्वैरिकुलाद्बलाहृतां स्वसंमतेभ्यो बहिरेव स श्रियम् ॥ २० ॥
विदारितारिद्विपगण्डमण्डलीसमुल्लसल्लोलशिलीमुखच्छलात् ।
कचेषु खड्गः क्रमकिंकरीमिव क्रुधा चकर्षास्य जयश्रियं रणे ॥ २१ ॥

---

१. मातङ्गघटा हस्तिसमूहः; (पक्षे) मातङ्गघटश्चण्डालकुम्भः. २. देवत्वार्थिभिः; (पक्षे) निधुवनार्थिभिः. ३. समिति युद्धे समृद्धम्; (पक्षे) समिद्भिः काष्ठैः. ४. नृपसमूहम्; चन्द्रबिम्बं च. ५. आत्मानम्; धनं च. ६. पक्षिभ्यः; ब्राह्मणेभ्यश्च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगत्त्रयोत्तंसितभासि तद्यशःसमग्रपीयूषमयूखमण्डले ।
विजृम्भमाणं रिपुराजदुर्यशो बभार तुच्छेतरलाञ्छनच्छविम् ॥ २२ ॥
वमन्नमन्दं रिपुवर्मयोगतः स्फुलिङ्गजालं तदसिस्तदा बभौ ।
वपन्निवासृग्जलसिक्तसंगरक्षितौ प्रतापद्रुमबीजसंततिम् ॥ २३ ॥
अवाप्तवाञ्छाभ्यधिकार्थसंपदोन्नतेषु संक्रान्त इवानुजीविषु ।
मदस्य लेशोऽपि न तस्य कुत्रचिन्महाप्रभुत्वेऽपि जनैरदृश्यत ॥ २४ ॥
द्विषत्सु कालो धवलः क्षमाभरे गुणेषु रक्तो हरितः प्रतापवान् ।
जनेक्षणैः पीत इति द्विषां व्यधादनेकवर्णोऽपि विवर्णतामसौ ॥ २५ ॥
प्रतापवह्नौ किल दीपिते ककुप्करीन्द्रभस्त्राकरफूत्कृतानिलैः ।
स कांचनाभां कटकं जगत्पुटे दधानमावर्तयति स्म विद्विषाम् ॥ २६ ॥
अवापुरेके रिपवः पयोनिधेः परे तु वेलां बलिनोऽस्य भूभुजः ।
ततोऽस्य मन्ये न कुतोऽप्यपूर्यत प्रचण्डदोर्विक्रमकेलिकौतुकम् ॥ २७ ॥
भयातुरत्राणमयीमनारतं महाप्रतिज्ञामधिरूढवानिव ।
न भूरिशङ्काविधुरे रिपावपि क्वचित्तदीयासिरचेष्टताहितम् ॥ २८ ॥
स कोऽपि चेदेकतमेन चेतसा क्षमेत संचिन्तयितुं फणीश्वरः ।
तदा तदीयान्रसनासहस्रभृद्गुणानिदानीमपि किं न वर्णयेत् ॥ २९ ॥
निशासु नूनं मलिनाम्बरस्थितिः प्रगल्भकान्तासुरते द्विजक्षतिः ।
यदि क्विपः सर्वविनाशसंस्तवः प्रमाणशास्त्रे परमोहसंभवः ॥ ३० ॥
धनुर्धराणां करवालशून्यता हिरण्यरेतस्यविनीतता स्थिता ।
अभूज्जगद्बिभ्रति तत्र केवलं गुणच्युतिर्मार्गण एव निश्चलम् ॥ ३१ ॥ (युग्मम्)
निरञ्जनज्ञानमरीचिमालिनं जिनेन्द्रचन्द्रं दधतः प्रमोदतः ।
न तस्य चेतस्यखिलक्ष्मापतेस्तमोऽवकाशः क्षणमप्यलक्ष्यत ॥ ३२ ॥

---

१. कृष्णवर्णः; यमश्च. २. शुक्लः; वृषभश्च. ३. हरिद्वर्णः; इन्द्राच्च. ४. पीतवर्णः; सादरमवलोकितश्च. ५. वर्णरहितत्वम्; नीचत्वं च. ६. कांचन अनिर्वचनीयां शोभाम्; सुवर्णकान्ति च. ७. सैन्यम्; कङ्कणं च. ८. व्याकरणप्रसिद्धस्य प्रत्ययविशेषस्य. ९. परम-ऊह; पर-मोह. १०. हिरण्यरेता अग्निः स एव अविना तद्वाहनभूतेन मेषेण नीयते नान्यः कश्चनाविनीतः शीलरहितः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महानदीनोऽप्यजडाशयो जगत्यनष्टसिद्धिः परमेश्वरोऽपि सन् ।
बभूव राजापि निकारकारणं विभावरीणामयमद्भुतोदयः ॥ ३३ ॥
तरङ्गिताम्भोधिदुकूलशालिनीमखर्वपूर्वापरपर्वतस्तनीम् ।
वरोरुदेशे स निधाय कोमलं करं बुभोजैकवधूमिव क्षितिम् ॥ ३४ ॥
अथास्य पत्नी निखिलावनीपतेर्बभूव नाम्ना चरितैश्च सुव्रता ।
स्थितेऽवरोधे प्रचुरेऽपि या प्रभोरभूत्सुधांशोरिव रोहिणी प्रिया ॥ ३५ ॥
सुधासुधारश्मिमृणालमालतीसरोजसारैरिव वेधसा कृतम् ।
शनैः शनैर्मौग्ध्यमतीत्य सा दधौ सुमध्यमा मध्यममध्यमं वयः ॥ ३६ ॥
स्मरेण तस्याः किल चारुतारसं जनाः पिबन्तः शरजर्जरीकृताः ।
स पीतमात्रोऽपि कुतोऽन्यथागलत्तदङ्गतः स्वेदजलच्छलाद्बहिः ॥ ३७ ॥
इतः प्रभृत्यम्ब न ते मुखाम्बुजश्रियं हरिष्येऽहमितीव चन्द्रमाः ।
प्रतीतयेऽस्याः सकुटुम्बको नखच्छलेन साध्व्याश्चरणाग्रमस्पृशत् ॥ ३८ ॥
प्रयाणलीलाजितराजहंसकं विशुद्धपार्ष्णि विजिगीषुवत्स्थितम् ।
तदङ्घ्रिमालोक्य न कोषदण्डभाग्भियेव पद्मं जलदुर्गमत्यजत् ॥ ३९ ॥
सुवृत्तमप्याप्तजडोरुसंगमं तदीयजङ्घायुगलं विलोमताम् ।
तथा दधावप्यनुयायिनं जनं चकार पञ्चेषुकदर्थितं यथा ॥ ४० ॥
उदञ्चदुच्चैःस्तनवप्रशालिनस्तदङ्गकंदर्पविलासवेश्मनः ।
वरोरुयुग्मं नवतप्तकाञ्चनप्रपञ्चितस्तम्भनिभं व्यराजत ॥ ४१ ॥
जडं गुरूकृत्य नितम्बमण्डलं स्मरेण तस्याः किल शिक्षितं कियत् ।
तथाप्यहो पश्यत सर्वतोऽमुना बुधाधिपानामपि खण्डितो मदः ॥ ४२ ॥
गभीरनाभिह्रदमज्जदुद्धुरस्मरप्रभिन्नद्विपगण्डमण्डलात् ।
समुच्चलन्तीव मधुव्रतावलिर्बभौ तदीयोदररोममञ्जरी ॥ ४३ ॥
सुवृत्तमावेकत उन्नतौ स्तनौ गुरुर्नितम्बोऽप्ययमन्यतः स्थितः ।
कथं भजे कान्तिमितीव चिन्तया ततान तन्मध्यमतीव तानवम् ॥ ४४ ॥

---

१. महान्-अदीनः; महा-नदी-इनः. २. अष्टसिद्धिरहितः; (पक्षे) न नष्टा सिद्धिर्यस्य सः. ३. चन्द्रोऽपि. ४. रात्रीणाम्; (पक्षे) अरीणां शत्रूणां विभौ स्वामिनि. ५. लोमरहितत्वम्; वैपरीत्यं च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सती च सौन्दर्यवती च पुंवरप्रसूश्च साक्षादियमेव भूत्रये ।
इतीव रेखात्रयमक्षतस्मयो विधिश्चकारात्र बलित्रयच्छलात् ॥ ४५ ॥
गुरोर्नितम्बादिह कामिकं गतः स नाभितीर्थं प्रमथेशनिर्जितः ।
समुल्लसल्लोमलतारुरुच्छविः स्मरस्त्रिदण्डं त्रिवलिच्छलाद्दधौ ॥ ४६ ॥
कृतौ न चेत्तेन विरञ्चिना सुधानिधानकुम्भौ सुदृशः पयोधरौ ।
तदङ्गलग्नोऽपि तदा निगद्यतां स्मरः परासुः कथमाशु जीवितः ॥ ४७ ॥
सुरस्रवन्तीकनकारविन्दिनीमृणालदण्डाविव कोमलौ भुजौ ।
करौ तदग्रे शुचिकङ्कणाङ्कितौ व्यराजतामब्जनिभौ च सुभ्रुवः ॥ ४८ ॥
सपाञ्चजन्यः कररुक्मकङ्कणप्रभोल्बणः स्याद्यदि कैटभद्विषः ।
स्फुरत्त्रिरेखं किल कण्ठकन्दलं तदोपमीयेत न वा नतभ्रुवः ॥ ४९ ॥
कपोलहेतोः खलु लोलचक्षुषो विधिर्व्यधात्पूर्णसुधाकरं द्विधा ।
विलोक्यतामस्य तथाहि लाञ्छनच्छलेन पश्चात्कृतसीवनव्रणम् ॥ ५० ॥
प्रवालबिम्बीफलविद्रुमादयः समा बभूवुः प्रभयैव केवलम् ।
रसेन तस्यास्त्वधरस्य निश्चितं जगाम पीयूषरसोऽपि शिष्यताम् ॥ ५१ ॥
अनादरेणापि सुधासहोदरीमुदीरयन्त्यामविकारिणीं गिरम् ।
ह्रियेव काष्ठत्वमियाय वल्लकी पिकी च कृष्णत्वमधारयत्तराम् ॥ ५२ ॥
ललाटलेखाशकलेन्दुनिर्गलत्सुधोरुधारेव घनत्वमागता ।
तदीयनासा द्विजरत्नसंहतेस्तुलेव कान्त्या जगदप्यतोलयत् ॥ ५३ ॥
जितास्मदुत्तंसमहोत्पलैर्युवां क्व याथ इत्यध्वनिरोधिनोरिव ।
उपात्तकोपे इव कर्णयोः सदा तदीक्षणे जग्मतुरन्तशोणताम् ॥ ५४ ॥
इमामनालोचनगोचरां विधिर्विधाय सृष्टेः कलशार्पणोत्सुकः ।
लिलेख वक्त्रे तिलकाङ्कमध्ययोर्भ्रुवोर्मिषादोमिति मङ्गलाक्षरम् ॥ ५५ ॥
उदीरिते श्रीरतिकीर्तिकान्तिभिः श्रयाम एतामिति मौनवान्विधिः ।
लिलेख तस्यां तिलकाङ्कमध्ययोर्भ्रुवोर्मिषादोमिति संगतोत्तरम् ॥ ५६ ॥
कपोललावण्यमयाम्बुपल्वले पतत्सतृष्णाखिलनेत्रपत्रिणाम् ।
ग्रहाय पाशाविव वेधसा कृतौ तदीयकर्णौ पृथुलांसचुम्बिनौ ॥ ५७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मरेण कालागुरुपत्रवल्लिवल्ललाटलेखामिषतो नतभ्रुवः ।
अशेषसंसारविशेषकैर्गुणैर्जगत्त्रये पत्रमिवावलम्बितम् ॥ ५८ ॥
अनिन्द्यदन्तद्युतिफेनिलाधरप्रवालशालिन्युरुलोचनोत्पले ।
तदास्यलावण्यसुधोदधौ बभुस्तरङ्गभङ्गा इव भङ्गुरालकाः ॥ ५९ ॥
तदाननेन्दोरधिरोहता तुलां मृगाङ्क चित्तेऽपि न लज्जितं त्वया ।
यतोऽसि कस्तत्र पयोधरोन्नतौ स मूढ यत्राभ्यधिकं व्यराजत ॥ ६० ॥
समग्रसौन्दर्यविधिद्विषो विधेर्घुणाक्षरन्यायवशाद्सावभूत् ।
तदास्य जाने निपुणत्वमीदृशीमनन्यरूपां कुरुते यदापराम् ॥ ६१ ॥
सरस्वतीवार्थमनिन्द्यलक्षणा गुणान्विता चापलतेव धन्विनम् ।
विभेव भास्वन्तमतीव निर्मला तमेकभूपालमलंचकार सा ॥ ६२ ॥
अथैकदान्तःपुरसारसुन्दरीशिरःस्रजं तामवलोक्य तत्पतिः ।
इति स्थिरोत्तानितनेत्रमर्थिनामचिन्त्यचिन्तामणिरप्यचिन्तयत् ॥ ६३ ॥
चकार यो नेत्रचकोरचन्द्रिकामिमामनिन्द्यां विधिरन्य एव सः ।
कुतोऽन्यथा वेदनयान्विताततोऽप्यभूदमन्दद्युति रूपमीदृशम् ॥ ६४ ॥
द्रुमोत्पलात्सौरभमिक्षुकाण्डतः फलं मनोज्ञं मृगनाभितः प्रभाम् ।
विधातुमस्या इव सुन्दरं वपुः कुतो न सारं गुणमाददे विधिः ॥ ६५ ॥
वपुर्वयोवेषविवेकवाग्मिताविलासवंशव्रतवैभवादिकम् ।
समस्तमप्यत्र चकास्ति तादृशं न यादृशं व्यस्तमपीक्ष्यते क्वचित् ॥ ६६ ॥
न नाकनारी न च नागकन्यका न च प्रिया काचन चक्रवर्तिनः ।
अभूद्भविष्यत्यथवास्ति साध्विमां यदङ्गकान्त्योपमिमीमहे वयम् ॥ ६७ ॥
असारसंसारमरुस्थलीभ्रमक्लमार्त्तहन्नेत्रपतत्रिणां मुदे ।
मृगीदृशः सिक्त इवामृतच्छटैरहो प्ररूढो नवयौवनद्रुमः ॥ ६८ ॥
फलं तथाप्यत्र यथर्तुगामिनः सुताह्वयं नोपलभामहे वयम् ।
अनन्यसक्तावनिभारखिन्नवन्निरन्तरं तेन मनो दुनोति नः ॥ ६९ ॥
सहस्रधा सत्यपि गोत्रजे जने सुतं विना कस्य मनः प्रसीदति ।
अपीद्धताराग्रहगर्भितं भवेद्दते विधोर्ध्यामलमेव दिङ्मुखम् ॥ ७० ॥

१. सरस्वती; पीडा च. २. कर्णिकारपुष्पात्. ३. श्यामलम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न चन्दनेन्दीवरहारयष्टयो न चन्द्ररोचींषि न चामृतच्छटाः ।
सुताङ्गसंस्पर्शसुखस्य निस्तुलां कलामयन्ते खलु षोडशीमपि ॥ ७१ ॥
असावनालोक्य कुलाङ्कुरं मम स्वभोगयोग्याश्रयभङ्गशङ्किनी ।
विशोषयत्युच्छ्वसितैरसंशयं मदन्वयश्रीः करकेलिपङ्कजम् ॥ ७२ ॥
नभो दिनेशेन नयेन विक्रमो वनं मृगेन्द्रेण निशीथमिन्दुना ।
प्रतापलक्ष्मीबलकान्तिशालिना विना न पुत्रेण च भाति नः कुलम् ॥७३॥
क्व यामि तत्किं नु करोमि दुष्करं सुरेश्वरं वा कमुपैमि कामदम् ।
इतीष्टचिन्ताचयचक्रचालितं क्वचिन्न चेतोऽस्य बभूव निश्चलम् ॥ ७४ ॥

इत्थं चिन्तयतोऽथ तस्य नृपतेः स्फारीभवच्चक्षुषो
निर्वातस्तिमितारविन्दसरसीसौन्दर्यमुद्रामुषः ।
कोऽप्युद्यत्पुलकाङ्कुरः प्रमदजैः सिक्तश्च नेत्राम्बुभि-
र्बीजावाप इवाप वाञ्छिततरोरुद्यानपालः स तम् ॥ ७५ ॥

अथ स दण्डधरेण[1] निवेदितो विनयतः प्रणिपत्य सभापतिम् ।
दुरितसंविदनध्ययनं सुधीरिति जगाद सुधास्नपिताक्षरम् ॥ ७६ ॥

राकाकामुकवद्दिगम्बरपथालंकारभूतोऽधुना
बाह्योद्यानमवातरद्विहपथात्कश्चिन्मुनिश्चारणः ।
यत्पादप्रणयोत्सवात्किमपरं पुष्पाङ्कुरच्छद्मना
वृक्षैरप्यनपेक्षितात्मसमयैः क्ष्मापाल रोमाञ्चितम् ॥ ७७ ॥

क्रीडाशैलप्रस्थपद्मासनस्थस्तत्त्वाभ्यासैः स प्रचेता इतीदम् ।
नामाख्यातं पार्श्ववर्तिव्रतीन्द्रैः कुर्वन्नास्ते तत्र संसूत्रितार्थम् ॥ ७८ ॥

इत्याकस्मिकविस्मयां कलयतस्तस्मात्क्लमच्छेदिनीं
ज्योत्स्नावद्यातियामिनीशविषयां वार्तामवार्त्तोत्सवाम् ।
दृग्भ्यामिन्दुमणीयितं करयुगेणाम्भोजलीलायितं
पारावारजलायितं च परमानन्देन राज्ञस्तदा ॥ ७९ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये द्वितीयः सर्गः ।

---

१. प्रतीहारेण.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## तृतीयः सर्गः ।

अथोत्थाय नृपः पीठाद्भानुः पूर्वाचलादिव ।
साधोः प्रचेतसस्तस्य[1] दिशं प्राप्य ननाम सः ॥ १ ॥
स तस्मै वनपालाय ददौ तोषतरोः फलम् ।
मनोरथलताबीजप्राभृतस्येव निष्क्रयम् ॥ २ ॥
आज्ञामिव पुरि क्लेशनिष्कासनपटीयसीम् ।
मुनीन्द्रवन्दनारम्भभेरीं प्रादापयन्नृपः ॥ ३ ॥
व्यानशे ककुभस्तस्याः कादम्बिन्या इव ध्वनिः ।
उत्कयन्निर्भरानन्दमेदुरान्पौरकेकिनः ॥ ४ ॥
चन्दनस्थासकैर्हास्यं लास्यमप्युल्लसद्ध्वजैः ।
पुष्पोत्करैश्च रोमाञ्चं पुरमप्याददे तदा ॥ ५ ॥
अमान्त इव हर्म्येभ्यस्तदा गमनसंमदात् ।
पौराः प्रथितनेपथ्याः स्वेभ्यः स्वभ्यो विनिर्ययौ ॥ ६ ॥
बहिस्तोरणमागत्य रथाश्वेभनिषादिनः ।
दूता इवार्थसंसिद्धेस्तमुदैक्षन्त पार्थिवाः ॥ ७ ॥
दिगम्बरपदप्रान्तं राजापि सह कान्तया ।
प्रतस्थे रथमास्थाय प्रभया भानुमानिव ॥ ८ ॥
नृपाः संचारिणः सर्वे तमाविष्कृतसात्त्विकम् ।
मुनीन्द्रवन्दनारूढं रसं भावा इवान्वयुः ॥ ९ ॥
सज्जालकानसौ[2] तत्र मत्तवारणराजितान्[3] ।
गृहानिव नृपान्प्रेक्ष्य पिप्रिये प्रान्तवर्तिनः ॥ १० ॥
प्रागेव जग्मुरुद्यानं सेवाक्षणविचक्षणाः ।
फलपुष्पाहरास्तस्य मूर्तिमन्त इवर्तवः ॥ ११ ॥

---

१. प्रचेतोनामकस्य यतेः; (पक्षे) प्रचेतसो वरुणस्य दिशं पश्चिमाम्. २. सज्ज-अलकान्; सत्-जालकान्. जालको गवाक्षः. ३. 'उक्तो मत्तवारणस्तु प्रभिन्नकटकुञ्जरे । क्लीबं प्रसादवीथीनां कुन्दवृक्षवृतावपि ॥' इति मेदिनी.

For Private and Personal Use Only

परस्पराङ्गसंघट्टभ्रष्टहारावचूलकैः ।
पथि दुःसंचरो मार्गो [1]मार्गः पाशैरिवाभवत् ॥ १२ ॥
दृष्ट्या [2]कुवलयस्यापि जेता [3]दर्शितविग्रहः ।
नेत्रोत्सवाय नारीणां [4]नारीणां सोऽभवन्नृपः ॥ १३ ॥
सोऽङ्गलावण्यसंक्रान्तपौरनारीनरेक्षणः ।
[5]गन्धर्वैरावृतः साक्षात्सहस्राक्ष इवाबभौ ॥ १४ ॥
बभुस्तस्य मुखाम्भोजपर्यन्तभ्रान्तषट्पदाः ।
अन्तर्मुनीन्दुसंधानान्निर्यद्ध्वान्तलवा इव ॥ १५ ॥
बिभ्रत्[6]सविभ्रमश्[7]चारुतिलकामलकावलिम् ।
[8]उल्लसत्पत्रवल्लीको [9]दीर्घनेत्रधृताञ्जनः ॥ १६ ॥
युक्तोऽप्युत्तालपुं[10]नागैः [11]सालसंगममादधत् ।
कामाराम इवारामं पौररामाजनो ययौ ॥ १७ ॥ (युग्मम्)
पुरंध्रीणां स वृद्धानां प्रतीच्छन्नाशिषः शनैः ।
इष्टसिद्धेरिव द्वारं [12]पुरः प्राप महीपतिः ॥ १८ ॥
[13]यतिभावपरः कान्ति बिभ्रदभ्यधिकां नृपः ।
निश्चक्राम पुराच्छ्लोकः कवीन्द्रस्य मुखादिव ॥ १९ ॥
शाखानगरमालोक्य पुरः प्रान्ते स पिप्रिये ।
तनूजमिव कान्ताया [14]बहुलक्षणमन्दिरम् ॥ २० ॥

---

१. मृगसमूहः. २. भूमण्डलस्य; उत्पलस्य च. ३ दर्शितशरीरः; कृतयुद्धश्च. ४. न-अरीणाम्. ५. अश्वैः; देवयोनिविशेषैश्च. ६. पक्षिणां भ्रमणेन सहितः; हावविशेषसहितश्च. ७. चारुतिलकयुक्तां चूर्णकुन्तलपङ्क्तिम्; (पक्षे) तिलक आमलकश्च वृक्षविशेषौ. ८. कस्तूर्यादिरसेन स्तनकपोलादिषु कृता रचना पत्रवल्ली; (पक्षे) उल्लसन्त्यः किसलययुक्ता लता यस्मिन्सः. ९. दीर्घलोचनन्यस्तकज्जलः; (पक्षे) दीर्घेण मूलेन धृता अञ्जना वृक्षविशेषा यत्र. १०. वृक्षविशेषैः; पुरुषश्रेष्ठैश्चः. ११. सालसं-गमम्; साल-संगमम्. सालो वृक्षविशेषः. १२. नगरस्य. १३. यतिः संन्यासी; (पक्षे) पाठविच्छेदस्थलम्. १४. बहुलक्षण; बहु-लक्षण. क्षण उत्सवः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रागेव विक्रमश्लाघ्यो[1] भवानीतनयोऽप्यभूत् ।
व्यक्तं पुनर्महासेनो[2] महासेनावृतस्तदा ॥ २१ ॥

उच्चैस्तनशिखो[3]ल्लासिपत्रशोभामदूरतः ।
वनालीं वीक्ष्य भूपालः प्रेयसीमित्यभाषत ॥ २२ ॥

कान्तारतरवो[4] नैते कामोन्मादकृतः परम् ।
अभवन्नः प्रीतये सोऽप्युद्यन्मधुपराशयः ॥ २३ ॥

अनेकविटपस्पृष्टपयोधरतटा[5] स्वयम् ।
वदत्युद्यानमालेयमकुलीनत्वमात्मनः[6] ॥ २४ ॥

उल्लसत्केसरो[7] रक्तपलाशः[8] कुञ्जराजितः[9] ।
कण्ठीरव इवारामः कं न व्याकुलयत्यसौ ॥ २५ ॥

सैन्यकोलाहलोत्तिष्ठद्विहंगावलयो द्रुमाः ।
अस्मदागमनोत्क्षिप्तपताका इव भान्त्यमी ॥ २६ ॥

संचरच्चञ्चरीकाणां श्रेणिस्तोरणस्रजम् ।
विडम्बयति कान्तारे हरिन्मणिमयीमियम् ॥ २७ ॥

पल्लवव्याप्तास्यानां सूरस्यन्दनवाजिनाम् ।
फेनलेशा इवाभान्ति द्रुमाग्रकुसुमोत्कराः ॥ २८ ॥

त्वङ्गत्तुङ्गतुरंगोर्मिस्तीरगं सैन्यवारिधेः ।
पुञ्जिताबालशैवालशोभामभ्येति काननम् ॥ २९ ॥

---

१. भवानी-तनयः (कार्तिकेयः). स च वेः पक्षिणः स्ववाहनमयूरस्य क्रमेण पादन्यासेन श्लाघ्यः; (पक्षे) भव-आनीत-नयः. २. महासेन इति कार्तिकेयस्य नामान्तरम्; (पक्षे) महती सेना यस्य. ३. उच्चैः-स्तनशिखा (कुचाग्रभागः); उच्चैस्तन-शिखा. ४. उद्यन्मधुपराशयः समुल्लसद्भ्रमरश्रेणयः कामोन्मादकृतो मदनोद्दीपकाः कान्तार-तरवो वनवृक्षाः परं नः प्रीतयेऽभवन्. सोऽपि कान्ता-रत-रवः कान्तायाः सुरतकालीनं मणितं नः प्रीतयेऽभवत्. कीदृशः कान्तारतरवः. कामोन्मादेन कृतः; उद्यत्-मधु-पर-आशयश्च. ५. षिङ्गस्पृष्टकुचा; वृक्षस्पृष्टमेघा च. ६. नीचकुलोत्पन्नत्वम्; अभूमिलीनत्वं च, उन्नतत्वमिति यावत्. ७. केसरो वृक्षविशेषः; (पक्षे) उल्लसत्स्कन्धोत्पन्नकेशः. ८. रक्तवर्णा पलाशा यस्मिन्; (पक्षे) रक्तं रुधिरं पलं मांसं चाश्नाति. ९. कुञ्ज-राजितः; कुञ्जर-अजितः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्क्षिप्तसहकाराग्रमञ्जरीरुक्मदण्डिकः ।
उत्सारयंश्छवङ्गैलालाञ्चिकर्पूरचम्पकान् ॥ ३० ॥
कासारसीकरासारमुक्ताहारविराजितः ।
प्रेर्यमाणो मुहुर्वेल्लल्लताहस्ताग्रसंज्ञया ॥ ३१ ॥
अयमस्माकमेणाक्षि चन्दनामोदसुन्दरः ।
मरुदभ्यर्णतामेति वेत्रीवोद्यानभूपतेः ॥ ३२ ॥ (विशेषकम्)
तन्वाना [2]चन्दनोद्दामतिलकं वदने किल ।
करोत्य[3]क्षतदूर्वाभिर्मङ्गलं मे वनस्थली ॥ ३३ ॥
एताः [4]प्रवालहारिण्यो मुदा [5]भ्रमरसंगताः ।
मरुन्नर्तकतालेन नृत्यन्तीव वने लताः ॥ ३४ ॥
निरूपयन्निति प्रीत्या प्रियायाः प्राप्य काननम् ।
तत्क्षणाद[6]क्षमत्याक्षीदौद्धत्यमिव पार्थिवः ॥ ३५ ॥
तत्कालोत्सारिताशेषराजचिह्नो व्यराजत ।
गुरून्नभिव्रजन्नेष विनयो मूर्तिमानिव ॥ ३६ ॥
[7]नक्षत्रैरुन्नतैर्युक्तः सकान्तः केलिकाननम् ।
[8]कराग्रं कुड्मलीकृत्य [9]राजा वनमिवाविशत् ॥ ३७ ॥
ददर्शाशोकमस्तोकस्तबकैस्तत्र पाटलम् ।
रागैश्छन्नमिवासन्नमुनीनां मुक्तमानसैः ॥ ३८ ॥
अधस्तात्तस्य विस्तीर्णे स्फाटिकोपलविष्टरे ।
तपः प्रगुणितागण्यपुण्यपुञ्जमिव स्थितम् ॥ ३९ ॥
दत्तनेत्रोत्सवारम्भमाश्रितं मुनिसत्तमैः ।
ऋक्षैरिव धरोत्तीर्णं क्षणं नक्षत्रनायकम् ॥ ४० ॥

---

१. प्रतीहारः. २. चन्दनवृक्षेणोद्दामं तिलकं वृक्षविशेषम्; (पक्षे) चन्दनस्योद्दामं तिलकं विशेषकम्. ३. अक्षताभिर्दूर्वाभिः; अक्षतैरभग्नतण्डुलैर्युक्ताभिर्दूर्वाभिश्च. ४. प्रवालैः पल्लवैः; विद्रुमैश्च. ५. भ्रमर-संगताः; भ्रमरसं-गताः. ६. अक्षं रथम्; आयव्ययादिव्यवहार-चिन्तां वा. ७. न-क्षत्रैः क्षत्रियैः; (पक्षे) उडुभिः ८. बद्धाञ्जलिः; संकुचितकिरणश्च. ९. राजा चन्द्रः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्तरस्तावकाशेन ज्ञानसिन्धुमहोर्मिभिः ।
मलेन लिप्तबाह्याङ्गं दर्शयन्तमनादरम् ॥ ४१ ॥
अत्यन्तनिःसहैरङ्गैर्मुक्ताहारपरिग्रहैः ।
व्यक्तयन्तमिवासक्तिं मुक्तिकान्तानुबन्धिनीम् ॥ ४२ ॥
नासावंशाग्रविन्यस्तस्तोकसंकोचितेक्षणम् ।
भावयन्तमथात्मानमात्मन्येवात्मनात्मनः ॥ ४३ ॥
दर्शनज्ञानचारित्रतपसामेकमाश्रयम् ।
क्षमागारं गतागारं मुनिमैक्षिष्ट पार्थिवः ॥ ४४ ॥ (कुलकम्)
अथास्पदं नभोगानां स्वर्णशैलमिव स्थिरम् ।
गुरुं प्रदक्षिणीकृत्य स राजा विशदांशुकः ॥ ४५ ॥
इलामूलमिलन्मौलिर्नत्वा भूमौ न्यविक्षत ।
न परं विनयश्रीणामाश्रयः श्रेयसामपि ॥ ४६ ॥ (युग्मम्)
मङ्गलारम्भसंरम्भप्रध्वनद्दुन्दुभिध्वनिम् ।
विडम्बयन्नथोवाच वाचमाचारवानिति ॥ ४७ ॥
त्वत्पादपादपच्छायां चिन्तासंतापशान्तिदाम् ।
संप्रति प्राप्य मुक्तोऽस्मि भवभ्रमपरिश्रमात् ॥ ४८ ॥
यदभूदस्ति यच्च भावि स्वं जन्म तन्मया ।
निर्णीतं पुण्यवन्नाथ त्वदालोकनमात्रतः ॥ ४९ ॥
तपोन्वितेन सूर्येण सदोषेणेन्दुनापि किम् ।
यो भवानिव दृष्टोऽपि न भिनत्त्यान्तरं तमः ॥ ५० ॥
चित्रमेतज्जगन्मित्रे नेत्रमैत्रीं गते त्वयि ।
यन्मे जडाशयस्यापि पङ्कजातं निमीलति ॥ ५१ ॥

---

१. मुक्त-आहार; मुक्ता-हार. २. न-भोगानाम; (पक्षे) नभोगानां देवानाम्. ३. गी-ष्पतिम्; यतिं च. ४. स्वच्छवस्त्रः; निर्मलकिरणश्च. ५. सूर्ये; सुहृदि च. ६. मन्दबुद्धेः; जलाशयस्य तडागादेश्च. ७. पापसमूहः; कमलं च.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युष्मत्पदप्रयोगेण पुरुषः स्याद्यदुत्तमः ।
अर्थोऽयं सर्वथा नाथ लक्षणस्याप्यगोचरः ॥ ५२ ॥
तथा मे पोषिता कीर्तिस्त्वद्दर्शनरसायनैः ।
यथास्तां त्रिदशावासे मात्यनन्तालयेऽपि न ॥ ५३ ॥
निर्निमेषं गलद्दोषं निर्व्यपेक्षमपक्ष्मलम् ।
ज्ञानचक्षुः सदोन्निद्रं न स्खलत्येव ते क्वचित् ॥ ५४ ॥
सिद्धमिष्टं त्वदालोकाज्ज्ञातं च ज्ञानिना त्वया ।
तत्पुनः प्रोच्यतेऽस्माभिः शंसितुं जाड्यमात्मनः ॥ ५५ ॥
इयं प्राणप्रिया पत्नी समयेऽपि स्थिता सती ।
निष्फलेव क्रियात्यर्थमनपत्या दुनोति माम् ॥ ५६ ॥
अदृष्टसंततिः स्पष्टमिष्टार्थप्रसवामपि ।
इमामहं महीं मन्ये केवलं भारमात्मनः ॥ ५७ ॥
चतुर्थपुरुषार्थाय स्पृहयालोर्ममाधुना ।
अदर्शनायते मोहान्नन्दनस्याप्यदर्शनम् ॥ ५८ ॥
दशामन्त्यां गतस्यापि पुंसस्तावन्न शस्यते ।
प्रदीपस्येव निर्वाणं यावन्नान्यं प्रकाशयेत् ॥ ५९ ॥
तत्कलत्रे कदान्वेव रसलीलालवालके ।
संपत्स्यते ममोद्भिन्नमनोरथतरोः फलम् ॥ ६० ॥
श्रुत्वेति प्रत्युवाचेदं मुनिर्भूपालकर्णयोः ।
लग्नदन्तद्युतिव्याजात्सुधाधारा इवोद्गिरन् ॥ ६१ ॥
नेदृक्क्विन्ताक्रमस्यासि वस्तुतस्त्वन्न भाजनम् ।
नेत्राधृष्यं क्वचित्तेजस्तमसा नाभिभूयते ॥ ६२ ॥

---

१. भवदीयचरणारविन्दसंबन्धेन पुरुषो जन उत्तमो भवति. अयमर्थो लक्षणस्य व्याकरणशास्त्रस्याप्यगोचरः. व्याकरणे हि युष्मत्पदयोगेन मध्यमः पुरुषो भवति, न तूत्तमः २. स्वर्गे; त्रिदशमिते आवासे गृहे च. ३. पाताले; असंख्याते गृहे च. अतिपुष्टा कीर्तिः स्वर्गे पाताले च न मातीति भावः. यश्चातिपुष्टोऽसंख्यातेष्वपि सद्मसु न माति तस्य त्रिदशमितेष्वावासेषु मानं दूरापास्तमेव. ४. मोक्षः; नाशश्च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धन्यस्त्वं गुणपण्यानामापणस्त्वं महीपते ।
त्वमेव संश्रयः श्रीणां सरितामिव सागरः ॥ ६३ ॥
त्वत्कीर्तिजह्नुकन्याया इतो लोकत्रयातिथेः ।
अन्तः प्रपत्स्यते राजन्राजहंसश्रियं शशी ॥ ६४ ॥
न परं क्षत्रियाः सर्वे त्वामनु त्रिदिवेश्वराः ।
नह्युदात्तस्य माहात्म्यं लङ्घयन्तीतरे स्वराः ॥ ६५ ॥
क्षोदीयानहमस्मीति मात्मानमवजीगणः ।
भवितासि त्वमचिराज्जगत्त्रयगुरोर्गुरुः ॥ ६६ ॥
गुणैर्घनोन्नते नूनं भवद्दावाग्निदीपितः ।
[1]त्वज्जन्मना जनः शान्तिममृतेनायमेष्यति ॥ ६७ ॥
या चैषा भवतः पत्नी सुव्रता सुव्रताख्यया ।
ह्रेपयिष्यति सा वेलां रत्नकुक्षितयोदधेः ॥ ६८ ॥
संसारसारसर्वस्वं भूत्रयस्यापि भूषणम् ।
इदमेनोविषच्छेदि स्त्रीरत्नमिति बुध्यताम् ॥ ६९ ॥
क्षुद्रतेजःसवित्रीभिः स्त्रीभिर्दिग्भिरिवात्र किम् ।
धन्येयं या जगच्चक्षुर्द्योभिः प्राचीव धास्यति ॥ ७० ॥
षण्मासादूर्ध्वमेतस्याः सरस्याः प्रतिमेन्दुवत् ।
[2]चतुर्दशाधिको गर्भे दिवस्तीर्थकृदेष्यति ॥ ७१ ॥
कृतार्थाविति मन्येथामात्मानौ तद्युवामिह ।
नह्यन्यो भविनां लाभः सुतादेवंविधात्परः ॥ ७२ ॥
जन्म वा जीवितव्यं वा [3]गृहमेधाथवा द्वयोः ।
आ कल्पं युवयोरेव यास्यति श्लाघ्यतामितः ॥ ७३ ॥
इत्थं ग्रन्थिमिव प्रमथ्य कृतिना तेनोरुचिन्ताभरं
वागर्थाविव तौ प्रसादमधिकं तं प्रापितौ दंपती ।
अन्तर्गूढगभीरभावपिशुनं यं भावयन्तश्चिरा-
ज्जातास्ते प्रमदेन पीनपुलकप्रोल्लासिनः सज्जनाः ॥ ७४ ॥

---

१ त्वत्पुत्रेण. २. पञ्चदशस्तीर्थकरो धर्मनाथः. ३. गार्हस्थ्यम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तथाविधभाविसुतोदयश्रवणतः प्रणतः पुनरप्यसौ ।
प्रमदगद्गदवागिति वाग्मिनां पतिरुवाच वचांसि मुनिं नृपः ॥ ७५ ॥

स्वर्गं संप्रति कः पुनात्ययमथो कुत्रास्य जन्मन्यभू-
च्छाभस्तीर्थकरत्वदानसुहृदः सम्यक्त्व[1]चिन्तामणेः ।
इत्थं वाग्भववैभवव्यतिकरं त्वं ब्रूहि जन्मार्णवो-
त्तीर्णस्यास्य भविष्यतो जिनपतेः शुश्रूषुरेषोऽस्म्यहम् ॥ ७६ ॥

इति प्रीतिप्रायं बहलपुलकस्यास्य सकलं
कलङ्कातङ्कानामपशकुनमाकर्ण्य वचनम् ।
मुनिः स्पष्टं द्रष्टुं तदपरभवोदारचरितं
प्रकर्षेणाकार्षीदवधिनयनोन्मीलनविधिम् ॥ ७७ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये तृतीयः सर्गः ।

## चतुर्थः सर्गः ।

अथो[2]पनिद्रावधिबोधचक्षुः स्वहस्तमुक्तावदवेक्ष्यमाणः ।
जिनस्य तस्यापरजन्मवृत्तं वृत्तान्तसाक्षीव मुनिर्बभाषे ॥ १ ॥
यत्पृष्टमिष्टं भवतार्थसिद्ध्यै तत्पार्थिवाकर्णय वर्ण्यमानम् ।
कथा कथंचित्कथिता श्रुता वा जैनी यतश्चिन्तितकामधेनुः ॥ २ ॥
स धातकीखण्ड इति प्रसिद्धे द्वीपेऽस्ति विस्तारिणि पूर्वमेरुः ।
नभो निरालम्बमवेक्ष्य केनाप्युज्जृम्भितः स्तम्भ इवेक्ष्यते यः ॥ ३ ॥
विभूषयन्पूर्वविदेहमस्य सीतासरिद्दक्षिणकूलवर्ती ।
एकोऽप्यनेकेन्द्रियहर्षहेतुर्वत्साभिधानो विषयोऽस्ति रम्यः ॥ ४ ॥
राजन्ति यत्र स्फुटपुण्डरीकप्रकाशिनः शाद्वलशालिवप्राः ।
च्युता निरालम्बतया कथंचिदाकाशदेशा इव चारुताराः ॥ ५ ॥
उद्गायतीव भ्रमदिक्षुयन्त्रचीत्कारनादैः श्रुतिसुन्दरैर्यः ।
प्रनृत्यतीवानिललोलसस्यैः स्वसंपदुत्कर्षमदेन मत्तः ॥ ६ ॥

---

१. रत्नत्रयस्यैव सम्यक्त्वमिति संज्ञान्तरम्. रत्नत्रयं च सम्यग्दर्शनज्ञानचारित्रलक्षणम्. २. स्फुरितावधिज्ञाननेत्रः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अग्रे भजन्तो विरसत्वमन्तः सग्रन्थयो निष्फलमुन्नमन्तः ।
अचेतना इक्षव एव यत्र निष्पीड्यमाना रसमुत्सृजन्ति ॥ ७ ॥
द्रष्टुं चिरेणात्मकुलप्रसूतां श्रियं विशिष्टाभ्युदयामुपेताः ।
यस्मिन्नुदन्वन्त इवावभान्ति विस्फारिताम्भोजदृशस्तडागाः ॥ ८ ॥
फलावनम्राम्रविलम्बिजम्बूजम्बीरनारङ्गलवङ्गपूगम् ।
सर्वत्र यत्र प्रतिपद्य पान्थाः पाथेयभारं पथि नोद्वहन्ति ॥ ९ ॥
यत्रानुकूलं ज्वलदर्ककान्तैर्विलीनकार्तस्वरपूरशङ्काम् ।
मध्यंदिनेऽम्भोजरजःपिशङ्गं क्षणं विधत्तेऽम्बु तरङ्गिणीनाम् ॥ १० ॥
काले प्रजानां जनयन्ति तापं करा रवेरेव न यत्र राज्ञः ।
स्याद्भोगभङ्गोऽपि भुजंगमानां स्वस्थे कदाचिन्न पुनर्नराणाम् ॥ ११ ।
तटे तटिन्यास्तरवः समृद्धिं संप्राप्य यत्र प्रतिनिष्क्रयाय ।
छायाछलात्तज्जलदेवताभ्यो दातुं फलानीव विशन्ति मध्ये ॥ १२ ॥
निर्माय निर्माय पुरीः सुराणां यच्छिक्षितं शिल्पकलासु दाक्ष्यम् ।
तस्यैव धात्रा विहितास्ति तत्र प्रकर्षसीमा नगरी सुसीमा[1] ॥ १३ ॥
नितम्बभूचुम्बिवनान्तरीया यानावृतोच्चैस्तनवप्रभागम् ।
वातोच्छलत्पुष्परजःपटेन ह्रीता वधूवत्स्वमुपावृणोति ॥ १४ ॥
अधृष्यमन्यैरधिरुह्य सालं नीलाश्मकूटांशुमिषेण यस्याः ।
रुणद्धि रुद्धो बहुधान्धकारः क्रुधेव तिग्मांशुकरप्रचारम् ॥ १५ ॥
यत्रोच्चहर्म्याग्रजुषामुदग्रान्पश्यन्मुखेन्दून्निशि सुन्दरीणाम् ।
ग्राह्ये तुषारत्विषि जातमोहः क्षणं भवेत्पर्वणि सैंहिकेयः ॥ १६ ॥
कामं[2] प्रति प्रोज्झितकृष्णवर्त्मा[3] दृष्ट्वापि देहीति[4] निमील्य शब्दम् ।
लोके दधानोऽपि महेश्वरत्वं[5] न दृश्यते यत्र जनो विषादी[6] ॥ १७ ॥
यत्रोच्चहर्म्याग्रहरिन्मणीनां प्रभासु दूर्वाङ्कुरकोमलासु ।
क्षणं क्षिपन्तो वदनान्यनूरुं[7] रवेस्तुरंगाः परिखेदयन्ति ॥ १८ ॥

---

१. सुसीमेति नगरीनाम. २. कंदर्पम्; अभिलाषं च. ३. त्यक्तमलिनमार्गः; मुक्तनेत्रानलश्च. ४. 'देहि' इति याचकशब्दम्; (पक्षे) देही शरीरी. ५. शिवत्वम्; प्रभुत्वं व. ६. विषभक्षकः; खिन्नश्च. ७. अरुणं सूर्यसारथिम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यापार्य सज्जालकसंनिवेशे करानभिप्रेङ्खति यत्र राज्ञि ।
द्रवत्यनीचैस्तनकूटरम्या कान्तेव चन्द्रोपलहर्म्यपङ्क्तिः ॥ १९ ॥
प्रक्षिप्य पूर्वेण मही महीभृत्करेण यान्स्वीकुरुतेऽपरेण ।
अन्तर्ययाप्तुं ग्रहकन्दुकांस्तान्हस्ता जिनागारमिषादुदस्ताः ॥ २० ॥
सारेषु रत्नेषु यया गृहीतेष्वब्धिर्वृथा वीचिभुजैः प्रनृत्यन् ।
रत्नाकरत्वेन न लज्जते यत्ततः स मे भाति जडस्वभावः ॥ २१ ॥
मुहुर्मुहुः स्फाटिकहर्म्यभित्तौ निरीक्ष्य रागापनिनीषयास्ये ।
स्वच्छामपि क्रान्तरदच्छदाभां दन्तच्छविं यत्र वधूः प्रमार्ष्टि ॥२२॥
स्वस्थो भृताच्छदगुरूपदेशः श्रीदानवारातिविराजमानः ।
यस्यां करोल्लासितवज्रमुद्रः पौरो जनो जिष्णुरिवावभाति ॥ २३ ॥
तद्यत्र चित्रं यद्गुणीयसापि स्नेहेन हीनाः स्मरदीपिकास्ताः ।
नैतत्पुनर्यन्नकुलप्रसूता भुजंगमोहं जनयन्ति वेश्याः ॥ २४ ॥
यां सारसर्वस्वनिधानकुम्भीं संवेष्ट्य शश्वत्परिखामिषेण ।
उद्भिद्य पातालतलान्युदीर्णा विषप्रपूर्णा भुजगी प्रयाति ॥ २५ ॥
निःशेषनम्रावनिपालमौलिमालारजःपिञ्जरिताङ्घ्रिपीठः ।
स भूपतिस्तत्र बभूव शास्ता रथं जना यं दशपूर्वमाहुः ॥ २६ ॥
अनेन कोपज्वलनेन दग्धाः सदामपुष्पाः खलु पत्रवल्ल्यः ।
त्वक्पाण्डिमा वैरिवधूकपोले कुतोऽन्यथा भस्मवदुल्ललास ॥ २७ ॥
अन्ये भियोपात्तपयोधिगोत्राः क्षोणीभुजो जग्मुरगम्यभावम् ।
लक्ष्मीस्ततो वारिधिराजकन्या तमेकमेवात्मपतिं चकार ॥ २८ ॥
वैधव्यदग्धारिवधूप्रहारहारावचूलच्युतमौक्तिकौघाः ।
बभुः प्रकीर्णाः सकलासु दिक्षु यशस्तरोर्बीजकणा इवास्य ॥ २९ ॥

१. सत्-जालक (गवाक्ष); सज्ज-अलक. २. किरणान्; हस्तांश्च. ३. चन्द्रे; नृपतौ च. ४. अनीचैस्तन(उच्चतर)-कूट; अनीचैः-स्तनकूट. ५. गुरुर्बृहस्पतिः; उपदेष्टा च. ६. श्रिया युक्तो यो दानवारातिर्विष्णुस्तेन; (पक्षे) श्रियो दाने वारा उत्सर्गजलेन. ७. पविः; हीरकश्च. ८. इन्द्रः. ९. तैलेन; प्रीत्या च. १०. न-कुल; नकुलः प्राणिविशेषश्च. ११. भुजंगमाः सर्पाः; पिङ्गाश्च. १२. विषं जलम्; गरलं च. १३. नदीविशेषः; सर्पिणी च. १४. दशरथम्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तं तदाच्छिद्य वशीकृतेऽस्मिन्गोमण्डले तेन वृषोन्नतेन ।
रक्ताक्षतां बिभ्रदियाय रोषाद्वैरी वनं यन्महिषीभिरेव ॥ ३० ॥
यत्पुण्डरीकाक्षमपि व्यपास्य स्मराकृतेस्तस्य वशं गता श्रीः ।
सेर्ष्यं विरूपाक्ष इतो व्यधासीद्देहार्धनद्धां किल शैलपुत्रीम् ॥ ३१ ॥
दोषोच्चयेभ्यश्चकितः स विद्वान्गताः पुनस्ते प्रपलाय्य तस्मात् ।
इत्यस्य विस्तारियशश्छलेन विरुद्धमद्यापि दिशो हसन्ति ॥ ३२ ॥
सकज्जलाश्रुव्यपदेशनिर्यद्भृङ्गावली वैरिविलासिनीनाम् ।
राज्ञा कृतं तेन रसाब्धिलोलहृत्पद्मसंकोचमवोचदुच्चैः ॥ ३३ ॥
उत्खातखड्गप्रतिबिम्बिताङ्गो रराज राजा समरप्रदोषे ।
जयश्रियासावभिसारणाय नीलेन संवीत इवांशुकेन ॥ ३४ ॥
अनारतं वीररसाभियोगैरायासितेव क्षणमस्य यूनः ।
विलासिनी भ्रूलतिकाग्ररङ्गच्छायासु विश्राममियाय दृष्टिः ॥ ३५ ॥
सरागमुर्व्या मृगनाभिदम्भादपारकर्पूरपदेन कीर्त्या ।
रत्यापि दन्तच्छदरुक्छलेन स एकहेलं सुभगोऽवगूढः ॥ ३६ ॥
असत्पथस्थापितदण्डलब्धस्थामातिवृद्धो विहितस्थितिर्यः ।
स एव रक्षार्थमशेषलक्ष्म्याः क्षात्रोऽस्य धर्मोऽजनि सौविदल्लः ॥३७॥
प्रयच्छता तेन समीहितार्थान्नूनं निरस्तार्थिकुटुम्बकेभ्यः ।
व्यर्थीभवत्त्यागमनोरथस्य चिन्तामणेरेव बभूव चिन्ता ॥ ३८ ॥
दूरात्समुत्त्रासितशासनोरुसिन्दूरमुद्रारुणभालमूलाः ।
यस्य प्रतापेन नृपाः कचाग्रकृष्टा इवाजग्मुरुपासनाय ॥ ३९ ॥
विधाय कान्तारसमाश्रितांस्तान्हारावसक्तान्विद्विषो द्विपश्च ।
क्रीडन्स लीलारसलालसाभिरासीच्चिरं चञ्चललोचनाभिः ॥ ४० ॥
अथैकदा व्योम्नि निरभ्रगर्भक्षणक्षपायां क्षणदाधिनाथम् ।
अनाथनारीव्यथनैनसेव स राहुणा प्रैक्ष्यत गृह्यमाणम् ॥ ४१ ॥

---

१. भूवलये; धेनुसमूहे च. २. वृषोऽनड्वान्; धर्मश्च. ३. महिषत्वम्; अरुणनेत्रत्वं च. ४. सैरिभीभिः; कृताभिषेकाभिः पत्नीभिश्च. ५. कमलतुल्यनेत्रम्; विष्णुं च. ६. विकृतनेत्रः; शिवश्च. ७. कञ्चुकी. ८. कान्ता; रसं-आश्रितान्; कान्तार-समाश्रितान्. ९. हार-अवसक्तान्; हा-राव-सक्तान्. १०. पूर्णिमारात्रौ. ११. चन्द्रम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं सीधुना स्फाटिकपानपात्रमिदं रजन्याः परिपूर्यमाणम् ।
चलाद्विरेफोच्चयचुम्ब्यमानमाकाशगङ्गास्फुटकैरवं वा ॥ ४२ ॥
ऐरावणस्याथ करात्कथंचिच्च्युतः सपङ्को बिसकन्द एषः ।
किं व्योम्नि नीलोपलदर्पणाभे सश्मश्रु वक्त्रं प्रतिबिम्बितं मे ॥ ४३ ॥
क्षणं वितर्क्येति स निश्चिकाय चन्द्रोपरागोऽयमिति क्षितीशः ।
दृङ्मीलनाविष्कृतचित्तखेदमचिन्तयच्चैवमुदारचेताः ॥४४॥ (विशेषकम्)
हा हा महाकष्टमचिन्त्यधाम्नि किमेतदत्रापतितं हिमांशौ ।
यद्वा किमुल्लङ्घयितुं कथंचित्केनापि शक्यो नियतेर्नियोगः ॥ ४५ ॥
सुधाद्रवैर्मन्मथमात्मबन्धुमुज्जीव्य नेत्राग्निशिखावलीढम् ।
क्रुधेव तद्वैरविनिष्क्रयार्थं स्थाणोरसौ मूर्ध्नि पदं विधत्ते ॥ ४६ ॥
कुतश्चिरं जीवति वाडवाग्नौ वर्तेत वार्धिः सह जीवनेन ।
अनेन चेच्चारुवसुप्रपञ्चैर्नीयेत न प्रत्यहमेव वृद्धिम् ॥ ४७ ॥
सुधाकरेणाप्यजरामरत्वं नीता सुरा एव मयात्र नान्ये ।
इतीव पूर्णोऽप्यतिलज्जमानः पुनः पुनः कार्श्यमसौ व्यनक्ति ॥ ४८ ॥
सुदुर्धरध्वान्तमलिम्लुचानामुत्सार्य सेनामनिवार्यतेजाः ।
रतेर्गलग्रन्थिमिवाबलानां मानं भिनत्त्येष चिरात्कराग्रैः ॥ ४९ ॥
इत्येष निःशेषजगल्ललामलीलायमानप्रसरद्गुणोऽपि ।
[१]राजा दशां प्रापदिहेदृशीं चेत्को नाम तत्स्यात्सुखपात्रमन्यः ॥५०॥
उपागमे तद्विपदामवश्यं पश्यामि किंचिच्छरणं न जन्तोः ।
अपारपाथोनिधिमध्यपातिपोताच्च्युतस्येव विहंगमस्य ॥ ५१ ॥
नीरोपितायां अपि सर्वदास्याः पश्यामि नार्द्रं हृदयं कदाचित् ।
युक्तं ततः पुंसि कलामयेऽपि स्थिरो न लक्ष्म्याः प्रणयानुबन्धः॥५२॥
अल्पीयसि स्वस्य फले यदेषा विस्तारिता श्रीः परिवारहेतोः ।
गुडेन संवेष्ट्य ततो मयात्मा [२]मत्कोटकेभ्यः किमु नार्पितोऽयम्॥५३॥

---

१. चन्द्रः. २. मत्कोटकः पिपीलकसदृशो गुडादिमधुरपदार्थभक्षको 'मकोडा' इति प्रसिद्धः कीटविशेषः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहेरिवापातमनोरमेषु भोगेषु नो विश्वसिमः कथंचित् ।
मृगः सतृष्णो मृगतृष्णिकासु प्रतार्यते तोयधिया न धीमान् ॥ ५४ ॥
अन्याङ्गनासंगमलालसानां जरा कृतेर्ष्येव कुतोऽप्युपेत्य ।
आकृष्य केशेषु करिष्यते नः पदप्रहारैरिव दन्तभङ्गम् ॥ ५५ ॥
क्रान्ते तवाङ्गे वलिभिः समन्तान्नश्यत्यनङ्गः किममावितीव ।
वृद्धस्य कर्णान्तगता जरेयं हसत्युदञ्चत्पलितच्छलेन ॥ ५६ ॥
रसाढ्यमप्याशु विकासिकाशसंकाशकेशप्रसरं तरुण्यः ।
उदस्थिमातङ्गजनोदपानपानीयवन्नाम नरं त्यजन्ति ॥ ५७ ॥
आकर्णपूर्णं कुटिलालकोर्मि रराज लावण्यसरो यदङ्गे ।
वलिच्छलात्सारणिधोरणीभिः प्रवाह्यते तज्जरसा नरस्य ॥ ५८ ॥
असंभृतं मण्डनमङ्गयष्टेर्नष्टं क्व मे यौवनरत्नमेतत् ।
इतीव वृद्धो नतपूर्वकायः पश्यन्नधोधो भुवि बम्भ्रमीति ॥ ५९ ॥
इत्थं पुरः प्रेक्ष्य जरामधृष्यां दूतीमिवापप्रसरोग्रदंष्ट्रः ।
यावन्न कालो ग्रसते बलान्मां तावद्यतिष्ये परमार्थसिद्ध्यै ॥ ६० ॥
इत्येष संचिन्त्य विनिश्चितार्थो वैराग्यवान्प्रातरमात्यबन्धून् ।
पप्रच्छ राजा तपसे यियासुः किं वा विमोहाय विवेकिनां स्यात् ॥ ६१ ॥
तं प्रेक्ष्य भूपं परलोकसिद्ध्यै साम्राज्यलक्ष्मीं तृणवत्त्यजन्तम् ।
मन्त्री सुमन्त्रोऽथ विचित्रतत्त्वचित्रीयमाणामिति वाचमूचे ॥ ६२ ॥
देव त्वदारब्धमिदं विभाति नभःप्रसूनाभरणोपमानम् ।
जीवाख्यया तत्त्वमपीह नास्ति कुतस्तनी तत्परलोकवार्ता ॥ ६३ ॥

---

१. 'वर्णं सितं शिरसि वीक्ष्य शिरोरुहाणां स्थानं जरापरिभवस्य तदेव पुंसाम् । आरोपितास्थिशकलं परिहृत्य यान्ति चाण्डालकूपमिव दूरतरं तरुण्यः ॥' इति भर्तृहरिश्लोकसमानार्थोऽयं श्लोकः. २. अयं प्रथमः पादः कुमारसंभव(१।३१)श्लोकस्य प्रथमः पादश्च समान एव. ३. खपुष्पशेखरतुल्यम्. ४. चार्वाकमतमेतत्. 'तत्र पृथिव्यादीनि भूतानि चत्वारि तत्त्वानि । तेभ्य एव देहाकारपरिणतेभ्यः किण्वादिभ्यो मदशक्तिवच्चैतन्यमुपजायते । तेषु विनष्टेषु सत्सु स्वयं विनश्यति । तच्चैतन्यविशिष्टदेह एवात्मा । देहातिरिक्ते आत्मनि प्रमाणाभावात् ।' इत्यादि सर्वदर्शनसंग्रहे द्रष्टव्यम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न जन्मनः प्राङ् न च पञ्चतायाः परो विभिन्नेऽवयवे न चान्तः ।
विशन्न निर्यन्न च दृश्यतेऽस्माद्भिन्नो न देहादिह कश्चिदात्मा[1] ॥६४॥
किं त्वत्र भूवह्निजलानिलानां संयोगतः कश्चन यन्त्रवाहः ।
गुडान्नपिष्टोदकधातकीनामुन्मादिनी शक्तिरिवाभ्युदेति ॥ ६५ ॥
विहाय तद्दृष्टमदृष्टहेतोर्वृथा कृथाः पार्थिव मा प्रयत्नम् ।
को वा स्तनाग्राण्यवधूय धेनोर्दुग्धं विदग्धो ननु दोग्धि शृङ्गम् ॥६६॥
श्रुत्वेत्यवादीन्नृपतिर्विधुन्वन्भानुस्तमांसीव स तद्वचांसि ।
अपार्थमर्थं वदतः सुमन्त्र नामापि ते नूनमभूदपार्थम् ॥ ६७ ॥
जीवः स्वसंवेद्य इहात्मदेहे सुखादिवद्बाधक[2]विप्रयोगात् ।
काये परस्यापि स बुद्धिपूर्वव्यापारदृष्टेः स्व इवानुमेयः ॥ ६८ ॥
तत्कालजातस्य शिशोरपास्य प्राग्जन्मसंस्कारमुरोजपाने[3] ।
नान्योऽस्ति शास्ता तदपूर्वजन्मा जीवोऽयमित्यात्मविदा न वाच्यम्॥६९
ज्ञानैकसंवेद्यममूर्तमेनं मूर्ता परिच्छेत्तुमलं न दृष्टिः ।
व्यापार्यमाणापि कृताभियोगैर्भिनत्ति न व्योम शितासियष्टिः ॥७०॥
संयोगतो भूतचतुष्टयस्य यज्जायते चेतन इत्यवादि ।
मरुज्ज्वलत्पावकतापिताम्भःस्थाल्यामनेकान्त[4] इहास्तु तस्य ॥ ७१ ॥
उन्मादिका शक्तिरचेतना या गुडादिसंबन्धभवा न्यदर्शि ।
सा चेतने ब्रूहि कथं विशिष्टदृष्टान्तकक्षामधिरोहतीह ॥ ७२ ॥
तस्मादमूर्तश्च निरत्ययश्च कर्ता च भोक्ता च सचेतनश्च ।
एकः कथंचिद्विपरीतरूपादवैहि देहात्पृथगेव जीवः ॥ ७३ ॥
निसर्गतोऽप्यूर्ध्वगतिः प्रसह्य प्राक्कर्मणा[5] हन्त गतीर्विचित्राः ।
स नीयते दुर्धरमारुतेन हुताशनस्येव शिखाकलापः ॥ ७४ ॥
तदात्मनः कर्मकलङ्कमूलमुन्मूलयिष्ये सहसा तपोभिः ।
मणेरनर्घस्य कुतोऽपि लग्नं को वा न पङ्कं परिमार्ष्टि तोयैः ॥ ७५ ॥

---

१. जीवः. २. बाधकप्रम[illegible]त्. ३. स्तन्यपाने. ४. व्यभिचारः. ५. 'द्राक्कर्मणा' इति पाठः.

For Private and Personal Use Only

दत्त्वा स तस्योत्तरमित्यबाधं ददौ सुतायातिर[illegible]ज्यम् ।
यन्निर्व्यपेक्षा परमार्थलिप्सोर्धात्रीं तृणायापि न मन्यते धीः ॥ ७६ ॥
अथैनमापृच्छ्य सबाष्पनेत्रं पुत्रं प्रपित्सुर्वनसंनिवेशम् ।
प्रजाः स भास्वानिव चक्रवाकीराक्रन्दिनीस्तत्प्रथमं चकार ॥ ७७ ॥
त्यक्ता[1]वरोधोऽपि सहावरोधैर्न[2]क्षत्रमुक्तानुपदोऽपि राजा ।
प्रापद्वनं पौरहृदि स्थितोऽपि को वा स्थितिं सम्यगवैति राज्ञाम् ॥७८॥
तद्वाहनं श्रीविमलादिमादौ नत्वा गुरुं भूपशतैरुपेतः ।
तत्रोग्रकर्मक्षयमूलशिक्षां दीक्षां स जैनीमभजज्जितात्मा ॥ ७९ ॥
तथा[3] समुद्रामधिबिभ्रदुर्वी धुन्वन्नरातीनपि विग्र[4]हस्थान् ।
मु[5]क्तोत्तमालंकरणः प्रजापो वनेऽपि साम्राज्यपदं बभार ॥ ८० ॥
ध्यानानुबन्धस्तिमितोरुदेहो मित्रेऽपि शत्रावपि तुल्यवृत्तिः ।
व्यालोपगूढः स वनैकदेशे स्थितश्चिरं चन्दनवच्चकासे ॥ ८१ ॥
पूषा तपस्यल्परुचिः सदोषः शशी शि[6]खावानपि कृष्णवर्त्मा ।
गुणोदधेस्तस्य ततो न कश्चित्तमः समुन्मूलयतः समोऽभूत् ॥ ८२ ॥
निरामयश्रीसदनाग्रनीव्रं तीव्रं तपो द्वादशधा विधाय ।
धन्योऽथ संन्यासविसृष्टदेहः सर्वार्थसिद्धिं स मुनिर्जगाम ॥ ८३ ॥
तत्र त्रयस्त्रिंशदुदन्वदायुर्देवोऽहमिन्द्रः स बभूव पुण्यैः ।
निर्वाणतोऽर्वागधिकावधीनां मूर्तः सुखानामिव यः समूहः ॥ ८४ ॥
सा तत्र मुक्ताभरणाभिरामा यन्मुक्तिरामा निकटीबभूव ।
मन्ये मनस्तस्य ततोऽन्यनारीविलासलीलारसनिर्व्यपेक्षम् ॥ ८५ ॥
तस्य प्रभाभासुररत्नगर्भा विभ्राजते रुक्मकिरीटलक्ष्मीः ।
अव्याजतेजोनिवहस्य देहे द्राघीयसी प्रज्वलतः शिखेव ॥ ८६ ॥

---

१. बन्धनम्; राज्ञामन्तःपुरं च. २. नक्षत्रमुक्तानुपदो राजा चन्द्र इति विरोधः; (पक्षे) न-क्षत्रमुक्तानुपदः. ३. आ समुद्रां पृथ्वीं बिभ्रत्; (पक्षे) स उर्वीं मुद्रां बिभ्रत्. मुद्रा योगशास्त्रादिप्रसिद्धाः. ४. शरीरस्थान्कामक्रोधादीन्; (पक्षे) युद्धस्थान्. ५. मुक्तानि त्यक्तानि उत्तमभूषणानि येन; (पक्षे) मौक्तिकमयोत्तमाभरणः. ६. अग्निः. ७. प्रधानगृहम्. ८. त्रयस्त्रिंशज्जलधिमितायुः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रेखात्रयाधिष्ठितकण्ठहारिहारावली तस्य विभोर्विभाति ।
सुदर्शनस्यात्यनुरक्तमुक्तिमुक्ता कटाक्षप्रसरच्छटेव ॥ ८७ ॥
नूनं सहस्रांशुसहस्रतोऽपि तेजोऽतिरिक्तं न च तापकारि ।
शृङ्गारसाम्राज्यमनन्यतुल्यं न चाभवत्तस्य मनोविकारि ॥ ८८ ॥
नवं वयो लोचनहारि रूपं प्रभूतमायुः पदमद्वितीयम् ।
सम्यक्त्वशुद्धाश्च गुणा जगत्सु किं किं न लोकोत्तरमस्ति तस्य॥८९॥
तस्य त्रियामाभरणाभिरामान्वक्तुं गुणान्वाञ्छति यः समग्रान् ।
आप्लावयन्तं जगतीं युगान्ते मुग्धस्तितीर्षत्युदधिं स दोर्भ्याम् ॥९०॥
[१]शरद्दलादूर्ध्वमितश्च्युतः सन्नस्याः स गर्भे भवतः प्रियायाः ।
शुक्तेरिव स्वातिभवोदबिन्दुर्मुक्तात्मकोऽग्रेऽवतरिष्यतीह ॥ ९१ ॥
इति निशम्य स सम्यगुदीरितां [२]यमवतोन्यभवास्थितिमर्हतः ।
ससुहृदुत्पुलकस्तिलको भुवः स्फुटकदम्बकदम्बकवद्बभौ ॥ ९२ ॥

अथोचितसपर्यया मुनिमनिन्द्यविद्यास्पदं
प्रपूज्य सपरिग्रहो विधिवदेनमानम्य च ।
यथासमयमेष्यतां सुमनसामिवातिथ्यवि-
द्विधातुमयमर्हणां द्रुतमगादगारं नृपः ॥ ९३ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये चतुर्थः सर्गः ।

---

पञ्चमः सर्गः ।

तत्र कारयितुमुत्सवं मुदा यावदेष सदसि न्यविक्षत ।
तावदम्बरतटावतारिणीः प्रैक्षतामरविलासिनीर्नृपः ॥ १ ॥
तारकाः क्व नु दिवोदितद्युतो विद्युतोऽपि न वियत्यनम्बुदे ।
क्वाप्यनेधसि न वह्नयो महस्तत्किमेतदिति दत्तविस्मयाः ॥ २ ॥
कंधरावधि तिरोहिता घनैः क्वाप्यभिन्नमुखमण्डलश्रिया ।
यामिनीरिपुजिगीषयोद्यतं सोमसैन्यमनुकुर्वतीः क्षणम् ॥ ३ ॥

---

१. मासषट्कात्. २. पूर्वजन्मवार्ताम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नभूषणरुचा प्रपञ्चिते वासवस्य परितः शरासने ।
अन्तरुल्लुरतडित्त्विषो जनैः स्वर्णसायकततीरिवक्षिताः ॥ ४ ॥
कान्तिकाण्डपटगुण्ठिता पुरा व्योमभित्तिमनु वर्णकद्युतिम् ।
तन्वतीस्तदनुभाविताकृतीस्तूलिकोल्लिखितचित्रविभ्रमम् ॥ ५ ॥
शीतदीधितिधियाभिधावितैः सैंहिकेयनिकुरम्बकैरिव ।
सौरभादभिमुखालिमण्डलैर्भ्राजितानि वदनानि बिभ्रतीः ॥ ६ ॥
स्वानुभावधृतभूरिमूर्तिना पद्मरागमणिनूपुरच्छलात् ।
भानुना क्षणमिह प्रतीक्ष्यतामित्युपात्तचरणाः समन्मथम् ॥ ७ ॥
निष्कलङ्कगलकन्दलीलुठत्तारहारलतिकापदेशतः ।
संगता इव चिरेण गौरवादन्तरिक्षसरितावगूहिताः ॥ ८ ॥
पारिजातकुसुमावतंसकस्पर्शमन्थरमरुत्पुरःसराः ।
पश्यतोऽथ नृपतेः सभान्तिकं ताः समीरणपथादवातरन् ॥९॥(कुलकम्)
पीवरोच्चकुचमण्डलस्थितिप्रत्ययानुमितमध्यभागया ।
दुर्वहोरुजघना जगल्लघूकुर्वतीरतुलरूपसंपदा ॥ १० ॥
तत्र कोकनदकोमलोपलस्तम्भमिन्दुमणिमण्डपं पुरः ।
ताः प्रतापधृतमद्भुतोदयं भूपतेर्यश इव व्यलोकयन् ॥ ११ ॥
तत्प्रतिक्षणसमुल्लसद्यशोराजहंसनिकुरम्बकैरिव ।
कामिनीकरविवर्तनोच्छलच्छुभ्रचामरचयैर्विराजितः ॥ १२ ॥
दाक्षिणात्यकविचक्रवर्तिनां हृच्चमत्कृतिगुणाभिरुक्तिभिः ।
पूरितश्रुतिशिरो विघूर्णयन्नेतुमन्तरिव तद्रसान्तरम् ॥ १३ ॥
सुस्वरश्रुतिमुदाररूपकां रागिणीं पृथगुपात्तमूर्छनाम् ।
गीतिमिन्दुवदनामिवोज्ज्वलां भावयन्मुकुलितार्धलोचनः ॥ १४ ॥
एणनाभिमभिवीक्ष्य कक्षयोः क्षिप्तभीततिमिरानुकारिणम् ।
रत्नकुण्डलमिषेण भानुना सेन्दुना किमपि संश्रितश्रुतिः ॥ १५ ॥
अङ्गवङ्गमगधान्ध्रनैषधैः कीरकेरलकलिङ्गकुन्तलैः ।
विभ्रमादपि समुत्क्षिपन्भ्रुवं भीतभीतमवनीश्वरैः श्रितः ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र हेममयसिंहविष्टरे काञ्चनाचल इवोच्चकैः स्थितः ।
सप्रमोदमुदितेन्दुसंनिभस्ताभिरैक्षि सदसि क्षितीश्वरः ॥१७॥(कुलकम्)
कर्मकौशलदिदृक्षयात्र नः प्राप्त एष पुरतोऽपि किं प्रभुः ।
सत्त्वपोहितुमितः प्रभृत्यथो दौस्थ्यमर्थपतिरभ्युपस्थितः ॥ १८ ॥
एकका इह निशम्य तच्छलाद्बाधितुं मनसिजोऽथवा गतः ।
अन्यथास्य वसुधामिमामतिक्रामति द्युतिरमानुषी कुतः ॥ १९ ॥
तर्कयन्त्य इति ताः परस्परं सप्रमोदमुपसृत्य भूपतिम् ।
जीव नन्द जय सर्वदा रिपूनित्यमन्दमुदचीचरन्वचः ॥ २० ॥
(त्रिभिर्विशेषकम्)

ताः स यत्नपरकिंकरार्पितेष्वासनेषु नृपतिर्न्यवीविशत् ।
वारिदात्ययदिनोपबृंहितेष्वम्बुजेष्विव विरोचनो रुचः ॥ २१ ॥
ताः क्षितीश्वरनिरीक्षणक्षणे रेजुरङ्कुरितरोमराजयः ।
अङ्गमग्नविषमेषुमार्गणव्यक्तपुङ्खलवलाञ्छिता इव ॥ २२ ॥
निर्मलाम्बरविशेषितत्विषस्तं स्फुरच्छ्रवणहस्तभूषणाः ।
कान्तिमन्तममराङ्गना नृपं तारका इव विधुं व्यभूषयन् ॥ २३ ॥
सोऽथ दन्तकरकुन्दकुड्मलस्रग्विभूषितसभं सभापतिः ।
आतिथेयवितथीकृतक्लमा इत्युवाच सुरसुन्दरीर्वचः ॥ २४ ॥
यद्गुणेन गुरुणा गरीयसीं स्वर्बिभर्ति गणनां जगत्स्वपि ।
मन्दिराणि किमपेक्ष्य ताः स्वयं भूभुजामपि नृणामुपासते ॥ २५ ॥
किं तु सा स्थितिरथातिधृष्टता व्याजमेतदथवातिभाषणे ।
त्वादृशेऽपि यदुपागते जने किं प्रयोजनमिहेति जल्प्यते ॥ २६ ॥
भारतीमिति निशम्य भूपतेः श्रीरुवाच सुरयोषिदीरिता ।
दन्तदीधितिमृणालनालकैः कर्णयोर्निदधती सुधामिव ॥ २७ ॥
मा वदस्त्वमिति भूपते भवद्दास्यमेव भुवि नः प्रयोजनम् ।
वासरैस्तु कतिभिः पुरंदरोऽप्यत्र कर्मकरवद्यतिष्यते ॥ २८ ॥

---

१. वस्त्रम्; (पक्षे) आकाशः. २. आकाशपक्षे श्रवणहस्तौ नक्षत्रे.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्जरासुरनरोरगेषु ते कोऽधुनापि गुणसाम्यमृच्छति।
अग्रतस्तु सुतरां यतो गुरुस्त्वं जगत्त्रयगुरोर्भविष्यसि॥ २९॥
उक्तमागमनिमित्तमात्मनः सूत्रवत्किमपि यत्समासतः।
तस्य भाष्यमिव विस्तरान्मया वर्ण्यमानमवनीपते शृणु॥ ३०॥
यच्चतुष्टयमनन्ततीर्थतोऽनर्धहायनमुदन्वतामगात्।
तस्य पल्य (?) दलमन्तिमं तथा भारतेऽभवदधर्मदूषितम्॥ ३१॥
तेन धर्मपरिवर्तदस्युना शुद्धदर्शनमणौ हृते छलात्।
वीक्षमाण इव केवलीश्वरं वासवोऽनिमिषलोचनोऽभवत्॥ ३२॥
अद्य भूप भवतोऽस्ति या प्रिया सुव्रता तदुदरे जिनोऽन्तरम्।
अर्धवत्सरमतीत्य धर्म इत्येष्यतीत्यवधितो विवेद सः॥ ३३॥
तत्प्रयाथ जननीं जिनस्य तां भाविनीं चिरमुपाध्वमादरात्।
इत्थमादिशदशेषनाकिनां नायकः समुपहूय नः क्षणात्॥ ३४॥
आगतोऽयमिह तत्त्वाज्ञया प्रेयसीं नृप निशान्तवर्तिनीम्।
ध्यातुमिच्छति सुराङ्गनाजनः कौमुदीमिव कुमुद्वतीगणः॥ ३५॥
संवदन्तमिति भारतीं मुनेर्वाक्प्रपञ्चमवधार्य स श्रियः।
उत्सवं द्विगुणितादरो द्वयेऽप्याशु धाम्नि पुरि च व्यदीधपत्॥ ३६॥
ताश्च कञ्चुकिपुरःसरास्ततस्तेन तूर्णमवरोधमन्दिरम्।
भास्वताग्रचरसंमदा रुचश्चन्द्रमण्डलमिव प्रवेशिताः॥ ३७॥
तत्र भूरिविबुधावतंसकप्रीतिपूरिगुणपूरपूरिताम्।
अङ्गसौरभविसर्पिषट्पदां पारिजाततरुमञ्जरीमिव॥ ३८॥
संभ्रमभ्रमितलोललोचनप्रान्तवान्तशुचिरोचिषां चयैः।
अद्भुतं धवलितालयामपि ध्यामलीकृतविपक्षयोषितम्॥ ३९॥
कामसिद्धिमिव रूपसंपदो जीवितव्यमिव यौवनश्रियः।
चक्रवर्तिपदवीमिव द्युतेश्चेतनामिव विलासवेषयोः॥ ४०॥

---

१. मासषट्कोनजलधिमितवर्षाणाम्. २. जिनम्. ३. इन्द्रः. ४. मलिनीकृत.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तामनेकनरनाथसुन्दरीवृन्दवन्दितपदां द्युयोषितः ।
हारिहेमहरिविष्टरे[1] स्थितां मानुषेशमहिषीं व्यलोकयन् ॥४१॥(कुलकम्)
तामुदीक्ष्य जितनाकनायिकाकायकान्तिमबलामिलापतेः[2] ।
ताभिरप्रतिमकालसंचितोऽप्युज्झितः सपदि चारुतामदः ॥ ४२ ॥
श्रीरशेषसुखदा प्रियंवदा भारती रतिरभेद्यकिंकरी ।
सौम्यदृष्टिरपि कर्णमोटिका[3] कालिका च रचितालकावलिः ॥ ४३ ॥
शीलवृत्तिरपराजिता जने सा वृषप्रणयिनी मनःस्थितिः ।
ह्रीप्रसक्तिधृतिकीर्तिकान्तयः स्पर्धयेव कुलमण्डनोद्यताः ॥ ४४ ॥
देव्य इत्यलमिमामुपासते प्रागपि प्रगुणिता गुणैः स्वयम् ।
तन्निदेशरसपेशलं हरेर्ब्रूहि कर्म किमु कुर्महेऽधुना ॥४५॥ (कुलकम्)
इत्युदीर्य च मिथः प्रणम्य च स्वं निवेद्य च तदिन्द्रशासनम् ।
स्वःस्त्रियस्त्रिभुवनेशमातरं तां निषेवितुमिहोपचक्रिरे ॥ ४६ ॥
अश्मगर्भमय[4]मूर्ध्वमुद्धृतं छत्रमिन्दुमणिदण्डमेकया ।
भ्राजते स्म सुदृशोऽन्तरुत्तरज्जाह्नवौघमिव मण्डलं दिवः ॥ ४७ ॥
कापि भूत्रयजयाय वल्गतो वल्गु तूणमिव पुष्पधन्वनः ।
पुष्पचारु कबरीप्रसाधनं मूर्ध्नि पार्थिवमृगीदृशो व्यधात् ॥ ४८ ॥
अङ्गरागमपि कापि सुभ्रुवः सांध्यसंपदिव निर्ममे दिवः ।
यामिनीव शुचिरोचिषं परा चारुचामरमचालयच्चिरम् ॥ ४९ ॥
मूर्ध्नि रत्नपुरनाथयोषितः सा कयापि रचितालकावलिः ।
या मुमोष मुखपद्मसंनिधौ गन्धलुब्धमधुपावलिश्रियम् ॥ ५० ॥
एणनाभिरसनिर्मितैकया पत्रभङ्गिमकरी कपोलयोः ।
अभ्यधत्त सुतनोरगाधतामुल्लसल्लवणिमाम्बुधे[5]रिव ॥ ५१ ॥
निष्कलङ्कमणिभूषणोच्चयैः सा कयापि सुमुखी विभूषिता ।
तारतारकवतीन्दुसुन्दरी शारदीव रजनी व्यराजत ॥ ५२ ॥

---

१. मनोहरे सुवर्णसिंहासने. २. भूपतेः. ३. चामुण्डा. ४. हरिन्मणिमयम्. ५. लावण्यसिन्धोः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावदेव किल कापि वल्लकीवेणुहारि हरिणेक्षणा जगौ ।
यावदर्थपतिकान्तयोदितां[1] नाशृणोदमृतवाहिनीं गिरम् ॥ ५३ ॥
एकया गुरुकलत्रमण्डले धृष्टकामुक इवाधिरोपितः ।
रागचञ्चलकराग्रलालितः कूजति स्म हतमानमौनकः[2] ॥ ५४ ॥
वल्गितभ्रु नवविभ्रमेक्षणं वेपितस्तनमुदस्तहस्तकम् ।
चारु चित्रपदचारमेकया नर्तितस्मरमनर्ति तत्पुरः ॥ ५५ ॥
यद्यदिष्टतममुत्तमं च यज्ज्ञातपूर्वमिह यच्च किंचन ।
तत्तदाभिरभिकर्मकौशलं स्पर्धयेव विधिवद्व्यधीयत ॥ ५६ ॥
सर्वतोऽपि सुमनोरमार्पितालंकृतिर्गुणविशेषशालिनी ।
भारतीव सुकवेरभूत्तदा शुद्धविग्रहवती नृपप्रिया ॥ ५७ ॥
रात्रिशेषसमये किलैकदा सा सुखेन शयिता व्यलोकयत् ।
स्वप्नसंततिमिमां दिवोऽर्हतस्तीर्थपद्धतिमिवोत्तरिष्यतः ॥ ५८ ॥
संचरत्पदभरेण निर्भरं भज्यमानदृढकूर्मकर्परम् ।
कल्पगन्धवहलोलमुद्धुरं राजताद्रिमिव गन्धसिन्धुरम् ॥ ५९ ॥
शृङ्गसंततिकदर्थितग्रहं शारदाभ्रमिव शुभ्रविग्रहम् ।
भूत्रयोत्सवविधायिनं वृषं[3] मूर्तिमन्तमिव बिभ्रतं वृषम् ॥ ६० ॥
गर्जितग्लपितदिग्गजावलीगण्डमण्डलमदाम्बुनिर्झरम् ।
एणकेतनकुरङ्गलिप्सयेवान्तरिक्षरचितक्रमं हरिम् ॥ ६१ ॥
रावरोषदलिताम्बुदावलीलग्नलोलरुचिसंचयामिव ।
कंधरामुरुकडारकेसरोल्लासिनीं दधतमुद्धतं हरिम् ॥ ६२ ॥
(इति पाठान्तरम्)
स्फारकान्तिलहरीपरम्पराप्लावितप्रकृतिकोमलाकृतिम् ।
तत्क्षणभ्रमदमन्दमन्दरक्षुब्धवारिधिगतामिव श्रियम् ॥ ६३ ॥
संभृतभ्रमरसङ्गिविभ्रमं स्रग्द्वयं शुचि विकासिकौसुमम् ।
व्योम्नि दिग्गजमदाविलं द्विधा जाह्नवौघमिव वायुना कृतम् ॥ ६४ ॥

---

१. नृपपत्न्या. २. पटहः. ३. धर्मम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[1]उग्रदग्धमधिरोप्य लाञ्छनच्छद्मनात्मभुवमङ्कमात्मनः ।
औषधीरसनिषेवणैरिवोज्जीवयन्तमुदितौषधीश्वरम् ॥ ६५ ॥
कौमुदीरसविलासलालसं मीनकेतुनृपतेः पुरोधसम् ।
कामिनीषु नवरागसंभ्रमाद्वैतवादिनमतिग्मतेजसम् ॥ ६६ ॥
(इति पाठान्तरम्)

सर्वथाहमपदोष एव किं ध्यामलो जन इति प्रतिज्ञया ।
लब्धशुद्धिमुडुदिव्यतण्डुलैश्चर्चितैरिव कृतोत्सवं रविम् ॥ ६७ ॥
स्तम्भितभ्रमितकुञ्चिताञ्चितस्फारितोद्वलितवेल्लितादिभिः ।
प्रक्रमैर्विहरदम्बुधौ युगं मीनयोर्नयनयोरिव श्रियः ॥ ६८ ॥
प्रागरसातलगतस्य तत्क्षणान्निर्यतः सुकृतमत्तदन्तिनः ।
कुम्भयोरिव युगं समौक्तिकं शातकुम्भमयपूर्णकुम्भयोः ॥ ६९ ॥
अभ्युपात्तकमलैः [2]कवीश्वरैः संश्रुतं कुवलयप्रसाधनम् ।
द्रावितेन्दुरसराशिसोदरं सच्चरित्रमिव निर्मलं सरः ॥ ७० ॥
[3]पीवरोच्चलहरिव्रजोद्धुरं [4]सज्जनक्रमकरं समन्ततः ।
अब्धिमु[5]ग्रतरवारिमजित[6]क्ष्माभृतं पतिमिवावनीभुजाम् ॥ ७१ ॥
स्वस्वदीधितिपरिग्रहग्रहग्रामवेष्टितमिवाद्रिशेखरम् ।
चित्ररत्नपरिवेषमुच्चकैश्चारुहेममहरिणारिविष्टरम् ॥ ७२ ॥
अश्मगर्भमणिकिङ्किणीचयैः सानुभावमकृताश्रयैरिव ।
दिव्यगन्धहृतलोलषट्पदैः सस्वनैः सुरविमानमन्वितम् ॥ ७३ ॥
[7]मत्तवारणविराजितं स्फुर[8]द्वज्रहेतिभरतोरणोल्बणम् ।
लोलकेतुपटनाकदम्बकं नाकिनामिव विमानमम्बरे ॥ ७४ ॥
(इति पाठान्तरम्)

---

१. महादेवभस्मीकृतम्. २. जलपक्षिश्रेष्ठैः. ३. पीवरोच्चल-हरिव्रजोद्धुरम्; (पक्षे) पीवरोच्च-लहरि-व्रजोद्धुरम्. ४. सज्जन-क्रमकरम्; (पक्षे) सज्ज-नक्रमकरम्. ५. उग्र-तर-वारि; (पक्षे) उग्र-तरवारि. ६. क्ष्माभृतो राजानः पर्वताश्च. ७. मत्तवारणो वरण्डकः; (पक्षे) मत्तगजः. ८. हीरकप्रभाभरनिर्मिततोरणेन; (पक्षे) पविरूपायुधातिशयतः सङ्ग्रामोल्बणम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्तरूर्ध्वफणिविस्फुरत्फणास्थालकोल्बणमणिप्रदीपकैः ।
निष्फलीकृतरिरंसुभोगिनीफूत्कृतोद्यममहीन्द्रमान्दिरम् ॥ ७५ ॥
क प्रयासि परिभूय मेदिनीं दौस्थ्यमत्पुर इतीव रोषतः ।
चित्ररत्नचयमुल्लसत्करैः स्फारितोरुहरिचापमण्डलम् ॥ ७६ ॥
तीर्थकर्तुरहमिन्द्रमन्दिरादेष्यतः पथि समृद्धिभावतः ।
अग्निमग्निकणसंततिच्छलादुत्क्षिपन्तमिव लाजसंचयम् ॥ ७७ ॥
प्रेक्ष्य तत्क्षणविनिद्रलोचना सा विहाय तलिनं सुभूषणा ।
पत्युरन्तिकमुपेत्य सुव्रता स्वप्नसङ्घमखिलं तमब्रवीत् ॥ ७८ ॥
बन्धुरं तमवधार्य तस्य सद्बन्धुरन्तकरमेनसां फलम् ।
व्याजहार स रदाग्रदीधितिव्याजहारमुरसि प्रकल्पयन् ॥ ७९ ॥
तं निशम्य हृदि मौक्तिकावलीं दन्तजैर्द्विगुणयन्मरीचिभिः ।
प्रीतिकन्दलितरोमकन्दलीसुन्दराकृतिरवीवदन्नृपः ॥ ८० ॥
(इति पाठान्तरम्)

देवि धन्यचरिता त्वमेव या स्वप्नसंततिमपश्य ईदृशीम् ।
श्रूयतां सुकृतकन्दलि क्रमाद्वर्ण्यमानमनघायि तत्फलम् ॥ ८१ ॥
वारणेन्द्रमिव दानबन्धुरं सौरभेयमिव धर्मधूर्धरम् ।
केसरीशमिव विक्रमोदितं श्रीस्वरूपमिव सर्वसेवितम् ॥ ८२ ॥
माल्यवत्प्रथितकीर्तिसौरभं चन्द्रवन्नयनवल्लभप्रभम् ।
भानुवद्भुवनबोधकोविदं मीनयुग्मवदमन्दसंमदम् ॥ ८३ ॥
कुम्भयुग्ममिव मङ्गलास्पदं निर्मलं सर इव क्लमच्छिदम् ।
तोयराशिमिव पालितस्थितिं सिंहपीठमिव दर्शितोन्नतिम् ॥ ८४ ॥
देवतागमकरं विमानवद्गीततीर्थमुरगस्य हर्म्यवत् ।
सद्गुणाढ्यमिह रत्नराशिवत्प्लुष्टकर्मगहनं च वह्निवत् ॥ ८५ ॥
लप्स्यसे सपदि भूत्रयाधिपं तीर्थनाथममुना त्वमात्मजम् ।
जायते व्रतविशेषशालिनां स्वप्नवृन्दमफलं हि न क्वचित् ॥ ८६ ॥

---

१. शय्याम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं तदर्थकथया हृदि कुल्ययेव
श्रोत्रान्तरप्रहितया हृदयेश्वरेण ।
देवी प्रमोदसलिलैरभिषिच्यमाना
वप्रावनीव विलसत्पुलकाङ्कुराभूत् ॥ ८७ ॥

स श्रीमानहमिन्द्र इत्यभिधया देवस्त्रयस्त्रिंशतो-
दन्वद्भिः प्रमितायुषो व्यपगमे सर्वार्थसिद्धेश्च्युतः ।
चन्द्रे बिभ्रति रेवतीप्रणयतां वैशाखकृष्णत्रयो-
दश्यां गर्भमवातरत्करितनुः श्रीसुव्रतायास्तदा ॥ ८८ ॥

आगत्यासनकम्पकल्पितचमत्काराः सुराः सर्वतो
जम्भारातिपुरःसराः सपदि तां गर्भे जिनं बिभ्रतीम् ।
स्तोत्रैस्तुष्टुवुरिष्टभूषणचयैरानर्चुरुच्चैर्जगु-
र्भक्त्या नेमुरनर्तिषुर्नवरसैस्तत्किं न यत्ते व्यधुः ॥ ८९ ॥

अहमिह महमीहे यावदुच्चैर्विधातुं
कथमिव पुरुहूतोत्पादितं तावदीक्षे ।
इति मनसि विलक्षं तं क्षितीशं सरल-
त्रिदशकुसुमवृष्टिच्छद्मना द्यौरहासीत् ॥ ९० ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये पञ्चमः सर्गः ।

---

षष्ठः सर्गः ।

सा भारतीव चतुरातिगभीरमर्थं
वेलेव गूढमणिमण्डलमम्बुराशेः ।
पौरंदरी दिगिव मेरुतिरोहितेन्दुं
गर्भं तदा नृपवधूर्दधती रराज ॥ १ ॥

सामादरादुदरिणीं रहसि प्रहृष्टा
दृष्टिः प्रतिक्षणमुदैक्षत भूमिभर्तुः ।

---

१. क्षेत्रभूमिरिव. २. उत्सवम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दैवादवाप्य तपनीयनिधानकुम्भीं
साशङ्करङ्ककुलमूलकुटुम्बिनीव ॥ २ ॥

अन्तर्वपुः प्रणयिनः परमेश्वरस्य
निर्यद्यशोभिरिव सा परिरभ्यमाणा ।
स्वल्पैरहोभिरभितो घनसारसार-
क्लृप्तोपदेहमिव देहमुवाह देवी ॥ ३ ॥

तृष्णाम्बुधेरपरपारमुपागतं च
निर्बन्धनं च तनयं जनयिष्यतीयम् ।
तेनावरुद्धकलकेलिशकुन्तमुक्ति
मुक्त्वान्यवस्तुषु बबन्ध न दोहदानि ॥ ४ ॥

वृद्धिं परामुदरमाप यथायथास्याः
श्यामाननः स्तनभरोऽपि तथातथाभूत् ।
यद्वा नितान्तकठिनां प्रकृतिं भजन्तो
मध्यस्थमप्युदयिनं न जडाः सहन्ते ॥ ५ ॥

तस्याः कपोलफलके स्फटिकाश्मकान्तौ
कंदर्पदर्पण इव प्रतिबिम्बिताङ्गः ।
रात्रावलक्ष्यत जनैर्यदि लाञ्छनेन
श्रीकण्ठकण्ठजरठच्छविना मृगाङ्कः ॥ ६ ॥

एकेन तेन बलिना स्वबलेन तस्या
भङ्क्त्वा बलित्रयमवर्धत मध्यदेशः ।
तेनैव संमदरसेन सुहृत्तदाभू-
दत्यन्तपीवरतरः कुचकुम्भभारः ॥ ७ ॥

उत्खातपङ्किलबिसाविव राजहंसौ
शुभ्रौ सभृङ्गवदनाविव पद्मकोषौ ।

---

१. भूमितलाद्दैवानुकूल्येन लब्धसुवर्णकलशा मा कश्चिद्धार्षीदिति भयाकुला दरिद्रगृहिणीव. २. तेन गर्भस्थेन.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्याः स्तनौ हृदि रसैः सरसीव पूर्णे
संरेजतुर्गवलमेचकचूचुकाग्रौ ॥ ८ ॥

गर्भे वसन्नपि मलैरकलङ्किताङ्गो
ज्ञानत्रयं त्रिभुवनैकगुरुर्बभार ।
तुङ्गोदयाद्रिगहनान्तरितोऽपि धाम
किं नाम मुञ्चति कदाचन तिग्मरश्मिः ॥ ९ ॥

काले कुलस्थितिरिति प्रतिपद्य विद्वा-
न्कर्तुं यदैच्छदिह पुंसवनादिकर्म ।
स्वःस्पर्धयेव तदुपेत्य पुरंदरेण
प्रागेव निर्मितमुदैक्षत स क्षितीशः ॥ १० ॥

सा गर्भनिर्भरतया सकलाङ्गसाद-
मासाद्य निष्क्रियतनुस्तरुणेन्दुगौरी ।
आलोकिता स्फटिककृत्रिमपुत्रिकेव
भर्तुस्तदा मदयति स्म मनो मृगाक्षी ॥ ११ ॥

वज्रानलादि न ससर्ज न चोज्जगर्ज
साश्चर्यमैलविल इत्यपरोऽम्बुवाहः ।
अष्टौ च सप्त च जिनेश्वरजन्मपूर्वा-
न्मासान्व्यधत्त नृपधामनि रत्नवृष्टिम् ॥ १२ ॥

पुष्यं गते हिमरुचौ तपसो वलक्ष-
पक्षाश्रितां तिथिमथ त्रिजयामवाप्य ।
प्राचीव भानुमभिनन्दितसर्वलोकं
सासूत सूत्रितनयं तनयं मृगाक्षी ॥ १३ ॥

शातोदरी शयनसंनिहितेन तेन
प्रोत्तप्तकाञ्चनसकाशरुचा चकाशे ।
कंदर्पदर्पजयिना नयनानलेन
कामद्विषः शिरसि चान्द्रमसी कलेव ॥ १४ ॥

---

१. गवलं माहिषं शृङ्गम्. २. ऐलविलः कुबेरः. ३. त्रयोदशीम्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टोत्तरां दशशतीं शुभलक्षणानां
बिभ्रत्स पुण्यविपणिः सहसापि दृष्टः।
स्वर्गोद्गतेऽपि परमोत्सवनिर्निमेषाः
काश्चित्रमत्र न चकार चकोरनेत्राः ॥ १५ ॥
गच्छन्नधश्चिरतरं जिनजन्मदत्त-
हस्तावलम्ब इव निर्मलपुण्यराशिः।
अप्रेरितोऽपि भवनामरमन्दिरेषु
निःसंख्यशङ्खनिवहः सहसोज्जगर्ज ॥ १६ ॥
रे रे भवभ्रमणजन्मजरान्तकाद्याः
सद्यः प्रयात शममेष जिनोऽवतीर्णः।
इत्थं प्रशासदिव डिण्डिमचण्डिमोच्चैः
खं [1]व्यन्तरानकशतध्वनिराततान ॥ १७ ॥
एको न केवलमनेकपमण्डलस्य
गण्डाच्छिखण्डिगलकज्जलकान्तिचौरः।
ज्योतिर्गृहग्रहिलसिंहसहस्रनादै-
रुत्कंधरः स जगतोऽपि मदो निरस्तः ॥ १८ ॥
तत्काललास्यरसलालसमोक्षलक्ष्मी-
विक्षिप्तपाणिमणिकङ्कणरावरम्यैः।
जन्मन्यनल्पतरकल्पनिवासिवेश्म-
घण्टास्वनैः स्वयमपूरि जगज्जिनस्य ॥ १९ ॥
बालस्य तस्य महसा सहसोद्यतेन
प्रध्वंसितान्धतमसे सदने तदानीम्।
सेवागताम्बरमुनीनिव सप्त काचि-
द्दीपान्व्यबोधयत केवलमङ्गलार्थम् ॥ २० ॥
जन्मोत्सवप्रथमवार्तिकमात्मजस्य
तस्य प्रमोदभरदुर्ललितो नरेन्द्रः।

1. व्यन्तरो देवयोनिभेदः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नोर्वीशमौलिमणिमालिकयाज्ञयैव
लक्ष्म्या पुनर्नियतमात्मसमीचकार ॥ २१ ॥
ते गन्धवारिविरजीकृतराजवर्त्म-
न्यभ्रादद्भ्रघृणयो मणयो निपेतुः ।
यैस्तत्क्षणोप्तसुकृतद्रुमबीजपुञ्ज-
निर्यत्प्ररोहनिकराकृतिरन्वकारि ॥ २२ ॥
उत्क्षिप्तकेतुपटपल्लवितान्तरिक्षे
चिक्षेप तीक्ष्णरुचिरत्र पुरे न पादान् ।
मन्ये पतत्रिदशपुष्परसप्रवाह-
संदोहपिच्छिलपथच्छलपातभीतः ॥ २३ ॥
संवाहयन्निव मनाक्चिरबन्धमुक्ता-
स्त्वङ्घ्रिसंस्थुलपदाः प्रतिपक्षवन्दीः ।
मन्दारदाममधुसीकरभारवाही
मन्दोऽतिमन्दगतिरत्र बभूव वायुः ॥ २४ ॥
तौर्यो ध्वनिः प्रतिगृहं लयशालि नृत्तं
गीतं च चारुमधुरा नवतोरणश्रीः ।
इत्याद्यनेकपरमोत्सवकेलिपात्रं
द्रागेकगोत्रमिव भूत्रितयं बभूव ॥ २५ ॥
शुभ्रं नभोऽभवदभूदपकण्टका भू-
र्भक्त्येव भानुरभिगम्यरुचिर्बभूव ।
आरोग्यवानजनि जानपदोऽपि लोक-
स्तत्किं न यत्सुखनिमित्तमभूत्तदानीम् ॥ २६ ॥
स्नाता इवातिशयशालिनि पुण्यतीर्थे
तस्मिन्रजोव्यपगमात्सहसा प्रसन्नाः ।
एष्यन्निजप्रणयिनां त्रिदिवात्तदानीं
संयोगयोग्यसमयाः ककुभो बभूवुः ॥ २७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रङ्गावलीध्वजपटोच्छ्रयतोरणादि-
व्यग्रे निधीश्वरपरिग्रहचक्रवाले ।
उद्वेल्लनोल्लसितरत्नरुचा हसद्भि-
र्निर्यामिकैरिव चिराच्चलितं निधानैः ॥ २८ ॥
जाते जगत्त्रयगुरौ गरिमाम्बुराशि-
नीरान्तरान्तरितविश्वमहिम्नि तत्र ।
कोऽन्यस्य राज्यमहिमेति किल प्रभाव-
शक्त्या हतं हरिहयासनमाप कम्पम् ॥ २९ ॥
तत्कम्पकारणमवेक्षितुमक्षमाणि
ज्ञात्वा शतान्यपि दशोज्ज्वललोचनानाम् ।
अत्यन्तविस्मयरसोत्सुकचित्तवृत्ति-
रिन्द्रोऽवधिं समुदमीलयदेकनेत्राम् ॥ ३० ॥
तेनाकलय्य जिनजन्म जवेन पीठा-
दुत्थाय तद्दिशि पदान्यपि सप्त गत्वा ।
देवो दिवस्तमभिवन्द्य मुदाभिषेक्तुं
प्रस्थानदुन्दुभिमदापयत क्षणेन ॥ ३१ ॥
उन्निद्रयन्निव चिराय शयालुधर्मं
तस्य ध्वनिर्भरितभूरिविमानरन्ध्रः ।
हर्म्याणि मेदुरतरोऽपि सुरासुराणां
द्राक्पारितोषकमिवार्थयितुं जगाम ॥ ३२ ॥
ते षोडशाभरणभूषितदिव्यदेहाः
स्वस्वोरुवाहनजुषः सपरिग्रहाश्च ।
हृल्लग्नजैनगुणसंततिकृष्यमाणा-
श्चेलुर्बलादिव दशापि दिशामधीशाः ॥ ३३ ॥
स्वर्दन्तिनं तदनु दन्तसरःसरोज-
राजीनटल्लडहनाकवधूनिकायम् ।

१. लडहः सुन्दरः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्फुल्ललोचनरुचां निचयैर्विचित्रैः
संचित्रयन्निव दिवस्पतिरारुरोह ॥ ३४ ॥

ऐरावणश्चटुलकर्णझलंझलाभि-[1]
रुड्डीनगण्डमधुपावलिराबभासे ।
यात्रोद्यतः पथि जिनस्य पदे पदेऽसौ
निर्मुच्यमान इव पापलवैस्त्रुटद्भिः ॥ ३५ ॥

गच्छन्ननल्पतरकल्पतरुप्रसून-
पात्रीपवित्रकरकिंकरचक्रवालैः ।
सोढुं तदीयविरहार्तिमशक्नुवद्भिः
क्रीडावनैरिव रराज स पृष्ठलग्नैः ॥ ३६ ॥

अन्योन्यघट्टनरणन्मणिभूषणाग्रा
वाचालितोच्चकुचकुम्भभराः सुराणाम् ।
उल्लासिलास्यरसपेशलकांस्यताल-
लीलाश्रिता इव रसाल्ललनाः प्रचेलुः ॥ ३७ ॥

गायन्नटन्नमदनुव्रजदप्यमन्दं
वृन्दं तदा दिविषदां मिलदासमन्तात् ।
देवः पृथक्पृथगुपात्तविशेषभावै-
स्तुल्यं सहस्रनयनो नयनैर्ददर्श ॥ ३८ ॥

उद्दामरागरससागरमग्नहूहू-
हाहादिकिंनरतरङ्गितगीतसक्तः ।
संत्रासहेतुषु नदत्स्वपि तूर्यलक्षे-
ष्वन्तर्न शीतकिरणं हरिणो बबाधे ॥ ३९ ॥

क्रूरः कृतान्तमहिषस्तरणेस्तुरंगा-
द्योतिः कुरङ्गरिपवः (?) पवनस्य चैणः ।

---

१. 'गजकर्णगतिर्झलंझलेत्युच्यते' इति कामन्दकीयनीतिसारटीका (१।४५).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वे समं ययुरमी जिनमार्गलग्नाः
के वा त्यजन्ति न परस्परवैरभावम् ॥ ४० ॥
पुष्पैः फलैः किसलयैर्मणिभूषणैश्च
तैस्तैर्विचित्रवरचीवरसंचयैश्च ।
कर्तुं जिनेन्द्रचरणार्चनमुत्तरन्तः
कल्पद्रुमा इव वियत्यमरा विरेजुः ॥ ४१ ॥
अन्योन्यसंचलनघट्टितकर्कशोरः-
क्षुण्णोरुहारमणयो नटतां सुराणाम् ।
तारापथात्करिघटाचरणप्रचार-
संचूर्णितोडुनिचया इव ते निपेतुः ॥ ४२ ॥
सूर्योपगामिभिरिभैर्मरुतां कराग्र-
व्यापारिताभिरभितापिनि गण्डमूले ।
गण्डूषवारिविसरप्रसरच्छटाभि-
र्दध्रे क्षणं श्रवणचामरचारुलक्ष्मीः ॥ ४३ ॥
रक्तोत्पलं हरितपत्रविलम्बि तीरे
त्रिस्रोतसः स्फुटमिति त्रिदशद्विपेन्द्रः ।
बिम्बं विकृष्य सहसा तपनस्य मुञ्च-
न्धुन्वन्करं दिवि चकार न कस्य हास्यम् ॥ ४४ ॥
तारापथे विचरतां सुरसिन्धुराणां
सूत्कारनिर्गतकराम्बुकणा इवारात् ।
ताराः सुरैर्दृढशिरेऽथ मिथोऽङ्गसङ्ग-
त्रुट्यद्विभूषणमणिप्रकरानुकाराः ॥ ४५ ॥
त्रैविक्रमक्रमभुजंगमभोगमुक्ता
निर्मोकरज्जुरिव दृष्टविषातिरेका ।

१. दृष्टजलाधिक्यया च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्योमापगा द्युपुरगोपुरदेहलीव
देवैर्व्यलोकि घटिता स्फटिकोपलेन ॥ ४६ ॥

रेजे जिनं स्नपयितुं पततां सुराणां
शुभ्रा विमानशिखरध्वजपङ्क्तिरभ्रे ।
आनन्दकन्दलितरूपशतं पतन्ती
ज्ञात्वा निजावसरमम्बरनिम्नगेव ॥ ४७ ॥

जाते जिने भुवनशास्तरि संचरन्तः
स्वर्दन्तिनो नभसि नीलपयोदखण्डम् ।
नाथादृते प्रथममिन्दुपुरप्रतोल्यां
दत्तं कपाटमिव लोहमयं बभञ्जुः ॥ ४८ ॥

अव्याहतप्रसरवातविवर्तमान-
नीलान्तरीयविवरस्फुरितोरुदण्डा ।
बाह्यच्छविव्यपनयार्पितगर्भशोभा
रम्भेव कस्य न मनोहरति स्म रम्भा ॥ ४९ ॥

यावज्जिनेश्वरपुरं हरिराजधान्याः
स्वर्गौकसां नभसि धोरणिरापतन्ती ।
लोकस्य शास्तरि जिने दिवमारुरुक्षो-
र्निःश्रेणिकेव सुकृतेन कृता रराज ॥ ५० ॥

वल्गद्घनोरुलहरीनिवहान्तराल-
हेलोल्लसन्मकरमीनकुलीरपोतान् ।
ये यानपात्रपटलप्रतिमैर्विमानै-
रुत्तेरुरम्बरमहाम्बुनिधेरमर्त्याः ॥ ५१ ॥

द्वारि द्वारि नभस्तलान्निपतितैस्तूपैर्मणीनां मुनि-
क्रीडापीतपयोधिभूतलमिव व्यालोकयद्यद्यपि ।
एकस्यैव जगद्विभूषणमणेस्तस्यार्हतो जन्मना
मेने रत्नपुरं तथापि मरुतां नाथस्तदा सार्थकम् ॥ ५२ ॥

---

१. अन्तरीयमधोवस्त्रम्. २. कदलीव. ३. समूहैः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरमिव पुरुहूतः प्राञ्जलिस्त्रिः परीत्य
त्रिभुवनमहनीयं हर्म्यमस्यातिरम्यम् ।
समुपनयनबुद्ध्या विश्वविश्वाधिपत्यं[1]
श्रियमिव सहसान्तः प्रेषयामास कान्ताम्[2] ॥ ६२ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये षष्ठः सर्गः ।

---

## सप्तमः सर्गः ।

प्रविश्य सद्मन्यथ सुव्रतायाः समर्प्य मायाप्रतिरूपमङ्के ।
शची जिनं पूर्वपयोधिवीचेः समुज्जहारेन्दुमिवोदितं द्यौः ॥ १ ॥
अवाप्य तत्पाणिपुटाग्रमैत्रीं प्रकाशमाने जिनयामिनीशे ।
करारविन्दद्वितयं तदानीं बिडौजसः कुड्मलतां जगाम ॥ २ ॥
प्रमोदबाष्पाम्बुकरम्बितेन दृशां सहस्रेण सहस्रनेत्रः ।
अपश्यदस्याकृतिलक्षणानां सकष्टमष्टाभ्यधिकं सहस्रम् ॥ ३ ॥
अपारयन्नप्रतिरूपमङ्गं जिनस्य तस्येक्षितुमीक्षणाभ्याम् ।
सहस्रनेत्राय तदा समूहः सुरासुराणां स्पृहयांबभूव ॥ ४ ॥
तमादरादर्भकमप्यदभ्रैर्गुणैर्गरीयांसमशेषलोकात् ।
कृतप्रणामाय पुरंदराय समर्पयामास पुलोमपुत्री[3] ॥ ५ ॥
ससंभ्रमेणाभ्रमुवल्लभस्य[4] न्यधायि मूर्ध्नि त्रिदिवेश्वरेण ।
जयेति वाचं मुहुरुच्चरद्भिः कराञ्जलिः स्वस्य सुरैरशेषैः ॥ ६ ॥
स तत्र चामीकरचारुमूर्तिः स्फुरत्प्रभामण्डलमध्यवर्ती ।
अनम्बुधाराधरतुङ्गशृङ्गे नवोदितश्चन्द्र इवाबभासे ॥ ७ ॥
तदङ्घ्रियुग्मस्य नखेन्दुकान्तिर्द्युदन्तिनो मूर्धनि विस्फुरन्ती ।
बभौ तदाक्रान्तिविभिन्नकुम्भस्थलोच्छलन्मौक्तिकमण्डलीव ॥ ८ ॥
अथाभिषेक्तुं सुरशैलमूर्ध्नि तमुद्वहंस्तीर्थकरं कराभ्याम् ।
पथा ग्रहाणां स गजाधिरूढश्चचाल सौधर्मपतिः[5] ससैन्यः ॥ ९ ॥
ध्वनत्सु तूर्येषु हरिप्रणीता स्तुतिस्तदाश्रावि सुरैर्न जैनी ।

---

१. निखिलजगत्प्रभुत्वम्. २. शचीम्. ३. शची. ४. ऐरावतस्य. ५. इन्द्रः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुहुस्तदारम्भचलाधरौष्ठप्रवाललीलाभिरवेदि किं तु ॥ १० ॥
अखण्डहेमाण्डकपुण्डरीकव्रजस्य दम्भात्रिदशोद्धृतस्य ।
सुवर्णकुम्भान्स्वशिरोभिरुद्वहन्नियाय तस्य स्नपनाय शेषः ॥ ११ ॥
विधूयमानामरमण्डलीभिः प्रभोरुपान्ते सितचामराली ।
रराज रागोत्सुकमुक्तिमुक्तकटाक्षविक्षेपपरम्परेव ॥ १२ ॥
प्रदह्यमानागुरुधूमलेखाकरम्बितं व्योम बभौ तदानीम् ।
जिनस्य जन्माभिषवोत्सवार्थमिवागताशेषभुजंगलोकम् ॥ १३ ॥
तमिन्दुशुभ्रध्वजनिर्मलोर्मिः सितातपत्रस्फुटफेनपुञ्जः ।
सुरासुराणां निवहोऽभिषेक्तुं रराज दुग्धाब्धिरिवानुगच्छन् ॥ १४ ॥
बभौ पिशङ्गः कनकोज्ज्वलाभिः प्रभाभिरस्याभ्रमुजीवितेशः ।
प्रभुं तमायान्तमवेत्य भक्त्या स संमुखायात इवाद्रिराजः ॥ १५ ॥
सुधाप्रवाहैरिव हारिगीतैस्तरङ्गिते व्योममहाम्बुराशौ ।
भुजभ्रमोल्लासितलास्यलीलाछलात्प्लवन्ते स्म मरुत्तरुण्यः ॥ १६ ॥
दिवोऽपि संदर्शितविभ्रमायाः सितैकवेणीमिव वृद्धमूर्तेः ।
स निर्जराणामधिपः पतन्तीं मुमोच दूरेण सुरस्रवन्तीम् ॥ १७ ॥
स चित्रमन्तर्हितभानुकान्त्या प्रभोरमुष्योपरि मेघखण्डम् ।
सहेमकुम्भस्य बभार शोभां मयूरपत्रातपवारणस्य ॥ १८ ॥
प्रयाणवेगानिलकृष्यमाणा घना विमानानि तदानुजग्मुः ।
तदग्रवेदीमणिमण्डलांशुस्फुरन्मरुच्चापजिघृक्षयेव ॥ १९ ॥
स वारिधेरन्तरनन्तनालस्फुरद्धरित्रीवलयारविन्दे ।
उपर्यटत्षट्पदकर्णिकाभं ददर्श मेरुं सपयोदमिन्द्रः ॥ २० ॥
अधः कृतस्तावदनन्तलोकः श्रिया किमुच्चैस्त्रिदशालयो मे ।
ईत्यस्य रोषादरुणाब्जनेत्रं भुवाभ्युदस्तास्यमिवेक्षणाय ॥ २१ ॥
परिस्फुरत्काञ्चनकायमाराद्विभावरीवासरयोर्भ्रमेण ।
विडम्बयन्तं नवदंपतीभ्यां परीयमाणानलपुञ्जलीलाम् ॥ २२ ॥

---

१. अयं वंशस्थवृत्तपादोऽत्र प्रमादापतित इति भाति. २. देवाङ्गनाः. ३. गङ्गाम्.
४. एतदुत्तरार्धमस्फुटम्.



For Private and Personal Use Only

रवीन्दुरम्योभयपार्श्वमन्तर्धृतेन्द्रनीलद्युति हेमकायम् ।
सचक्रशङ्खस्य पिशङ्गवस्त्रां त्रिविक्रमस्याकृतिमुद्वहन्तम् ॥ २३ ॥
घनानिलोत्थैः स्थलपङ्कजानां परागपूरैरुपबृंहिताग्रम् ।
मुहुर्जिनस्यापततोऽतिदूरादुदञ्चितग्रीवमिवेक्षणाय ॥ २४ ॥
दिगन्तरेभ्यो द्रुतमापतद्भिर्घनैर्घनाखण्डलचापचित्रैः ।
उपान्तरत्नप्रकरोपहारैर्धरै[1]रिवाद्रीन्द्रमुपास्यमानम् ॥ २५ ॥
सिताब्दरुद्धार्धहिरण्यदेहं शिरःस्फुरत्पाण्डुशिलार्धचन्द्रम् ।
कपालमालाललितोडुपङ्क्त्या धृतार्धनारीश्वरमूर्तिशोभम् ॥ २६ ॥
अमी भ्रमन्तो विततस्थलान्मे ग्रहा ग्रहीष्यन्ति सुवर्णकोटीः ।
इतीव तेषां प्रसरं निरोद्धुं घनानुपान्ते दधतं सचापान् ॥ २७ ॥
नितम्बिनीः संततमेव [2]भास्वत्कराभिमृष्टोच्चपयोधराग्राः ।
समासजन्तं सरितां प्रवाहैस्तटीः क्षरत्स्वेदजलैरिवार्द्राः ॥ २८ ॥
असह्यहेतिप्रसरैः परेषां प्रभञ्जनात्प्राप्तहिरण्यलेशैः ।
महस्विसैन्यैः कटकेष्वटद्भिर्निषेवितं साधु महीधरेन्द्रम् ॥ २९ ॥
[3]मरुद्ध्वनद्वंशमनेक[4]तालं [5]रसालसंभावितमन्मथैलम् ।
धृतस्मरातङ्कमिवाश्रयन्तं वनं च गानं च सुराङ्गनानाम् ॥ ३० ॥
तटैरुदञ्चन्मणिमण्डलांशुच्छटैरुदूढोच्छिखबर्हिशङ्काम् ।
सचेतसोऽपि प्रथयद्भिरुच्चैः [6]प्रतारितानेकबिडालपोतम् ॥ ३१ ॥
विशाल[7]दन्तं [8]घनदानवारिं प्रसारितोद्दाम[9]कराग्रदण्डम् ।
उपेयुषो दिग्गजपुंगवस्य पुरो दधानं प्रतिमल्ललीलाम् ॥ ३२ ॥

---

१. पर्वतैः. २. भास्वन्तो देदीप्यमाना ये करा हस्ताः; (पक्षे) भास्वतः सूर्यस्य कराः किरणाः. ३. मरुतो देवाः; मरुद्वायुश्च. वंशो वंशीनामकं वाद्यम्; वेणुश्च. ४. तालः कालक्रियामानम्; वृक्षभेदश्च. ५. रसेन अलसं मन्थरम्. भाविता मन्मथस्य कामस्य एला गीतबन्धविशेषो येन; (पक्षे) रसालैराम्रैः संभाविता मन्मथा मदनसंज्ञका वृक्षविशेषा एलालताश्च यस्मिन्. ६. मणिकिरणेषु मयूरभ्रान्त्युत्पादनेन वञ्चितानेकमार्जारशिशुम्. ७. दन्तोऽद्रिकटकः; रदश्च. ८. घन-दान-वारिम्; (पक्षे) घन-दानव-अरिम्. ९. शुण्डादण्डम्; किरणाग्रदण्डं च.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधिश्रियं नीरदमाश्रयन्तीं नवान्नुदन्तीमतिनिष्कलाभान् ।
स्वनैर्भुजंगाञ्शिखिनां दधानं प्रगल्भवेश्यामिव चन्दनालीम् ॥ ३३ ॥

गजभ्रमान्मुग्धमृगाधिनाथैर्विदार्यमाणान्नखरप्रहारैः ।
तडिच्छलान्निर्गलदस्रधारान्दधानमा मेखलमम्बुवाहान् ॥ ३४ ॥

जिनागमे प्राज्यमणिप्रभाभिः प्रभिन्नरोमाञ्चमिव प्रमोदात् ।
समीरणान्दोलदबालतालैर्भुजैरिवोल्लासितलास्यलीलम् ॥ ३५ ॥

अकृत्रिमैश्चैत्यगृहैर्जिनानां कृतः पवित्रोऽयमिति प्रयत्नात् ।
सुरेश्वरेणानमता प्रदत्तप्रतिष्ठयेवोच्छिरसं महत्या ॥ ३६ ॥

विलङ्घ्य पन्थानमथामराणां पतिः स निष्कम्पचमूध्वजाग्रः ।
नितान्तवेगेन तमुत्सुकत्वात्किलागतं संमुखमाससाद ॥३७॥ (कुलकम्)

उपेयुषोऽनन्तपथाध्वनीनानेनेनसस्ताञ्शिरसा प्रतीच्छन् ।
निरन्तराया विबुधानुवृत्तेः फलं व्यनक्ति स्म तदामराद्रिः ॥ ३८ ॥

हरेर्द्विपो हारिहिरण्यकक्षः क्षरन्मदक्षालितशैलशृङ्गः ।
बभौ तडिद्दण्डविहारसारः शरत्तडित्वानिव तत्र वर्षन् ॥ ३९ ॥

सलीलमैरावणवामनाद्यैर्भृतानि यैरेव गजैर्जगन्ति ।
स्थिरं दधत्तानपि मूर्ध्नि मेरुर्धराधराख्यामधरीचकार ॥ ४० ॥

सविक्रमं क्रामति हास्तिके यन्ननाम नो नाम मनाग्गिरीन्द्रः ।
असंशयं सा जिनभक्तिरेव स्थिरा चकारास्य महाचलत्वम् ॥ ४१ ॥

मदेन मूर्धन्यमणिप्रभाभिर्विनिर्गतान्तस्तमसेव गण्डात् ।
निरुद्धदृष्टिप्रसराः सुराणां शनैः शनैर्गन्धगजाः प्रसस्रुः ॥ ४२ ॥

हिरण्यभूभृद्विरदैस्तदानीं मदाम्बुधारास्नपितोत्तमाङ्गः ।
स दृष्टपूर्वोऽपि सुरासुराणामजीजनत्कज्जलशैलशङ्काम् ॥ ४३ ॥

---

१. लक्ष्मीयुक्तं नीरदं दन्तरहितमप्याश्रयन्तीं निष्कलाभमतिक्रान्तान्दरिद्रानिति यावत्. एतादृशान्नवांस्तरुणानपि भुजंगान्विटाञ्शिखिनां चूलाधारिदासविशेषाणां स्वनैः कटुभाषणैः करणभूतैर्नुदन्तीं निष्कासयन्तीम्, इति वेश्यापक्षे; चन्दनालीपक्षे तु नीरदं मेघम्, शिखिनां मयूराणां स्वनैरतिमलिनकान्तीन्भुजगान्नुदन्तीम्. २. निष्पापान्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मदाञ्जनेनालिखितां गजेन्द्रैः सहेषमुत्क्षिप्तखुराग्रटङ्काः ।
हयाः किलाहार्यशिलासु जैनीमिहोत्किरन्ति स्म यशःप्रशस्तिम् ॥४४॥
केशाञ्चनैः किंचिदवाञ्चितास्याः पुरःप्रविष्टापरकायमश्वाः ।
इह प्लुतोल्लङ्घनवल्गनाद्यैर्मुदेव लास्यं पुरतोऽस्य चक्रुः ॥ ४५ ॥
कृतश्रमा ये नववीथिकासु तुरंगमाः साधितपञ्चधाराः ।
इहोच्चनीचं चरणैस्त एव विलङ्घ्य चान्ये नभसीव जग्मुः ॥ ४६ ॥
दृढैस्तुरंगाग्रखुरप्रहारैरिहोच्छलन्तो ज्वलनस्फुलिङ्गाः ।
बभुर्विभिद्येव महीं विभिन्नफणीन्द्रमौलेरिव रत्नसंघाः ॥ ४७ ॥
समन्ततः काञ्चनभूमिभागास्तथा रथैर्क्षुदिरे सुराणाम् ।
यथा विवस्वद्रथनेमिधारापथेऽरुणस्यापि मतिभ्रमोऽभूत् ॥ ४८ ॥
नितम्बमाघ्राय मदादुदञ्चच्छिरः समाकुञ्चितफुल्लघोणम् ।
अनुव्रजन्तं चमरीं महोक्षमिहारुणत्कष्टमहो महेशः ॥ ४९ ॥
द्युयोषितां कर्षितकुन्तलाग्राः स्तनोरुजङ्घाजघनं स्पृशन्तः ।
शनैरभीका इव संविचेरुस्तरङ्गिणीतीरसरोजवाताः ॥ ५० ॥
वियोगनामापि न सोढुमीशं दिवः स्वमुद्यानमिवावतीर्णम् ।
हरिः प्रपेदे सुमनोभिरामं वनं स तत्र पृथु पाण्डुकाख्यम् ॥ ५१ ॥
अथो जिनेन्द्रानुचराः सुराणामपास्तविस्तीर्णकुथच्छलेन ।
विचित्रकर्माचरणैरशेषैश्चिरादमुच्यन्त मतङ्गजेन्द्राः ॥ ५२ ॥
स वारितो मत्तमरुद्द्विपौघः प्रसह्य कामश्रमशान्तिमिच्छन् ।
रजस्वला अप्यभजत्स्रवन्तीरहो मदान्धस्य कुतो विवेकः ॥ ५३ ॥
गजो न वन्यद्विपदानदिग्धं पपौ पिपासाकुलितोऽपि तोयम् ।
स्वजीवितेभ्योऽपि महोन्नतानामहो गरीयानभिमान एव ॥ ५४ ॥
करी करोत्क्षिप्तसरोरुहास्योच्छलन्निलीनालिकुलच्छलेन ।
कचेष्विवाकृष्य हठेन यान्तीं बुभोज वामामपि तां स्रवन्तीम् ॥५५॥

---

१. अहार्यः पर्वतः. २. वल्गाकर्षणैः. ३. अश्वस्य पञ्चविधा गतिर्धारेत्युच्यते. ४. क्षुण्णाः. ५. कामुकाः. ६. वारितो जलात्; (पक्षे) वारितो निषिद्धः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रालशैवालदलान्तरीयं व्युदस्य मध्यं स्पृशति द्विपेन्द्रे ।
तटाग्रभूमिर्जघनस्थलीव जलैरुदञ्चावि वनापगायाः ॥ ५६ ॥
पयस्युदस्तोरुकरं मिमङ्क्षोर्द्विपाधिपस्योत्पतितं कपोलात् ।
उपर्यलीनां वलयं चकासे सदण्डनीलातपवारणाभम् ॥ ५७ ॥
विलासवत्याः सरितः प्रसङ्गमवाप्य विस्फारिपयोधरायाः ।
गजो ममज्जात्र कुतोऽथवा स्यान्महोदयः स्त्रीव्यसनालसानाम् ॥५८॥
दलानि संभोगभरार्पितानि नखक्षतानीव सरोरुहिण्याः ।
दधन्नदाम्भस्तलिनात्कथंचिदवातरल्लब्धरसो महेभः ॥ ५९ ॥
वनेऽत्र सप्तच्छदगन्धदत्तप्रतिद्विपभ्रान्तिविधूतवीतीन्[१] ।
प्रयुज्य सामैव शनैर्गजेन्द्रान्विनिन्युरालानपदं नयज्ञाः ॥ ६० ॥
निषादिने साधुनयप्रयुक्ताः स्वयं स्वकायाकलनाय वारीम्[२] ।
ददुर्महेभाः क्रियते कथं वा जडात्मकैरात्महितप्रवृत्तिः ॥ ६१ ॥
खलीनपर्याणमपास्य कृच्छ्रात्सुरैर्मुखारोपितवध्रनद्धाः[३] ।
हयाननाहेषितदत्तकर्णा[४] विनिन्यिरेऽश्वा भुवि वेल्लनाय ॥ ६२ ॥
इतस्ततो लोलनभाजि वाजिन्याभिच्युताः फेनलवा विरेजुः ।
तदङ्गसङ्गत्रुटितोरुहारप्रकीर्णमुक्ताप्रकरा इवोर्व्याः ॥ ६३ ॥
नदान्मिलच्छैवलजालनीला निरीयुराक्रम्य पयस्तुरंगाः ।
दिनोदये व्योम समुत्पतन्तः पयोधिमध्यादिव हारिदश्वाः[५] ॥ ६४ ॥
इह क्षरन्निर्झरवारिहारिण्यनल्पकल्पद्रुणि कल्पनाथः[६] ।
निवेशयामास यथायथं स स्थलाम्बुशाखाचरवाहनानि ॥ ६५ ॥
तदादि भूमौ शिशुवक्रमाभ्यां सकौतुकं क्रामति नाकिचक्रे ।
बभार दृग्दोषनिषेधयित्रीं यमश्छविं कज्जललाञ्छनस्य[७] ॥ ६६ ॥

भूदेव्याः शिरसीव कुन्तलतुलालम्बिद्रुमश्यामले
लीलोत्तंसितकेतकीकिसलयस्योन्मुद्रयन्तीं द्युतिम् ।

---

१. शय्यातः. २. 'वीतिरङ्कुशकर्मणि.' ३. निजबन्धनरज्जुम्. ४. हयाननाः किंनर्यः. ५. सूर्यरथाश्वाः. ६. इन्द्रः ७. बालकस्यापि मुखादिषु दृष्टिदोषनिवारणार्थं कज्जलबिन्दुं कुर्वन्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शृङ्गे स्वर्णगिरेः स धूर्जटिजटाजूटाग्रपिङ्गत्विषि
प्रेङ्खत्पाण्डुशिलां कलामिव विधोः कल्पाधिपः प्रैक्षत ॥ ६७ ॥
संसारार्तिमिव व्यतीत्य पदवीं शुक्लेन दिग्दन्तिना
ध्यानेनेव महीभृतस्त्रिभुवनस्येवास्य मूर्ध्नि स्थिताम् ।
तां कैवल्यशिलामिवार्धरजनीप्राणाधिनाथाकृतिं
प्राप्यार्हन्निरतो व्रतीव समभूदाखण्डलो निर्वृतः ॥ ६८ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये सप्तमः सर्गः ।

---

अष्टमः सर्गः ।

अथ सरभसमस्यां न्यस्तविस्तीर्णभास्व-
न्मणिमयहरिपीठे निर्भरोत्साहयोगः ।
शरभमिव हिमाद्रेरभ्रमातङ्गकुम्भा-
ज्जिनपतिमवतार्य स्थापयामास जिष्णुः ॥ १ ॥
मदनभिदमधास्यन्नूनमेनं न मूर्ध्ना
यदि कथमपि शेषस्तच्छिलापद्मवेषः ।
अपि मृदुलमृणाली कोमलस्तद्धुरापां
स कथमितरथाप्स्यत्क्ष्माभरोद्धारकीर्तिम् ॥ २ ॥
किमतनुतरपुण्यैः स्विद्यशोभिः स्वयं वा
निजसमयसमेतैरूर्मिभिः क्षीरसिन्धोः ।
इति सुरपरिपाट्या शङ्कमानैः शिलायाः
शिरसि सितमयूखैः श्लिष्यमाणः स रेजे ॥ ३ ॥
अनुगुणमनुभावस्यानुरूपं विभूतेः
समुचितमनुवृत्तेर्देशकालानुकूलम् ।
अविकलमकलङ्कं निस्तुलं तस्य भर्तुः
स्नपनविधिममर्त्याः प्रारभन्ते स्म तस्मिन् ॥ ४ ॥

---

१. अर्धचन्द्राकृतिम्. २. मुक्तः; संतुष्टश्च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवकरनिकुरम्बे मारुतेनापनीते
कुरुत [1]घनकुमाराः साधु गन्धोदवृष्टिम् ।
तदनु च मणिमुक्ताभङ्गरङ्गावलीभि-
र्विरचयत चतुष्कं सत्वरं दिक्कुमार्यः ॥ ५ ॥

स्वयमयमिह धत्ते छत्रमीशाननाथ-
स्तदनुगतमृगाक्ष्यो [2]मङ्गलान्युत्क्षिपन्तु ।
जिनसविधममर्त्या नर्तिता बालवाल-
व्यजनविधिसनाथाः सन्तु सानत्कुमाराः ॥ ६ ॥

बलिफलकुसुमस्रग्गन्धधूपाक्षताद्यैः
प्रगुणयत विचित्राण्यन्नपात्राणि देव्यः ।
सलिलमिह पयोधेरेष्यति व्यन्तराद्याः
पटुपटहमृदङ्गादीनि तत्सज्जयन्तु ॥ ७ ॥

प्रवणय वरवीणां वाणि [3]रीणासि कस्मा-
त्किमपरमिह ताले तुम्बरो त्वं वरोऽसि ।
इह हि भरत रङ्गाचार्य विस्तार्य रङ्गं
त्वरयसि नटनार्थं किं न रम्भामदम्भाम् ॥ ८ ॥

समुचितमिति कृत्यं जैनजन्माभिषेके
त्रिदशपतिनियोगाद्व्याहयन्नाग्रहेण ।
कलितकनकदण्डोद्दण्डदोर्दण्डचण्डः
सुरनिवहमवादीद्द्वारपालः कुबेरः ॥ ९ ॥ (कुलकम्)

बहलमलयजन्मोन्मिश्रकर्पूरपांसु-
प्रसरपरिमलान्धाः श्रेणयः षट्पदानाम् ।
जिनपतिमभिषेक्तुं वाञ्छतां त्रुट्यदेनो-
निगलवलयतुल्या निर्लुठन्ति स्म तस्मिन् ॥ १० ॥

अयमतिशयवृद्धो निम्नगानामधीशः
कथमिममधिरोहत्वम्बुनाथो नगेन्द्रम् ।

---

१. हे बालमेघाः. २. मङ्गलान्यष्टौ दर्पणदूर्वादध्यक्षतादीनि. ३. रीणा खिन्ना.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति तमुपरि मेरोर्नेतुमुत्क्षिप्य देवाः
कलितकनककुम्भामारभन्ते स्म पङ्क्तिम् ॥ ११ ॥
अभिनवमणिमुक्ताशङ्खशुक्तिप्रवाल-
प्रभृतिकमतिलोलैर्दर्शयन्नूर्मिहस्तैः ।
[1]जडजठरतयैक्षि व्याकुलो मुक्तकच्छः
स्थविरवणिगिवाग्रे स्वर्गिभिः क्षीरसिन्धुः ॥ १२ ॥
उपचितमतिमात्रं [2]वाहिनीनां सहस्रैः
[3]पृथुलहरिसमूहैः क्रान्तदिक्चक्रवालम् ।
[4]अकलुषतरवारिक्रोडमज्जन्महीध्रं
नृपमिव विजिगीषुं मेनिरे ते पयोधिम् ॥ १३ ॥
अनुगतभुजगेन्द्रान्मन्दराद्रीनिवोच्चै-
र्दधतममलमुक्तामालिनः स्वर्णकुम्भान् ।
सुरनिकरमुपेतं वारिधिर्वीक्ष्य भूयो-
ऽप्यतिमथनभियेव व्याकुलोर्मिश्चकम्पे ॥ १४ ॥
उदधिनिहितनेत्रान्वीक्ष्य वाग्विभ्रमाणां
निधिरमृतभुजस्तान्पालकः केलिपात्रम् ।
विहितमुदमवोचद्वाचमेतामनुक्तो-
ऽप्यवसरमुखरत्वं प्रीतये कस्य न स्यात् ॥ १५ ॥
नियतमयमुदञ्चद्वीचिमालाछलेनो-
च्छलति जलदमार्गे ज्ञातजैनाभिषेकः ।
तदनु जडतयोच्चैर्नाधिरोढुं समर्थः
पतति पुनरधस्तात्सागरः किं करोतु ॥ १६ ॥
प्रशमयितुमिवार्तिं दुर्वहामौर्ववह्ने-
र्यदधिरजनि चान्द्रीः शीलयामास भासः ।

१. पूर्णागाधमध्यभावेन स्थूलोदरत्वेन च दृष्टः. २. नदीनाम्; सेनानां च. ३. पृथुलहरिसमूहैः; (पक्षे) पृथुल-हरिसमूहैः. हरयोऽश्वाः. ४. अकलुषतरं वारि जलम्; (पक्षे) तरवारिः खड्गः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदयमिति मतिर्मे क्षीरसिन्धुर्जनाना-
मजनि हृदयहारी हारनीहारगौरः ॥ १७ ॥
द्विरदतरुतुरंगश्रीसुधाकौस्तुभाद्याः
कति कति न ममार्था हन्त धूर्तैर्गृहीताः ।
इति मुहुरयमुर्वी ताडयन्नूर्मिहस्तैः
ग्रहिल इव विरावैः सागरो रोरवीति ॥ १८ ॥
पवनजववशेनोत्पत्य दूरं पतन्तो
जलधिजलतरङ्गाः कम्बुकिर्मीरभासः ।
उपरि विततमुक्तासंग्रहोत्तालबुद्ध्या
झटिति कलिततारामण्डला वा विभान्ति ॥ १९ ॥
घनतरतरुणाढ्येनात्र देशे न केना-
प्यतिगुरुगिरिणा वा दुर्निवारप्रचाराः ।
स्वयमिममभिसस्रुर्यत्समस्ताः स्रवन्त्यो
निरुपममिदमस्मादस्य सौभाग्यमब्धेः ॥ २० ॥
अयमुपरि सविद्युत्तोयमादातुमब्धे-
र्व्यतिपजति तमालश्यामलो वारिवाहः ।
तुहिनकिरणकान्तं कान्तया श्लिष्यमाणः
शिशयिषुरिव शौरिः शेषपर्यङ्कपृष्ठम् ॥ २१ ॥
स्फुटकुमुदपरागः सागरो मातरं नः
क्षितिमहह कदाचित्प्लावयिष्यत्यशेषाम् ।
इति किल जलवेगं रोद्धुमाबद्धमालाः
कथमपि तटमस्य क्ष्मारुहो न त्यजन्ति ॥ २२ ॥
रतिविरतिषु वेलाकानने किंनरीभिः
पुलकितकुचकुम्भोत्तम्भमासेव्यतेऽस्मिन् ।

---

१. उन्मत्तः. २. वा इवार्थे. ३. प्रचुरतरवृक्षेण समृद्धेन; (पक्षे) बहुभिस्तरुणैराढ्येन.
४. विकसितकुमुदवच्छ्वेतः; (पक्षे) कुमुत् भूमेर्हर्षस्तेनापरागो बद्धमत्सरः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चपलकलभलीलाभिन्नकङ्कोलकैला-
परिमलमिलितालिध्वानधीरः समीरः ॥ २३ ॥
अयमिह जटिलोर्मिर्भाति कङ्केल्लिवल्ली-
किसलयललिताभिर्विद्रुमाणां लताभिः ।
ज्वलिततनुरिवान्तर्वाडवाग्नेः शिखानां
विततिभिरतिगाध्योत्साहबंहीयसीभिः ॥ २४ ॥
इह हि मिलितरङ्गत्प्रौढसिन्धुप्रियायाः
पुलिनजघनरङ्गोत्सङ्गसङ्गात्पयोधिः ।
सरभसमुपकूजत्कुक्कुहक्काणदम्भा-
न्मसृणमणितलीलोल्लासमभ्यस्यतीव ॥ २५ ॥
सकलजगदधृष्यस्यैकगाम्भीर्यभाजो
बहुलहरियुतस्य प्रोल्लसत्कङ्कणस्य ।
इति निगदति तस्मिन्नाकिलोकस्य तस्या-
प्यजनि सलिलराशेरन्तरं नैव किंचित् ॥ २६ ॥
सुरसमितिरसंख्यैः क्षीरपाथोधिनीरं
यदुरुकनककुम्भैरुच्चुलुम्प्यांचकार ।
चुलुककलितवार्धेः स्मारयामास नश्य-
द्वरुणनगरनारीस्तेन कुम्भोद्भवस्य ॥ २७ ॥
स्नपनविधिनिमित्तोपात्तपानीयपूर्णाः
सपदि दिवमुदीयुः शातकुम्भीयकुम्भाः ।
दृषद इव तदन्ये यच्च रिक्ता निपेतुः
प्रकटमिह फलं तज्जैनमार्गानुवृत्तेः ॥ २८ ॥
अनुगतभुजमालालीलयारभ्यमाणै-
र्मणिघटपरिवर्तावर्तनैः क्षीरसिन्धोः ।

१. अतितृष्णासंयोगदीर्घतमाभिः. २. कुक्कुहो जलपक्षिविशेषः. ३. 'मणितं रतिकूजितम्'. ४. बहु-लहरि; (पक्षे) बहुल-हरि. ५. कङ्कणं करभूषणम्; जलकणश्च. ६. देवसमूहः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उदकमुपनयद्भिर्देववृन्दैस्तदानी-
मभिनवमभिनीतं वार्घटीयन्त्रचक्रम् ॥ २९ ॥

घनसुषिरततानामुद्धुरानद्धनादे
तिरयति रवमुच्चैर्भिन्नभूमीध्ररन्ध्रे ।
प्रसरति नवनाट्यप्रक्कणत्किङ्किणीना-
ममरसहचरीणां मङ्गलोद्गाररावे ॥ ३० ॥

कलुषमिह विपक्षं दर्शनादेव जित्वा
स्वगुणगरिमहेलाक्रान्तसिंहासनस्य ।
प्रथममभरनाथा भूत्रयस्येव राज्ये
कनककलशतोयैश्चक्रुरस्याभिषेकम् ॥ ३१ ॥ (युग्मम्)

जरठविशदकन्दप्रोज्ज्वलायां शिलायां
प्रचलदरुणमुग्धस्निग्धपाणिप्रवालः ।
अमृतमधुरनीरैः सिच्यमानः स देवै-
रभिनव इव रेजे पुण्यवल्लीप्ररोहः ॥ ३२ ॥

हिमगिरिमिव मेरुं नीरपूरैः सृजद्भिः
स्नपयितुमपि पृथ्वीमाशु पृथ्वीं समर्थैः ।
शिशुरपि जिननाथश्चुक्षुभे नो मनाग-
प्यहह सहजधैर्यं दुर्निवार्यं जिनानाम् ॥ ३३ ॥

यदधरितसुधौघैरर्हतः स्नानतोयैः
सममसमसमृद्ध्यानेनिजुः श्रद्धयाङ्गम् ।
जगति खलु जरायां सर्वसाधारणायां
तदसुलभममर्त्या भेजिरे निर्जरत्वम् ॥ ३४ ॥

नटदमरवधूनां दृक्कटाक्षच्छटाभाः
कनकरुचिकपोले तीर्थकर्तुः स्फुरन्तीः ।

---

१. वार्घटीयन्त्रमरघट्ट इति प्रसिद्धम्. २. 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥' इत्यमरः. ३. अनेनिजुरक्षालयन्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नपनसलिलशेषाशङ्कया मार्जयन्ती
व्यधित हरिपुरंध्री कस्य न स्मेरमास्यम् ॥ ३५ ॥
विशदमणिमयाभ्यां वज्रसूचीविभिन्न-
श्रवणयुगमिताभ्यां कुण्डलाभ्यां स रेजे ।
किमपि समधिगन्तुं तत्त्वविद्यारहस्यं
सुरगुरुभृगुपुत्राभ्यामिव ज्ञानसिन्धुः ॥ ३६ ॥
त्रिगुणवलितमुक्तातारहारापदेशा-
दुरसि वरणमालाः प्रक्षिपन्त्यस्तदानीम् ।
अहमहमिकयोर्वी श्रीश्च मुक्तिश्च तिस्रः
स्वयमपि वृणते स्म प्रेमवत्यस्तमेकम् ॥ ३७ ॥
निरुपममणिमाला तन्मुखेन्दोरुपान्ते
विगलदमृतधाराकारमुन्मुद्रयन्ती ।
शशिनममलकान्त्याक्रम्य बन्दीकृतानां
विततिरिव विरेजे तत्प्रियाणामुडूनाम् ॥ ३८ ॥
मणिमयकटकाग्रप्रोतरत्नग्रहश्रीः
स घनकनककाञ्चीमण्डलाभोगरम्यः ।
त्रिदशरचितभूषाविभ्रमो हेमगौरः
कनकगिरिरिवान्यो मेरुशृङ्गे रराज ॥ ३९ ॥
ध्रुवमिह भवितायं धर्मतीर्थस्य नेता
स्फुटमिति स मघोना धर्मनाम्नाभ्यधायि ।
न खलु मतिविकासादर्शदृष्टाखिलार्थाः
कथमपि वितथार्थां वाचमाचक्षते ते ॥ ४० ॥
किमपि मृदुमृदङ्गध्वानविच्छेदमूर्छ-
च्छ्रुतिसुखसुषिरास्यप्रस्वनोल्लासिलास्ये ।
परिणमति सुधात्माधीनगन्धर्वगीते
व्यतिकरपरिरम्भे तत्र तौर्यत्रिकस्य ॥ ४१ ॥

१. प्राप्ताभ्याम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दलितकमठपृष्ठं चारुचारीप्रयोगै-
भ्रमितभुजनिरस्तस्वस्तविस्तारितारम् ।
प्रकटघटितलिङ्गाकारमावर्तवृत्त्या
प्रमदविवशमिन्द्रैस्तत्पुरस्तादनर्ति ॥ ४२ ॥ (युग्मम्)

इति निरुपमभक्तिं शक्तिमप्यात्मनीनां
स्नपनविनययुक्त्या व्यक्तयन्तः सुरेन्द्राः ।
स्तुतिभिरवितथाभिः स्तुत्यमेनं समस्ताः
शिरसि निहितहस्ताः स्तोतुमारेभिरे ते ॥ ४३ ॥

अखिलमलिनपक्षं पूर्वपक्षे निधाय
प्रथममुदितमात्रस्यापि संपूर्णमूर्तेः ।
जिनवर तव कान्त्या यत्कलामात्रशेषः
प्रतिपदमृतभानुः स्पर्धते तन्मुधैव ॥ ४४ ॥

मुनिभिरमलबोधैरप्यशक्यासु कर्तुं
स्तुतिषु तव गुणानामप्रगल्भप्रभेव ।
वरद मुहुरमन्दानन्दसंदोहदम्भा-
त्स्खलति गलगुहान्तर्निर्भरं भारती नः ॥ ४५ ॥

स्पृशति किमपि चेतश्चुम्बकग्रावगत्या
त्वयि जिन जनतायाः स्वस्वकार्योद्यतायाः ।
किमु कुतुकमपूर्वं नाथ यत्पूर्वजन्म-
व्रजवृजिनघनायःशृङ्खला निर्गलन्ति ॥ ४६ ॥

अमितगुणगणानां त्वद्गतानां प्रमाणं
भवति समधिगन्तुं यस्य कस्यापि वाञ्छा ।
प्रथममपि स तावद्व्योम कत्यङ्गुलानी-
त्यनघ सुगमसंख्याभ्यासमङ्गीकरोतु ॥ ४७ ॥

मनुज इति मुनीनां नायकं नाकिनाम-
प्यवगणयति यस्त्वां निर्विवेकः स एकः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकलविदकलङ्कः क्षीणसंसारशङ्क-
श्चकितजनशरण्यः कस्त्रिलोक्यां त्वदन्यः ॥ ४८ ॥
न खलु तदपि चित्रं यत्त्वयोद्देष्यतापि
प्रथममयमकारि प्राप्तपुण्यो जनोऽत्र ।
प्रतिशिखरि वनानि ग्रीष्ममध्येऽपि कुर्या-
त्किमु न जलदकालः प्रोल्लसत्पल्लवानि ॥ ४९ ॥
तव वृषमधिरूढो योऽपि तस्य द्युलोकः
स खलु कियति दूरे यो जनेनापि लभ्यः ।
यदि चतुरगमाप्तः प्राप्तवांस्तद्दुरापं
तदपि जिन जनोऽयं जन्मकान्तारतीरम् ॥ ५० ॥
सर इव मरुमार्गे स्वच्छतोयं तृषार्तै-
स्तरुरिव रविरश्मिव्याकुलैरत्र सान्द्रः ।
निधिरिव चिरदुःस्थैः शर्मणेऽस्माभिरेकः
कथमपि भवभीतैर्नाथ दृष्टोऽसि दिष्ट्या ॥ ५१ ॥
स्वगुणगरिमदौःस्थ्यं रोदसी रन्ध्ररोषा-
द्व्यतिषजति जिनेश त्वद्यशश्चन्द्रगौरम् ।
कथय कथममन्दां मन्दिरोद्योतशक्तिं
प्रकटयति घटान्तर्वर्तिरूपः प्रदीपः ॥ ५२ ॥
गुणपरिकरमुच्चैः कुर्वतैव त्वयैते
क्षपितकलुषदोषा रोपितास्तद्विपक्षाः ।
अथ न कथममीषां नेक्ष्यते त्वद्द्वयेन
त्वदनुगतजनेऽपि प्रायशः प्रीतिलेशः ॥ ५३ ॥
इह पिहितपदार्थे सर्वथैकान्तवल्ग-
न्निबिडतमतमोभिर्विश्ववेश्मन्यकस्मात् ।

---

१. वृषं धर्मम्; (पक्षे) वृषभम्. २. यः जनेन; (पक्षे) योजनेन क्रोशचतुष्टयात्मकेन. ३. चतुरगं चारित्रभारम्; (पक्षे) तुरगम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वमसि स खलु दीपः केवलालोकहेतुः
शलभसुलभलीलां लप्स्यते यत्र कामः ॥ ९४ ॥
अलमलममृतेनास्वादितं त्वद्वचश्चे-
त्किममरतरुलक्ष्म्या त्वय्यपि प्रार्थ्यमाने ।
जिन जगदतमस्कं कुर्वति त्वत्प्रबोधे
किमहिमरुचिना वा कार्यमत्रेन्दुना वा ॥ ९५ ॥
दुरितमुदितं पाकोद्रेकात्पुराकृतकर्मणां
झटिति घटयत्यर्हद्भक्तेः स्वशक्तिविपर्ययम् ।
उपजलतरुच्छायाछन्ने जने जरठीभव-
द्द्युमणिकिरणैर्भीष्मो ग्रीष्मो न किं शिशिरायते ॥ ९६ ॥
इत्याराध्य त्रिभुवनगुरुं तत्र जन्माभिषेके
भक्त्या मातुः पुनरपि तमुत्सङ्गभाजं विधाय ।
भूयो भूयस्तदमलगुणग्रामवार्ताभिरुद्य-
द्रोमानस्ते त्रिदशपतयः स्वानि धामानि जग्मुः ॥ ९७ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्येऽष्टमः सर्गः ।

---

नवमः सर्गः ।

सिक्तः सुरैरित्थमुपेत्य विस्फुरज्जटालवालोऽथ स नन्दनद्रुमः ।
छायां दधत्काञ्चनसुन्दरीं नवां सुखाय वप्तुः सुतरामजायत ॥ १ ॥
चित्रं किमेतज्जिनयामिनीपतिर्यथा यथा वृद्धिमनश्वरीमगात् ।
सीमानमुल्लङ्घ्य तथा तथाखिलं प्रमोदवार्धिर्जगदप्यपूरयत् ॥ २ ॥
लप्स्यामहे तीर्णभवार्णवं पुनर्विवेकिनं क्वैनमितीव तं प्रभुम् ।
बाल्याङ्गसंस्कारविशेषसत्क्रियाः किमप्यहंपूर्विकया सिषेविरे ॥ ३ ॥
लोकस्त्रिलोक्यां सकलोऽपि सप्रभः प्रभावसंभावितमेकमर्भकम् ।
ज्योतिर्ग्रहाणामिव मण्डलो ध्रुवं ध्रुवं समन्तादनुवर्तते स्म तम् ॥ ४ ॥

---

१. जटाला जटायुक्ता बालाः केशा यस्य; (पक्षे) जटा मूलम्, आलवालमावालः. २. कांचन अनिर्वचनीयाम्; (पक्षे) काञ्चनवत्सुन्दरीम्,. ३. पितुः; मालाकारादेश्च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तैस्तैस्त्रिसंध्यं मणिभूषणैः प्रभुं तमेकमेवोपचचार वासवः।
को वा दुरापां समवाप्य संपदं विचक्षणः क्षेमविधौ विमुह्यति ॥ ५ ॥
औत्सुक्यनुन्ना शिशुमप्यसंशयं चुचुम्ब मुक्तिर्निभृतं कपोलयोः।
माणिक्यताटङ्ककरापदेशतस्तथाहि ताम्बूलरसोऽत्र संगतः ॥ ६ ॥
प्राच्या इवोत्थाय स मातुरङ्कतः कृतावलम्बो गुरुणा महीभृता।
भून्यस्तपादः सवितेव बालकश्चचाल वाचालितकिङ्किणीद्विजः ॥ ७ ॥
रिङ्खन्पदाक्रान्तमहीतले बभौ स्फुरन्नखांशुप्रकरेण स प्रभुः।
शेषस्य बाधाविधुरेऽस्य धावता कुटुम्बकेनेव निषेवितक्रमः ॥ ८ ॥
बभ्राम पूर्वं सुविलम्बमन्थरप्रवेपमानाग्रपदं स बालकः।
विश्वंभरायां पदभारधारणप्रगल्भतामाकलयन्निव प्रभुः ॥ ९ ॥
पुत्रस्य तस्याङ्कसमागमक्षणे निमीलयन्नेत्रयुगं नृपो बभौ।
अन्तः कियद्गाढनिपीडनाद्वपुः प्रविष्टमस्येति निरूपयन्निव ॥ १० ॥
उत्सङ्गमारोप्य तमङ्गजं नृपः परिष्वजन्मीलितलोचनो बभौ।
अन्तर्विनिक्षिप्य सुखं वपुर्गृहे कपाटयोः संघटयन्निव द्वयम् ॥ ११ ॥
चित्रं प्रचिक्रीड यथा यथा करप्रकीर्णपांसुप्रकरैः कुमारकैः।
आदर्शवन्निर्मल एव सोऽभवत्तथा तथान्तःफलितावनीत्रयः ॥ १२ ॥
कः पण्डितो नाम शिखण्डमण्डने मराललीलागतिदीक्षकोऽथवा।
नैसर्गिकज्ञाननिधेर्जगद्गुरोर्गुरुश्च शिक्षासु बभूव तस्य कः ॥ १३ ॥
शास्त्रेषु शास्त्रेषु कलासु चाभवन्मनीषिणां यश्चिरसंचितो मदः।
ज्ञानापणे तत्र पुरः स्थितेऽगलच्छरीरतः स्वेदजलच्छलेन सः ॥१४॥
बाल्यं व्यतिक्रम्य समुन्नतिं क्रमाद्दधत्समस्तावयवानुवर्तिनीम्।
लक्ष्मीं स निःशेषकलाजुषस्तदा पुपोष पीयूषमयूखमालिनः ॥ १५ ॥
मध्यंदिनेनेव सहस्रदीधितिर्महाध्वराग्नेर्हविषेव भूयसा।
बाल्यव्यपायेन किमप्यपूर्ववज्जिनस्य नैसर्गिकमप्यभून्महः ॥ १६ ॥
तस्योद्धृताद्रिर्दशकंधरो मुदे वहन्न येनैक्षि महीमहीश्वरः।
नाश्चर्यकृत्तस्य बभूव तद्द्वयं स येन दृष्टस्त्रिजगद्धुरंधरः ॥ १७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्राब्जशङ्खादिविलोकनोत्थया स्वकान्तसंकेतनिवासशङ्कया ।
मन्ये न लक्ष्मीर्नवपल्लवारुणं तदङ्घ्रिपङ्केरुहयुग्ममत्यजत् ॥ १८ ॥
उद्यत्पदाङ्गुष्ठनखांशुदण्डिकाप्रकाण्डगर्भं युगमस्य जङ्घयोः ।
कार्तस्वरस्तम्भविशेषशालिनीं जहास दोलां नवधर्मसंपदः ॥ १९ ॥
अत्यन्तमव्याहतवेगवीर्ययोर्जगत्त्रयीनेत्रमनोगजेन्द्रयोः ।
स्तम्भाविवोरूद्दढबन्धहेतवे व्यधायिषातां ध्रुवमस्य वेधसा ॥ २० ॥
कण्ठीरवेणेव नितान्तमुन्नतं नितम्बबिम्बं परिणाहि बिभ्रता ।
एणोमयी तेन जनस्य दर्शनात्प्रमत्तमातङ्गघटाविघट्टिता ॥ २१ ॥
तप्तो ध्रुवं प्राग्जिननाभिपल्वले विवेश दानोद्धुरधर्मसिन्धुरः ।
समुल्लसल्लोमलतापदेशतो मदाम्बुधारा कथमन्यथा तटे ॥ २२ ॥
लक्ष्मीरिहान्तःपुरसुन्दरी चिरं गुणैः सह स्थास्यति सौविदल्लकैः ।
जानन्निती वास्य मनोहितं विधिर्व्यधाद्विशालं हृदयं दयावतः ॥ २३ ॥
तस्यैकमुच्चैर्भुजशीर्षमुद्वहन्सहेलमालम्बितभूत्रयो भुजः ।
भूभारनिर्मुक्तशिरःसहस्रकं फणीश्वरं दूरमधश्चकार सः ॥ २४ ॥
रेखात्रयेणेव जगत्त्रयाधिकां निरूपयन्तं निजरूपसंपदम् ।
तत्कण्ठमालोक्य ममज्ज लज्जया विशीर्यमाणः किल कम्बुरम्बुधौ ॥२५॥
यन्निस्तुलेनापि तदाननेन्दुना व्यधात्तुलारोहणमुग्रपातकम् ।
अद्यापि हेमद्युतिरुद्यतस्ततो भवत्यसौ श्वित्रविपाण्डुरः शशी ॥२६॥
स्निग्धा बभुर्मूर्धनि तस्य कुन्तलाः कलिन्दकन्याम्बुतरङ्गभङ्गुराः ।
फुल्लाननाम्भोरुहि सारसौरभे निलीननिःशब्दमधुव्रता इव ॥ २७ ॥
वज्राब्जसारैरिव वेधसा कृतं तमास्पदं विक्रमसौकुमार्ययोः ।
उर्व्याः करं ग्राहयितुं न केवलं बभूव वध्वा अपि वप्तुराग्रहः ॥२८॥
तं यौवराज्ये नयशीलशालिनं व्यधात्तनूजं नवयौवनं नृपः ।
प्रागेव लोकत्रयराज्यसंपदां निधानमेनं न विवेद भूपतिः ॥ २९ ॥
तस्मिन्गुणैरेव नियम्य कुर्वति प्रकाममाज्ञावशवर्तिनः परान् ।
आसीन्नृपोऽन्तःपुरसारसुन्दरीविलासलीलारसिकः स केवलम् ॥ ३० ॥

१. पितुः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शृङ्गारवत्या दुहितुः स्वयंवरे प्रतापराजेन विदर्भभूभुजा।
दूतः कुमारानयनार्थमीरितः समाययौ रत्नपुरप्रभोर्गृहम् ॥ ३१ ॥
भर्तुः प्रतीहारनिवेदितस्ततः प्रविश्य संसद्गृहमाहितानतिः।
भ्रूभेददत्तावसरः स कर्णयोः क्षरत्सुधासारमुवाच वाचिकम् ॥ ३२ ॥
किं चाग्रतस्तेन निरीक्ष्य भूपतेः कुमारमाकारविनिर्जितस्मरम्।
तद्रूपशोभासुभगोऽस्य दर्शितो जगन्मनोलुण्ठनलम्पटः पटः ॥ ३३ ॥
पीयूषधारागृहमत्र नेत्रयोर्निरीक्ष्य कन्याप्रतिबिम्बमद्भुतम्।
किं तथ्यमित्थं भवितेति चिन्तयन्पुरो नृपः श्लोकमिमं व्यलोकयत् ३४
अस्याः स्वरूपं कथमेणचक्षुषो यथावदन्यो लिखितुं प्रगल्भताम्।
धातापि यस्याः प्रतिरूपनिर्मितौ घुणाक्षरन्यायकृताकृतेर्जडः ॥ ३५ ॥
ततोऽधिकं विस्मितमानसो नृपः सुतस्य तस्याश्च विलोक्य विग्रहम्।
तच्चारुरूपासवपानघूर्णितोत्तमाङ्गसंसूचितमित्यचिन्तयत् ॥ ३६ ॥
यः स्वप्नविज्ञानगतेरगोचरश्चरन्ति नो यत्र गिरः कवेरपि।
यं नानुबध्नन्ति मनःप्रवृत्तयः स हेलयार्थो विधिनैव साध्यते ॥ ३७ ॥
क्वायं जगल्लोचनवल्लभो युवा क्व कन्यकारत्नमतर्क्यमीदृशम्।
तत्सर्वथा दुर्घटकर्मनिर्मितिप्रगल्भ्यमानाय नमोऽस्तु वेधसे ॥ ३८ ॥
नूनं विहायैनमियं स्वयंवरे वरार्थिनी नापरमर्थयिष्यति।
इन्दुं सदानन्दविधायिनं विना किमन्यमन्वेति कदापि कौमुदी ॥ ३९ ॥
यत्कन्यकायामुपवर्ण्यते बुधैः कुलं च शीलं च वयश्च किंचन।
सर्वत्र संबन्धविधानकारणं प्रियस्य तत्प्रेम गुणैर्विशिष्यते ॥ ४० ॥
प्रत्यङ्गलावण्यविलोकनोत्सुकः कृतस्पृहोऽस्यां युवराजकुञ्जरः।
दृष्ट्वापि रागोल्बणया विभाव्यते करी यथान्तर्मददर्पदुःसहः ॥ ४१ ॥
इत्थं विचिन्त्यैष कृतार्थनिर्णयो नृपः सुतं दारपरिग्रहक्षमम्।
प्रस्थापयामास ससैन्यमादराद्विदर्भभूवल्लभपालितां पुरीम् ॥ ४२ ॥
राजा च दूतेन च तेन चोदितस्ततो ध्वजिन्या च मुदा च संयुतः।
रूपेण चास्यास्त्वरितस्मरेण च प्रभुः प्रतस्थे स विदर्भमण्डलम् ॥ ४३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोभां स बिभ्रत्करवालशालिनीं सुवर्णसारं कटकं प्रकाशयन् ।
भव्यं च भीमं च तदा प्रसाधनं बभार नारीहितपूरणक्षमम् ॥ ४४ ॥
दन्तीन्द्रमारुह्य स दानभोगवान्पथि प्रवृत्तश्च गुरोरनुज्ञया ।
शोभामसंप्राप्तसहस्रचक्षुषः पुरंदरस्यानुचकार सुन्दरीम् ॥ ४५ ॥
धुन्वन्निवोर्वीं दलयन्निवाम्बरं गिलन्निवाशाश्चलयन्निवाचलान् ।
प्रस्थानशंसी पटहध्वनिस्तदा समुज्जजृम्भे जगदाक्षिपन्निव ॥ ४६ ॥
ओंकारवत्प्रस्तुतमङ्गलश्रुतेः समुत्थिते व्योमनि शङ्खनिःस्वने ।
कण्ठेऽपतद्द्युप्रसवच्छलात्प्रभोः स्वयंवरस्रङ्निहितैव कान्तया ॥४७॥
राज्ञा प्रयुक्ताः स्वयमाहितौजसः समर्पितालंकृतयः क्षितीश्वराः ।
तं साधुशब्दा इव साध्यसिद्धये मनश्चमत्कारिणमर्थमन्वयुः ॥ ४८ ॥
भद्राश्च मन्दाश्च मृगाश्च केऽपि ये नदीगिरीन्द्रोभयवर्त्मचारिणः ।
ते तस्य संकीर्णसमन्विताः पुरो बभूवुरैरावतवंशजा गजाः ॥ ४९ ॥
काम्बोजवानायुजबाह्लिका हयाः सपारसीकाः पथि चित्रचारिणः ।
शैलूषसभ्यां इव दृष्टिनर्तकीमनर्तयन्नृत्यविचक्षणाः प्रभोः ॥ ५० ॥
तां नेत्रपेयां विनिशम्य सुन्दरीं सुधामलङ्कामयमान उत्सुकः ।
क्रामन्नपाचीं हरिसेनया वृतो बभौ स काकुत्स्थ इवास्तदूषणः ॥५१॥
कल्पद्रुचिन्तामणिकामधेनवस्तटेऽपि मग्नाः खलु दानवारिधेः ।
स्तोत्रैरजस्रं कथमन्यथार्थिनो धनार्थमस्यैव यशांसि तुष्टुवुः ॥ ५२ ॥
रत्नावनीबिम्बितचारुमूर्तयो विरेजिरे तस्य चमूचराः प्रभोः ।
विज्ञाय सेवावसरं रसातलाद्विनिःसरन्तो भवनामरा इव ॥ ५३ ॥
लावण्यकासारतरङ्गसीकरव्रजैरिवोद्वृत्तभुजाग्रपातिभिः ।
लाजैस्तमानर्चुरुदग्रमन्मथद्रुमप्रसूनैरिव पौरयोषितः ॥ ५४ ॥

---

१. खड्गः; (पक्षे) कराश्च वालाश्च(?). २. शोभनवर्णा ब्राह्मणादयः; कनकं च. ३. सेना; भूषणविशेषश्च. ४. न अरीणामिति च्छेदः; (पक्षे) नारीणाम्. ५. सुधां-अलं-कामयमानः; (पक्षे) सुधाम-लङ्कां-अयमानः. ६. दक्षिणां दिशम्. ७. अश्वसेनया; वानरसेनया च. ८. दूरीकृतदोषः; नाशितदूषणाख्यराक्षसश्च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवेति नन्देति जयेति चोच्चकैरुदीरिताशीर्जरतीभिरात्मनः ।
सिद्धेरिव द्वारमवाप तत्क्षणं पुरस्तदानीं युवराजकुञ्जरः ॥ ५५ ॥
अग्रे प्रसर्पच्चतुरङ्गविस्तृतां कृशां च मध्ये विशिखावरोधतः ।
पश्चादतुच्छामपि तां पताकिनीं प्रियामिव प्रेक्ष्य स पिप्रिये प्रभुः ॥५६॥
हर्म्यैरिवोत्तम्भितकुम्भशोभितैरुपात्तनानावलभीमतैर्गजैः ।
निर्यान्तमुत्केव वियोगविक्लवा तमन्वगात्सालसमुन्नतैः पुरी ॥ ५७ ॥
रम्याननेन्दोर्वृतकाननश्रियः श्रितस्य सद्भिः सदनाश्रयस्य च ।
वेगेन भर्तुः पथि गच्छतोऽन्तरं महत्तदा तस्य पुरस्य चाभवत् ॥५८॥
श्रेणीव रेणूद्गमनिष्ठितावनिस्फुटीभवच्छेषफणामणित्विषाम् ।
सर्पत्सु सैन्येषु रराज दन्तिनां मदस्रुतिस्तत्क्षणपातलोहिनी ॥ ५९ ॥
कम्पाद्भुवः क्षुभ्यदशेषवारिधिस्तदा भविष्यज्जगतोऽप्युपप्लवः ।
अस्या व्यधास्यन्भरभङ्गुराकृतेर्गजा न चेद्दानजलाभिषेचनम् ॥ ६० ॥
प्रायोऽपदस्पृष्टमहीतलाः खुरैर्वियद्गमाभ्यासरसं हया व्यधुः ।
तन्मत्तमातङ्गचमूभराद्भुवो विभावयामासुरमी विपर्ययम् ॥ ६१ ॥
लीलाप्रचारेषु यथा यथा व्यधुर्नखाग्रभागोल्लिखनं तुरंगमाः ।
उत्सर्पिपांसुप्रकरच्छलादभूत्तथा तथोर्व्याः पुलकाङ्कुरोद्गमः ॥ ६२ ॥
अन्तःस्खलल्लोहखलीननिर्गलद्विलोललाला जलफेनिलाननाः ।
चेलुः पिबन्तः पवनातिरंहसो द्विषद्यशांसीव तुरंगपुंगवाः ॥ ६३ ॥
तस्योत्क्रमालक्ष्यत पार्श्वयोर्द्वयोः समुल्लसल्लोलपृथुप्रकीर्णका ।
ध्यानान्नभोवर्त्मगतेरसंशयादुदीर्णपक्षेव तुरंगमावलिः ॥ ६४ ॥
तस्य व्रजद्वीरतुरंगसंनिधौ मयूरपत्रातपवारणव्रजः ।
वीचीचयोल्लासितशैवलावलीविलासमासादयति स्म तोयधेः ॥ ६५ ॥

---

१. रथ्या. २. सेनाम्. ३. उपात्ता नाना बलस्य बलेन वा भीमता भयंकरत्वं यैः; (पक्षे) वलभी चन्द्रशाला तया मतैः. ४. सालवत्समुन्नतैः; (पक्षे) सालसमिति क्रियाविशेषणम्. ५. वनम्; (पक्षे) कुत्सितं मुखम्. ६. सतामनाश्रयस्य; (पक्षे) सदनानां गृहाणामाश्रयस्य.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुष्प्रेक्ष्यतामस्य बलाभियोगतो रजोभिरुत्सर्पिभिरम्बरे गते ।
रक्तोऽपि दोषैकभयादिवोच्चकैर्न दिक्षु चिक्षेप दिवाकरः करान् ॥६६॥
आसिन्धुगङ्गाविजयार्धसिंहलादभिद्रवद्दुर्वहवाहिनीभृतः ।
त्रस्यद्धरित्रीधरवज्रपञ्जरो बलोदधिस्तस्य बभूव दुर्धरः ॥ ६७ ॥
तापापनोदाय सदैव भूत्रयीविहारखेदादिव पाण्डुरद्युतिम् ।
कीर्तेर्वयस्यामिव भर्तुरग्रतो विलोक्य गङ्गां बहु मेनिरे नराः ॥ ६८ ॥
शंभोर्जटाजूटदरीविवर्तनप्रवृत्तसंस्कार इव क्षितावपि ।
यस्याः प्रवाहः पयसां प्रवर्तते सुदुस्तरावर्ततरङ्गभङ्गुरः ॥ ६९ ॥
पर्यन्तकान्तारसमीरविस्फुरत्तरङ्गविस्फारितफेनलाञ्छिता ।
प्रालेयशैलोरगराजरेचितप्रलम्बनिर्मोकनिभा विभाति या ॥ ७० ॥
विष्णोरिवाङ्घ्रेर्नखरश्मिरञ्जिता करैरिवेन्दोर्भवमूर्ध्नि लालिता ।
भिन्ना हिमाद्रेस्तुहिनैरिवोच्चकैश्चकास्ति या क्षीरसहोदरद्युतिः ॥७१॥
काञ्चीव रत्नोच्चयगुम्फिता क्षितेर्दिवश्च्युतेवामलमौक्तिकावलिः ।
कृष्टा सशब्दं पुरुहूतदन्तिनो विराजते राजतशृङ्खलेव या ॥ ७२ ॥
सूर्यस्य तापेन दिवानिशं ज्वलन्महौषधीनामकृशः कृशानुभिः ।
तप्तस्य नीहारगिरेरिव द्रवश्चकास्ति यस्याः शुचिरम्भसां प्लवः ॥७३॥
तीरेऽपि यस्यास्त्रिजगज्जुषश्चरन्स सार्वभौमोऽपि निमज्जति ध्रुवम् ।
बुद्ध्येव नावा घटितोरुकाष्ठया ततार तृष्णामिव तां स जाह्नवीम् ॥७४॥
हेलोत्तरत्तुङ्गमतङ्गजावलीकपोलपालीगलितैर्मदाम्बुभिः ।
गङ्गाजलं कज्जलमञ्जुलीकृतं कलिन्दकन्योदकविभ्रमं दधौ ॥ ७५ ॥
एके भुजैर्वारणसेतुभिः परे चमूचराः केचन नौभिरायताम् ।
अह्नाय जह्नोस्तनयां यदृच्छया पुरः प्रतिज्ञामिव तामतारिषुः ॥७६॥
उत्साहशीलाभिरलं जडात्मिका त्रिमार्गगासंख्यपथप्रवृत्तिभिः ।
तद्वाहिनीभिः प्रसभं दिवौकसां कथं न पश्चात्क्रियते स्म वाहिनी ७७
नागैः समुत्सर्पिभिराक्षिपन्नगान्पुरीरशेषाः पटवेश्मभिर्जयन् ।
उत्केतनैर्भूरिवनानि तर्जयन्नदीश्च भूभिः स विडम्बयन्नगात् ॥ ७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रमितिविधुरा[1] ये मिथ्यात्वं पथः[2] प्रतिपेदिरे
पिदधुरपि ये कूटारम्भैर्[3]दिगम्बरदर्शनम्[4] ।
प्रगुणबलवां[5]स्तांस्तानुच्चैः प्रमथ्य गिरीश्वरा-[6]
न्स्वमिह सुगमं कुर्वन्मार्गं जगाम जिनेश्वरः ॥ ७९ ॥

इत्युच्चैस्तनवप्र[7]भूषणवतीर्नारीः पुरीर्वा[8] श्रय-
न्कान्तारङ्गमितान[9]रीनिव नगेष्वालोकयन्किंनरान् ।
देशानप्यतिलङ्घयन्सम[10]करान्सिन्धुप्रवाहानिव
प्राप प्रेमवतीमिवात्तमदनां[11] देवः स विन्ध्यस्थलीम् ॥ ८० ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये नवमः सर्गः ।

---

दशमः सर्गः ।

अथाधिपेनार्थयितुं दिनानां रथस्य पन्थानमिवोपरिष्टात् ।
पादाग्रनम्रेण निषेव्यमाणं धराधरं विन्ध्यमसौ ददर्श ॥ १ ॥

समुन्नमत्कूटपरम्पराभिराक्रान्तमन्तः पृथुकंदराभिः ।
भुवोऽर्धमर्धं नभसो गृहीत्वा मन्ये यमुच्चैर्विदधे विधाता ॥ २ ॥

स्रष्टा दधात्येव महानदीनां[12] महानदीनां शिखरोन्नतिं यः ।
स्वर्गादिहागत्य सदानभोगैः[13] सदा नभोगैरनुगम्यमानः ॥ ३ ॥

मुनेर्[14]महिम्नामभितो निरोद्धुरध्वानमन्वेष्टुमिवोत्सुको यः ।
शृङ्गाग्रलग्नोडुचयच्छलेन नक्तं समुन्निद्रसहस्रनेत्रः ॥ ४ ॥

प्रस्थैरदुस्थैः कलितोऽप्यमानः पादैरमन्दैः प्रसृतोऽप्यगेन्द्रः ।
युक्तो वनैरप्यवनः श्रितानां यः प्राणिनां सत्यमगम्यरूपः ॥ ५ ॥

---

१. अतिशयेनाप्रमाणाः; (पक्षे) प्रमाणपञ्चकोपलक्षिततर्कशास्त्रविह्वलाः. २. मार्गस्य जिनदर्शनस्य च. ३. शिखरारम्भैः; अनुचितप्रारम्भैश्च. ४. दिगाकाशावलोकनम्; जिनदर्शनं च. ५. सुसंनद्धसैन्यवान्; चतुर्दशगुणस्थानशक्तिमांश्च. ६. पर्वतेन्द्रान्; समर्थान्नैयायिकप्रभृतिवादिनश्च. इत्यादर्शपुस्तकस्थं टिप्पणम्. ७. उच्चैः-स्तनवप्र; (पक्षे) उच्चैस्तन-वप्र-इति च्छेदः. ८. इवार्थे. ९. कान्ता-रङ्ग-इतान्; (पक्षे) कान्तारं-गमितान्. १०. सम-करान्; (पक्षे) स-मकरान्. ११. कामः; (पक्षे) वृक्षविशेषः. १२. महा-नदीनाम्; महान्-अदीनाम्. १३. दानभोगाभ्यां सहितैः. १४. अगस्त्यस्य.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विहाय मानं स्मरवासभूमाविहायमानं सहसा सुरस्त्री ।
रसालसारं विपिनं निरीक्ष्य रसालसा रन्तुमियेष कान्तम् ॥ ६ ॥
पञ्चाननोत्क्षिप्तकरीन्द्रकृत्तिर्गुहान्वितो दत्तशिवाप्रमोदः ।
अहिप्रहारोल्बणनीलकण्ठो यो रौद्रभावं क्वचिदातनोति ॥ ७ ॥
पुंनागनारङ्गलवङ्गजम्बूजम्बीरलीलावनशालि यस्य ।
शृङ्गं सदापारनभोविहारश्रान्ताः श्रयन्ते सवितुस्तुरंगाः ॥ ८ ॥
प्रियायुतं सानुनि कुञ्जरं गां निकुञ्जरङ्गां गतमीक्षमाणः ।
मुनीश्वरोऽपि स्मरति प्रियाया रतिप्रियायासवशेन यत्र ॥ ९ ॥

वप्रक्रीडाप्रहतिषु दृढैर्यत्र मत्तद्विपानां
दन्ताघातैर्झटिति जलदाभोगभाजो नितम्बात् ।
पक्षच्छेदव्रणगणगतोद्दामदम्भोलिधारा-
शल्यानीव स्फुरदुरुतडिद्दण्डखण्डानि पेतुः ॥ १० ॥

मम यदि लवणोदानन्दिसोमोद्भवायाः
सममपरमपत्यं स्यादहं तत्कृतार्था ।
इति किल निशि सूते यस्य सोमोद्भवानां
सितकरमणिभित्तिर्वाहिनीनां शतानि ॥ ११ ॥

यत्राम्बुजेषु भ्रमरावलीनामेणावली सत्तमरावलीना ।
पपौ सरस्याशुतरं गतान्तं न वारि विस्फारितरङ्गतान्तम् ॥ १२ ॥

निर्मुक्तगर्भभरनिर्भरदुर्बलासु
कादम्बिनीषु कटकाग्रविलम्बिनीषु ।
भग्नामनेकमणिभासुररश्मिजालै-
र्यः पूरयत्यनुदिनं हरिचापलक्ष्मीम् ॥ १३ ॥

स दृष्टमात्रोऽपि गिरिर्गरीयांस्तस्य प्रमोदाय विभोर्बभूव ।
गुणान्तरापेक्ष्यमभीष्टसिद्ध्यै नहि स्वरूपं रमणीयतायाः ॥ १४ ॥

---

१. इह-अयमानं आगच्छन्तम्. २. नर्मदायाः. ३. समीचीनशब्दश्रवणे आसक्ता. ४. प्राप्तसमीपम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुहृत्तमः सोऽथ सभासु [1]हृत्तमःप्रभाकरश्छेत्तुमिति [2]प्रभाकरः ।
[3]धरे क्षणं व्यापृतकंधरेक्षणं तमीश्वरं प्राह [4]जगत्तमीश्वरम् ॥ १५ ॥

पूर्वापराम्भोधितटीतरङ्गमालाप्ररङ्गत्कटकोऽयमद्रिः ।
त्वत्सैनिकाक्रान्ततनुश्चकास्ति नम्रीभवन्नन्य इव क्षितीशः ॥ १६ ॥

अशेषसुरसुन्दरीनयनवल्लभोऽयं दध-
न्मदान्धघनसुन्दरभ्रमरुचिः सहस्राक्षताम् ।
महावहनभक्तितो मुकुलिताग्रभास्वत्करः
पुरस्तव पुरंदरद्युतिमुपैति [5]पृथ्वीधरः ॥ १७ ॥

[6]अनेकधातुच्छविभासुरा बलान्निवर्तिताः [7]कुम्भभुवार्कमण्डलात् ।
[8]अनेकधातुच्छविभा [9]सुराबला न का श्रयत्यस्य वनाकुलास्तटीः॥ १८॥

बिम्बं विलोक्य निजमुज्ज्वलरत्नभित्तौ
क्रोधात्प्रतिद्विप इतीह ददौ प्रहारम् ।
तद्भग्नदीर्घदशनः पुनरेव तोपा-
ल्लीलालसं स्पृशति पश्य गजः प्रियेति ॥ १९ ॥

पलाय्य निर्यन्मदवारिधारा गिरेरुपान्ते करिणः प्रयान्तः ।
त्वत्तूर्यनादैस्त्रुटितोरुमूला विभान्ति कूटा इव निर्लुठन्तः ॥ २० ॥

न वप्रे नवप्रेमबद्धा भ्रमन्ती स्मरन्ती स्मरं तीव्रमासाद्य भर्तुः ।
क्षणादीक्षणादीश बाष्पं वमन्ती [10]दशां का दशाङ्कामिहान्वेति न स्त्रीः॥२१॥

प्रकटितोरुपयोधरबन्धुराः सरसचन्दनसौरभशालिनीः ।
[11]मदनबाणगणाङ्कितविग्रहो गिरिरयं भजते सुभगास्तटीः ॥ २२ ॥

इयं गिरेर्गैरिकरागरञ्जिता विराजते गह्वरवारिवाहिनी ।
पविप्रहारत्रुटितोरुपक्षतिक्षताद्गलन्तीव नवास्रधोरणिः ॥ २३ ॥

---

१. हृदयान्धकारदूरीकरणे सूर्यः. २. एतन्नामकः. ३. पर्वते. ४. जगच्चन्द्रम्. ५. पृथ्वीछन्दोऽपि. ६. अनेक-धातु-च्छवि-भासुराः. ७. अगस्त्येन. ८. अनेकधा-अतुच्छ-विभा. ९. देवाङ्गना. १०. दशमीं कामदशाम्. मरणमित्यर्थः. ११. मदन-बाणः पुष्पविशेषः; कामशरश्च.

For Private and Personal Use Only

निर्जयता निजरत्नरुचा भां [1]मेन्दरसानुगतारमणीनाम् ।
सा न कदाप्यमुना ध्रियते या [2]मेन्दरसानुगता रमणीनाम् ॥ २४ ॥

रोद्धुं पुनर्ग्रहपथं लघु [3]हारिदश्वै-
रश्वैरुपद्रुतनिकुञ्जलताप्रवालः ।
शृङ्गादुदग्रजलदैरयमुन्नमद्भिः
प्रोल्लङ्घयन्निव मुनेः समयं विभाति ॥ २५ ॥

दिवाकरोत्तापिततापनोपलात्स्मरारिभालादिव निर्गतो गिरेः ।
समूलमारात्[4]कुसुमेषु सुन्दरं क्षणादधाक्षीन्[5]मदनं हुताशनः ॥ २६ ॥

द्रुपङ्क्तिभिः प्रांशुमनोरमाभिर्गिरौ हरत्याशु मनोऽ[6]रंमाभिः ।
पिकध्वनीनां [7]कमितारमन्ते सुरस्त्रियः [8]सोत्कमिता रमन्ते ॥ २७ ॥

विस्तारं पथि पुरतोऽधिकं दधाना वक्रत्वं विषमविषा प्रदर्शयन्ती ।
एतस्मात्प्रसरति [9]शैलवामलूरात्[10]कन्येयं सरिदुरगीव मेकलस्य ॥ २८ ॥

उन्मीलन्नवनलिनीवनप्रसूनं भात्येतद्गतमलमम्बु नर्मदायाः ।
निर्भिन्नं शिखरशतैरमुष्य पुष्यन्नक्षत्रं पतितमिवान्तरिक्षखण्डम् ॥ २९ ॥

मुदा पुलिन्दीभिरिहेष्यते भवान्[11]कान्तारसानुग्रहभूरिभान्वितः ।
अयं महीध्रोऽप्यधिरुह्यते भिया [12]कान्तारसानुग्रहभूरिभान्वितः ॥ ३० ॥

सत्सूत्रमत्र तरुतीरनिकुञ्जवेदी-
विद्यामठे कलरवक्रमपाठकेषु ।
अश्रान्तमेव निगदत्सु वधूद्वितीयः
को नाम कामनिगमाध्ययनं न धत्ते ॥ ३१ ॥

भियेव धात्र्या स्थलपङ्कजाक्ष्या निरीक्ष्यमाणं वनसैरिभाणाम् ।
क्रीडत्युदश्वद्रनपङ्कशृङ्गं गिरेः शिशूनामिव वृन्दमग्रे ॥ ३२ ॥

---

१. मन्दर-सानुग-तार-मणीनाम्. २. मन्द-रस-अनुगता. ३. सूर्यसंबन्धिभिः. ४. कुसुमेषु इति सप्तमी; (पक्षे) कुसुममयैरिषुभिर्बाणैः सुन्दरम्. ५. वृक्षविशेषम्; कामं च. ६. अरं शीघ्रम्. ७. कामुकम्. ८. सोत्कण्ठं प्राप्ताः. ९. पर्वतरूपवल्मीकात्. १०. नर्मदा. ११. कान्ता-रस-अनुग्रहभूः-इभान्वितः. १२. कान्तार-सानु-ग्रह-भूरि-भ-अन्वितः.

१०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्सैनिकास्तुल्यमदुर्महाभयं निस्त्रिंशचक्रेषुवराहवा नराः ।
नश्यत्सु सिंहादिषु तेन निर्भया निस्त्रिंशचक्रेषु वैराहवानराः ॥ ३३ ॥

यो नारङ्गः सरल इति यो यश्च पुंनागनामा
ज्ञात्वा वृक्षः सरसपयसा पोषितः पालितश्च ।
गूढं सोऽपि प्रथयति निधिं यत्प्ररोहाग्रहस्तै-
स्तत्किं युक्तं गिरिरयमिति व्याकुलो रोरवीति ॥ ३४ ॥

जराधवलमौलिभिः प्रचुरसौविदल्लैरिव
प्रफुल्लतरुभिर्वृता प्रणयिनामुनोत्सङ्गिता ।
परिष्वजति चन्दनावलिरियं भुजंगान्यत-
स्ततोऽतिगहनं स्त्रियश्चरितमत्र वन्दामहे ॥ ३५ ॥

मन्दाक्षमन्दा क्षणमत्र तावन्नव्यापि न व्यापि मनोभवेन ।
रामा वरा मावनिरन्यपुष्टवध्वा नवध्वानवशा न यावत् ॥ ३६ ॥

कुपितकेसरिचक्रचपेटया करटिकुम्भतटादभिपातिताः ।
इह विभान्ति तरुस्खलनच्युतस्फुरदुडुप्रकरा इव मौक्तिकाः ॥ ३७ ॥

प्रणयिनि नवनीवीग्रन्थिमुद्भिद्य लज्जा-
विधुरसुरवधूनां मोचयत्यन्तरीयम् ।
अधिरजनि गुहायामत्र रत्नप्रदीपे
करकुवलयघाताः सार्थपार्थीभवन्ति ॥ ३८ ॥

नवो धनी यो मदनायको भवेन्न बोधनीयो मदनाय को भवे ।
स सुभ्रुवामत्र तु नेत्रविभ्रमैर्विबोध्यते सत्तिलकोऽपि कानने ॥ ३९ ॥

उद्भिद्य भीमभवसंततितन्तुजालं
मार्गेऽपवर्गनगरस्य नितान्तदुर्गे ।

---

१. निस्त्रिंश-चक्र-इषु-वर-आहवाः. निस्त्रिंशः खड्गः. २. हिंस्रसमूहेषु. ३. वराहवानराः. ४. लज्जाव्याकुला. ५. नवीनापि. ६. व्याप्ता. ७. लक्ष्मीस्थानम्. ८. कोकिलया. ९. नवीनकूजिताधीना. १०. निष्फला भवन्ति. ११. तरुणः. १२. संसारे. १३. वृक्षविशेषः. स च नारीकटाक्षपातेन विकसितो भवतीति प्रसिद्धिः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लब्ध्वा भवन्तमभयं जिन सार्थवाहं
प्रस्थातुमुत्थितवतामयमग्रभूमिः ॥ ४० ॥

वनेऽत्र पाकोल्बणदाडिमीफलप्रकाशमाकाशमणिं नवोदितम् ।
जिघृक्षवोऽमी निपतन्ति वानरा अनूरुदण्डाग्रनिवारिता अपि ॥ ४१ ॥

कैटके सरोजवनसंकटके हरिणानपास्य सविधे हरिणा ।
करटङ्कैर्दलयता कैरटं करिणः क्षताः स्फुटमिहाकरिणः ॥ ४२ ॥

क्वेदं नभः क्व च दिशः क्व च पुष्पवन्तौ
क्वैताः प्रकामतरलद्युतयश्च ताराः ।
मन्येऽमुना नगनिशागतिना गिलित्वा
सर्वं स्वमेव विहितं ननु पीनपीनम् ॥ ४३ ॥

दूरेण दावानलशङ्कया मृगास्त्यजन्ति शोणोपलसंचयद्युतीः ।
इहोच्छलच्छोणितनिर्झराशया लिहन्ति च प्रीतिजुषः क्षणं शिवाः ॥ ४४ ॥

स्मरति स्म रतिप्रियाद्यतः क्षणमीक्षणमीलितं रतम् ।
परमाप रमात्र तत्तमस्तरसास्तरसा वियोगिनी ॥ ४५ ॥

अत्रोच्चरुक्मशिखरी गिरिरत्र रौप्यः
साक्षादिह स्फटिकसारशिलोच्चयोऽपि ।
अस्मिन्वनैर्हिममयोऽत्र च चित्रकूटो
रत्नैरनेकगिरिभिर्घटितोऽयमेकः ॥ ४६ ॥

अनेन पूर्वापरदिग्विभागयोः प्रमाणदण्डायितमत्र भारते ।
अयं कुबेरान्तकगुप्तयोर्दिशोरलङ्घ्यसीमेव पृथुः स्थितोऽन्तरे ॥ ४७ ॥

ढक्का नदन्तीह भवत्यरीणां नवाशु भङ्गाय तिरोहितानाम् ।
यशस्तवोच्चैः शुचि किंनरेन्द्रे न वा शुभं गायति रोहितानाम् ॥ ४८ ॥

प्रेङ्खन्मरुच्चलितचम्पकचारुपुष्पै-
रर्घं च निर्झरजलैश्च वितीर्य पाद्यम् ।

---

१. सूर्यम्. २. अद्रिनितम्बे. ३. सिंहेन. ४. कुम्भम्. ५. आकरः खनिरेषामस्ति योनित्वेन ते. आकरजा इत्यर्थः. ६. चन्द्रसूर्यौ. ७. पर्वतरात्रिचरेण. ८. मूर्छालक्षणमन्धकारम्. ९. मृगविशेषाणाम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वय्यागते मणिशिलाकृतविष्टरार्थः
शैलः करोति सकलामयमातिथेयीम् ॥ ४९ ॥

उद्दामसामोद्भवचीत्कृतानां प्रत्यारवैर्भूरिदरीमुखोत्थैः ।
त्वत्सैन्यसंमर्दभवोरुदुःखान्मुहुर्मुहुः पूत्कुरुतेऽयमद्रिः ॥ ५० ॥

कृतार्थीकृतार्थीहित त्वा हितत्वात्सदानं सदा नन्दिनं वादिनं वा ।
विभालम्बिभालं सुधर्मा सुधर्मापितख्यापितख्याति सा नौति सानौ ॥ ५१॥

प्राभाकरीरिति गिरो विनिशम्य सम्य-
ग्देवेऽपि तां परिषदं प्रति दत्तनेत्रे ।
एकोऽवतीर्य शिखरादथ किंनराणा-
मिन्द्रः प्रणम्य विनयाज्जिनमित्यवादीत् ॥ ५२ ॥

दिक्सैव पुण्यजननी विषयः स धन्यः
सेव्यानि तानि नगपत्तनकाननानि ।
यान्यर्हता भगवता भवता कथंचि-
दध्यासितान्यपरमस्ति किमत्र तीर्थम् ॥ ५३ ॥

भव्यस्तवस्याद्यमलंकृतीनामनर्घरत्नत्रयमाश्रितोऽपि ।
भव्य स्तवस्याद्यमलं कृतीनां प्राप्याङ्घ्रिपङ्केरुहयोः क्षणेन ॥ ५४ ॥

अत्र प्रचारो न विपंल्लवानां विपल्लवानां यदि वा तरूणाम् ।
आवासमस्मद्गृहसंनिधाने हसन्निधानेशपुरीं ददातु ॥ ५५ ॥

कुशोपरुद्धां द्रुतमालपल्लवां वराप्सरोभिर्महितामकल्मषाम् ।
नृपेषु रामस्त्वमिहोररीकुरु प्रसीद सीतामिव काननस्थलीम् ॥ ५६ ॥

---

१. सामोद्भवा हस्तिनः. २. पूत्करणमार्तव्याहरणमिति नलचम्पूटीका. ३. अर्थीकृताश्च तेऽर्थिनोऽर्थीकृतार्थिनः. कृतमर्थीकृतार्थिनामीहितं येन तत्संबोधनम्. त्वा त्वाम्. विभालम्बी सप्रभो भालो यस्य. सुधर्मा देवसभा. शोभनधर्मेणार्पिता प्रापिता सती ख्यापिता प्रकटीकृता ख्यातिः कीर्तिर्यत्र भवनकर्मणि तत्तथाभूतम्. नौति स्तौति. ४. विपदंशानाम्. ५. विगतकिसलयानाम्. ६. कुशैस्तृणविशेषैः; (पक्षे) तन्नाम्ना पुत्रेण. ७. द्रु-तमालपल्लवाम्; (पक्षे) द्रुतं-आलपत्-लवाम्. लवोऽपि सीतायाः पुत्रः. ८. अप्सरसो देवाङ्गनाः; (पक्षे) अद्भिर्युक्तानि सरांसि. ९. रमणीयः; (पक्षे) दाशरथिः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्याकर्ण्य स तस्य किंनरपतेर्भक्तिप्रगल्भां गिरं
श्रान्तं सैन्यमवेत्य वीक्ष्य करिणां संभोगयोग्यां भुवम् ।
देवो यावदचिन्तयन्निधिभृता तावत्क्षणान्निर्मितं
शालामन्दिरमन्दुराट्टवलभीप्राकारसारं पुरम् ॥ ९७ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये दशमः सर्गः ।

---

एकादशः सर्गः ।

अथ स तत्र निधीश्वरनिर्मिते प्रविशति स्म पुरे परमेश्वरः ।
समुदितोऽपि चतुर्विधसेनया विहित[1]मोहतमोहतिरद्भुतम् ॥ १ ॥

सुहृदमात्यगणाननुजीविनो नयनिधिर्विनिवेश्य यथायथम् ।
स्वयमिहोज्ज्वलरत्ननिकेतने स पदमाप दमान्वितमानसः ॥ २ ॥

बलभरोच्छलितैः पिहितप्रभोऽभजत मृण्मयतामिव यैर्जनः ।
मुकुरवत्स तु तैरपि पांसुभिर्नर[2]मणी रमणीयतरोऽभवत् ॥ ३ ॥

न घनघर्मपयःपृषतोदयो न च तनुत्वमजायत यत्प्रभोः ।
तदभिनत्पटुतां न जगज्जनोत्सवपुषो वपुषोऽध्वपरिश्रमः ॥ ४ ॥

तदपि रूढिवशात्कृतमज्जनो विहितयात्रिकवेषविपर्ययः ।
अयमुवाह रुचिं नयनप्रियां न च न कांचन काञ्चनदीधितिः ॥५॥ (युग्मम्)

नभसि दिक्षु वनेषु च संचरन्नृतुगणोऽथ गुणाढ्यमियाय तम् ।
समुपभोक्तुमिवैतदुपासनारसमयं समयं स्वमवन्निव ॥ ६ ॥

हिममहामहिमानमपोहितुं सरसतामनुशासितुमङ्गिनाम् ।
दधदनिन्द्यगुणोपनतामृतुक्रमधुरं मधुर[3]ञ्चति काननम् ॥ ७ ॥

कतिपयैर्दशनैरिव कोरकैः कुरबकप्रभवैर्विहसन्मुखः ।
शिशुरिव स्खलितस्खलितं मधुः पदमदादमदालिनि कानने ॥ ८ ॥

मलयशैलतटीमटतो रवेर्ध्रुवमभूत्प्रणयी मलयानिलः ।
पुनरमुष्य यतो दिशमुत्तरा[4]मपरथाप रथाग्रवरः कथम् ॥ ९ ॥

---

१. विहिता मोहरूपतमसो हतिर्येन. २. नरश्रेष्ठः. ३. अलंकरोति. ४ अपरथा-आप.

For Private and Personal Use Only

कल[1]विराजिविराजितकानने नवरसालरसालसषट्पदः ।
सुरभिकेसरकेसर[2]शोभितः प्रविससार स सारबलो मधुः ॥ १० ॥
अहह निर्दहति स्म वियोगिनां सुभगमङ्गमनङ्गहुताशनः ।
मुहुरुदीरितरोचिरयं[3] चलत्कमलया मलयानिललीलया ॥ ११ ॥
तदभिधानपदैरिव षट्पदैः शबलिताम्रतरोरिह मञ्जरी ।
कनकभङ्गिरिव स्मरधन्विनो जैनमदारमदारयत्[4] अञ्जसा ॥ १२ ॥
समधिरुह्य शिरः कुसुमच्छलादयमशोकतरोर्मदनानलः ।
पथि दिधक्षुरिवैक्षत सर्वतः समवधूतवधूतरसो[5]ऽध्वगान् ॥ १३ ॥
युवतिदीर्घकटाक्षनिरीक्षितः पुलकितस्तिलकः कुसुमच्छलात् ।
अकृत लास्यमिवास्य जगत्पतेरुपवने पवनेरितपल्लवः ॥ १४ ॥
शशिमुखीवदनासवलालसे बकुलभूरुहि पुष्पसमाकुले ।
धृतिमधत्त परां मधुपावलिः किमसमा न समानगुणे रतिः ॥ १५ ॥
उचितमाप पलाश इति ध्वनिं द्रुमपिशाचपतिः कथमन्यथा ।
अजनि पुष्पपदाद्दलिताध्वगो नृगलजङ्गलजम्भरसोन्मुखः (?) ॥ १६ ॥
गहनकुञ्जलतान्तरितक्रमां सहचरीं निभृतः प्रतिपालयन् ।
विधुरितोऽपि पपौ स पिपासया कुसुमलीनमली न मधु क्षणम् ॥ १७ ॥
रसविलासविशेषविदो नराः कथममी विलयं न ययुः क्षणात् ।
विकसितास्तरवोऽपि विचेतना मृगदृशोऽङ्घ्रि दृशोर्व्यतिषङ्गतः ॥ १८ ॥
मलयमारुतचूतपिकध्वनिप्रभृतिसायकसंचयमर्पयन् ।
मधुरसौ विदधे स्मरधन्विनं कमपि नाकिपिनाकिजयोर्जितम् ॥ १९ ॥
श्वसिति रोदिति मुह्यति कम्पते स्खलति ताम्यति यत्सहसाध्वगः ।
तदयमक्षतपक्षशिलीमुखैः किमधुना मधुना हृदि नाहतः ॥ २० ॥
विनिहतोऽयमनाथवधूजनो विधुरिता धुरि ता मुनिपङ्क्तयः ।
सुरभिणा समभेदि नतभ्रुवामिह स मानसमानमतङ्गजः ॥ २१ ॥

---

१. कोकिलः. २. वृक्षविशेषः. ३. प्रकटितज्वालः. ४. स्त्रीरहितं जनमदारयत्. ५. अगणितवधूकोपान्. ६. संबोधनम्.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति विशङ्क्य मधोर्वनवासिनः प्रहरतः परितोऽपि पराभवम् ।
प्रणयिनीकुचकञ्चुकमुच्चकैरुरसि को रसिको न दधे जनः ॥२२॥(कुलकम्)

प्रचलवेणिलताञ्चलताडितोन्नतनितम्बतटस्तरुणीजनः ।
स्मरनिषादकशाभिरिवाहतश्चिरमतोऽरमतोङ्कुरदोलया ॥ २३ ॥

स्मरवशीकरणौषधचूर्णवन्निदधतोपरि सौमनसं रजः ।
किमपरं मधुना वशिनोऽपि ते मुनिजना निजनामवशीकृताः ॥ २४ ॥

स्वयमगाद्वसतिं कलिमत्यजद्दृशमदत्त मुखे प्रियकामिनाम् ।
इति बहूनि चकार वधूजनः स किल कोकिलकोविदशिक्षया ॥ २५ ॥

मधुनिवृत्तिजुषां शुचिसंगमाद्धृतमुदामिव काननसंपदाम् ।
विचकिलप्रसवावलिरन्वगादिह सिता हसितानुकृतिं मुखे ॥ २६ ॥

सकलदिग्विजये वरमल्लिकाकुसुमसंगतभृङ्गरवच्छलात् ।
इह निनाय जनं स्मरभूपतेर्न न वशं नवशङ्खभवो ध्वनिः ॥ २७ ॥

युवतिदृष्टिरिवासवपाटला स्मरनृपस्य बभौ नवपाटला ।
प्रणदिता मधुपैरिव [१]काहला प्रियतमायतमानपराजये ॥ २८ ॥

वपुषि चन्दनमुज्ज्वलमल्लिका शिरसि हारलता गलकन्दले ।
मृगदृशामिति वेषविधिर्नृणामनवमो नवमोहमजीजनत् ॥ २९ ॥

इह तृषातुरमर्थिनमागतं विगलिताशमवेक्ष्य मुहुर्मुहुः ।
हृदयभूस्त्रपयेव भिदां गता गतरसा तरसा सरसी शुचौ ॥ ३० ॥

इह शुनां रसना वदनाद्बहिर्निरगमन्नवपल्लवचञ्चलाः ।
हृदि खरांशुकरप्रकरार्पिताः किमकृशा नु कृशानुशिखाः शुचौ ॥ ३१ ॥

खल इव [२]द्विजराजमपि क्षिपन्दलितमि[३]त्रगुणो नव[४]कन्दलः ।
अजनि कामकुतूहलिनां पुना रसमयः समयः स घनागमः ॥ ३२ ॥

इह घनैर्मलिनै[५]रपहस्तिता कुटजपुष्पमिषादुडुसंततिः ।
गिरिवने भ्रमरारवपूत्कृतैरवततार [६]ततारतिरम्बरात् ॥ ३३ ॥

---

१. वाद्यविशेषः. २. चन्द्रम्; (पक्षे) ब्राह्मणश्रेष्ठम्. ३. सूर्यः; (पक्षे) सुहृत्. ४. अङ्कुरः; (पक्षे) कलहः. ५. तिरस्कृता. ६. प्रसृतखेदा.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भृशमधार्यत नीपनभस्वता सह पयोधरनम्रनभःश्रिया ।
गलितहारनिभोदकधारया प्रथमसंगमसंगरविभ्रमः ॥ ३४ ॥
भुवनतापकमर्कमिवेक्षितुं कलितकान्तचलद्युतिदीपिका ।
दिशि दिशि प्रससार कृषीवतां सह मुदारमुदारघनावलिः ॥ ३५ ॥
जलधरेण पयः पिबताम्बुधेर्ध्रुवमपीयत वाडवपावकः ।
कथमिहेतरथा तडिदाख्यया रुचिररोचिररोचत वह्निजम् ॥ ३६ ॥
नभसि निर्गतकोमलमालतीकलिकया स्मरतोमरतीक्ष्णया ।
हृदयविद्ध इवालिगणः पुरा चलति का लतिकाः स्म निरीक्षितुम् ॥ ३७ ॥
निभृतभृङ्गकुलाकुलकेतकीतरुरुदीर्णसितप्रसवाङ्कुरः ।
भृशमशोभत मत्त इव स्मरद्विरदनो रदनोदितभूत्रयः ॥ ३८ ॥
त्वयि विभावपि भावपिधायिनि ध्रुवमनाथवतीमिव तां सखीम् ।
रिपुरिवैष विषं जलदो ददत्समद हन्ति दहन्ति च विद्युतः ॥ ३९ ॥
समधिगम्य पयः सरसामसावसहतापहता पतिवञ्चिता ।
यदतनोत्तनुतापितपूत्तरं तदयि तद्दयितस्य न पातकम् ॥ ४० ॥
स्वयमनम्बुजमेव सरोऽभवद्व्यधित सा तु वनान्तमपल्लवम् ।
यदि तया मृतयैव सुखं स्खलन्निनदया न दयास्ति वनेऽपि ते ॥ ४१ ॥
न रमते स्मयते न न भाषते स्वपिति नात्ति न वेत्ति न किंचन ।
सुभग केवलमस्मितलोचना स्मरति सा रतिसारगुणस्य ते ॥ ४२ ॥
इति कयापि दयापरयापरः प्रणयपूर्वमिहाभिहितो युवा ।
मुदमिवोदवहन्न च चारुतामदममन्दममन्थरमन्मथः ॥ ४३ ॥(कुलकम्)
तृणकुटीरनिभे हृदि योषितां ज्वलति तीव्रवियोगहुताशने ।
स्वजनवच्छिखिभेकगणो नदन्नकृत पूत्कृतपूरमिवाकुलः ॥ ४४ ॥
प्रलपतां कृपयैव वियोगिनां किमपि दाहमहाज्वरशान्तये ।
शरदियं सरसीषु निरन्तरं व्यतनुतातनुतामरसं पयः ॥ ४५ ॥

---

१. मुदा अरं-उदारघनावलिः. २. श्रावणे. ३. दन्तक्षुण्णलोकत्रयः. ४. शरीरतापतप्तिमिविशेषं यच्चकार.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इयमुदस्य करैः परिचुम्बतः सरसिजास्यमभून्न घनादरा ।
शरददत्त सुधाकरलालनासुखरता खरतापमतो रवेः ॥ ४६ ॥

किमपि पाण्डुपयोधरमण्डले प्रकटितामरचापनखक्षता ।
अपि मुनीन्द्रजनाय ददौ शरत्कुसुमचापमचापलचेतसे ॥ ४७ ॥

विघटिताम्बुपटानि शनैः शनैरिह दधुः पुलिनानि महापगाः ।
नवसमागमजातह्रियो यथा स्वजघनानि घनानि कुलस्त्रियः ॥ ४८ ॥

स्फुरदमन्दतडिद्द्युतिभासुरं शरदि शुभ्रमुदीक्ष्य पयोधरम् ।
कपिशकेसरकेसरिशङ्कया प्रतिनदन्ति न दन्तिगणाः क्षणम् ॥ ४९ ॥

कलमरालवधूमुखखण्डितं विपुलवप्रजले कमलाकरम् ।
निकटमप्यवधीरयति स्म साभिनवशालिवशालिपरम्परा ॥ ५० ॥

अयमनङ्गगजस्य मदाम्भसः परिमलो न तु शारदभूरुहः ।
इयमयस्त्रिपदी त्रुटिताभितः कमलिनीमलिनीविततिर्न तु ॥ ५१ ॥

हृदयहारिहरिन्मणिकण्ठिकाकलितशोणमणीव नभःश्रियः ।
ततिरुदैक्षि जनैः शुकपत्त्रिणां भ्रमवतामवतारितकौतुका ॥ ५२ ॥

मरुति वाति हिमोदयदुःसहे सहसि संततशीतभयादिव ।
हृदि समिद्धवियोगहुताशने वरतनोरतनोद्वसतिं स्मरः ॥ ५३ ॥

पतितमेव तदा हिममङ्गिनां वपुषि कीर्तिहरं शरदत्यये ।
शरणमुद्धतयौवनकामिनीस्तनभरो न भरोपचितो यदि ॥ ५४ ॥

बहलकुङ्कुमपङ्ककृतादरा मदनमुद्रितदन्तपदाधराः ।
तुहिनकालमतो घनकञ्चुका निजगदुर्जगदुत्सवमङ्गनाः ॥ ५५ ॥

अपि जगत्सु मनोभवतेजसां प्रवणयन्त्यतिरेकमनेकशः ।
हिममयानि तदा सवितुर्महोर्महिमहानिमहानि वितेनिरे ॥ ५६ ॥

स महिमोदयतः शिशिरो व्यधादपहृतप्रसरत्कमलाः प्रजाः ।
इति कृपालुरिवाश्रितदक्षिणो दिनकरो न करोपचयं दधौ ॥ ५७ ॥

---

१. अभिनवशालिवशा-अलिपरम्परा. २. सप्तच्छदवृक्षस्य. ३. लोहशृङ्खला.
४. भ्रमरीश्रेणिः. ५. सिक्थकः. ६. महः-महिम-हानिभू-अहानि.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विघटयन्नखिलेन्द्रियपाटवं भृशमुरीकृतधर्मदिगाश्रयः।
वपुषि बिभ्रदसौ तपसा महः कृशामिनः शमिनः समतां दधौ ॥५८॥
मृगदृशामिह सीत्कृतकम्पिताधरपुटस्फुटदन्तसमद्युतः।
विदधिरे नवकुन्दलता दलत्सुमनसो मनसो धृतिमङ्गिनाम् ॥ ५९ ॥
सुरभिपत्रवतः कुसुमेष्वभून्मरुवकस्य जनो विगतस्पृहः।
सुभगरूपजुषो मृगचक्षुषः प्रथितमान्यतमान्यगुणेष्विव ॥ ६० ॥
इह हि रोध्ररजांसि यशांसि वा विशदभांसि जगज्जयशालिनः।
विदधिरे न मनोभवभूपतेः सममनन्तमनन्तरितं भुवा ॥ ६१ ॥
करणबन्धविवर्तनसाक्षिणीः समधिगम्य निशाः सुरतक्षमाः।
तपसि कामिगणस्तरुणीजनैररमतारमतामसमानसैः ॥ ६२ ॥
अथ दिदृक्षुममुं रमणीयतामृतुगणस्य समं समुपेयुषः।
अभिदधे जिनमित्यमराधिपो विनयतो नयतोषितभूत्रयम् ॥ ६३ ॥
ऋतुकदम्बकमाह्वयतीव वः श्रवणगोचरतां युगपद्गतैः।
भ्रमरकोकिलहंसकलापिनां रसकलैः सकलैरपि निःस्वनैः ॥ ६४ ॥
सेना सुराणाममना मितारम्भवत्ययाना मधुना च येन।
सेना सुराणा मम नामितारं भवत्ययानामधुना चयेन ॥ ६५ ॥
प्रभाविताने कलतागताया प्रभाविताने कलता गता या।
प्रभाविताने कलतागताया सा स्त्री मधौ किं स्पृहणीयपुण्या ॥ ६६ ॥
वीक्ष्याङ्गना सत्तिलकान्सरागा विलासमुद्रायतनेऽत्र कान्ते।
गुणांस्त्वयीवाभवदस्तशात्राविलो समुद्रायतनेत्रकान्ते ॥ ६७ ॥
पदप्रहारैः पुरुषेण दध्रे मदः समुद्यत्तरुणीहतेन।
रुतं तदश्रावि वने पिकीनामदः समुद्यत्तरुणीह तेन ॥ ६८ ॥

---

१. प्रथित-मान्यतम-अन्यतमगुणेषु. २. अमनस्का. ३. मनोविरहान्मितारम्भवती. ४. गमनरहिता. ५. कामदेवेन सह. ६: कामः. ६. स्तुतिमुखरा. ७. नामिता-अरम्. ८. अयानां भाग्यानां चयेन. ९. अवलोकितबहुविधवल्लीवृक्षाविस्तारा. १०. मनोज्ञता. ११. प्रभौ-इता-न. १२. हे इकलत, इः कामस्तद्वत्कलता मनोज्ञता यस्य तत्संबोधनम्. १३. अप्राप्तशुभविधिः. १४. भूमिः. १५. समुद्रा-आयतनेत्रकान्ते. १६. समुत्-यत्-तरुणि-(वृक्षे)-इह.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वामद्य केकिध्वनितापदेशात्सुराजमानेन स मानवेन ।
घनागमः स्तौत्यमृतोदयार्थी सुराजमानेनस मा नवेन ॥ ६९ ॥
कलापि नो मन्दरसानुगास्ते पयोदलेशोपहिता हिमांशोः ।
कलापिनो मन्दरसानुगास्ते संभाव्यते तेन शरत्प्रवृत्तिः ॥ ७० ॥
गुणलतेव धनुर्भ्रमरावली शरदि तामरसं गमिताधिकम् ।
ततिरतोऽप्सरसां कुसुमेषुणा शरदितामरसङ्गमिताधिकम् ॥ ७१ ॥

इति वचनमुदारं भाषमाणे मुदारं
प्रशमितवृजिनस्य स्वर्गिनाथे जिनस्य ।
मतिरिह घनगानां रन्तुमासीन्नगानां
ततिषु कुसुमलीनां वीक्ष्य पालीमलीनाम् ॥ ७२ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्य एकादशः सर्गः ।

---

द्वादशः सर्गः ।

दिदृक्षया काननसंपदां पुरादथायमिक्ष्वाकुपतिर्विनिर्ययौ ।
विधीयतेऽन्योऽप्यनुयायिनां गुणैः समाहितः किं न तथाविधः प्रभुः ॥१॥
बभूव यत्पुष्पवतीमृतुक्षणे वनस्थलीं सेवितुमुत्सुको जनः ।
अचिन्तितात्मक्रमविप्लवो महान्मनोनुरागः खलु तत्र कारणम् ॥ २ ॥
विकासिपुष्पद्रुणि कानने जनाः प्रयातुमीषुः सह कामिनीगणैः ।
स्मरस्य पञ्चापि न पुष्पमार्गणा भवन्ति सह्याः किमसंख्यतां गताः ॥ ३ ॥
बभौ तदारक्तमलक्तकद्रवैर्वधूजनस्याङ्घ्रिसरोरुहद्वयम् ।
पथि स्थलाम्भोरुहकोटिकण्टकक्षतक्षरच्छोणितसंचयैरिव ॥ ४ ॥
गतागतेषु स्खलितं वितन्वता नितम्बभारेण समं जडात्मना ।
भुजौ सुवृत्तावपि कङ्कणक्वणैः किलाङ्गनानां कलहं प्रचक्रतुः ॥ ५ ॥

---

१. हे मनुष्यस्वामिन्. २. हे सुराजम. शोभना राज्ञां मा यस्य तत्संबोधनम्. ३. स्तवेन. ४. मन्दर-सानु-गा-आस्ते. ५. मन्द-रस-अनुगाः-ते. ६. शरदिता बाणखण्डिता अतएव अमरसङ्गमिता देवसङ्गं प्राप्ता. अधिकं जले. ७. घनं निरन्तरं गानं यस्यास्ताम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुस्तनाभोगभरेण मध्यतः कृशोदरीयं झटिति त्रुटिष्यति ।
इतीव काञ्ची कलकिङ्किणीक्कणैर्मृगीदृशः पूत्कुरुते स्म वर्त्मनि ॥ ६ ॥
नितम्बसंवाहनबाहुलालनश्रमोद्भारापनयादिभिर्घनैः ।
चटूनि चक्रे मुहुरेणचक्षुषां विचक्षणो दक्षिणमारुतः पथि ॥ ७ ॥
[1]प्रवालशालिन्य[2]नपेतविभ्रमा नितान्त[3]मुच्चैस्तनगुच्छलाञ्छिता ।
सलीलमुद्यत्त[4]रुणावलम्बिता वनं ययौ कापि लतेव जङ्गमा ॥ ८ ॥
नितम्बबिम्बप्रसराहतक्रमः कुचस्थलीताडनमूर्छितश्च यः ।
विलासिनीनां मलयाद्रिमारुतः स जीव्यते स्म श्वसितानिलैः पथि ॥ ९ ॥
प्रियस्य कण्ठार्पितबाहुबन्धना पथि स्खलन्ती विनिमीलनादृशोः ।
प्रकाशयन्तीव मनोभवान्धतां जगाम काचिद्वनमेणलोचना ॥ १० ॥
यथाभवन्नूपुरपाणिकङ्कणक्कणप्रगल्भो मणिकिङ्किणीरवः ।
उपेयुषीणां वनमेणचक्षुषां तथा पुरो लास्यमधत्त मन्मथः ॥ ११ ॥
उदश्चति भ्रूलतिका मुहुर्मुहुः प्रकम्पते तन्वि यदोष्ठपल्लवः ।
अवैमि तेन स्मितपुष्पशातनो विजृम्भते ते हृदि मानमारुतः ॥ १२ ॥
जगज्जनानन्दविधायिनि क्षणे वृथा त्वयारम्भि मृगाक्षि विग्रहः ।
मनस्विनीनां सुलभाभिमानता महानृतुप्रक्रम एष दुर्लभः ॥ १३ ॥
अथापराद्धं दयितेन कुत्रचिद्दिनोपपत्स्येति तवाकुलं मनः ।
परस्परं प्रेम समुन्नतिं गतं भयानि भामिन्यपदेऽपि पश्यति ॥ १४ ॥
अनन्यनारीप्रणयिन्यपि त्वया यदागसां चिह्नमदर्शि स भ्रमः ।
रसेन यस्त्वामभितोऽपि वीक्षते कथं स ते विप्रियमाचरिष्यति ॥ १५ ॥
अपास्तपीयूषमयूखशोभया प्रभातकान्त्येव वियुक्तया त्वया ।
अनुज्झितस्नेहभरः स संप्रति प्रपद्यते दीप इवाभिपाण्डुताम् ॥ १६ ॥
कृतेर्ष्ययेव त्वयि दत्तचेतसो गतं क्षुधेव क्वचिदस्य निद्रया ।
मुखस्य ते दास्यमिवागतोऽधुना शशी स शीतोऽपि ददाह तद्वपुः ॥ १७ ॥

---

१. पल्लवयुक्ता प्रकृष्टकेशयुक्ता च. २. विलाससहिता पक्षिसंचारसमेता च. ३. उच्चैस्तन-गुच्छलाञ्छिता; उच्चैः स्तनगुच्छलाञ्छिता. ४. तरुणा वृक्षेण तरुणपुरुषेण च अवलम्बिता.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्रुवं वियोगे कुसुमेषुमार्गणैस्तवापि भिन्नं हृदयं विभाव्यते ।
अमी समुल्लासितसारसौरभाः स्फुरन्ति निःश्वाससमीरणाः कुतः ॥ १८ ॥
तदस्तु संधिर्युवयोः प्रसीद नः प्रतप्तयोरायसपिण्डयोरिव ।
सखीभिरित्थं गदितानुकूलयांचकार कान्तं किल कापि कामिनी ॥ १९ ॥
(कुलकम्)

विभिद्य मानं कलकोकिलस्वने मनोनुरागं मिथुनेषु तन्वति ।
कुतूहलादेव स केवलं तदा धनुर्धुनीते स्म जगज्जयी स्मरः ॥ २० ॥
त्रिनेत्रसङ्ग्रामभरे पलायितः स्मरस्य विश्वासपदं कथं मधुः ।
उमार्पितप्रत्यय एष मन्यते विलासिनीर्जीवितदानपण्डिताः ॥ २१ ॥
विवर्णतां लोकबहिःस्थितिं पिका मधुं प्रभुद्रोहिणमाश्रिता ययुः ।
नतभ्रुवां पादयुगस्य पङ्कजं समाश्रितच्छायमभूत्पदं श्रियः ॥ २२ ॥
तरुन्निषङ्गानिव बिभ्रतामुना स्मरस्य पौष्पाः कति नार्पिताः शराः ।
परं तथाप्येष जगज्जये वधूकटाक्षमेवेषुममन्यत क्षमम् ॥ २३ ॥
वसन्तलीलामलयानिलादिभिः समं मनोभूः समयेन युज्यते ।
निरन्तरं तस्य समस्तदिग्जये सहायभावं सुदृशो वितन्वते ॥ २४ ॥
इति प्रसङ्गादुपलालिताः प्रियैः स्वशक्तिमाकर्ण्य मधुप्रधर्षिणीम् ।
स्वरूपगर्वोद्धुरकंधराः स्खलत्पदप्रचारं पथि जग्मुरङ्गनाः ॥ २५ ॥
(कुलकम्)

प्रभोदयाह्लादितलोकलोचनो विलासिनीभिः परिवारितस्ततः ।
शशीव ताराभिरलंकृतो घनं वनं विवेशोत्तरकोशलेश्वरः ॥ २६ ॥
गिरीशलीलावनमित्युपश्रुतेर्भ्रमन्निह क्षोपभयादिव स्मरः ।
न कान्तिपीयूषनिधानकुम्भयोर्मुमोच कान्ताकुचयोरुपान्तिकम् ॥ २७ ॥
ध्रुवं त्रिनेत्रानलदाहतः प्रभृत्युदर्चिषि द्वेषमुपागतः स्मरः ।
यदत्र सान्द्रद्रुमदीर्घदुर्दिने वने निवासैकरसो बभूव सः ॥ २८ ॥
इहाबभौ मारुतधूतकेतकीपरागपांसुप्रकरः समन्ततः ।
अनङ्गदावानलमीलितात्मनां वियोगभाजामिव भस्मसंचयः ॥ २९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतस्ततः कज्जलकोमला दधौ पुरो भ्रमन्ती भ्रमराङ्गनावलिः ।
जगज्जिगीषोर्विषमेषुभूभुजः कराग्रवल्गन्निशितासिविभ्रमम् ॥ ३० ॥
विजित्य बाणैर्मदनस्य कुर्वतः समस्तमेकातपवारणं जगत् ।
अभङ्गुरां षट्पदबन्दिनो वने जगुस्तदानीं बिरुदावलीमिव ॥ ३१ ॥
परागपुञ्जा यदि पुष्पजा अमी न पांसुतल्पाः स्मरमत्तदन्तिनः ।
अलिच्छलात्पान्थवधाय धावतः कथं तदन्तस्त्रुटिताङ्घ्रि शृङ्खला ॥ ३२ ॥
ददत्प्रवालौष्ठमुपात्तयौवनो मधुः प्रसूनांशुककर्षणोत्सुकः ।
लतावधूनामिह संगमे जनैरदर्शि कूजन्निव कोकिलस्वनैः ॥ ३३ ॥
शिखण्डिनां ताण्डवमत्र वीक्षितुं तवास्ति चेच्चेतसि तन्वि कौतुकम् ।
समाल्यमुद्दामनितम्बचुम्बिनं सुकेशि तत्संवृणु केशसंचयम् ॥ ३४ ॥
जलेषु ते वक्रसरोजनिर्जितो जनैः स्फुटच्चारुसरोरुहाकरः ।
अदर्शि सव्रीड इवोदरे क्षिपन्कृपाणपुत्रीमिव षट्पदावलिम् ॥ ३५ ॥
सविभ्रमं वीक्ष्य तवेक्षणद्वयं गतं च वाचालितरत्ननूपुरम् ।
महोत्पलैर्वारि निमीलितं दिवि ह्रियेव हंसैश्च पलायितं जवात् ॥ ३६ ॥
यदि स्फुरिष्यन्ति तवाधरद्युतेः पुरः कियत्कालमशोकपल्लवाः ।
तदाधिगत्यान्तरमुद्यतत्रपा ध्रुवं गमिष्यन्ति विवर्णताममी ॥ ३७ ॥
भव क्षणं चण्डि वियोगिनीजने दयालुरुन्मुद्रय सुन्दरीं गिरम् ।
अमी हताशाः प्रथयन्तु मूकतां कृतान्तदूता इव लक्षिताः पिकाः ॥३८॥
उदीरयन्नित्यमृतप्रपां गिरं विचित्रचाटूक्तिविचक्षणः क्षणात् ।
प्रसर्पदानन्दतिरोहितक्रुधं चकार कश्चित्तरुणो मनस्विनीम् ॥ ३९ ॥
(कुलकम्)

अगोचरं चण्डरुचेरपि द्युतां निकुञ्जलीलासदनेषु पुञ्जितम् ।
प्रभाभिरुद्भासितवीरुधस्तमो विनिन्यिरे भङ्गमनङ्गदीपिकाः ॥ ४० ॥
परिभ्रमन्त्यः कुसुमोच्चिचीषया विरेजिरे तत्र सरोजलोचनाः ।
जिनेन्द्रमभ्यर्चयितुं सपर्यया कृतप्रयत्ना वनदेवता इव ॥ ४१ ॥
उदग्रशाखाकुसुमार्घमुद्भुजा व्युदस्य पार्ष्णिद्वयमञ्चितोदरी ।
नितम्बभूस्त्रस्तदुकूलबन्धना नितम्बिनी कस्य चकार नोत्सवम् ॥ ४२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करैः प्रवालान्कुसुमानि लोचनैर्नखांशुभिस्तत्र विजित्य मञ्जरीः ।
वधूजनस्यास्य जिघृक्षतो भयात्किलाचकम्पे पवनाहतं वनम् ॥ ४३ ॥
प्रमत्तकान्ताकरसंगमादमी सदागमाभ्यासरसोज्ज्वला अपि ।
क्षणान्निपेतुः सुमनोगणा यतो ह्रियेव विच्छायमभूत्ततो वनम् ॥ ४४ ॥
किमन्यदन्ये पिकपञ्चमादयो यशांसि पुण्यैरलभन्त सेवकाः ।
समर्थ्यते कार्यमनङ्गभूपतेः पुनस्तदेकेन वसन्तशाखिना ॥ ४५ ॥
इतीव काचिन्नवचूतमञ्जरीं प्रियस्य वश्यौषधिमाददे मुदा ।
स्वमेव तद्दर्शनमात्रकर्मणा विवेद मुग्धा न वशीकृतं पुरा ॥ ४६ ॥
(युग्मम्)

लताग्रदोलाञ्चनलीलया मुहुर्नतोन्नतस्फारनितम्बमण्डला ।
श्रमं प्रचक्रे पुरुषायितक्रियाप्रकर्षहेतोरिव कापि कामिनी ॥ ४७ ॥
स्वमूर्ध्नि चूडामणिरश्मिकार्मुके निवेशयन्ती नवनीपगोलकम् ।
पिकाय मर्मव्यथकाय कानने निबद्धलक्ष्येव वधूरलक्ष्यत ॥ ४८ ॥
कयाचिदुज्जृम्भितचारुचम्पकप्रसूनमाला जगृहे न पाणिना ।
स्मरान्तकग्रस्तवियोगिनीच्युतां विडम्बयन्ती कलधौतमेखलाम् ॥ ४९ ॥
उदग्रशाखाञ्चनचञ्चलाङ्गुलेर्भुजस्य मूलं स्पृशति प्रिये छलात् ।
स्मितं वधूनामिव वीक्ष्य सत्रपैरमुच्यतात्मा कुसुमैर्द्रुमाग्रतः ॥ ५० ॥
मिथः प्रदत्तैर्नवपुष्पदामभिर्बभुस्तदानीं मिथुनानि सर्वतः ।
अवन्ध्यपातप्रसरैः प्रकोपतश्रितानि बाणैरिव पुष्पधन्वना ॥ ५१ ॥
विपक्षनामापि कुरङ्गचक्षुषां बभूव मन्त्रो ध्रुवमाभिचारिकः ।
प्रियैस्तदुच्चारणपूर्वमर्पिता प्रसूनमाला यदियाय वज्रताम् ॥ ५२ ॥
रतावसाने लतिकागृहाद्वधूर्विनिर्यतीः स्विन्नकपोलमण्डलाः ।
प्रवीजयन्ति स्म समीरणेरितैः प्रवाललीलाव्यजनैर्महीरुहाः ॥ ५३ ॥
स्रजो विचित्रा हृदि जीवितेश्वरैः समाहिताश्चारुचकोरचक्षुषाम् ।
तदन्तरेऽन्तर्विशतो मनोभुवश्चकासिरे वन्दनमालिका इव ॥ ५४ ॥

---

१ आम्रेण.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मितं विलासस्य कटाक्षविभ्रमं रतेरनङ्गस्य सुधारसच्छटाः ।
यशांसि तारुण्यनृपस्य मेनिरे विलासिनीनां शिरसि स्रजो जनाः ॥ ५५ ॥
प्रसूनशून्येऽपि तदर्थिनी तरौ नियोजयन्ती करपल्लवं मुहुः ।
निरीक्षणात्पत्युरनङ्गविह्वला स्मितं सखीनां विदधे सुलोचना ॥ ५६ ॥
तदा यदासीत्तनुरामणीयकं प्रसूनमालाभरणैर्मृगीदृशाम् ।
अवैति तद्वर्णयितुं तदा स्मरो यदा कवित्वं लभते प्रसादतः ॥ ५७ ॥
कृतेऽपि पुष्पावचये समन्ततो लतासु लीलार्पितपाणिपल्लवाः ।
स्फुरन्नखांशुप्रकरेण तत्क्षणं वितेनिरे पुष्पविभङ्गिमङ्गनाः ॥ ५८ ॥
प्रसूनलक्ष्मीमपहृत्य गच्छतां वधूजनानां भयलोलचक्षुषाम् ।
वनेन मुक्ता विषमेषुशालिना शिलीमुखास्तत्र निपेतुरन्तिके ॥ ५९ ॥
समुल्लसत्संमदबाष्पबिन्दुभिर्निलीयमानैरिव लोचनैर्नृणाम् ।
वपुर्जलार्द्रं श्रमभारभङ्गुरास्तदा वहन्ति स्म कुरङ्गलोचनाः ॥ ६० ॥

शुभ्राम्भोजविशाललोचनयुगोपान्तेषु बिभ्रन्नवां
सद्यः प्रस्फुटशुक्तिसंपुटतटीनिष्क्रान्तमुक्ताकृतिम् ।
मूले च स्तनकुम्भयोरनुकृतश्च्योतत्सुधाम्भोलवः
स्त्रीणां जीवितमन्मथः समजनि स्वेदोदबिन्दुव्रजः ॥ ६१ ॥

वनान्मकरकेतनप्रणयिनः करोल्लासित-
स्फुरत्कमलकेलयस्तुलितपूर्णचन्द्राननाः ।
अशेषकुसुमोच्चयश्रमजलार्द्रदेहास्ततो
जवाज्जनितविस्मयाः श्रिय इव स्त्रियो निर्ययुः ॥ ६२ ॥

तादृक्कान्ताचरणकमलस्पर्शजाग्रत्स्मरस्य
प्रस्वेदाम्बुद्रव इव पुरो विन्ध्यधात्रीधरस्य ।
उद्दामोर्मिप्रसरपुलको घर्मममर्व्यथायां
दृष्टः सैन्यैरसिरिव महान्नर्मदाम्भःप्रवाहः ॥ ६३ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये द्वादशः सर्गः ।

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रयोदशः सर्गः ।

द्विगुणितमिव यात्रया वनानां स्तनजघनोद्वहनश्रमं वहन्त्यः ।
जलविहरणवाञ्छया सकान्ता ययुरथ मेकलकन्यकां तरुण्यः ॥ १ ॥
जलभरपरिरम्भदत्तचित्ताः श्रमसलिलप्रसरच्छलेन रागात् ।
प्रथममिव समेत्य संमुखं ताः सपदि जलैः परिरेभिरे तरुण्यः ॥ २ ॥
क्षितितलविनिवेशनात्प्रसर्पन्नखमणिशोणमयूखमङ्घ्रियुग्मम् ।
श्रमनिवहविलम्बमानजिह्वाप्रसरमिवाध्वनि सुभ्रुवां बभासे ॥ ३ ॥
प्रियकरकलितं विलासिनीनां नवशिखिपत्त्रमयातपत्रवृन्दम् ।
मृदुकरपरिमर्शनात्तसौख्यं वनमिव पृष्ठगतं रराज रागात् ॥ ४ ॥
इह मृगनयनासु साम्यमक्ष्णोः प्रथममवेक्ष्य विशश्वसुः कुरङ्ग्यः ।
तदनु निरुपमैर्भ्रुवो विलासैर्विजितगुणा इव ताः प्रणश्य जग्मुः ॥ ५ ॥
वदनमनु मृगीदृशो द्रुमाग्रात्पतदलिमण्डलमाशु गन्धलुब्धम् ।
क्षितिगतशशिनो भ्रमेण राहोरवतरतो गगनाद्द्युतिं जहार ॥ ६ ॥
दिनकरकिरणैरुपर्यधस्तात्तुलितकुकूलकृशानुभिः परागैः ।
पुटनिहितसुवर्णवद्धभूमिः स्वतनुरमन्यत हन्त तप्यमाना ॥ ७ ॥
वनविहरणखेदनिःसहं ते वपुरतिपीनपयोधरं बभूव ।
इति किल स मुदस्य कोऽपि दोर्भ्यां युवतिमनाकुलितो जगाम रागी ॥८॥
मिलदुरसिजचक्रवाकयुग्माः प्रथयति भास्वति यौवने प्रकाशम् ।
स्फुटरवकलहंसकास्तरुण्यः सरित इव प्रतिपेदिरे नदीं ताम् ॥ ९ ॥
अधिगतकरुणारसेव रेवा श्रमभरमन्दरुचो विलोक्य तन्वीः ।
जललवनिचितारविन्ददम्भात्सपदि सबाष्पकणेक्षणा बभूव ॥ १० ॥
प्रकटय पुलिनानि दर्शयाम्भोभ्रमणमुदञ्चय निर्भरं तरङ्गान् ।
घनजघनगभीरनाभिनृत्यद्भ्रुकुटि तुलां न तथाप्युपैषि तन्व्याः ॥ ११ ॥
नयनमिव महोत्पलं तरुण्याः सरसिजमास्यनिभं च मन्यसे यत् ।
तदुभयमपि विभ्रमैरुभाभ्यां जितमिह वल्गसि किं वृथोद्वहन्ती ॥ १२ ॥
इति मुहुरपरैर्यथार्थमुक्ता क्षणमपि न स्थिरतां दधौ ह्रियेव ।
गिरिविवरतलान्यधोमुखी सा परमपराब्धिवधूर्द्रुतं जगाम॥१३॥(कालापकम्)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकटितपुलकेव सा स्रवन्ती विदलितशैवलराजिमञ्जरीभिः ।
सरलिततरलोर्मिबाहुदण्डा प्रणयभरादिव दातुमङ्कपालिम् ॥ १४ ॥
स्मितमिव नवफेनमुद्वहन्ती प्रथममनल्पसरोजकल्पितार्घा ।
कलविहगरवैरिवालपन्ती व्यतनुत पाद्यमिवाम्बुभिर्वधूनाम् ॥ १५ ॥(युग्मम्)
उपनदि पुलिने प्रियस्य मुक्तामणिमयभूषणभाजि वक्षसीव ।
स्वयमुपरि निपत्य कापि रागान्मुहुरिह लोलयति स्म चञ्चलाक्षी ॥ १६ ॥
प्रणिहितमनसो मृगेक्षणानां चटुलविवर्तितनेत्रविभ्रमेषु ।
प्रविदधुरधिकस्पृहां ह्रदिन्यां चलशफरीस्फुरिते क्षणं युवा नः ॥ १७ ॥
उपनदि नलिनीवनेषु गुञ्जत्यलिनि निमीलितलोचनः कुरङ्गः ।
तटगतमपि नो ददर्श सैन्यं नहि विषयान्धमतिः किमप्यवैति ॥ १८ ॥
कथमपि तटिनीमगाहमानाश्चकितदृशः प्रतिमाछलेन तन्व्यः ।
इह पयसि भुजावलम्बनार्थं समभिसृता इव वारिदेवताभिः ॥ १९ ॥
अधिगतनदमप्यगाधभावैः सलिलविहारपरिच्छदं वहन्त्यः ।
प्रणयिभिरथ धार्यमाणहस्ताः प्रविविशुरम्भसि कातरास्तरुण्यः ॥ २० ॥
अविरलपलितायमानफेनं वलिनमिवोर्मिभिरङ्गमुद्वहन्ती ।
जतुबहलवधूपदप्रहारैरजनि सरिज्जरती रुषेव रक्ता ॥ २१ ॥
ध्वनिविजितगुणोऽप्यनेकधायं रटति पुरः कथमत्रपो मरालः ।
इति समुचितवेदिनेव तन्व्याः स्थितमिह वारिणि नूपुरेण तूष्णीम् ॥ २२ ॥
प्रसरति जललीलया जनेऽस्मिन्बिसवदनो दिवमुत्पपात हंसः ।
नवपरिभवलेखभून्नलिन्या प्रहित इवांशुमते प्रियाय दूतः ॥ २३ ॥
पृथुतरजघनैर्नितम्बिनीनां स्खलितगतिः पयसामभूत्प्रवाहः ।
अधिगतवनितानितम्बभारः कथमथवा सरसः पुरः प्रयाति ॥ २४ ॥
अपहृतवसने जडेन लौल्याज्जघनशिलाफलके नितम्बवत्याः ।
करजलिपिपदात्तदाविरासीद्विषमशरस्य जगज्जयप्रशस्तिः ॥ २५ ॥
कथमधिकगुणं करं मृगाक्षी क्षिपति मयीह वनान्तमाश्रितायाम् ।
इति विदितपराभवेव लक्ष्मीः सपदि सरोजनिवासमुत्ससर्ज ॥ २६ ॥

१. वलीयुक्तम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निवसनमिव शैवलं निरस्य स्पृशति जने नवसङ्गभाजि मध्यम् ।
वदनमिव पिधातुमुद्यतोर्मि प्रसरकराथ सरिद्वधूश्चकम्पे ॥ २७ ॥
पृथुतरजघनैर्विलोड्यमाना युवतिजनैः कलुषत्वमाश्रयन्ती ।
स्वपुलिनमुपसर्पिभिः पयोभिः सरिदुपगोपयति स्म लज्जितेव ॥ २८ ॥
प्रतियुवति निषेव्य नाभिरन्ध्रेष्वभिनवविन्ध्यदरीप्रवेशलीलाम् ।
अभजत गुरुगण्डशैलयुक्त्या स्तनकलशाग्रविघट्टनानि रेवा ॥ २९ ॥
वरतनुजघनाहतैर्गभीरप्रकृतिभिरप्यतिचुक्षुभे पयोभिः ।
इह विकृतिमुपैति पण्डितोऽपि प्रणयवतीषु न किं जडस्वभावः ॥ ३० ॥
समसिचत मुहुर्मुहुः कुचाग्रं करसलिलैर्दयितो विमुग्धवध्वाः ।
मृदुतरहृदयस्थलीप्ररूढस्मरनवकल्पतरोरिवाभिवृद्ध्यै ॥ ३१ ॥
स्तनतटपरिघट्टितैः पयोभिः सपदि गले परिरेभिरे तरुण्यः ।
अधिगतहृदया मनस्विनीनां किमु विलसन्मकरध्वजा न कुर्युः ॥ ३२ ॥
हृदि निहितघटेव बद्धतुम्बीफलललिताङ्गलतेव कापि तन्वी ।
इह पयसि सविभ्रमं तरन्ती पृथुलकुचोच्चयशालिनी रराज ॥ ३३ ॥
तटमनयत चारुचम्पकानां स्रजमबलागलविच्युतां तरङ्गैः ।
निजदयितरिपोरिवौर्ववह्नेः प्रचुरशिखापरिशङ्कया स्रवन्ती ॥ ३४ ॥
प्रियतमकरकल्पितेऽङ्गरागे प्रथममगान्न तथा क्लमं सपत्नी ।
अनुनदि सलिलैर्यथापनीते नखपदमण्डनवीक्षणान्मृगाक्ष्याः ॥ ३५ ॥
नवनखपदराजिरम्बुजाक्ष्या हृदि जलबिन्दुकरम्बिता बभासे ।
वरसारदुपढौकितप्रवालव्यतिकरदन्तुररत्नकण्ठिकेव ॥ ३६ ॥
सरभसमधिपेन सिच्यमाने पृथुलपयोधरमण्डले प्रियायाः ।
श्रमसलिलमिषात्सखेदमश्रूण्यहह मुमोच कुचद्वयं सपत्न्याः ॥ ३७ ॥
प्रियकरसलिलोक्षितातिपीनस्तनकलशोत्थितसीकरैस्तरुण्याः ।
प्रतियुवतिरथर्वसारमन्त्राक्षरनिकरैरिव ताडिता मुमूर्छ ॥ ॥ ३८ ॥
अहमिह गुरुलज्जया हतोऽस्मि भ्रमर विवेकनिधिस्त्वमेक एव ।
मुखमनु सुमुखी करौ धुनाना यदुपजनं भवता मुहुश्चुचुम्बे ॥ ३९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति सरसिरुहभ्रमात्प्रियाणामनुसरते वदनानि षट्पदाय ।
रतिरसरसिकोऽपि लज्जमानः किमपि हृदि स्पृहयांबभूव कामी ४० (युग्मम्)
प्रियकरसलिलैर्मनस्विनीनां न्यशमि हृदि प्रबलोऽपि मन्युवह्निः ।
अविरलमलिनाञ्जनप्रवाहो नयनयुगान्निरगादिवास्य धूमः ॥ ४१ ॥
अपहृतवसने जलैर्नितम्बे निहितदृशं करकेलिपङ्कजेन ।
प्रियमुरसि विनिघ्नती स्मरस्य स्फुटमकरोत्कुसुमायुधत्वमेका ॥ ४२ ॥
मुखतुहिनकरेऽपि संहतेन स्तनयुगलेन तुलां कुतोऽधिरूढे ।
इति जघनहतं पयो वधूनां रजनिवियोगिविहंगमौ निरासे ॥ ४३ ॥
सरभसमिह यत्तटात्पतन्त्यः प्रविविशुरन्तरशङ्कितास्तरुण्यः ।
घनपुलक इवाशयो जलानां तदुदितबुद्बुदबिन्दुभिर्बभूव ॥ ४४ ॥
प्रियकरविहितामृताभिषेकैरुरसि हरानलदग्धविग्रहोऽपि ।
प्रतिफलितचलद्द्विरेफदम्भादजनि सजीव इव स्मरस्तरुण्याः ॥ ४५ ॥
निपतितमरविन्दमङ्गनायाः श्रवणतटाददितिदुर्लभोपभोगात् ।
मधुकरनिकरस्वनैर्विलोले पयसि शुचेव समाकुलं रुरोद ॥ ४६ ॥
अविरललहरीप्रसार्यमाणैस्तरलदृशश्चकितेव केशजालैः ।
स्तनकलशतटान्ममज्ज पत्रान्तरमकरी सरितः पयस्यगाधे ॥ ४७ ॥
अभजत जघनं जघान वक्षस्तरलतरङ्गकरैश्चकर्ष केशान् ।
विट इव जलराशिरङ्गनानां सरभसपाणिपुटाहतश्चुकूज ॥ ४८ ॥
मुखमपहृतपत्रमङ्गनानां प्रबलजलैरवलोक्य शङ्कितेव ।
सरिदकृत पुनस्तदर्थमूर्मिप्रसरकरार्पितशैवलप्ररोहैः ॥ ४९ ॥
सपदि वरतनोरतन्यतान्तर्य इह परिष्वजता जडेन रागः ।
स किल विमलयोर्युगे तदक्ष्णोः स्फटिक इव प्रकटीबभूव तस्याः ॥५०॥
निरलकमपवस्त्रमस्तमाल्यं क्षततिलकं च्युतयावकाधरौष्ठम् ।
सह दयिततमैर्निषेव्यमाणं सुरतमिवाम्बु मुदेऽभवद्वधूनाम् ॥ ५१ ॥
श्रवणपथरतापि कामिनीनां विशदगुणाप्यपदूषणापि दृष्टिः ।
अभजत जडसंगमेन रागं धिगधिकनीचरताश्रयं जनानाम् ॥ ५२ ॥

१. केशकौटिल्यरोहित्यात्.

For Private and Personal Use Only

धुतकरवलयस्वनं निशम्य प्रतियुवतेरलिखण्डिताधरायाः ।
अविहितकथया कयापि सेर्ष्यं विवलितकंधरमैक्षि जीवितेशः ॥ ५३ ॥
अकलुषतरवारिभिर्विभिन्नास्वभिनवपत्त्रलतासु कामिनीनाम् ।
नखपदविततिर्दधौ कुचान्तर्भुवि परिशेषितरक्तकन्दलीलाम् ॥ ५४ ॥
अविरतजलकेलिलोलकान्तास्तनकलशच्युतकुङ्कुमैस्तदानीम् ।
कृतबहलविलेपनेव रेवा पतिमकरोत्सरितामतीव रक्तम् ॥ ५५ ॥
अहमुदयवता जनेन नीचैःपथनिरतापि यदृच्छयोपभुक्ता ।
इति सरलितवीचिबाहुदण्डा प्रमदभरादिव वाहिनी ननर्त ॥ ५६ ॥
दिन¹मबलमथो गृहान्प्रयाथ क्षणमहमप्यभयं भजामि कान्तम् ।
इति करुणरुतेन चक्रवाक्या समभिहिता इव ताः प्रयातुमीषुः ॥ ५७ ॥
इति कृतजलकेलिकौतुकास्ताः सह दयितैः सुदृशस्ततोऽवतेरुः ।
कलुषितहृदयस्तदा नदोऽपि प्रकटमभूदिव तद्वियोगदुःखैः ॥ ५८ ॥
जलविहरणकेलिमुत्सृजन्त्याः कचनिचयः क्षरदम्बुरम्बुजाक्ष्याः ।
परिविदितनितम्बसङ्गसौख्यः पुनरपि बन्धभियेव रोदिति स्म ॥ ५९ ॥
मुखशशिविमुखीकृतावतारे सतमसि पक्ष इवोच्चये कचानाम् ।
अविरलजलबिन्दवस्तदानीमुडुनिकरा इव रेजिरे वधूनाम् ॥ ६० ॥
प्रणयमथ जलाविलांशुकानां मुमुचुरुदारदृशः क्षणात्तदानीम् ।
ध्रुवमवगणयन्ति जाड्यभीत्या स्वयमपि नीर²समागतं विदग्धाः ॥ ६१ ॥
अतिशयपरिभोगतोऽम्बुलीलारसमयतामिव सुभ्रुवोऽभिजग्मुः ।
सितसिचयपदाद्यदुत्तरङ्गं पुनरपि भेजुरिमाः पयःपयोधिम् ॥ ६२ ॥
³मरुदपहृतकंकणापि कामं करकलितामलकङ्कणा तदानीम् ।
कचनिचयविभूषितापि चित्रं विकचसरोजमुखी रराज काचित् ॥ ६३ ॥
अनुकलितगुणस्य सौमनस्यं प्रकटमभूत्कुसुमोच्चयस्य तेन ।
अहमहमिकया स्वयं वधूभिर्यदयमधार्यत मूर्ध्नि संभ्रमेण ॥ ६४ ॥
समुचितसमयेन मन्मथस्य त्रिभुवनराज्यपदे प्रतिष्ठितस्य ।
मृगमदतिलकच्छलान्मृगाक्षी न्यधित मुखे नवनीलमातपत्रम् ॥ ६५ ॥

१. समाप्तप्रायम्. २. नीर-समागतम्; नीरसं-आगतम्. ३. पवनापनीतजलकणापि.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभिनवशशिनो भ्रमेण मा भून्मम वदनेन समागमो मृगस्य ।
श्रवणगतमितीव कापि पाशद्वयमकरोन्मणिकुण्डलच्छलेन ॥ ६६ ॥
मृगमदघनसारसारपङ्कस्तबकितकुम्भनिभस्तनी सखीनाम् ।
हृदि मदनगजेन्द्रमात्तधूलीमदमिव काचिददर्शयत्कृशाङ्गी ॥ ६७ ॥
लवणिमरसपूर्णनाभिवापीमनु जलयन्त्रघटीगुणोपमानम् ।
निरवधि दधती कयापि मुक्तामणिमयहारलता न्यधायि कण्ठे ॥ ६८ ॥
अभिमुखमभिदह्यमानकृष्णागुरुघनधूमचयच्छलेन तन्व्यः ।
स्मरपरवशवल्लभाभिसारोत्सुकमनसः परिरेभिरे तमांसि ॥ ६९ ॥

रतिरमणविलासोल्लासलीलासु लोलाः
किमपि किमपि चित्ते चिन्तयन्त्यस्तरुण्यः ।
प्रविरचितविचित्रोदारशृङ्गारसाराः
सह निजनिजनाथैः स्वानि धामानि जग्मुः ॥ ७० ॥

इत्थं वारिविहारकेलिगलितश्रोणीदुकूलाञ्चला
वीक्ष्यैताः परयोषितः सुकृतधूर्धुर्यो जगद्बान्धवः ।
तद्दोषोपचयप्रमार्जनविधौ दत्ताशयः सांशुको-
ऽप्यब्धि स्नातुमिवापरं दिनमणिस्तत्कालमेवागमत् ॥ ७१ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये त्रयोदशः सर्गः ।

चतुर्दशः सर्गः ।

स्वं सप्तधा स्यन्दनसप्तिदम्भात्कृत्वा समाराधयतोऽथ वृद्ध्यै ।
ध्वान्तस्य भानुः कृपयेव दातुं प्रस्तावमस्ताचलसंमुखोऽभूत् ॥ १ ॥
अपास्य पूर्वामभिसर्तुकामो गुप्तां दिशं पाशधरेण सूर्यः ।
विलम्बमानापसरन्मयूखैः पपात पाशैरिव कृष्यमाणः ॥ २ ॥
स्वैराभिसारोत्सवसंनिरोधात्क्रोधोद्धुराणामिव बन्धकीनाम् ।
अर्कस्तदा रक्तकटाक्षलक्षच्छटाभिराताम्ररुचिर्बभूव ॥ ३ ॥
तां पूर्वगोत्रास्थितिमप्यपास्य यद्वारुणीं नीचरतः सिषेवे ।
स्वसंनिधानादपसार्यते स्म महीयसा तेन विहायसार्कः ॥ ४ ॥

१. रथाश्वव्याजात्. २. वरुणेन.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा यथा चण्डरुचिः प्रतीच्यां संतापमुत्सृज्य बभूव रक्तः ।
स्पर्धानुबन्धादिव कामिनोऽपि तथा तथा प्रेमवतीष्वरज्यन् ॥ ५ ॥
प्राप्तं पुनः [1]प्रत्यगमोषधीषु न्यासीचकारात्मरुचोऽत्र कश्चित् ।
शेषा रविः स्थापयितुं दिनान्ते यियासुरस्ताचलमाजगाम ॥ ६ ॥
मूर्धीव लीलावनकुन्तलाढ्ये तिष्ठन्भुवो भानुरिहास्तशैले ।
चूडामणित्वं प्रययौ दिनान्तेऽप्यहो महत्त्वं महतामचिन्त्यम् ॥ ७ ॥
अस्ताद्रिमारुह्य रविः पयोधौ कैवर्तवत्क्षिप्तकराग्रजालः ।
आकृष्य चिक्षेप नभस्तटेऽसौ क्रमात्कुलीरं मकरं च मीनम् ॥ ८ ॥
आविर्भवद्ध्वान्तकृपाणयष्ट्या छिन्नेव मूले दिनवल्लिरुच्चैः ।
स्रस्तांशुमत्पक्वफला पतन्ती सद्यो जगद्व्याकुलमाततान ॥ ९ ॥
बिम्बेऽर्धमग्ने सवितुः पयोधौ प्रोद्भूतपोतभ्रममादधाने ।
लीलांशुकाष्ठाग्रविलम्बिताहःसांयात्रिकेणाम्बुनि मङ्क्षु मीषे ॥ १० ॥
भूयो जगद्भूषणमेव कर्तुं तप्तं सुवर्णोज्ज्वलभानुगोलम् ।
कराग्रसंदंशधृतं पयोधेश्चिक्षेप नीरे विधिहेमकारः ॥ ११ ॥
आवर्तगर्तान्तरसौ पयोधेर्न्यधीयत स्यन्दनवाहवेषैः ।
आकृष्य शूरोऽपि तमःसमूहैरहो दुरन्तो बलिनां विरोधः ॥ १२ ॥
प्रवासिना तद्विरहाक्षमेव सूर्येण पत्यारुणकान्तिदम्भात् ।
दत्त्वालये पत्रकपाटमुद्रां ययौ सहाम्भोजवनस्य लक्ष्मीः ॥ १३ ॥
दिशां समानेऽपि वियोगदुःखे पूर्वैव पूर्वं यदभूद्विवर्णा ।
तेनात्मनि प्रेम रवेरतुल्यं प्रवासिनोऽनक्षरमाचचक्षे ॥ १४ ॥
कामस्तदानीं मिथुनानि शीघ्रं प्रत्येकमेकः प्रजहार बाणैः ।
न लक्ष्यशुद्धिर्निबिडान्धकारे भविष्यतीत्याहितचेतसेव ॥ १५ ॥
अन्योन्यदत्तं बिसखण्डमास्ये रथाङ्गनाम्नोर्युगलं प्रयत्नात् ।
सार्धं वियोगाद्रुतमुत्पतिष्णोर्जीवस्य वज्रार्गलवद्बभार ॥ १६ ॥
लब्ध्वा पयोमज्जनपूर्वमब्धे रम्यांशुकप्रावरणं दिनान्ते ।
मित्रेण दूराध्वचरेण मुक्तं वर्त्माम्बरं ध्वान्तमलीमसं तत् ॥ १७ ॥

---

१. प्रतिपर्वतम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्मज्ज्य सिन्धौ सवितुर्दिनान्ते वृथोडुरत्नोद्धरणाय यत्नः ।
यत्तत्करस्पर्शमवाप्य जग्मुर्भूयोऽपि रत्नाकरमेव तानि ॥ १८ ॥
मित्रं[1] क्वचित्कूटनिधिर्निधत्ते वसूनि हत्वेत्युदितापवादः ।
संध्यामथोदीरितरागरक्तां शस्त्रीमिवान्तर्निदधेऽस्तशैलः ॥ १९ ॥
प्रदोषपञ्चास्यचपेटयोच्चैरुन्मुक्तमुक्तोज्ज्वलतारकौघः ।
ध्वस्तो नभःप्रौढगजस्य भास्वत्कुम्भोपरश्चेन्दुमिषादुदस्तः ॥ २० ॥
अथास्तसंध्यारुधिराणि पातुं विस्तारिताराभरदन्तुरास्यः ।
वेतालवत्कालकरालमूर्तिः समुज्जिजृम्भे सहसान्धकारः ॥ २१ ॥
अस्ताचलात्कालवलीमुखेन क्षिप्ते मधुच्छत्र इवार्कबिम्बे ।
उड्डीयमानैरिव चञ्चरीकैर्निरन्तरं व्यापि नभस्तमोभिः ॥ २२ ॥
अन्यं जलाधारमितः प्रविष्टे कुतोऽपि हंसे सहिते सहायैः ।
नभःसरोऽच्छेदगरीयसीभिश्छन्नं तमःशैवलमञ्जरीभिः ॥ २३ ॥
अस्तं गते भास्वति जीवितेशे विकीर्णकेशेव तमःसमूहैः ।
ताराश्रुबिन्दुप्रकरैर्वियोगदुःखादिव द्यौ रुदती रराज ॥ २४ ॥
तेजोनिरस्तद्विजराजजीवे गते जगत्तापिनि तिग्मरश्मौ ।
तद्वासहर्म्यं तमसा विशुद्ध्यै द्यौर्गोमयेनेव विलिम्पति स्म ॥ २५ ॥
नूनं महो ध्वान्तभयादिवान्तश्चित्ते निलीनं परिहृत्य चक्षुः ।
यच्चेतसैवेक्षणनिर्व्यपेक्षमद्राक्षुरुच्चावचमत्र लोकाः ॥ २६ ॥
आज्ञामतिक्रम्य मनोभवस्य यियासतां सत्वरमध्वगानाम् ।
पुनस्तदा नीलशिलामयोच्चप्राकारबन्धायितमन्धकारैः ॥ २७ ॥
लब्ध्वा समृद्धिं रतये स्वभावान्मलीमसानां मलिना भवन्ति ।
यत्पांसुला दस्युनिशाचराणामभून्मुदे केवलमन्धकारः ॥ २८ ॥
तथाविधे सूचिमुखाग्रभेद्ये जातेऽन्धकारे वसतिं प्रियस्य ।
हृत्कक्षलग्नस्मरदाहवह्निविज्ञातमार्गेव जगाम काचित् ॥ २९ ॥

---

१. यथा कश्चिच्छद्मनिधानो मित्रद्रोहो द्रव्यं गृहीत्वा मित्रं घातयति, रक्तलिप्तां कार्यकारिणीं छुरिकां च पिदधाति तद्वत्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संचार्यमाणा निशि कामिनीभिर्गृहाद्गृहं रेजुरमी प्रदीपाः ।
तेजोगुणद्वेषितया प्रवृद्धैस्तमोभिरान्ध्यं गमिता इवोच्चैः ॥ ३० ॥
दधुर्वधूभिर्निशि साभिलाषमुल्लासितप्रांशुशिखाः प्रदीपाः ।
प्रत्यालयं क्रुध्यदनङ्गमुक्तप्रोत्तप्तनाराचनिकायलीलाम् ॥ ३१ ॥
पूर्वाद्रिभित्त्यन्तरितोऽथ रागात्स्वज्ञापनायोपपतिः किलेन्दुः ।
पुरंदराशाभिमुखं कराग्रैश्चिक्षेप ताम्बूलनिभां स्वकान्तिम् ॥ ३२ ॥
ऐरावणेन प्रतिदन्तिबुद्ध्या क्षते तमोध्यामलपूर्वशैले ।
प्राची तटोत्थैरिव धातुचूर्णैरिन्दोः कराग्रैश्छुरिता रराज ॥ ३३ ॥
उदंशुमत्या कलया हिमांशोः कोदण्डयष्ट्यार्पितबाणमेव ।
भेत्तुं तमस्तोमगजेन्द्रमासीदाबद्धसंधान इवोदयाद्रिः ॥ ३४ ॥
व्यापारितेनेन्द्रककुब्भवान्या हत्वार्धचन्द्रेण तमोलुलायम् ।
कीलालधारा इव तस्य शोणाः प्रसारिता दिक्षु रुचः क्षणेन ॥ ३५ ॥
अर्धोदितेन्दोः शुकचञ्चुरक्तं वपुः स्तनाभोग इवोदयाद्रौ ।
प्राच्याः प्रदोषेण समागतायाः क्षतं नखस्येव तदाबभासे ॥ ३६ ॥
इन्दुर्यदन्यासु कलाः क्रमेण तिथिष्वशेषा अपि पौर्णमास्याम् ।
धत्ते स्म तद्वेद्मि गुणान्पुरंध्रीप्रेमानुरूपं पुरुषो व्यनक्ति ॥ ३७ ॥
उद्धर्तुमुद्दामतमिस्रपङ्काद्व्योमापि कारुण्यनिधिः पिशाङ्गः ।
भूद्धारलीलाकिणकालिकाङ्कः सिन्धोः शशी कूर्म इवोज्जगाम ॥ ३८ ॥
मुखं निमीलन्नयनारविन्दं कलानिधौ चुम्बति राज्ञि रागात् ।
गलत्तमोनीलदुकूलबन्धा श्यामाद्रवच्चन्द्रमणिच्छलेन ॥ ३९ ॥
एकत्र नक्षत्रपतिः स्वशक्त्या निशाचरोऽन्यत्र दुनोति वायुः ।
निमील्य नेत्राब्जमतः कथंचित्पत्युर्वियोगं नलिनी विषेहे ॥ ४० ॥
लेभे शशी शोणरुचं किरातैर्यो बाणविद्धेण इवोदयाद्रौ ।
अग्रेऽवदातद्युतिरङ्गनानां धौतः स हर्षाश्रुजलैरिवासीत् ॥ ४१ ॥

१. शरभिन्नमृग इव.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रात्रौ नभश्चत्वरमापतन्तमुद्वेल्लदुल्लोलभुजः पयोधिः।
तनूजमिन्दुं सुतवत्सलत्वादुत्सङ्गमानेतुमिवोल्ललास॥ ४२॥
तथाश्रुवानेन जगन्महोभिः कृतस्तनीयाञ्शशिनान्धकारः।
मन्ये यथास्यैव कलङ्कदम्भादनन्यगामी शरणं प्रपेदे॥ ४३॥
कुमुद्वतीविभ्रमहासकेलिं कर्तुं प्रवृत्ते भृशमोषधीशे।
प्रभावभाजां ज्वलति स्म रात्रौ महौषधीनां ततिरीर्ष्ययेव॥ ४४॥
दिवार्कतप्तैः कुमुदैः सुहृत्त्वात्प्रकाश्यमाने हृदये सितांशुः।
उत्खाततत्पक्षसरोजमूलो रुषेव रेजे लसमानरश्मिः॥ ४५॥
विलासिनीचित्तकरण्डिकायां जगद्भ्रमात्खिन्न इवाह्नि सुप्तः।
उत्थाप्यते स्म द्रुतमंशुदण्डैः संताड्य चन्द्रेण रतेर्भुजंगः॥ ४६॥
शशी जगत्ताडनकुण्ठितानां निशानपट्टः स्मरमार्गणानाम्।
उत्तेजितांस्तान्यदनेन भूयो व्यापारयामास जगत्सु कामः॥ ४७॥
कर्पूरपूरैरिव चन्दनाद्यैर्मालाकलापैरिव मालतीनाम्।
द्यौर्दक्षिणेनेव समं धरित्र्या प्रसाधिता चन्द्रमसा कराग्रैः॥ ४८॥
वपुः सुधांशोः स्मरपार्थिवस्य मानातपच्छेदि सितातपत्रम्।
अनेन कामास्पदमानिनीनां छाया परा कापि मुखे यदासीत्॥ ४९॥
किमप्यहो धार्ष्ट्यमचिन्त्यमस्य पश्यन्तु चन्द्रस्य कलङ्कभाजः।
यदेष निर्दोषतया जितोऽपि तस्थौ पुरस्तात्तरुणीमुखानाम्॥ ५०॥
यन्मन्दमन्दं बहलान्धकारे मनो जगामाभिमुखं प्रियस्य।
तन्मानिनीनामुदिते मृगाङ्के मार्गोपलम्भादिव धावति स्म॥ ५१॥
तावत्सती स्त्री ध्रुवमन्यपुंसो हस्ताग्रसंस्पर्शसहा न यावत्।
स्पृष्टा कराग्रैः कमला तथा हि त्यक्तारविन्दाभिससार चन्द्रम्॥ ५२॥
उपात्ततारामणिभूषणाभिरायाति पत्यौ निलये कलानाम्।
कान्ताजनो दिग्भिरिवोपदिष्टं प्रचक्रमेऽथ प्रतिकर्म कर्तुम्॥ ५३॥

---

१. कामः. २. तीक्ष्णीकरणपाषाणः. ३. नायकविशेषेण.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनैरमूल्यस्य कियन्ममेदं हैमं तुलाकोटियुगं निबद्धम् ।
इत्यम्बुजाक्ष्या नवयावकार्द्रं रुषेव रक्तं पदयुग्ममासीत् ॥ ५४ ॥
त्रिनेत्रभालानलदाहबिभ्यत्कंदर्पलीलानगरस्य हैमम् ।
प्राकारमुच्चैर्जघनस्य पार्श्वे बबन्ध काचिद्रशनाछलेन ॥ ५५ ॥
पयोधराणामुदयः प्रसर्पद्धारानुबन्धेन विलासिनीनाम् ।
विशेषतः कस्य मलीमसास्यो न दीप्रभावोन्नतिमाततान ॥ ५६ ॥
चन्द्रोदयोज्जृम्भितरागवार्धेर्वेलाग्रकल्लोलमिवोच्छलन्तम् ।
श्वासैः सकम्पं निशि मानिनीनां मेने जनो यावकरक्तमोष्ठम् ॥ ५७ ॥
कायस्थ एव स्मर एष कृत्वा दृग्लेखनीं कज्जलमञ्जुलां यः ।
शृङ्गारसाम्राज्यविभोगपत्रं तारुण्यलक्ष्म्याः सुदृशो लिलेख ॥ ५८ ॥
श्लक्ष्णं यदेवावरणाय दध्रे नितम्बिनीभिर्नवमुल्लसन्त्या ।
क्रोधादिवोच्छृङ्खलया तदङ्गकान्त्यात्मनान्तर्निदधे दुकूलम् ॥ ५९ ॥
आरोप्य चित्रा वरपत्रवल्लीः श्रीखण्डसारं तिलकं प्रकाश्य ।
नारङ्गपुंनागनिषेवणीया कयापि चक्रे नवकाननश्रीः ॥ ६० ॥
आदाय नेपथ्यमथोत्सुकोऽयं कान्ताजनः कान्तमतिप्रगल्भाः ।
मूर्ता इवाज्ञाः स्मरभूमिभर्तुरलङ्घनीयाः प्रजिघाय दूतीः ॥ ६१ ॥
गच्छ त्वमाच्छादितदैन्यमन्यव्याजेन तस्यापसदस्य पार्श्वे ।
ज्ञात्वाशयं ब्रूहि किल प्रसङ्गात्तथा यथास्मिल्लघिमा न मे स्यात् ॥६२॥
यद्वा निवेद्य प्रणयं प्रकाश्य दुःखं निपत्य क्रमयोरपि त्वम् ।
प्रियं तमत्रानय दूति यस्मात्क्षीणो जनः किं न करोत्यकृत्यम् ॥६३॥
नार्थी स्वदोषं यदि वाधिगच्छत्यालि त्वमेवात्र ततः प्रमाणम् ।
इत्याकुला काचिदनङ्गतापादभिप्रियं संदिदिशे वयस्याम् ॥६४॥(कुलकम्)
दृष्टापराधो दयितः श्रयन्ते प्राणाश्च मे सत्वरगत्वरत्वम् ।
तदत्र यत्कृत्यविधौ विदग्धा दूति त्वमेवेति जगाद काचित् ॥ ६५ ॥

---

१. प्रसर्पत्-हारानुबन्धेन; प्रसर्पत्-धारानुबन्धेन. २. न-दीप्रभावोन्नतिम्. दीप्रभावः कामोद्रेकः; नदी-प्रभावोन्नतिम्. ३. नारङ्गपुंनागा विटश्रेष्ठाः; (पक्षे) वृक्षविशेषाः. ४. नवका-आननश्रीः; नव-काननश्रीः. ५. पदयोः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वद्वासवेश्माभिमुखे गवाक्षे प्रतिक्षणं चक्षुरनुक्षिपन्ती।
त्वद्रूपमालिख्य मुहुः पतन्ती त्वत्पादयोः सा गमयत्यहानि॥ ६६॥
स्त्रीत्वादरुद्धप्रसरो यथास्यां शरैरमोघैः प्रहरत्यनङ्गः।
साशङ्कवत्केवलपौरुषस्थे तथा न दत्ते त्वयि किं करोमि॥ ६७॥
यत्कम्पते निःश्वसितैः कवोष्णं गृह्णाति यल्लोचनमुक्तमम्भः।
अवैम्यनङ्गज्वरजर्जरं तत्त्वद्विप्रयोगे हृदयं मृगाक्ष्याः॥ ६८॥
आविर्बभूवुः स्मरसूर्यतापे हारावलीमूलजटा यथाङ्गे।
त्वन्नामलीना गलकन्दलीयं तथाधिकं शुष्यति चञ्चलाक्ष्याः॥ ६९॥
स्तुत्वा दिने रात्रिमहश्च रात्रौ स्तौति स्म सा पूर्वमपूर्वतापात्।
संप्रत्यहो वाञ्छति तत्र तन्वी स्थातुं न यत्रास्ति दिनं न रात्रिः॥७०॥(युग्मम्)
प्रगल्भतां शीतकरः स्फुरन्तु कर्णोत्पलानि प्रसरन्तु हंसाः।
त्वद्विप्रलम्भज्वरभाजि तस्यां वीणाप्यरीणा रणतु प्रकामम्॥ ७१॥
इत्थं घने व्यञ्जितनेत्रनीरे प्रदर्शिते प्रेम्णि सखीजनेन।
क्षणान्मृगाक्षी हृदयेश्वरस्य हंसीव सा मानसमाविवेश॥ ७२॥(कुलकम्)
प्रकाशितप्रेमगुणैर्वचोभिराक्रम्य बद्धा हृदये सखीभिः।
आकृष्यमाणा इव निर्विलम्बं ययुर्युवानः सविधं वधूनाम्॥ ७३॥
आः संचरन्नम्भसि वारिराशेः श्लिष्टः किमौर्वाग्निशिखाकलापैः।
स्विच्चण्डचण्डद्युतिमण्डलाग्रप्रवेशसंक्रान्तकठोरतापः॥ ७४॥
अथाङ्कदम्भेन सहोदरत्वात्सोत्साहमुत्सङ्गितकालकूटः।
अङ्गानि यन्मुर्मुरवह्निपुञ्जभाञ्जीव मे शीतकरः करोति॥ ७५॥
इत्थं वियोगानलदाहमङ्गे निवेदयन्ती सुमुखी सखीनाम्।
समेयुषस्तत्क्षणमद्वितीयामजीजनत्कापि रतिं प्रियस्य॥७६॥ (विशेषकम्)
आयाति कान्ते हृदयं विधेयविवेकवैकल्यमगान्मृगाक्ष्याः।
तत्कालनिस्त्रिंशमनोभवास्त्रसंघातघातैरिव घूर्णमानम्॥ ७७॥
बाष्पाम्बुसंप्लावितपक्ष्मलेखं चक्षुः क्षणात्स्फारिततारकं च।
किं प्रेम मानं यदि वा मृगाक्ष्याः प्रियावलोके प्रकटीचकार॥ ७८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समुच्छ्वसन्नीवि गलद्दुकूलं स्खलत्पदं सक्कणकङ्कणं वा ।
प्रियागमे स्थानकमायताक्ष्या विसिस्मिये प्रेक्ष्य सखीजनोऽपि ॥ ७९ ॥
लावण्यमङ्गे भवती बिभर्ति दाहश्च मेऽभूद्व्यवधानतोऽपि ।
तद्ब्रूहि शृङ्गारिणि संप्रतीदं कुतस्त्वया शिक्षितमिन्द्रजालम् ॥ ८० ॥
जाड्यं[1] यदि प्राप्यमुरोजयोस्ते तद्वेपथुर्मानिनि मे कुतस्त्यः ।
इत्युच्चरंश्चाटुवचांसि कश्चित्प्रियामकार्षीच्च्युतमानवेगाम् ॥ ८१ ॥(युग्मम्)
मानस्य गाढानुनयेन तन्व्या निर्वासितस्यापि किमस्ति शेषः ।
इतीव बोद्धुं हृदि चन्दनार्द्रे व्यापारयामास करं विलासी ॥ ८२ ॥

सभ्रूभङ्गं करकिसलयोल्लासलीलाभिनीत-
प्रत्यग्रार्था प्रतिविदधती विस्मयस्मेरमास्यम् ।
सा दंपत्योरजनि मदनोज्जीविनी कापि गोष्ठी
यस्यां मन्ये श्रवणमयतां जग्मुरन्येन्द्रियाणि ॥ ८३ ॥

चन्द्रे सिञ्चति चान्दनैरिव रसैराशा महोभिः क्षणा-
दुन्मीलन्मकरन्दसौरभमिव प्रादाय दूतीवचः ।
सोत्कण्ठं समुपेत्य कैरवमिव प्रोल्लासि कान्तामुखं
स्वस्थाः केऽपि मधुव्रता इव मधून्यापातुमारेभिरे ॥ ८४ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये चतुर्दशः सर्गः ।

पञ्चदशः सर्गः ।

भर्गभालनयनानलदग्धं मन्मथं यदधिजीवयति स्म ।
कोऽपि कल्पतरुमध्वमृतं तत्पातुमारभत किंनरलोकः ॥ १ ॥
शीतदीधितिविकासि सुगन्धं पत्त्रवद्दशनकेसरकान्तम्[2] ।
स्त्रीमुखं कुमुदवन्मधुपानां पातुमत्र मधुभाजनमासीत् ॥ २ ॥
यावदाहितपरिस्रुति पात्रे चित्तमुत्तरलितं मिथुनानाम् ।
तावदन्तरिह बिम्बपदेन द्रागमज्जि वदनैरतिलौल्यात् ॥ ३ ॥
दन्तकान्तिशबलं सविलासाः साभिलाषमपिबन्मधु पात्रे ।
श्लिष्यमाणमिव सोदरभावाद्व्यक्तरागममृतेन तरुण्यः ॥ ४ ॥

१. शैत्यं स्थौल्यं च. २. दलयुक्तम्; (पक्षे) पत्रवल्लीमण्डनसमेतम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यामिनीप्रथमसंगमकाले शोणतां यदभजद्विजनाथः ।
तन्मधूनि ललनाकरपात्रे सोऽपि नूनमपिबत्प्रतिमूर्त्या ॥ ५ ॥
श्वासकीर्णनवनीरजरेणुच्छद्मना चषकसीधु पिबन्ती ।
कान्तपाणिपरिमार्जनशिष्टं मानचूर्णमपि कापि मुमोच ॥ ६ ॥
निष्ठितासवरसे मणिपात्रे पाणिशोणमणिकङ्कणभासः ।
कापिशायनधियाशु पिबन्ती काप्यहस्यत सखीभिरभीक्ष्णम् ॥ ७ ॥
यौवनेन मदनेन मदेन त्वं कृशोदरि सदाप्यसि मत्ता ।
तद्वृथायमधुना मधुधारापानकेलिकलनास्वभियोगः ॥ ८ ॥
पुण्डरीककमलोत्पलसारैर्यैस्त्रिवर्णमकरोत्किल वेधाः ।
किं तु कोकनदकान्तिचिकीर्षुर्नेत्रयुग्ममधुना मधुपानात् ॥ ९ ॥
अङ्गसादमवसादितधैर्यो यो ददाति मतिमोहनमुच्चैः ।
सोऽपि सस्पृहतया रमणीभिः सेव्यते कथमहो मधुवारः ॥ १० ॥
सीधुपानविधिना किल कालक्षेपमेव कलयन्मदनान्धः ।
कामिनीं रहसि कोऽपि रिरंसुश्चाटुचारुपदमित्थमवादीत् ॥ ११ ॥ (कुलकम्)
उल्ललास विनिमीलितनेत्रं यन्मृगीदृशि मधूनि पिबन्त्याम् ।
तन्निपीतचषके स्फुरिताक्ष्यां लज्जयेव गतमब्जमधस्तात् ॥ १२ ॥
मद्यमन्यपुरुषेण निपीतं पीयते कथमिवेति जिहासुः ।
चन्द्रबिम्बपरिचुम्बितमेतत्कामिना बहिरहस्यत काचित् ॥ १३ ॥
किं न पश्यति पतिं तव पार्श्वे धृष्ट एष सखि शीतमयूखः ।
आसवान्तरवतीर्य यदुच्चैः पातुमाननमुपैति पुरस्तात् ॥ १४ ॥
त्वत्प्रदष्टमथवा कथमग्रे दर्शयिष्यति मुखं स्ववधूनाम् ।
इत्युदीक्ष्य चषके शशिबिम्बं काप्यगद्यत सनर्म सखीभिः ॥ १५ ॥ (युग्मम्)
स्त्रीमुखानि च मधूनि च पीत्वा छिन्निलेखमपरः कुतुकेन ।
अन्तरं महदिह प्रतिपद्य प्रीतिमासवरसेषु मुमोच ॥ १६ ॥
बिम्बितेन शशिना सह नूनं पीवरोरुभिरपायित मद्यम् ।
यत्तदीयहृदयान्तरलीनैर्निर्गतं सपदि मन्युतमोभिः ॥ १७ ॥

---

1. प्राङ्गणोपविष्टा.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामहेतुरुदितो मधुदाने गोत्रभेदमकरोत्पुरतोऽन्यः ।
संगताप्यपुरुषोत्तमबुद्ध्या श्रीर्न्यवर्तत ततो वनितायाः ॥ १८ ॥
ह्रीविमोहमपनीय निरस्यन्नन्तरीयमपि चुम्बितवक्त्रः ।
सस्पृहं प्रणयवानिव भेजे कामिनीभिरसकृन्मधुवारः ॥ १९ ॥
जग्मतुर्मुहुरलक्तकतिक्तौ यद्विदंशपदवीमधरोष्ठौ ।
तेन मद्यमधिकं स्वदते स्म स्मेरमन्मथवते मिथुनाय ॥ २० ॥
क्षालितोऽपि मधुना परिपीतोऽप्याननेन दशनैर्दलितोऽपि ।
स्वां मुमोच न रुचिं मिथुनानां यत्ततः कथमभूदधरोऽयम् ॥ २१ ॥
त्यज्यतां पिपिपिपिपिप्रिय पात्रं दीयतां मुमुमुखासव एव ।
इत्यमन्थरपदस्खलितोक्तिः प्रेयसी मुदमदाद्दयितस्य ॥ २२ ॥
कापिशायनरसैरभिषिच्य प्रायशः सरलतां हृदि नीते ।
भ्रूलतासु रचनासु च वाचां सुभ्रुवां वनमभूत्कुटिलत्वम् ॥ २३ ॥
प्रोल्लसन्मृगदृशां मदनो हृद्यालवाल इव सीधुरसेन ।
भ्रूलताविलसितैरिह साक्षात्कस्य हास्यकुसुमं न चकार ॥ २४ ॥
तोषितापि रुषमाहितरोषाप्याप तोषमबला मधुपानात् ।
सर्वथा हि पिहितेन्द्रियवृत्तिर्वाम एव मदिरापरिणामः ॥ २५ ॥
भ्रूलता ललितलास्यमकस्मात्स्मेरमास्यमवशानि वचांसि ।
सुभ्रुवां चरणयोः स्खलितानि क्षीबतां भृशमनक्षरमूचुः ॥ २६ ॥
भिन्नमानदृढवज्रकवाटेनास्यता जवनिकामिव लज्जाम् ।
तत्क्षणाञ्चितशरासनचण्डः सीधुना प्रकटितो विषमेषुः ॥ २७ ॥
प्रावृताः शुचिपटैरतिमृद्वीः स्पर्शदीपितमनोभवभावाः ।
प्रेयसीः समगुणा इह शय्याः कामिनो रतिसुखाय विनिन्युः ॥ २८ ॥
कान्तकान्तदशनच्छददेशे लग्नदन्तमणिदीधितिरेका ।
आबभावुपजनेऽपि मृणालीनालकैरिव रसं प्रपिबन्ती ॥ २९ ॥
प्रेयसा धृतकरापि चकम्पे चुम्बितापि मुखमाक्षिपति स्म ।
व्याहृतापि बहुधा सकृदूचे किंचिदप्रकटमेव नवोढा ॥ ३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्तरीयमपकर्षति नाथे प्रावरिष्ट हृदयं स्वकराभ्याम् ।
अन्तरीयमपरा पुनराशु भ्रष्टमेव न विवेद नितम्बात् ॥ ३१ ॥
कामिना द्रुतमपास्य मुखान्तर्धानवस्त्रमिव कञ्चुकमस्याः ।
व्यञ्जितः पृथुपयोधरकुम्भो दुःसहो मदनगन्धगजेन्द्रः ॥ ३२ ॥
पीनतुङ्गकठिनस्तनशैलैराहतोऽपि न मुमूर्छ युवा यत् ।
तत्र नूनमधरामृतपानप्रेम कारणमवैम्यबलायाः ॥ ३३ ॥
वक्षसा पृथुपयोधरभारं निष्पिपेष हृदयं दयितायाः ।
कोऽपि कर्तुमिह चूर्णमिहान्तर्लीनदुर्ललितकोपकणानाम् ॥ ३४ ॥
श्लिष्टमिष्टवनितावपुरादौ नापनेतुमपरः प्रशशाक ।
प्रीतिभिन्नपुलकाङ्कुरशङ्कुप्रोतविग्रह इवाग्रहतोऽपि ॥ ३५ ॥
श्लिष्यतापि जघनस्तनमुच्चैरन्तरे प्रणयिनाहमपास्तम् ।
सुभ्रुवो वलिमिषादिह मध्यं भ्रूविभङ्गमतनिष्ट रुषेव ॥ ३६ ॥
योषितां सरसपाणिजरेखालंकृतो घनतरः स्तनभारः ।
आबभौ प्रणयिसंगमहर्षोच्छ्वासवेगभरभिन्न इवोच्चैः ॥ ३७ ॥
कर्कशस्तनयुगेन न भग्नास्त्वन्नखा हृदि न वा व्यथितस्त्वम् ।
इत्युदारनवयौवनगर्वा कापि कान्तमधि गर्वमहासीत् ॥ ३८ ॥
सुप्त इत्यतिविविक्ततया स्वं संप्रकाश्य निलयः कुतुकेन ।
ऐक्षतेव सुतनो रतचित्रं बोधितैकतरदीपकनेत्रः ॥ ३९ ॥
नात्र काचिदपरा परिणेतुः प्रीतिधाम वसतीति पुरंध्री ।
ईर्ष्ययेव परिरब्धवतोऽन्तर्द्रष्टुमस्य हृदयं प्रविवेश ॥ ४० ॥
कुन्तलाञ्चनविचक्षणपाणिः प्रोन्नमय्य वदनं वनितायाः ।
कोऽपि लोलरसनाञ्चललीलालालनाचतुरमोष्ठमधासीत् ॥ ४१ ॥
पीवरोच्चकुचतुम्बकचुम्बिन्यापुपोष कमितुः करदण्डे ।
वल्लकीत्वमनुताडिततन्त्रीक्वाणकूजितगुणेन पुरंध्री ॥ ४२ ॥
अङ्गसंग्रहपरः करपातं मध्यदेशमभितो विदधानः ।
योषितः स्म विजिगीषुरिवान्यः क्षिप्रमाक्षिपति काञ्चनकाञ्चीम् ॥४३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्पर्शभाजि न परं करदण्डे कामिनः प्रकटकण्टकयोगः ।
ईषदुच्छ्वसितकोमलनाभीपङ्कजेऽपि सुदृशोऽद्भुतमासीत् ॥ ४४ ॥
संचरन्निति इतो नतनाभीकूपके निपतितः प्रियपाणिः ।
मेखलागुणमवाप्य मदान्धोऽप्यारुरोह जघनस्थलमस्याः ॥ ४५ ॥
नीविबन्धभिदि वल्लभपाणौ सुभ्रुवः कलकलो मणिकाञ्च्याः ।
नोदितालिसुरतोत्सवलीलारम्भसंभ्रमपटुः पटहोऽभूत् ॥ ४६ ॥
नीविबन्धमतिलङ्घ्य कराग्रे कामिनः प्रसरतीह यथेच्छम् ।
भर्त्सना स्मितमलीकतरा इत्याख्यदक्षतमनङ्गवतीनाम् ॥ ४७ ॥
पाणिना परिमृशन्नबलोरुस्तम्भमञ्चितकलापगुणेन ।
कश्चिदाकलितमारमहेभं मोचयन्निव रतेषु रराज ॥ ४८ ॥
भ्रूकपोलचिबुकाधरचक्षुश्चूचुकादिपरिचुम्बनदक्षः ।
कोऽपि कोपितवधूप्रतिषिद्धां सान्त्वयन्निव रतिं विरराज ॥ ४९ ॥
सीत्कृतानि कलहंसकनादः पाणिकङ्कणरणत्कृतमुच्चैः ।
ओष्ठखण्डनमनोभवसूत्रे भाष्यतां ययुरमूनि वधूनाम् ॥ ५० ॥
गण्डमण्डलभुवि स्तनशैले नाभिगह्वरतले च विहृत्य ।
सश्रमा इव दृशो दयितस्यानङ्गवेश्मनि विशश्रमुरासाम् ॥ ५१ ॥
नोत्पपात पतिता नवकामिन्यूरुमूलफलके खलु दृष्टिः ।
कामिनः प्रमदकारिणि रङ्कस्येव गूढमणिभाजि निधाने ॥ ५२ ॥
पूर्वशैलमिव तुङ्गकुचाग्रं प्रेयसि श्रयति लोचनचन्द्रे ।
प्लावितं मनसिजार्णवनीरैः सुभ्रुवो जघनमण्डलमुच्चैः ॥ ५३ ॥
प्रेङ्खति प्रियतमे निरवद्यातोद्यवाद्यपटुकूजितकण्ठे ।
चित्रलास्यलयवल्गु नितम्बो वल्गति स्म सुरते वनितायाः ॥ ५४ ॥
ओष्ठखण्डननखक्षतिवक्षस्ताडनस्तनकचग्रहणाद्यैः ।
मत्सरादिव मिथो मिथुनानां कामकेलिकलहस्तुमुलोऽभूत् ॥ ५५ ॥
सोत्सवैः करणसंपरिवर्तैश्चाटुभिश्च मणितैः स्तनितैश्च ।
पूर्वसंस्तुतमपि च्युतलज्जं कामिनां रतमपूर्वमिवासीत् ॥ ५६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अश्रुगद्गदगिरामिह तावद्योषितां रतविधौ करुणोक्तिः।
तानि शुष्करुदितान्यपि यूनां भेजिरे श्रवणयोरमृतत्वम्॥ ५७॥
आहतानि पुरुषायितमुच्चैर्धाष्टर्यमीदृगुपमर्दसहत्वम्।
कामिभिः क्षणमवेक्ष्य वधूनामन्यतैव सुरते प्रतिपेदे॥ ५८॥
भग्नपाणिवलया च्युतमाल्या भिन्नतारमणिहारलतापि।
ताम्यति स्म सुरते न कथंचित्प्रेमकार्मणवशेव कृशाङ्गी॥ ५९॥
स्पष्टधाष्टर्यमविरोधितवाञ्छं मञ्जुकूजितमनादृतदेहम्।
चित्रचाटुरुचि यत्प्रणयिन्यास्तत्प्रियस्य रतये रतमासीत्॥ ६०॥
मीलितेक्षणपुटै रतिसौख्यं योषितामनुभवद्भिरभीष्टैः।
निर्निमेषनयनैकविभोग्यं तत्रिविष्टपसुखं लघु मेने॥ ६१॥
संवितेनुरधिकं मिथुनानां प्रीतिमप्यवमतात्मसुखानि।
प्रेमनिर्भरपरस्परचित्ताराधनोत्सवरतानि रतानि॥ ६२॥
भूरिमद्यरसपानविनोदैर्गाढशून्यहृदयानि तदानीम्।
कान्यपि स्म मिथुनानि न वेगात्प्राप्नुवन्ति रतकेलिसमाप्तिम्॥ ६३॥
उत्थितान्यपि रतोत्सवलीलाकौशलापहृतनेत्रमनांसि।
युक्तमेव मिथुनानि रतान्तेऽन्योन्यवस्त्रवरिवर्तमकार्षुः॥ ६४॥
प्रेयसीपृथुपयोधरकुम्भे वल्लभस्य शुशुभे नखपङ्क्तिः।
चारुतामणिनिधाविव मुद्रावर्णपद्धतिरनङ्गनृपस्य॥ ६५॥
संप्रविश्य वलभीषु गवाक्षैर्वीक्ष्य चोन्नतपयोधरमङ्गम्।
कामतप्त इव कामधुनीनामाचचाम पवनः श्रमवारि॥ ६६॥
पश्यति प्रियतमेऽवनतास्या कान्तदष्टदशनच्छदबिम्बम्।
ऐक्षतेव हृदयं त्रपमाणा स्त्री पुनः स्मरशरव्रणचिह्नम्॥ ६७॥
गन्तुमारभत कोऽपि रतान्ते गृह्यमाणवसनान्तरदृष्टम्।
ऊरुदण्डमवलम्ब्य तरुण्याः सश्रमोऽपि रतवर्त्मनि भूयः॥ ६८॥
चुम्बनेन हरिणीनयनानामोष्ठतो मिलितयावकरागम्।
ईर्ष्ययेव दयितेक्षणयुग्मं चुम्बति स्म समयेऽपि न निद्रा॥ ६९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं विलोक्य मधुपानविनोदमत्त-
कान्तारतोत्सवरतान्स्पृहयेव लोकान् ।
चन्द्रोऽपि कैरवमभूनि समं रजन्या
पीत्वास्तशैलरतिकाननसंमुखोऽभूत् ॥ ७० ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये पञ्चदशः सर्गः ।

---

षोडशः सर्गः ।

सेवायै समयविदागतः सुराणां संदोहः क्षुभितपयोधिमन्द्रनादः ।
धर्माय त्रिभुवनभानवेऽभ्युदेतुं यामिन्याः परिणतिमित्थमाचचक्षे ॥ १ ॥
रथ्यासु त्वदमलकीर्तिकीर्तनेषु प्रारब्धेष्वभिनवमागधैरिदानीम् ।
व्योमाग्रात्पतति मुदामरप्रयुक्तः पुष्पाणां प्रकर इवैष तारकौघः ॥ २ ॥
संभोगं प्रविदधता कुमुद्वतीभिश्चन्द्रेण द्विगुणित आत्मनः कलङ्कः ।
तन्नूनं रतिपरमम्बरान्तलग्नं यात्येनं समवगणय्य यामिनीयम् ॥ ३ ॥
गाढस्त्रीभुजपरिरम्भनिर्भरोद्यन्निद्राणि स्फुटपटहारवैश्च भूयः ।
वर्तन्ते विघटितसंपुटानि यूनां भ्रूकुंसप्रगुणगुणानि लोचनानि ॥ ४ ॥
दृग्दोषव्यपनयहेतवे सगर्वा निर्वाणोल्मुकामिव कर्परं पुरस्तात् ।
वक्त्रेन्दोरुपरि तवावतार्य दूरं द्यौरेषा क्षिपति सलक्ष्म चन्द्रबिम्बम् ॥ ५ ॥
ते भावाः करणविवर्तनानि तानि प्रौढिः सा मृदुमणितेषु कामिनीनाम् ।
एकैकं तदिव रताद्भुतं स्मरन्तो धुन्वन्ति श्वसनहताः शिरांसि दीपाः ॥६॥
यद्दोषोपचिततमोऽपि ते कथासु प्रारब्धास्वमरवरैर्विलीयतेऽस्मिन् ।
तन्मन्ये तव गुणकीर्तनानि नाम साधर्म्योदयमपि न द्विषां सहन्ते ॥ ७ ॥
राजानं जगति निरस्य सूरसूतेनाक्रान्ते प्रसरति दुन्दुभेरिदानीम् ।
यामिन्याः प्रियतमविप्रयोगदुःखैर्हृत्संधेः स्फुटत इवोद्भटः प्रणादः ॥ ८ ॥
चेतस्ते यदि चपलं पुरानुशेते तन्मानिन्यमुमधुनापि मानयेशम् ।
आकर्ण्य ध्वनितमितीव ताम्रचूडस्यानम्रं प्रियमुषसि प्रपद्यतेऽन्या ॥ ९ ॥
संदष्टे प्रियविधिनाधरीकृतेऽस्मिञ्शीतांशौ हिमपवनार्तपान्थवक्त्रैः ।
सीत्कारं प्रवितनुते विधूतहस्ता मुग्धापि क्षणरजनी विवृत्तलक्ष्मीः ॥१०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विध्वस्तां निजवसतिं विलोक्य कोपान्निष्क्रान्ता किल कमलेयमोषधीशात् ।
निःश्रीकं तमिव शुचावलोकयन्ती स्वं तेजस्त्यजति च पङ्क्तिरोषधीनाम् ११
संभोगश्रमसलिलैरिवाङ्गनानामङ्गेषु प्रशममितं मनोभवाग्निम् ।
उन्मीलज्जलजरजःकणान्किरन्तः प्रत्यूषे पुनरनिलाः प्रदीपयन्ति ॥ १२ ॥
युष्माभिः प्रकटितकामकौशलाभिः साध्वेतान्निधुवनयुद्धमत्र सोढम् ।
इत्युक्त्वा स्पृशति मुदेव भृङ्गनादैः प्रत्यूषानिललहरी वधूः सखीव ॥१३॥
प्रागल्भ्यं विहितममीभिरत्ययेऽह्नां नाथस्य प्रतिगृहमित्यसौ रुषेव ।
प्रत्यूषः पवनकरेण धूमकेशेष्वाकृष्य क्षपयति संप्रति प्रदीपान् ॥ १४ ॥
मूर्ध्नीवोद्गतपलितायमानरश्मौ चन्द्रेऽस्मिन्नमति विभावरीजरत्याः ।
अन्योन्यं विहगरवैरिवोल्लसन्त्यो दिग्वध्वो विदधति विप्लवाट्टहासान्॥१५॥
आसज्योद्धृतचरणापरार्धमेताः कण्ठाग्रं मुकुलितलोचनास्तरुण्यः ।
प्रस्थातुं शयनतलोत्थितानभीष्टान्याचन्ते प्रकटितचाटु चुम्बनानि ॥ १६ ॥
पद्मिन्यामहनि विधाय कोषपानं चिक्रीडुर्निशि यदमी कुमुद्वतीभिः ।
तद्वर्णैर्न परमुदीरयन्ति भृङ्गाः कृष्णत्वं निजचरितैरपि प्रकामम् ॥ १७ ॥
पर्यस्ते दिवसमणौ न काचिदासीद्बाधा वस्तिमिरपिशाचगोचराणाम् ।
इत्याशाः पतितहिमद्रवाश्रु लोकान्वात्सल्याद्विहगरुतैरिवालपन्ति ॥ १८ ॥
भात्येषा सुभगतम क्षपापवृत्तौ विच्छाया नभसि निशाकरस्य कान्तिः ।
एतं ते मुखमुकुरं प्रमार्ज्य लक्ष्म्या प्रक्षिप्ता स्वगुणादिदृक्षयेव भूतिः ॥ १९ ॥
तन्नूनं प्रियविरहार्तचक्रवाक्याः कारुण्यान्निशि रुदितं घनं नलिन्या ।
यत्प्रातर्जललवलाञ्छितारुणानि प्रेक्ष्यन्ते कमलविलोचनानि तस्याः ॥२०॥
स्रस्तोडुक्रमपरिणामिपाण्डुपत्त्रे व्योमाग्रे द्रुम इव संश्रये खगानाम् ।
उन्मीलत्किसलयविभ्रमं भजन्ते जम्भारेः ककुभि विभाकरस्य भासः ॥२१॥
भस्मास्थिप्रकरकपालकश्मलोऽग्रे यः संध्यावसरकपालिनावकीर्णः ।
तं भास्वत्युदयति चन्द्रिकोडुचन्द्रव्याजेनावकरमपाकरोति कालः ॥ २२ ॥
निःशेषं हृतजनजातरूपवृत्तेर्ध्वान्तस्य प्रविरचितोऽमुनावकाशः ।
इत्युच्चैर्गगनमुदस्तमण्डलाग्रो विच्छिन्नश्रवणकरं करोति भानुः ॥ २३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरम्भोच्छलिततुरंगकुञ्जरश्रीः क्षुण्णोद्यन्मकरकुलीरमीनरक्तः ।
देवार्थं विदधदहीनरश्मिरब्धेरुन्मज्जत्ययमहिमांशुमन्दराद्रिः ॥ २४ ॥
पाथोधेरुपजलतैलमुत्थितार्चिर्ध्वान्तच्छिद्रजति रविः प्रदीपलक्ष्मीम् ।
यस्याभात्युपरि पतङ्गपातभीत्या विन्यस्तं मरकतपात्रवद्विहायः ॥ २५ ॥
दीपेनाम्बरमणिना रथाश्वदूर्वं संयोज्यारुणघुसृणं खमेव पात्रम् ।
नक्षत्राक्षतनिकरं पुरः क्षिपन्ती प्राचीयं प्रगुणयतीव मङ्गलं ते ॥ २६ ॥
पाथोधेरधिगतविद्रुमांशुभिर्वा सिन्धुस्त्रीकरकलितार्घकुङ्कुमैर्वा ।
लोकानामयमनुरागकन्दलैर्वा प्रत्यूषे वपुररुणं बिभर्ति भानुः ॥ २७ ॥
उत्तिष्ठ त्रिजगदधीश मुञ्च शय्यामात्मानं बहिरुपदर्शयाश्रितानाम् ।
तिग्मांशुर्द्रुतमधिरोहतु त्वदीयैस्तेजोभिर्विजित इवोदयाद्रिदुर्गम् ॥ २८ ॥
आयातो दुरधिगमामतीत्य वीथीमासीनः क्षणमुदयाद्रिभद्रपीठे ।
प्रारब्धाभ्युदयमहोत्सवो विवस्वान्दिक्कान्ताः करघुसृणैर्विलिम्पतीव ॥२९॥
मार्तण्डप्रखरकराग्रपीड्यमानादेतस्मादमृतमिव च्युतं सुधांशोः ।
मथ्नन्त्यो दधि कलशीषु मेघमन्द्रैः प्रध्वानैः शिखिकुलमुत्कयन्ति गोप्यः ॥
यामिन्यामनिशमनीक्षितेन्दुबिम्बं व्यावृत्ते प्रणयिनि भास्करे मुदेव ।
सोल्लासं मधुकरकज्जलैरिदानीं पद्मिन्यः सरसिजनेत्रमञ्जयन्ति ॥ ३१ ॥
सिन्दूरद्युतिमिह मूर्ध्नि कुङ्कुमानां वक्त्रेन्दौ वसनगतां कुसुम्भशोभाम् ।
बिभ्राणा नवतरणित्विषोऽपि साध्वीर्वैधव्येऽभिजनवधूर्विदूषयन्ति ॥ ३२ ॥
स्वच्छन्दं विधुमभिसार्य यत्प्रविष्टा प्रातः श्रीः कमलगृहे निरस्य मुद्राम् ।
भूयोऽपि प्रियमनुवर्तते दिनेशं कः स्त्रीणां गहनमवैति तच्चरित्रम् ॥ ३३ ॥
प्रस्थातुं तव विहितोद्यमस्य भर्तुः प्रोत्सर्पद्ध्वदनविलोलनीलपत्रः ।
प्राच्यायं समुचितमङ्गलार्थमग्रे सौवर्णः कलश इवांशुमानुदस्तः ॥ ३४ ॥
तद्द्वारि द्विरदमदोक्षिते मिथोऽङ्गसंघट्टच्युतमणिमण्डिते नृपाणाम् ।
राज्यश्रीश्चलतुरगाङ्घ्रि तूर्यनादैर्व्यालोलध्वजकपटेन नृत्यतीव ॥ ३५ ॥
मार्तण्डप्रखरकराग्रटङ्कघातप्रक्षुण्णस्थपुटतमस्तुषारकूटाः ।
उद्योगप्रगुणचमूचरस्य योग्याः प्रस्थातुं तव ककुभोऽधुना बभूवुः ॥ ३६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आयाति प्रबलतरप्रतापपात्रे नेत्राणां दिवसकृति त्वयीव मैत्रीम्।
संतापः प्रकटतरो भवत्विदानीं शत्रूणामिव तपनाश्मनां गणेषु ॥ ३७ ॥
इत्थं स त्रिदशजनस्य मन्दराद्रिक्षुब्धाम्भोनिनदसमां निशम्य वाणीम्।
उत्तस्थौ सितवसनोर्मिरम्यतल्पाद्दुग्धाब्धेः पवनतरङ्गितादिवेन्दुः ॥ ३८ ॥
उत्तिष्ठन्नुदयगिरेरिवेन्दुरस्माद्देवेन्द्रान्मुकुलितपाणिपङ्कजाग्रात्।
सोऽद्राक्षीदथ नमतो नगोपमेभ्यः पीठेभ्यो भुवि सरितामिव प्रवाहान् ३९
कारुण्यद्रविणनिधे निधेहि दृष्टिं सेवार्थी भवतु जनश्चिरात्कृतार्थः।
यच्चिन्ताभ्यधिकफलान्यसौ ददाना तां चिन्तामणिगणनामपाकरोति ॥ ४०
इत्युच्चैर्निगदति वेत्रिणामधीशे श्रीधर्मः समुचितविन्नरामरेन्द्रान्।
भ्रूदृष्टिस्मितवचसामसौ प्रसादैः प्रत्येकं सदसि यथार्हमाचचक्षे ४१ (कुलकम्)
निःशेषं भुवनविभुर्विभातकृत्यं कृत्वार्यं कृतसमयानुरूपवेषः।
आरुह्य द्विरदमुदग्रदानमुच्चैः प्रत्यग्रं सुकृतमिवाथ संप्रतस्थे ॥ ४२ ॥
भास्वन्तं द्युतिरिव कीर्तिवद्गुणाढ्यं सोत्साहं सुभटमिवोत्सुका जयश्रीः।
दुर्धर्षा भुवनविसर्पिणी दुरापा तं सेना त्रिभुवननाथमन्वियाय ॥ ४३ ॥
अक्षिप्तप्रलयनटोद्भटाट्टहासैः प्रेङ्खद्भिः पटुपटहारवैः प्रयाणे।
एकत्रोच्छलितरजश्छलेन सर्वाः संसक्ता इव ककुभो भयाद्बभूवुः ॥ ४४ ॥
मेण्ठेन द्विपमपनीतबन्धमन्यं प्रेक्ष्यैतत्प्रमथनमांसलाभिलाषः।
प्रश्च्योतद्द्विगुणमदाम्बुधारमुच्चैरालानद्रुवरमिभो हठादभाङ्क्षीत् ॥ ४५ ॥
तिष्ठन्ती मृदुलभुजंगराजमूर्धन्युद्वोढुं दृढपदमक्षमा क्षमा ते।
कर्णान्तेऽभिहित इतीव भृङ्गदूतैर्नागेन्द्रः पथि पदमन्थरं जगाम ॥ ४६ ॥
भ्रश्यन्त्याश्चरणभरात्करावलम्बं ये दातुं भुव इव लम्बमानहस्ताः।
कर्णान्तध्वनदलिकोपकूणिताक्षास्ते जग्मुः पथि पुरतोऽस्य वारणेन्द्राः ४७
संचेलुः प्रचलितकर्णताललीलावातोर्मिव्यतिकरशीतलैः समन्तात्।
संघट्टभ्रमभरमूर्छिता इवाशाः सिञ्चन्तः पृथुकरसीकरैः करीन्द्राः ॥ ४८ ॥
अश्रान्तं श्रिय इव चारुचामराणां यः पश्चाद्विचरति लोलवालधीनाम्।
क्रामद्भिर्भुवमभितो जवेन वाहैः स व्यक्तं कथमिव लङ्घितो न वायुः ॥४९

१. हस्तिपकेन. २. पृथ्वी.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्योन्यस्खलनवशादयःखलीनप्रोद्गच्छज्ज्वलनकणच्छलेन सान्द्रम् ।
कान्तारे विदधति भूरिवेगबाधां गन्धर्वा निदधुरिव क्रुधा दवाग्निम्॥५०॥
आक्रान्ते चटुलतुरंगपुंगवाङ्घ्रिक्षुण्णोर्वीवलयरजोभिरन्तरिक्षे ।
दिङ्मोहात्पतित इव क्वचित्तदानीं तिग्मांशुर्न नयनगोचरीबभूव ॥ ५१ ॥
उत्फालैर्द्रुतमवटस्थलीरलङ्घ्यास्तद्वाहैर्गतिरभसेन लङ्घयद्भिः ।
सर्वत्र [1]श्वसनकुरङ्गपुंगवोत्था संभ्रान्तिर्मनसि समादधे न केषाम् ॥ ५२ ॥
उद्वल्गत्तुरगतरङ्गिताग्रसेनासंचारक्षतशिखरोच्चयच्छलेन ।
विन्ध्याद्रेः प्रथमकृताध्वसंनिरोधस्योल्लूनं शिर इव सैनिकैः प्रकोपात् ५३
उत्खाताचलशिखरैः पुरः परागेणाश्वीयैः स्फुटमवटेषु पूरितेषु ।
सा बुद्धिः खलु रथिनो यदस्य पश्चात्प्रस्थाने सुगमतरो बभूव मार्गः ॥५४
प्राग्भागं द्विरदभयादुदग्रदन्तः प्रोत्सृज्य प्रकटितघर्घरोरुनादः ।
उत्कूर्दन्विकटपदैरितस्ततोऽग्रे [2]दासेरः पटुनटकौतुकं चकार ॥ ५५ ॥
सर्वाशाद्विपमदवाहिनीषु सेनासंचारोच्छलितरजःस्थलीकृतासु ।
उड्डीनैर्भ्रमरकुलैरिवावकीर्णं व्योमासीदविरलदुर्दिनच्छलेन ॥ ५६ ॥
आतङ्काकुलशबरीवितीर्णगुञ्जापुञ्जेषु ज्वलितदवानलभ्रमेण ।
कारुण्यामृतरसवर्षिणीं स गच्छंश्चिक्षेप प्रभुरसकृद्वनेषु दृष्टिम् ॥ ५७ ॥
संसर्पद्बलभररुद्धसिन्धुवेगं प्रोद्दामद्विरदतिरस्कृताग्रशृङ्गम् ।
आक्रम्य ध्वजविजितोरुकन्दलीकं विन्ध्याद्रिं स विभुगुणैरधश्चकार ॥५८
सर्पत्सु द्विरदबलेषु नर्मदायाः संजातं सपदि पयः प्रतीपगामि ।
वाहिन्यो मदजलनिर्मितास्त्वमीषामुत्सङ्गं द्रुतमुदधेरवापुरेव ॥ ५९ ॥
मद्दन्तद्वयवलभीनिवासलीलालोलेयं नियतमनन्यगा तु लक्ष्मीः ।
सामर्षप्रसरमितीव चिन्तयन्तो दन्तीन्द्राः सरिति बभञ्जुरम्बुजानि ॥ ६० ॥
आ स्कन्धं जलमवगाह्य दीर्घदन्तैरामूलोद्धृतसरलारविन्दनालाः ।
आलोड्याखिलमुदरं तरङ्गवत्याः कृष्टान्त्रावलय इव द्विपा विरेजुः ॥६१॥
उन्मीलन्नवनलिनीमराललीलालंकारव्यतिकरसुन्दरीं समन्तात् ।
आनन्दोदवसितदेहलीमिवार्थश्रीसिद्धेः सरितमलङ्घयत्स रेवाम् ॥ ६२ ॥

१. पवनवाहनीभूतहरिणश्रेष्ठोत्था. २. उष्ट्रः.

For Private and Personal Use Only

एकान्तं सुरसवरार्थमाश्रयन्ती प्रेक्ष्योच्चैरतनुपयोधराग्रलक्ष्मीः ।
स्त्रीरत्नोत्सुकमनसापि तेन विन्ध्यारण्यानी गुणगुरुणा स्थिरं सिषेवे ॥६३॥
उत्तुङ्गद्रुमवलभीषु पानगोष्ठीव्यासक्तैर्मधुपकुलैर्निलीनमुक्तम् ।
बिभ्राणा मधु मधुरं प्रसूनपात्रे गेहेव द्रुतमटवी बलैः प्रमुक्ता ॥ ६४ ॥
वाहिन्यो हिमसलिलाः सशाद्वला भूर्यत्रोच्चैर्द्विरदभरक्षमा द्रुमाश्च ।
संसिद्ध्यै द्रुतमटतो बभूवुरध्वन्यावासाः कतिचिदमुष्य तत्र तत्र ॥ ६५ ॥
द्राघीयांसमपि जवान्वितान्तदुर्गे गव्यूतिप्रमितमिव व्यतीत्य मार्गम् ।
सोत्कण्ठं हृदयमसौ दधत्प्रियायां वैदर्भे विषयमथ प्रभुः प्रपेदे ॥ ६६ ॥
आरूढस्तुरगमिभं सुखासनं वा प्रोल्लङ्घ्य द्रुतमसमं सुखेन मार्गम् ।
देशेऽस्मिन्महति पुनर्वसुप्रधाने व्योम्नीव द्युमणिरगादसौ रथस्थः ॥ ६७ ॥
प्रध्वानैरनुकृतमन्द्रमेघनादैः पाण्डित्यं दधति शिखण्डिताण्डवेषु ।
ग्रामीणैर्घन इव वीक्षिते सहर्षं वज्रीव प्रभुरधिकं रथे रराज ॥ ६८ ॥
क्षेत्रश्रीरधिकतिलोत्तमा सुकेश्यः कामिन्यो दिशि दिशि निष्कुटाः सरम्भाः ।
इत्येनं ग्रथितमशेषमप्सरोभिः स्वर्गादप्यधिकममंस्त देशमीशः ॥ ६९ ॥
विस्फारैरविदितविभ्रमैः स्वभावाद्ग्रामेयीनयनपुटैर्निपीयमानम् ।
लावण्यामृतमधिकाधिकं तथापि श्रीधर्मो भुवनविभुर्बभार चित्रम् ॥ ७० ॥
पुण्ड्रेक्षुव्यतिकरशालिशालिवप्रे प्रोन्मीलद्विशदसरोरुहच्छलेन ।
अन्येषां श्रियमिव नीवृतां हसन्ती देशश्रीर्गुणगुरुणा मुदा लुलोके ॥७१॥
कूष्माण्डीफलभरगर्भचिर्भटेभ्यो वृन्ताकस्तबकविनम्रवास्तुकेभ्यः ।
संकीर्णे मिथ इव दृष्टिरस्य लग्ना निष्क्रान्ता कथमपि शाकवाटकेभ्यः ॥
देशश्रीहृतहृदयेक्षणः क्षणेन प्रोल्लङ्घ्य क्रममिव वर्त्म नातिदूरे ।
तत्रोर्वीमणिमयकुण्डलानुकारिप्राकारं पुरमथ कुण्डिनं ददर्श ॥ ७३ ॥

---

१. सुरा एव सबरा भिल्लाः. दन्त्यादिरपि सबरशब्दः; (पक्षे) सुरसो यो वरः. २. मदिरागृहम्. पानशालेति यावत्. ३. गृहारामाः. ४. अप्सरोभिर्देवाङ्गनाभिस्तिलोत्तमासुकेशीरम्भाप्रभृतिभिः; (पक्षे) जलयुक्तसरोभिः. ५. देशानाम्. ६. चिर्भटः 'कचरी' इति देशभाषाप्रसिद्धः फलविशेषः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वार्तादौ तदनु रजस्ततः प्रणादो भेरीणामतनुबलान्वितस्य भर्तुः ।
एतस्याभिमुखगमोत्सुकं तदानीं सानन्दं पुरि विदधे विदर्भराजम् ॥ ७४ ॥
सोल्लासं कतिपयवेगवत्तुरंगैरेत्यास्मिन्नभिमुखमंशुमानिवासीत् ।
अस्योद्यद्गुणगरिमप्रकर्षमेरोः पादान्ते प्रणतिपरः प्रतापराजः ॥ ७५ ॥
देवोऽपि प्रणयवशीकृतः कराभ्यामुत्क्षिप्य क्षितिमिलितोत्तमाङ्गमेनम् ।
यद्रम्यं क्षणमपि नो मनोरथानां तद्बाह्वोः पृथुतरमन्तरं निनाय ॥ ७६ ॥
श्लाघ्यं मे कुलमखिलं दिगप्यवाची धन्येयं समजनि संततिः कृतार्था ।
कीर्तिश्च प्रसरतु सर्वतोऽद्य पुण्यैरातिथ्यं भुवनगुरौ त्वयि प्रयाते ॥ ७७ ॥
सोऽप्यन्तर्मनसि महानयं प्रसादो देवस्येत्यविरतमेव मन्यमानः ।
उन्मीलद्घनपुलकाङ्कुरः प्रमोदादित्यूचे विनयनिधिर्विदर्भराजः ॥ ७८ ॥
किं ब्रूमः शिरसि जगत्त्रयेऽपि लोकैराज्ञेयं स्रगिव पुरापि धार्यते ते ।
स्वीकारस्तदखिलराज्यवैभवेषु प्राणेष्वप्ययमधुना विधीयतां नः ॥ ७९ ॥
अत्यन्तं किमपि वचोभिरित्युदारैः सप्रेम प्रवणयति प्रतापराजे ।
देवोऽयं सरलतरं स्वभावमस्य प्रेक्ष्येति प्रियमुचितं मुदाचचक्षे ॥ ८० ॥
सर्वस्वोपनयनमत्र तावदास्तां जाताः स्मस्त्वदुपगमाद्वयं कृतार्थाः ।
नास्माकं तव विभवे परस्वबुद्धिर्नो वास्ते वपुषि मनागनात्मभावः ॥ ८१ ॥
आलापैरिति बहुमानयन्समीपे गच्छन्तं तमुचितसत्क्रियाप्रतीतः ।
ताम्बूलार्पणमुदितं विदर्भराजं स्वावासं प्रति विससर्ज धर्मनाथः ॥ ८२ ॥
आनन्दोच्छ्वसितमनाः पुरोपकण्ठे योग्यायामथ वरदाप्रतीरभूमौ ।
आवासस्थितिमविरोधिनीं विधातुं सेनायाः पतिमयमादिदेश देवः ॥ ८३ ॥

स यावत्सेनानीरलमलभताज्ञामिति विभोः
पुरं पूर्वस्थित्या सपदि धनदस्तावदकरोत् ।
सुरस्कन्धावारद्युतिविजयिनो यस्य विशिखा-
समासन्नं शाखानगरमिव तत्कुण्डिनमभूत् ॥ ८४ ॥

द्वारि द्वारि पुरे पुरे पथि पथि प्रत्युल्लसत्तोरणां
पौराः पूर्णमनोरथा रचयत प्रत्यग्ररङ्गावलिम् ।

१. दक्षिणा दिक्. २. वरदा विदर्भदेशप्रसिद्धा नदी.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुण्यैर्वस्त्रिदशेन्द्रशेखरमणिः सोऽयं जगद्वल्लभः
प्राप्तो रत्नपुरेश्वरस्य तनयः श्रीधर्मनाभः प्रभुः ॥ ८५ ॥
यास्तूर्यारवहारिगीतमुखराः पात्राणि दध्यक्षत-
स्रग्दूर्वादलभाञ्जि बिभ्रति करे सोत्तंसवेषाः स्त्रियः ।
श्रीशृङ्गारवतीचिरार्जिततपःसौभाग्यशोभा इव
श्रेयः प्राप्य समागमं वरमिमं धन्याः प्रतीच्छन्तु ताः ॥ ८६ ॥
अद्योत्क्षिप्य करं ब्रवीम्यहमितः शृण्वन्तु रे पार्थिवाः
का शृङ्गारवती कथापि भवतां प्राप्ते जिने संप्रति ।
वार्ता तावदमी ग्रहप्रभृतयः कुर्वन्तु भाप्राप्तये
देवो यावदुदेति नाखिलजगच्चूडामणिर्भास्करः ॥ ८७ ॥
इत्थं विदर्भवसुधाधिपराजधान्यां
द्राग्दण्डपाशिकवचःशकुनं निशम्य ।
तिष्ठन्स तत्र नगरे धनदोपनीते
सिद्धिं विभुर्हृदयति स्म हृदि स्वकार्ये ॥ ८८ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये षोडशः सर्गः ।

सप्तदशः सर्गः ।

अथायमन्येद्युरुदारवेषः प्रतापराजाप्तजनोपहूतः ।
देशान्तरायातनरेन्द्रपूर्णां स्वयंवरारम्भभुवं प्रपेदे ॥ १ ॥
मुक्तामयी कुङ्कुमपङ्किलायां रङ्गावलिर्यत्र पतिंवरायाः ।
सौभाग्यभाग्योदयभूरुहाणामुप्तेव रेजे नवबीजराजिः ॥ २ ॥
यशःसुधाकूर्चिकयेव तत्र शुभ्रं नभोवेश्म स कर्तुमुच्चैः ।
मञ्चोच्चयान्कुण्डिनमण्डनेन प्रपञ्चितान्भूमिभुजा ददर्श ॥ ३ ॥
शृङ्गारसारङ्गविहारलीलाशैलेषु तेषु स्थितभूपतीनाम् ।
वैमानिकानां च मुदागतानां देवोऽन्तरं किंचन नोपलेभे ॥ ४ ॥
निःसीमरूपातिशयो ददर्श प्रदह्यमानागुरुधूपवर्त्या ।
मुखं न केषामिह पार्थिवानां लज्जामषीकूर्चिकयेव कृष्णम् ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयं स कामो नियतं भ्रमेण कमप्यधाक्षीद्गिरिशस्तदानीम् ।
इत्यद्भुतं रूपमवेक्ष्य जैनं जनाधिनाथाः प्रतिपेदिरे ते ॥ ६ ॥
अथोऽङ्गिनां नेत्रसहस्रपात्रं निर्दिष्टमिष्टेन स मञ्चमुच्चैः ।
सोपानमार्गेण समारुरोह हैमं मरुत्वानिव वैजयन्तम् ॥ ७ ॥
सिंहासने शृङ्ग इवोदयाद्रेस्तत्र स्थितो रत्नमये कुमारः ।
स तारकाणामिव भूपतीनां प्रभां पराभूय शशीव रेजे ॥ ८ ॥
उल्लासितानन्दपयःपयोधौ पीयूषधाम्नीव विशेषरम्ये ।
कासां न नेत्राणि पुराङ्गनानां दृष्टेऽपि तत्रेन्दुमणीबभूवुः ॥ ९ ॥
इक्ष्वाकुमुख्यक्षितिपालकीर्तिं पठत्स्वथो मङ्गलपाठकेषु ।
दृप्तस्मरास्फालितकार्मुकज्यानिर्घोषवन्मूर्छति तूर्यनादे ॥ १० ॥
करेणुमारुह्य पतिंवरा सा विवेश चामीकरचारुकान्तिः ।
विस्तारिमञ्चान्तरमन्तरिक्षं कादम्बिनी लीनतडिल्लतेव ॥११॥ (युग्मम्)
सा वागुरा नेत्रकुरङ्गकाणामनङ्गमृत्युंजयमन्त्रशक्तिः ।
शृङ्गारभूवल्लभराजधानी जगन्मनःकार्मणमेकमेव ॥ १२ ॥
लावण्यपीयूषपयोधिवेला संसारसर्वस्वमुदारकान्तिः ।
एकाप्यनेकैर्जितनाकनारी नृपैः सकामं ददृशे कुमारी ॥१३॥ (युग्मम्)
एतां धनुर्यष्टिमिवैष मुष्टिग्राह्यैकमध्यां समवाप्य तन्वीम् ।
नृपानशेषानपि लाघवेन तुल्यं मनोभूरिषुभिर्जघान ॥ १४ ॥
यद्यत्र चक्षुः पतितं तदङ्गे तत्रैव तत्कान्तिजले निमग्नम् ।
शेषाङ्गमालोकयितुं सहस्रनेत्राय भूपाः स्पृहयांबभूवुः ॥ १५ ॥
पयोधरश्रीसमये प्रसर्पद्धारावलीशालिनि संप्रवृत्ते ।
सा राजहंसीव विशुद्धपक्षा महीभृतां मानसमाविवेश ॥ १६ ॥
स्वभावशोणौ चरणौ दधत्या न्यस्ते पदेऽन्तः स्फटिकावदातम् ।
उपाधियोगादिव भूपतीनां मनस्तदानीमतिरक्तमासीत् ॥ १७ ॥

---

१. इन्द्रः. २. एतन्नामकं निजप्रासादम्. ३. यौवने, प्रावृषि च. ४. हारावली, धारावली च. ५. शुद्धमातापितृकुला, शुक्लोभयपतत्रा च. ६. हृदयं, सरोविशेषं च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहो समुन्मीलति धातुरेषा शिल्पक्रियायाः परिणामरेखा।
जगद्वयं मन्मथवैजयन्त्या यया जयत्येष मनुष्यलोकः॥ १८॥
धनुर्लता भ्रूरिषवः कटाक्षाः स्तनौ च सर्वस्वनिधानकुम्भौ।
सिंहासनं श्रोणिरतुल्यमस्याः किं किं न योग्यं स्मरपार्थिवस्य॥१९॥
मङ्क्तुं जले वाञ्छति पद्ममिन्दुर्व्योमाङ्गणं सर्पति लङ्घनार्थम्।
क्लिश्यन्ति लक्ष्म्याः सुदृशा हृतायाः प्रत्यागमार्थं कति न त्रिलोक्याम्२०
कुतः सुवृत्तं स्तनयुग्ममस्या नितम्बभारोऽपि गुरुः कथं वा।
येन द्वयेनापि महोन्नतेन समाश्रितं मध्यमकारि दीनम्॥ २१॥
यद्वर्ण्यते निर्वृतिधाम धन्यैर्ध्रुवं तदस्याः स्तनयुग्ममेव।
नो चेत्कुतस्त्यक्तकलङ्कपङ्का युक्ता गुणैरत्र वसन्ति मुक्ताः॥ २२॥
इत्यङ्गशोभातिशयेन तस्याश्चमत्कृताश्चेतसि चिन्तयन्तः।
मनोभवास्त्रैरिव हन्यमानाः शिरांसि के के दुधुवुर्न भूपाः॥ २३॥
मन्त्रान्निपेठुस्तिलकान्यकार्षुर्ध्यानं दधुश्चिक्षिपुरिष्टचूर्णम्।
इमां वशीकर्तुमनन्यरूपां किं किं न चक्रुर्निभृतं नरेन्द्राः॥ २४॥
शृङ्गारलीलामुकुरायमाणान्यासन्नृपाणां विविधेङ्गितानि।
कन्यानुरागि प्रतिबिम्ब्यमानं व्यक्तं मनोऽलक्ष्यत यत्र तेषाम्॥२५॥
कंदर्पकोदण्डलतामिवैको भ्रुवं समुत्क्षिप्य समं सुहृद्भिः।
करप्रयोगाभिनयप्रवालां विलासगोष्ठीं रसिकश्चकार॥ २६॥
स्कन्धे मुहुर्वक्रितकंधरोऽन्यः कस्तूरिकायास्तिलकं ददर्श।
अभ्युद्धरत्युद्धुरवैरिवार्धेर्वसुंधरापङ्कमिवात्र लग्नम्॥ २७॥
लीलाचलत्कुण्डलरत्नकान्त्या कर्णान्तकृष्टं धनुरैन्द्रमन्यः।
अदर्शयच्चन्द्रधिया गतस्य सङ्गं मृगस्येव मुखे निषेद्धुम्॥ २८॥
व्यराजतान्यो निजनासिकाग्रे निधाय जिघ्रन्करकेलिपद्मम्।
सदस्यलक्ष्यं कमलाश्रितेव श्रियानुरागात्परिचुम्ब्यमानः॥ २९॥
कश्चित्कराभ्यां नखरागरक्तं सलीलमावर्तयति स्म हारम्।
स्मरास्त्रभिन्ने हृदयेऽस्रधाराभ्रमं जनानां जनयन्तमुच्चैः॥ ३०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ताम्बूलरागोल्बणमोष्ठबिम्बं प्रमार्जयञ्शोणकराङ्गुलीभिः ।
पिबन्निवालक्ष्यत दन्तकान्तिच्छलेन शृङ्गारसुधामिवान्यः ॥ ३१ ॥
अथ प्रतीहारपदे प्रयुक्ता श्रुताखिलक्ष्मापतिवृत्तवंशा ।
प्रगल्भवागित्यनुमालवेन्द्रं नीत्वा सुभद्राभिदधे कुमारीम् ॥ ३२ ॥
अवन्तिनाथोऽयमनिन्द्यमूर्तिरमध्यमो मध्यमभूमिपालः ।
ग्रहा ध्रुवस्येव समग्रशक्तेर्यस्यानुवृत्तिं विदधुर्नरेन्द्राः ॥ ३३ ॥
त्रुट्यत्सु वेलाद्रितटेषु नश्यत्युदग्रदिक्कुञ्जरचक्रवाले ।
यस्य प्रयाणे पटहप्रणादैः स्पष्टाट्टहासा इव रेजुराशाः ॥ ३४ ॥
निःक्षत्रियादेव रणान्निवृत्तो विनार्थिनं कामपुषश्च दानात् ।
अभूत्करः केवलमस्य कान्तापृथुस्तनाभोगविभोगयोग्यः ॥ ३५ ॥
अस्येदमावर्जितमौलिमालाभृङ्गच्छलेनाङ्घ्रियुगं नरेन्द्राः ।
के के न भूपृष्ठलुठल्ललाटभ्रष्टोद्भटभ्रूकुटयः प्रणेमुः ॥ ३६ ॥
एनं पतिं प्राप्य दिवाप्यवन्तीप्रासादशृङ्गाग्रजुषस्तवायम् ।
सिप्रातटोद्यानचकोरकान्तानेत्रोत्सवायास्तु चिरं मुखेन्दुः ॥ ३७ ॥
ततः सुभद्रावचनावसाने श्रीमालवेन्द्रादवतारिताक्षीम् ।
नीत्वा नरेन्द्रान्तरमन्तरज्ञा पतिंवरां तां पुनरित्यवोचत् ॥ ३८ ॥
दुष्कर्मचिन्तामिव यो निषेद्धुं विवेश चित्ते सततं प्रजानाम् ।
विलोक्यतां दुर्नयवह्निपाथः सोऽयं पुरस्तान्मगधाधिनाथः ॥ ३९ ॥
सुखं समुत्सारितकण्टकस्य[1] बभ्राम कीर्तिर्भुवनत्रयेऽस्य ।
विशालवक्षःस्थलवासलुब्धा दूरान्नृपश्रीः पुनराजगाम ॥ ४० ॥
महीभुजा तेन गुणैर्निबद्धं गोमण्डलं[2] पालयता प्रयत्नात् ।
अपूरि पूरैः पयसामिवान्तर्ब्रह्माण्डभाण्डं विशदैर्यशोभिः ॥ ४१ ॥
ज्ञातप्रमाणस्य यशोऽप्रमाणं वृद्धास्य जज्ञे तरुणस्य लक्ष्मीः ।
दैवात्ततोऽतुल्यपरिग्रहस्य त्वमेव कल्याणि भवानुरूपा ॥ ४२ ॥
विदारयन्ती विषमेषुशक्त्या मर्माणि तस्मादहितस्वरूपात् ।
आकृष्यमाणापि तया प्रयत्नात्पराङ्मुखी चापलतेव साभूत् ॥ ४३ ॥

१. 'क्षुद्रशत्रुश्च कण्टकः'. २. भूमण्डलं, धेनुसमूहं च.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्फुरत्प्रतापस्य ततोऽङ्गभर्तुः सूर्यांशुराशेरिव संनिकर्षम् ।
कुमुद्वतीं सा सरसीव कृच्छ्रान्निनाय चैनामिति चाभ्यधत्त ॥ ४४ ॥
अङ्गोऽप्यनङ्गो हरिणेक्षणानां राजाप्यसौ चण्डरुचिः परेषाम् ।
भोगैरहीनोऽपि हतद्विजिह्वः को वा चरित्रं महतामवैति ॥ ४५ ॥
वक्रेषु विद्वेषिविलासिनीनामुदश्रुधाराप्रसरच्छलेन ।
भेजुः कथंचिन्न पुनः प्ररोहमुत्खातमूला इव पत्रवल्ल्यः ॥ ४६ ॥
संख्येषु साक्षीकृतमात्मसैन्यं खड्गोऽपि वश्यप्रतिभूरुपात्तः ।
कृतार्थवत्पत्रपरिग्रहेण दासीकृतानेन विपक्षलक्ष्मीः ॥ ४७ ॥
गङ्गामुपास्ते श्रयति त्रिनेत्रं स्वं निर्जरेभ्यः प्रविभज्य दत्ते ।
अस्याननेन्दुद्युतिर्महिमानो व्योमापि धावन्नधिरोहतीन्दुः ॥ ४८ ॥
यद्यस्ति तारुण्यविलासलीलासर्वस्वनिर्वेशमनोरथस्ते ।
तत्कामिनीमानसराजहंसं मूर्त्यन्तरानङ्गममुं वृणीष्व ॥ ४९ ॥
ग्रीष्मार्कतेजोभिरिव स्मरास्त्रैस्तप्ताप्युदञ्चत्कमलेऽपि तत्र ।
सा पल्वले निर्मलमानसस्था न राजहंसीव रतिं बबन्ध ॥ ५० ॥
संपूर्णचन्द्राननमुन्नतांसं विशालवक्षःस्थलमम्बुजाक्षम् ।
नीत्वा कलिङ्गाधिपतिं कुमारीं दौवारिकी सा पुनरित्युवाच ॥ ५१ ॥
खिन्नं मुहुश्चारुचकोरनेत्रे प्रौढप्रतापार्कविलोकनेन ।
नेत्रामृतस्यन्दिनि राज्ञि साक्षान्निक्षिप्यतां निर्वृतयेऽत्र चक्षुः ॥ ५२ ॥
अनारतं मन्दरमेदुराङ्गैः प्रमथ्यमानोऽस्य गजैः पयोधिः ।
शुशोच दुःखान्मरणाभ्युपायं ग्रस्तं त्रिनेत्रेण स कालकूटम् ॥ ५३ ॥
चकर्ष निर्मुक्तशिलीमुखां यत्करेण कोदण्डलतां रणेषु ।
जगत्त्रयालंकरणैकयोग्यमसौ यशःपुष्पमवाप तेन ॥ ५४ ॥
चेतश्चमत्कारिणमत्युदारं नवं रसैरर्थमिवातिरम्यम् ।
त्वमेनमासाद्य पतिं प्रसन्ना श्लाघ्यातिमात्रं भव भारती वा ॥ ५५ ॥
भूतिप्रयोगैरतिनिर्मलाङ्गात्तस्मात्सुवृत्तादपि राजपुत्री ।
आदर्शबिम्बादिव चन्द्रबुद्ध्या न्यस्तं चकोरीव चकर्ष चक्षुः ॥ ५६ ॥

---

१. कुत्सितहर्षवतीं च. २. चन्द्रे, नृपे च.

For Private and Personal Use Only

नरप्रकर्षोपनिषत्परीक्षाविचक्षणा दक्षिणभूमिभर्तुः ।
नीत्वा पुरस्तादवरोधरक्षा विदर्भभूपालसुतां बभाषे ॥ ५७ ॥
लीलाचलत्कुण्डलमण्डितास्यः पाण्ड्योऽयमुड्डामरहेमकान्तिः ।
आभाति शृङ्गोभयपक्षसर्पत्सूर्येन्दुरुच्चैरिव काञ्चनाद्रिः ॥ ५८ ॥
निर्मूलमुन्मूल्य महीधराणां वंशानशेषानपि विक्रमेण ।
तापापनोदार्थमसौ धरित्र्यामेकातपत्रं विदधे स्वराज्यम् ॥ ५९ ॥
अनेन कोदण्डसखेन तीक्ष्णैर्बाणैरसंख्यैः सपदि क्षताङ्गः ।
अभाजनं वीररसस्य चक्रे को वा न संख्येषु विपक्षवीरः ॥ ६० ॥
गृहीतपाणिस्त्वमनेन यूना तन्वि स्वनिःश्वाससहोदराणाम् ।
श्रीखण्डसारां मलयानिलानां सखीमिवालोकय जन्मभूमिम् ॥ ६१ ॥
कङ्कोलकैलालवलीलवङ्गरम्येषु वेलाद्रितटेषु सिन्धोः ।
कुरु स्पृहां नागरखण्डवल्लीलीलावलम्बिक्रमुकेषु रन्तुम् ॥ ६२ ॥
दिनाधिनाथस्य कुमुद्वतीव पीयूषभानोर्नलिनीव रम्या ।
सा तस्य कान्तिं प्रविलोक्य दैवान्नानन्दसंदोहवती बभूव ॥ ६३ ॥
महीभुजो ये जिनधर्मबाह्याः सम्यक्त्ववृत्त्येव तया विमुक्ताः ।
सद्योऽपि पातालमिव प्रवेष्टुं बभूवुरत्यन्तमधोमुखास्ते ॥ ६४ ॥
कर्णाटलाटद्रविडान्ध्रमुख्यैर्महीधरैः कैरपि नोपरुद्धा ।
रसावहा प्रौढनदीव सम्यग्रत्नाकरं धर्ममथ प्रपेदे ॥ ६५ ॥
यच्चक्षुरस्याः [1]श्रुतिलङ्घनोत्कं यद्दृष्टि च भ्रूः [2]स्मृतिजातधर्मम् ।
अद्वैतवादं [3]सुगतस्य हन्ति [4]पदक्रमो यच्च [5]जडद्विजानाम् ॥ ६६ ॥
प्रजापतिश्रीपतिवाक्पतीनां ततः समुद्यद्वृषलाञ्छनानाम् ।
मुक्त्वा परेषामिह [6]दर्शनानि सर्वाङ्गरक्तेयममूज्जिनेन्द्रे ॥६७॥ (युग्मम्)

---

१. कर्णपथलङ्घनोत्कण्ठम्; (पक्षे) वेदमार्गातिक्रमणाभिलाषम्. २. स्मृतिजातः कामस्तस्य धर्मं चापम्. धनुर्वाचकोऽपि धर्मशब्दो मेदिन्यादिषु पठ्यते; (पक्षे) मन्वादिस्मृतिप्रोक्तं धर्मम्. ३. शोभनगमनस्य, बुद्धस्य च. ४. चरणप्रचारः; (पक्षे) पदस्य क्रमो वैदिकप्रसिद्धः पदपाठः. ५. जलपक्षिणाम्. हंसानामिति यावत्; (पक्षे) मूढब्राह्मणानाम्. ६. अवलोकनानि, शास्त्राणि च.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाहि दृष्टयोभयमार्गनिर्यन्मुदश्रुधारान्वितया मृगाक्षी ।
प्रसारितोद्दामभुजाग्रयेव सोत्कण्ठमालिङ्गति नूनमेनम् ॥ ६८ ॥
विभावयन्तीत्यथ मन्मथोत्थं विकारमाकारवशेन तस्याः ।
अर्हद्गुणग्रामकथासु किंचिद्विस्तारयामास गिरं सुभद्रा ॥ ६९ ॥
गुणातिरेकप्रतिपत्तिकुण्ठीकृतामरेन्द्रप्रतिभस्य भर्तुः ।
यद्वर्णनं मद्वचसाप्यमुष्य भानोः प्रदीपेन निरीक्षणं तत् ॥ ७० ॥
इक्ष्वाकुवंशप्रभवः प्रशास्ति महीं महासेन इति क्षितीशः ।
तस्यायमारोपितभूमिभारः श्रीधर्मनामा विजयी कुमारः ॥ ७१ ॥
मासान्निशान्ते दश जन्मपूर्वानस्याभवत्पञ्च च रत्नवृष्टिः ।
यया न दारिद्र्यरजो जनानां स्वप्नेऽपि दृग्गोचरतां जगाम ॥ ७२ ॥
जन्माभिषेकेऽस्य सुरोपनीतैर्दुग्धाब्धितोयैः प्रविधीयमाने ।
संक्षाल्यमानः कनकाचलोऽपि कैलासशैलोपमतां जगाम ॥ ७३ ॥
लावण्यलक्ष्मीजितमन्मथस्य किं ब्रूमहे निर्मलमस्य रूपम् ।
वीक्ष्यैव यद्विस्मयतो बभूव हरिर्द्विनेत्रोऽपि सहस्रनेत्रः ॥ ७४ ॥
वक्षःस्थलात्प्राज्यगुणानुरक्ता युक्तं न लोलापि चचाल लक्ष्मीः ।
बद्धा प्रबन्धैरपि कीर्तिरस्य बभ्राम यद्भूत्रितयेऽद्भुतं तम् ॥ ७५ ॥
बुद्धिर्विशाला हृदयस्थलीव सुनिर्मलं लोचनवच्चरित्रम् ।
कीर्तिश्च शुभ्रा दशनप्रभेव प्रायो गुणा मूर्त्यनुसारिणोऽस्य ॥ ७६ ॥
सुराङ्गनानामपि दुर्लभं यत्पदाम्बुजद्वन्द्वरजोऽपि नूनम् ।
तस्याङ्कमासाद्य गुणाम्बुराशेस्त्रैलोक्यवन्द्या भव सुन्दरि त्वम् ॥ ७७ ॥
इत्थं तयोक्ते द्विगुणीभवन्तं रोमाञ्चमालोकनमात्राभिन्नम् ।
सा दर्शयामास तनौ कुमारी जिनेश्वरे मूर्तमिवाभिलाषम् ॥ ७८ ॥
भावं विदित्वापि तथा करेणुं सख्याः सहासं पुरतः क्षिपन्त्याः ।
चेलाञ्चलं सा चलपाणिपद्मा प्रोत्सृज्य लज्जां द्रुतमाचकर्ष ॥ ७९ ॥
श्रीधर्मनाथस्य मनोज्ञमूर्तेः प्रवेपमानाग्रकरारविन्दा ।
संवाहितां वेत्रभृता कराभ्यां चिक्षेप कण्ठे वरणस्रजं सा ॥ ८० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसह्य रक्षत्यपि नीतिमक्षतामभूद्[1]नीतिः सुखभाजनं जनः ।
भयापहारिण्यपि तत्र सर्वतः को नाम नासीत्प्र[2]भयान्वितः क्षितौ ॥ ६४ ॥
त्रिसंध्यमागत्य पुरंदराज्ञया सुराङ्गना दर्शितभूरिविभ्रमाः ।
वितन्वते स्म स्मरराजशासनं सुखाय संगीतकमस्य वेश्मनि ॥ ६५ ॥
वक्त्राब्जेन जयश्रियं विकसता क्रोडीकृतां दर्शय-
न्हस्तोदस्तजयध्वजेन विदधद्व्यक्तामथैनां पुनः ।
एकः प्राप सुषेणसैन्यपतिना संप्रेषितः संसदं
तस्यानेकनृपप्रवर्तितस[3]मिद्वृत्तान्तवि[4]द्वार्तिकः ॥ ६६ ॥
प्रणतशिरसा तेनानुज्ञामवाप्य जगत्पतेः
कथयितुमुपक्रान्ते मूलादिहाजिपराक्रमे ।
श्रवणमयतामन्यान्यापुस्तदेकरसोदया-
दपरविषयव्यावृत्तानीन्द्रियाणि सभासदाम् ॥ ६७ ॥
इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्येऽष्टादशः सर्गः ।

---

एकोनविंशः सर्गः ।

[4]आहवक्रममामूलमथ दूतः पुरः प्रभोः ।
आह [5]वक्रममामूलमिति विद्वेषिभूभुजाम् ॥ १ ॥
कार्यशेषमशेषज्ञोऽशेषयित्वा स निर्ययौ ।
यावत्संबन्धिनो देशात्सुषेणः सह सेनया ॥ २ ॥
तावदङ्गादयः क्षोणीभुजो [6]दाराधियातया ।
[7]वामयास्यानुजग्मुस्ते भुजोदारा धिया तया ॥ ३ ॥ (युग्मम्)
अथ तैः प्रेषितो दूतः पृथ्वीनाथैर्युयुत्सुभिः ।
साक्षाद्दर्व इवागत्य तमवोचच्चमूपतिम् ॥ ४ ॥

---

१. नीतिरहितः; (पक्षे) स्वचक्रपरचक्रादि-ईतिरहितः. २. प्रकृष्टभयेन; प्रभया कान्त्या च. ३. युद्धवार्ताभिज्ञः. वार्तिको वार्ताहरो दूतः. ४. अस्मिन्सर्गे आदर्श-पुस्तके यमकादिषु संक्षिप्तं टिप्पणं क्वचिद्वर्तते प्रायस्तदेवात्र गृहीतम्. ५. वक्रं विषमम्, अत एव अमामूलमलक्ष्मीकारणम्. ६. दारसंबन्धी य आधिस्तेन यातया प्राप्तया धिया. ७. वामया वक्रयेति धियेत्यस्य विशेषणम्.



For Private and Personal Use Only

त्वं क्षमो भुवनस्यापि तेनेनेन प्रभास्वतः ।
तवानूना चमूचक्रे तेनेऽनेन प्रभा स्वतः ॥ ५ ॥
तवानूरोरिवाकाशे प्रभुभक्तिर्न वाधिका ।
अग्रेसरी पुनः किं न वारिराशौ निमज्जतः ॥ ६ ॥
चतुरङ्गां चमूं त्यक्त्वा चतुरं गां गतः कथम् ।
प्रभयाधिकरक्षां स प्रभयाधिगतोऽवति ॥ ७ ॥
कार्मणेनैव तेनोढा सा शृङ्गारवतीति यः ।
साशङ्कस्तु कृतः पत्या राजवर्गः प्रणश्यता ॥ ८ ॥
नैवमायोधनं शक्त्यानवमायो धनं ददत् ।
समनागबलः कर्तुं स मनागवलत्त्वया ॥ ९ ॥ (युग्मम्)
लक्ष्मीजिघृक्षया तुभ्यं राजकं नापराध्यति ।
किं तु रीत्येव वैदर्भ्या गौडीयायाभ्यसूयितम् ॥ १० ॥
मारसारसमाकारा राकामा सरसा रमा ।
सा गता हसना तेन न तेनासहतागसा ॥ ११ ॥
(प्रतिलोमानुलोमपादः)

त्वामिहायुङ्क विश्वस्तभूतलोपकृतिक्षमः ।
न वापराधिकृन्नाथः केवलं भूतिहेतवे ॥ १२ ॥

---

१. तेन इनेन स्वामिना. २. प्रभास्वतस्तेजस्विनः. ३. तव चमूचक्रे अनेन स्वतः अनूना प्रभा चक्रे. ४. नवा अधिका च; (पक्षे) बाधिः का न. ५. समुद्रे; (पक्षे) वा-अरिराशौ शत्रुसमूहे. ६. प्रभया तेजसा; प्रकर्षेण भयाधिगतः. योऽकारणं चमूं त्यक्त्वा प्रपलायते स भयान्वितो भवत्येव. ७. प्रत्यग्रसङ्ग्रामम्. ८. न अवमः अयः शुभावहो विधिर्यस्य. ९. तुल्यहस्तिसैन्यः. १०. मनाक्-अवलत्. ११. गौडदेशभवाय. यथा वैदर्भी रीतिर्गौडीवल्लभाय कवये कुप्यति तथा तुभ्यं शृङ्गारवत्याभ्यसूयितम्. १२. कामसर्वस्वतुल्याकृतिः. १३. राकावन्मा लक्ष्मीर्यस्याः सा. १४. कामिनी. १५. स्मितमुखी; (पक्षे) अहसना अस्मेरास्या. चित्तानुरागविरहात्. १६. तेन आगसापराधेन. १७. विश्वस्तं समस्तं यद्भूतलं तस्योपकाराय समर्थः; (पक्षे)-विश्वस्त-भूत-लोप कृति-क्षमः श्रद्धालुजनविनाशकः. विश्वासघातक इति यावत्. १८. न-वा-अपराधकृत्; (पक्षे) नव-अपराधकृत्.

अस्य मानाधिकैः सेना अस्यमाना नैवाजितः ।
अस्यमानाहतेरेता अस्यमानावितुं क्षमः ॥ १३ ॥
परलोकभयं बिभ्रत्प्रभुभक्तिं प्रपद्यसे ।
भवितासि ततो नूनं स्ववंशोद्धरणक्षमः ॥ १४ ॥
अरमभीतियुक्तस्ताः कष्टं स्कन्दोऽपि रक्षति ।
अरमभीतियुक्तस्ता दूरे पास्यति वाहिनीः ॥ १५ ॥
अबलां तां पुरस्कृत्य त्यक्तोऽसि सबलोऽमुना ।
निराश्रयस्ततो धीर राजवर्गं त्वमाश्रय ॥ १६ ॥
प्रार्थयैतांश्चतुर्वर्गं रथवाजिप्रदानतः ।
लप्स्यसे पक्षतामुच्चैरथवाजिप्रदानतः ॥ १७ ॥
परमस्नेहनिष्ठास्ते परदानकृतोद्यमाः ।
समुन्नतिं तवेच्छन्ति प्रधनेन महापदाम् ॥ १८ ॥
राजानस्ते जगत्ख्याता बहुशोभनवाजिनः ।
वने कस्तत्क्रुधा नासीद्बहुशोभनवाजिनः ॥ १९ ॥
सकृपाणां स्थितिं बिभ्रत्स्वधामनिधनं तव ।
दाता वा राजसंदोहो द्राक्कान्तारसमाश्रयम् ॥ २० ॥
सहसा सह सारेभैर्धाविताधाविता रणे ।
दुःसहेऽदुः सहेऽलं ये कस्य नाकस्य नार्जनम् ॥ २१ ॥
तेषां परमतोषेण संपदातिरसं गतः ।
स्वोन्नतिं पतितां बिभ्रत्सन्महीनो भविष्यसि ॥२२॥ (युग्मम्)

१. प्रमाणाधिकैः. २. क्षिप्यमाणा. ३. नवीनसङ्ग्रामात्. ४. खड्गप्रमाणघाततः. ५. असि-अमान-अवितुं. ६. परलोको जन्मान्तरं शत्रुश्च. ७. स्वामिसेवां मर्दनतां च (?). ८. रथ-वाजि-प्रदानतः. ९. अथवा-आजि-प्रदानतः. १०. बहुशोभन-वाजिनः. ११. बहुशोभ-नव-अजिनः. १२. सदयानाम्; (पक्षे) सखड्गाम्. १३. स्व-धामनि स्वगृहे धनं तव दाता दास्यति; (पक्षे) स्वधाम्ना निधनम्. १४. राजसमूहः. १५. कान्ता-रसं-आश्रयम्; (पक्षे) कान्तार-समाश्रयम्. १६. गजप्रधानैः. १७. धाविताधौ आधिरहिते रणे इताः प्राप्ताः. १८. संपत्त्याधिकरागम्; (पक्षे) संपदातिः सेवकः, असंगत एकाकी. १९. स्वामित्वम्; (पक्षे) च्युताम्. २०. सत्-मही-इनः समीचीन-भूपालः; (पक्षे) गृहरहितः.

[1]बहुशस्त्रासमाप्यैषां [2]बहुशस्त्रासमाहतेः ।
को वा न रमते [3]प्राप्ताङ्को वानरमते गिरौ ॥ २३ ॥
कि[4]मु दासतया स्थातुमीहसे क्वापि [5]भूभृति ।
असंख्यं कर्म तत्कुर्वंल्लप्स्यसे [6]कम्बलोत्सवम् ॥ २४ ॥
[7]बहुधामरणेऽ[8]च्छद्युद्बहुधा मरणेच्छया ।
[9]परभीरहितं पश्येत्[10]परभीरहितं परम् ॥ २५ ॥
बन्धाय वाहिनीशस्य तवैते मेदिनीभृतः ।
आयान्ति कटकैर्जुष्टाः सनागहरिखड्गिभिः ॥ २६ ॥
मुरलो [11]मुरलोपीव [12]कुन्तलः [13]कुन्तलश्च कैः ।
मालवो [14]मालवोद्ग्रीवैर्वार्यते वार्य ते रणे ॥ २७ ॥
उद्दामद्विरदेनाद्यो (?) कलिङ्गेन वृषध्वजः ।
शिरोर्पितार्धचन्द्रेण कार्यस्त्वमगजाश्रितः ॥ २८ ॥
[15]अनेकपापरक्तो वा लभ सेनाशमं गतः ।
अनेकपापरक्तो वा लभसे नाशमङ्गतः ॥ २९ ॥
हितहेतु वचस्तुभ्यमभ्यधामहमीदृशम् ।
विरोधिन्यपि यत्साधुर्न विरुद्धोपदेशकः ॥ ३० ॥
अधिकं दरमेत्याहो अधिकंदरमुन्नतान् ।
[16]समासादयशाः शैलान्समासादय वा नृपान् ॥ ३१ ॥
इति राजगणे तस्मिन्नधिकोपकृतिक्षमे ।
गतिद्वयमुदाहृत्य प्रणिधिर्विरराम सः ॥ ३२ ॥

---

१. बहुशः-त्रासम्. २. बहुशस्त्र-आसमाहतेः. ३. लब्धोत्सङ्गः. ४. उदासतया; (पक्षे) दासतया. ५. राज्ञि, पर्वते च. ६. कं-बलोत्सवम्; (पक्षे) कम्बलोत्सवम्. ७. बहु-धाम-रणे. ८. अच्छद्युत्स्वच्छतेजाः. ९. पर-भी-रहितम्. १०. परभीः कातरः. ११. विष्णुरिव. १२. कुन्तलदेशनृपः. १३. कुन्तान् लातीति. १४. मा लक्ष्मीस्तस्या लवस्तेनोद्ग्रीवैः. १५. अनेकप-अपरक्तः. १६. समासात्-अयशाः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रैरोऽरीरोरुररुरत्काकुकं केकिकङ्किकः ।
चञ्चच्चूच्चिच्चोचे ततताततीति तं ततः ॥ ३३ ॥ (चतुरक्षरः)

अन्तरत्यन्तनिगूढपदाभिप्रायभीषणा ।
वाग्भुजङ्गीव ते मूढी कस्य विश्वासकृद्द्विहः ॥ ३४ ॥

दुर्जनः सत्सभां प्रष्टामीहते न स्वभावतः ।
किमुलूकस्तमोहन्त्रीं भास्वतः सहते प्रभाम् ॥ ३५ ॥
(गूढचतुर्थपादः)

सीमा सौभाग्यभाग्यानां शोभासंभावितस्मरः ।
अहो धाष्टर्यं जगन्नाथः कामणीत्युच्यते खलैः ॥ ३६ ॥

प्रभाप्रभावभाग्येन भाग्येन स वधूकरम् ।
तेने तेनेऽपतन्माला तन्मालापं वृथा कृथाः ॥ ३७ ॥

गुणदोषानविज्ञाय भर्तुर्भक्ताधिका जनाः ।
स्तुतिमुच्चावचामुच्चैः कां न कां रचयन्त्यमी ॥ ३८ ॥

धर्मे बुद्धिं परित्यक्त्वापरत्रानेकपापदे ।
सदयः कुरुते कस्तां परत्रानेकपापदे ॥ ३९ ॥

आस्तां जगन्मणेस्तावद्भानोरन्यैर्महस्विभिः ।
अनूरोरपि किं तेजः संभूय परिभूयते ॥ ४० ॥

मम चापलतां वीक्ष्य नवचापलतां दधत् ।
अयमाजिरसाद्गन्तुं किं यमाजिरमिच्छति ॥ ४१ ॥

सौजन्यसेतुमुद्भिन्दन्यस्त्वया नैव वारितः ।
तन्नः क्रोधार्णवौघेन ष्लावनीयो नृपव्रजः ॥ ४२ ॥

---

१. रायं धनं ददातीति रैरः; अरीन् ईरयन्तीत्यरीराः सुभटाः, तेषां ऊरुर्महान्. केकिना कङ्कते इत्येवंशीलः केकिकङ्की कार्तिकेयः, तस्येव कः कामो यस्य स केकिकङ्किकः. चञ्चन्ती चञ्चुर्दक्षा उच्चा महती चिद्बुद्धिर्यस्य. ततां प्रचुरां तां लक्ष्मीमतति गच्छति इत्येवंशीलस्ततताती. काकुकं मर्मव्यथकशब्दम्. २. अधर्मे. ३. परेभ्यस्त्रायन्ते ते अनेकपा हस्तिनस्तेषामापदे.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विपद्विधास्यतेऽत्राहंकारिभिः [1]कारिभिर्मम ।
एकाकिनापि रुध्यन्ते हरिणा हरिणा न किम् ॥ ४३ ॥
जयश्रियमथोद्वोढुं त्वत्प्रतापाग्निसाक्षिकाम् ।
वित्तमाजौ ददद्दूतं सुषेणो विससर्ज सः ॥ ४४ ॥
रागिताजिवरा कापि नेतेनाततताम्रसा ।
सामताततना तेने पिकारावजिता गिरा ॥ ४५ ॥
(अनुलोमप्रतिलोमार्धः)
तथाप्यनुनयैरेष शाम्यति स्म न दुर्जनः ।
और्वस्तनूनपान्नीरैर्नीरधेरिव भूरिभिः ॥ ४६ ॥
युद्धानकाः स्म तद्ग्रामाः सदानघ नदन्ति नः ।
बबृंहिरे जयायोच्चैः मदानघनदन्तिनः ॥ ४७ ॥
उद्भिन्नोद्दामरोमाञ्चकञ्चुकेषु मुदस्तदा ।
अन्तरङ्गेषु शूराणां संनाहा न बहिर्ममुः ॥ ४८ ॥
निर्जदोरदनोदीर्णश्रीरता [2]वैनताविभा [3] ।
[4]तरसारबलं चेरुरिभा [5]भूतहतो भृशम् ॥ ४९ ॥
(प्रातिलोम्येनानन्तरश्लोकः)
संभृतो [6]हृतभूभारिरुचेऽलं [7]वैरसारतः ।
[8]भावितानघतारश्रीर्न दीनो दरदोऽजनि ॥ ५० ॥
शङ्केऽनुकूलपवनप्रेङ्खितैः स्यन्दनध्वजैः ।
निक्कणत्किङ्किणीक्वाणैर्योद्धुं जुहुविरे द्विषः ॥ ५१ ॥
नवप्रियेषु बिभ्राणाः सङ्गरागमनायकाः ।
क्व योषितोऽभवन्नोत्काः संगरागमनाय काः ॥ ५२ ॥

---

१. का-अरिभिः. २. निजबाहुदन्ताभ्यामुदीर्णा या श्रीस्तस्यां रताः. ३. घनानां समूहो घनता तद्वद्विभा येषाम्. ४. तरसा आरबलं शत्रुसैन्यम्. ५. भूतहतः प्राणिघातकाः. ६. भुवि भान्तीति भूभास्ते च तेऽरयश्च, तेषां रुचिः सा हृता येन, तत्संबोधनम्. ७. वरसारत उत्कृष्टबलात्. ८. भाविता अधिगता अनघा तारा उज्ज्वला श्रीर्येन.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्दशावत्यनीकेऽत्र त्वत्प्रतापप्रदीपके ।
वधायैव निपेतुस्ते पतंगा इव शत्रवः ॥ ५३ ॥
गैङ्गोरगगुरूग्राङ्गगीरगोगुरुरुग्रगुः ।
रागागारिगरैरङ्गैरग्रेऽङ्गं गुरुगीरगात् ॥ ५४ ॥ (द्व्यक्षरः)
अङ्गमुत्तुङ्गमातङ्गमायान्तं प्रत्यपद्यत ।
वात्येव वारिदानीकं सा सुषेणस्य वाहिनी ॥ ५५ ॥
अैतस्तमानसे सेना सैदाना सारवा रणे ।
अतस्तमानसेसेना सदानासारवारणे ॥ ५६ ॥ (समुद्गकः)
कुम्भभूरिव निर्मग्नसपक्षानेकभूधरम् ।
उच्चुलुम्पांचकारोच्चैः स क्षणादङ्गवारिधिम् ॥ ५७ ॥
निस्त्रिंशदारितारातिहृदयाचलनिर्गता ।
न करिस्कन्धदघ्नासृङ्नदी दीनैरतीर्यत ॥ ५८ ॥ (निरौष्ठ्यः)
स्नेहपूर इव क्षणे तत्रोद्रेकं महीभुजः ।
अस्तं यियासवोऽन्येऽपि प्रदीपा इव भेजिरे ॥ ५९ ॥
हेमवर्माणि सोऽद्राक्षीद्द्राविना भाविनासिना ।
द्विड्बलान्यत्सकेनेव निचितानि चिताग्निना ॥ ६० ॥
तैद्घनोत्क्षिप्तदुर्वारतैरवारिमहोर्मयः ।
अरिक्ष्माधरवाहिन्यो रणक्षोणीं प्रपेदिरे ॥ ६१ ॥
समुत्साहं समुत्साहंकारमाकारमादधत् ।
ससारारं ससारारम्भवतो भवतो बलम् ॥ ६२ ॥
कोदण्डदण्डनिर्मुक्तकाण्डच्छन्ने विहायसि ।
चण्डांशुश्चण्डभीत्येव संवव्रे करसंचयम् ॥ ६३ ॥

१. गङ्गा च उरगगुरुश्च उग्राङ्गं च तद्वद्गौरा या गीर्वाणी तया गुरुर्बृहस्पतिः. उग्रा गावो बाणा मयूखा वा यस्य सः. राग एवागारं येषां तेषां गरैर्विषप्रायैः. गुरुगीर्महानादः. २. सत् शोभनं अनीत बलं यस्याः सा सदानाः, अतस्तमानान् अक्षीणाहंकारान् स्यति तस्मिन्. सेना स्वामियुक्ता. सदानासारा वारणा यस्मिन्. ३. त एव घनाः. ४. वारि जलम्; (पक्षे) तरवारिः खड्गः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सारसेनारसे[१] नागाः समरे समरेखया ।
न न दाननदाश्चेरुर्वाजिनो वाजिनोद्धताः ॥ ६४ ॥
उद्दण्डं यत्र यत्रासीत्पुण्डरीकं[२] रणाम्बुधौ ।
निपेतुस्तव योधानां तत्र तत्र शिलीमुखाः[३] ॥ ६५ ॥
के न बाणैर्नवाणैस्ते[४] सेनया सेनया हताः ।
मानवा मानबाधान्धाः सत्वराः सत्त्वराशयः ॥ ६६ ॥
बाणैर्बलमरातीनां सदापिहितसौरभैः[५] ।
अपूरि सुरमुक्तैश्च त्वद्बलं कुसुमोत्करैः ॥ ६७ ॥
मूर्धानं दुधुवुस्तत्र कङ्कपत्रक्षता भटाः ।
प्रभोरर्थासमाप्तौ वा प्राणानां रोद्धुमुत्क्रमम् ॥६८॥ (अतालव्यः)
त्रुट्यद्द्विट्कण्ठपीठास्थिटात्कारभरभैरवे ।
पेतुर्भयान्वितास्तत्र[६] पत्रिणो न पतत्रिणः ॥ ६९ ॥
शरघाताद्गजैर्दीनरसितैरुत्पलायितम्[७] ।
रक्ताब्धौ तत्करैश्छिन्नैरसितैरुत्पलायितम्[८] ॥ ७० ॥
वेतालास्ते तृषोत्ताला: पश्यन्तः शरलाघवम् ।
पाणिपात्रस्थमप्यत्र कीलालं न पपुर्युधि ॥ ७१ ॥
त्वद्बलैर्विषमारातिमारातिस्फुटविक्रमैः[९] ।
अखगं व्योम कुर्वाणैः कुबाणैस्तस्तरे[१०] तदा ॥ ७२ ॥
संसारसारलक्ष्म्येव वैदर्भ्या स्वीकृतस्य ते ।
ईर्ष्यया वर्धितोत्साहा तत्र शत्रुपरम्परा ॥ ७३ ॥
पराजिताशु[११] भवतः सेनया यतमानया[१२] ।
पराजिता शुभवतः सेनया[१३] यतमानया[१४] ॥ ७४ ॥ (युग्मम्)

---

१. रसो रागः, शब्दो वा. २. छत्रं, सिताम्भोजं च. ३. बाणाः, भ्रमराश्च. ४. नवशब्दैः. ५. आच्छादितसूर्यकान्तिभिर्बाणैः, प्रकटीकृतसौरभ्यैः कुसुमोत्करैश्च. ६. भया प्रभया; (पक्षे) भयेन. ७. युद्धात्पलायिता गजा इत्यर्थः. ८. उत्पलवदाचरितम्. ९. विषमा ये अरातयस्तेषां मारो मारणम्. १०. कुः पृथ्वी. ११. पराजिता आशु. १२. यत्नं कुर्वाणया. १३. स्वामिसमेतया. १४. विस्तृताहंकारया.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो भग्ने बलेऽन्यस्मिन्पुलकस्फारसैनिकः ।
एकहेलं महोत्साहे मालवेन्द्रेण कुन्तलः ॥ ७५ ॥
सुषेणस्तद्बलद्वन्द्वचूडं सन्नाहवपुषं ततः ।
हर्षेण वीक्ष्य सौवर्णसंनाहवपुषं ततः ॥ ७६ ॥
चतुरङ्गबले तत्र परिसर्पति शात्रवे ।
सैन्यमाश्वासयामास व्याकुलं स्वं चमूपतिः ॥ ७७ ॥ (युग्मम्)
स वाजिसिन्धुरग्रामान्संभ्रमादभिधावितः ।
जवादसिं स्फुरद्धामा बिभ्रन्नादमधात्ततः ॥ ७८ ॥ (गोमूत्रिकः)
सगजः सरथः साश्वः सपदातिः समन्ततः ।
क्रामन्नभिमुखं क्रोधात्तीव्रतेजाः शितायुधः ॥ ७९ ॥ (युग्मम्)
समारेभे समारेभे समारे भे रणे रिपुः ।
स दानेन सदानेन सदानेन व्यपोहितुम् ॥ ८० ॥
अम्भोधिरिव कल्पान्ते खड्गकल्लोलभीषणः ।
स्खलितो न स भूपालैस्तत्र वेलाचलैरिव ॥ ८१ ॥
कैङ्कः किं कोककेकाकी किं काकः केकिकोऽककम् ।
कौकः कुकैककः कैकः कः केकाकाकुकाङ्ककम् ॥ ८२ ॥
(एकाक्षरः)
अनेकधातुरङ्गाढ्यान्कुञ्जराजिदुरासदान् ।
रिपुशैलानसिर्भिन्दञ्जिष्णोर्वज्रमिवाबभौ ॥ ८३ ॥
जघान करवालीयवातेनारेर्बलं बली ।
न नाशा ते निरालम्बा करे तेनावनिर्वरः ॥ ८४ ॥ (अर्धभ्रमः)

१. सन्न-आहव-पुषं. २. स-मार-इभे. सम-आरेभे, आरेभः शब्दः. समारेभे समारम्भः. दानेन खण्डनेन सदानेन सद्बलेन. व्यपोहितुमुपक्रान्तुम्. ३. कङ्को बकः. कोककेकाकी चक्रवाकहंसगामी. काको ध्वाङ्क्षः. केकिकः मयूरवत्क आत्मा स्वरूपं यस्य सः. कुकैककः स्वर्गपृथ्वीजलेष्वद्वितीयः. गुरुत्वात्. कुटिलं जगाम. केकाकाकुको मयूरः स चिह्नं यस्य स केकाकाकुकाङ्कः, तस्येव कं शरीरं यस्य तम्. ४. अनेकधा-तुरंग; (पक्षे) अनेक-धातु-रङ्ग. ५. कुञ्जर-आजि; (पक्षे) कुञ्ज-राजि.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेन सङ्ग्रामधीरेण तव नाथ पदातिना ।
एकहेलमनेकेभ्यः शत्रुभ्यो निशितासिना ॥ ८५ ॥
भरं याममयारम्भरञ्जिता ददताजिरम् ।
याता क्षमा माक्षता या मदमाररमादम ॥ ८६ ॥ (युग्मम्)
(सर्वतोभद्रम्)
धाम्ना धाराजलेनेव दृष्टमातङ्गसंगमाम् ।
अभ्युक्ष्याभ्युक्ष्य जग्राह तत्कृपाणो रिपुश्रियम् ॥ ८७ ॥
देवेन्दो विवदद्बादिवाददावदवाम्बुद ।
दिवं ददद्बुदावेदं दुद्वृन्दं विदैववत् ॥ ८८ ॥ (द्व्यक्षरः)
पीत्वारिशोणितं सद्यः क्षीरगौरं यशो वमन् ।
इन्द्रजालं तदीयासिः काममाविश्चकार सः ॥ ८९ ॥
स प्रसादेन देवस्य रसादेकपदे बलम् ।
संपदेऽजयदेव द्विट्कम्पदेन संदेवनम् ॥ ९० ॥ (मुरजबन्धः)
तेन मालवचोलाङ्गकुन्तलव्याकुले रणे ।
भानुनेव तमःकीर्णे किं किं नो तेजसा कृतम् ॥ ९१ ॥
काननाः कानने नुन्ना नाकेऽनीकाङ्कानिनः ।
के के नानीकिनीनेन नाकीनैकाकिना ननु ॥ ९२ ॥(त्र्यक्षरः)
सागरे भुवि कान्तारे संगरे वा गरीयसि ।
त्वद्भक्तिः कस्य नो दत्ते कामधेनुरिवेहितम् ॥ ९३ ॥
देवनाथमनादृत्य भावनास्तम्भनादृते ।
त्वयीनासीत्स नास्तद्विड्जयी नाथमनास्ततः ॥ ९४ ॥(मुरजबन्धः)
खङ्गत्रासावशिष्टेऽथ प्रणष्टे विद्विषां बले ।
सुषेणः शोधयामास रणभूमिं महाबलः ॥ ९५ ॥

---

१. भरमत्यर्थम्. अयारम्भरञ्जिता शुभावहविधिप्रारम्भरञ्जिता सती. मा लक्ष्मीस्तस्या अक्षता नित्यता. आररमादम अरिसमूहलक्ष्मीदमन. याता लब्धा. २. शत्रुसमूहम्. ३. विपरीतभाग्ययुक्तम्. ४. जितवानेव. ५. सक्रीडनं यथा भवति. ६. अस्फुटोऽस्य बन्धस्य विन्यासः. ७. कुत्सितमुखाः. ८. अनीकाङ्के सङ्ग्रामोत्सङ्गे कनन्ति एवंशीलाः. ९. सेनापतिना.. १०. हे देवेश, एकाकिना.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गजवाजिजवाजिजयानुगतः स रसात्तरसात्तयशोविभवः ।
क्रमवन्तमवन्तमिळां श्रयितुं स्वयमेत्यं[1]यमेत्य भवन्तमितः ॥ ९६ ॥

चन्द्रांशुचन्दनरसादपि शीतमङ्गं
पीयूषपूरमसकृद्वमतीव दृष्टिः ।
क्वायं पुनर्वसति वैरिमहीशवंश-
संशोषणो भुवनभूषण ते प्रतापः ॥ ९७ ॥

चक्रेऽरिसंततिमिहाजिषु नष्टपक्षा-
तिख्यातिमेकचकिताकृतिधारिणीं यः ।
तिग्मासिरिष्टमतवत्स तवावति क्ष्मां
किं तत्परं धरणिमित्र कृतिन्ब्रवीमि ॥ ९८ ॥

कः शर्मदं वृजिनभीतिहरं जितात्मा
हर्षाय न स्मरति तेऽभिनवं चरित्रम् ।
संपद्गुणातिशयपस्त्य रुचं तवैति
कः कान्तिमानतिसुधाद्रवरोचमानाम् ॥ ९९ ॥

(इति श्लोकद्वयनिर्वर्तितषोडशदलकमलचित्रे कविकाव्यनामाङ्कः । यथा—कर्णिकाक्षरेण सह प्रथमदलाग्रदलाग्रेषु 'हरिचंद्रकृतधर्मजिनपतिचरितमिति' इति ।)

हतमोहतमोगतेस्तव क्षणदे[2]नेक्षणदेशशोभितः ।
समया[3] समयात्स्वयं ततः कमला त्वां कमलाभमैक्षत ॥ १०० ॥

आतङ्कार्तिहरस्तपद्युमणिसद्रूरिप्रभाजिद्वसु-
द्रष्टव्यं हृदि चिह्नरत्नमसमं[4] शौर्यं च पीनोन्नते ।
देहेऽधत्त हितं त्वमन्दमहादि क्षुद्रेऽप्यतो दर्शने
वल्गुर्मद्रमहस्य[5] रम्यमपरं क्षीणव्यपायं पदम् ॥ १०१ ॥

दम्भलोभभ्रमा आदिरुद्धा गुणैर्द्रष्टुमप्यक्षमादेव वक्रं तव ।
वर्जयित्वा ययुः सुश्रुत त्वां तथा ते भजन्ते यथा नेश भक्तानपि॥१०२॥

---

१. भाग्यं प्राप्य. २. उत्सवदेन. ३. समीपे. ४. कौस्तुभमणिम्. ५. मनोज्ञोत्सवस्य.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(अत्र श्लोकद्वयविनिर्मिते चक्रचित्रे प्रथमतृतीयषष्ठाष्टमाक्षररेखाभ्रमेण कविनामाङ्कश्लोकः । यथा—

'आर्द्रदेवसुतेनेदं काव्यं धर्मजिनोदयम् ।
रचितं हरिचन्द्रेण परमं रसमन्दिरम् ॥')

स्फुटमिति कथयित्वा सत्कृतिं प्राप्य दूते
गतवति निजगेहं तत्सुषेणः ससैन्यः ।
अहितविजयलब्धं वित्तमानीय भक्त्या-
नतिचिरमुपनिन्ये धर्मनाथाय तस्मै ॥ १०३ ॥

लभ्या श्रीर्विनिहत्य संगरभुवि क्षुद्रद्विपोऽभ्युन्नता
धिक्तां धर्मपरिच्युतामरमिति स्वीकारमन्दस्पृहः ।
तद्धर्माभरुचं दधद्वरभरिद्रव्यं सदार्यो ददे
देवोऽस्तालसमाधिभित्कृतधियां ताम्यन्महस्त्री मुदे ॥ १०४ ॥

(अत्र चक्रबन्धचित्रे तृतीयषष्ठाक्षररेखाभ्रमेण काव्यकविनामाङ्कः । यथा—श्रीधर्माभ्युदयः । हरिचन्द्रकाव्यम् ।)

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये एकोनविंशः सर्गः ।

## विंशः सर्गः ।

इत्यब्दानां पञ्चलक्षाणि यावत्क्षीणक्षुद्राराातिरुद्यत्प्रभावः ।
देवः पारावारवेलावनान्तं प्राज्यं धर्मः पालयामास राज्यम् ॥ १ ॥
रात्रौ तुङ्गे स्फाटिके सौधशृङ्गे तामास्थानीमेकदा स प्रतेने ।
चन्द्रज्योत्स्नान्तर्हितेऽस्मिन्प्रभावादाकाशस्था या सुधर्मेव रेजे ॥ २ ॥
जीर्णे कालाज्जातरन्ध्रं नु पश्यन्देवस्तारादन्तुरं व्योमभागम् ।
ज्वालालीलां बिभ्रतीं कल्पवह्नेरह्नायोल्कां निष्पतन्तीं ददर्श ॥ ३ ॥
आविष्कर्तुं स्फारमोहान्धकारच्छन्नं मुक्तेर्मार्गमत्यन्तदुर्गम् ।
आदौ दिष्ट्या व्यञ्जिता या ज्वलन्ती वर्तिर्दीपस्येव शोभामभार्षीत् ॥ ४ ॥

---

१. स्वर्णाभदीप्तिम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यादायास्यं विस्फुरत्तारतारादन्तश्रेणीभीष्ममत्तुं जगन्ति ।
कालेनैका व्योम्नि विस्तार्यमाणा जिह्वेवाशु श्रद्धया या चकासे ॥ ५ ॥
कान्तिः कालव्यालचूडामणेः किं पिङ्गा स्थाणोर्व्योममूर्तेर्जटा वा ।
ज्वाला किं वास्यैव भालाक्षवह्नेर्दाहार्थेन्दोर्धाविता कामबन्धोः ॥ ६ ॥
भूयोऽनेन त्रैपुरं किं नु दाहं कर्तुं मुक्तस्तप्तनाराच एषः ।
इत्याशङ्काव्याकुलं लोकचेतो या सर्पन्ती व्योम्नि दूरादकार्षीत् ॥ ७ ॥
कर्तुं कार्ष्णीं केवलं स्वस्य नाशो देवो विश्वस्यापि धाता तपस्याः(?) ।
इत्यानन्दात्तस्य नीराजनेव व्योम्नि रेजे या समारभ्यमाणा ॥ ८ ॥
तामालोक्याकाशदेशादुदञ्चज्ज्योतिर्ज्वालादीपिताशां पतन्तीम् ।
इत्थं चित्ते प्राप्तनिर्वेदखेदो मीलच्चक्षुश्चिन्तयामास देवः ॥ ९ ॥
देवः कश्चिज्ज्योतिषां मध्यवर्ती दुर्गे तिष्ठन्नित्यमेषोऽन्तरिक्षे ।
यातो दैवादीदृशीं चेदवस्थां कः स्याल्लोके निर्व्यपायस्तदन्यः ॥ १० ॥
आयुःकर्मालानभङ्गे प्रसर्पन्नापद्वीथीर्दीर्घदोर्दण्डचण्डः ।
प्राणायामारामभूलानि भिन्दन्केरुत्सिक्तः सह्यते कालदन्ती ॥ ११ ॥
यत्संसक्तं प्राणिनां क्षीरनीरन्यायेनोच्चैरङ्गमप्यन्तरङ्गम् ।
आयुश्छेदैर्याति चेत्तत्तदास्था का बाह्येषु स्त्रीतनूजादिकेषु ॥ १२ ॥
प्रत्यावृत्तिर्न व्यतीतस्य नूनं सौख्यस्यास्ति भ्रान्तिरागामिनोऽपि ।
तत्तत्कालोपस्थितस्यैव हेतोर्बध्नात्यास्थां संसृतौ को विदग्धः ॥ १३ ॥
वातान्दोलत्पद्मिनीपल्लवाम्भोबिन्दुच्छायाभङ्गुरं जीवितव्यम् ।
तत्संसारासारसौख्याय कस्माज्जन्तुस्ताम्यत्यब्धिवीचीचलाय ॥ १४ ॥
सारङ्गाक्षीचञ्चलापाङ्गनेत्रश्रेणीलीलालोकसंक्रामितं नु ।
व्यालोलत्वं तत्क्षणादृष्टनष्टा धत्ते नृणां हन्त तारुण्यलक्ष्मीः ॥ १५ ॥
हालाहलासोदरा मन्दरागप्रादुर्भूता सत्यमेवात्र लक्ष्मीः ।
नो चेच्चेतोमोहहेतुः कथं सा लोके रागं मन्दमेवादधाति ॥ १६ ॥
विण्मूत्रादेर्धाम मध्यं वधूनां ताभिःष्यन्दद्द्वारमेवेन्द्रियाणि ।
श्रोणीबिम्बं स्थूलमांसास्थिकूटं कामान्धानां प्रीतये धिक्तथापि ॥ १७ ॥

१. बाह्यमिव धासकृत्स्म.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेदोमज्जाशोणितैः पिच्छलेऽन्तस्त्वक्प्रच्छन्ने स्नायुनद्धास्थिसंधौ ।
साधुर्देहे कर्मचण्डालगेहे बध्नात्युद्यत्पूतिगन्धे रतिं कः ॥ १८ ॥
इन्द्रोपेन्द्रब्रह्मरुद्राहमिन्द्रा देवाः केचिद्ये नराः पन्नगा वा ।
तेऽप्यन्येऽपि प्राणिनां क्रूरकालव्यालाक्रान्तं रक्षितुं न क्षमन्ते ॥ १९ ॥
बालं वर्षीयांसमाढ्यं दरिद्रं धीरं भीरुं सज्जनं दुर्जनं च ।
अश्नात्येकः कृष्णवर्त्मेव कक्षं सर्वग्रासी निर्विवेकः कृतान्तः ॥ २० ॥
स्वच्छामेवाच्छाद्य दृष्टिं रजोभिः श्रेयोरत्नं जाग्रतामप्यशेषैः ।
दोषैर्येषां दस्युरूपैरुपात्तं संसारेऽस्मिन्हा हतास्ते हताशाः ॥ २१ ॥
वित्तं गेहादङ्गमुच्चैश्चिताग्नेर्व्यावर्तन्ते बान्धवाश्च श्मशानात् ।
एकं नानाजन्मवल्लीनिदानं कर्म द्वेधा याति जीवेन सार्धम् ॥ २२ ॥
छेत्तुं मूलात्कर्मपाशानशेषान्सद्यस्तीक्ष्णैस्तद्यतिष्ये तपोभिः ।
को वा कारागाररुद्धं प्रबुद्धः शुद्धात्मानं वीक्ष्य कुर्यादुपेक्षाम् ॥ २३ ॥
इत्थं यावत्प्राप्य वैराग्यभावं देवश्चित्ते चिन्तयामास धर्मः ।
ऊचुः स्वर्गादित्युपेत्यानुकूलं देवास्तावत्केऽपि लौकान्तिकास्ते ॥ २४ ॥
निःशेषापन्मूलभेदि त्वयेदं देवेदानीं चिन्तितं साधु साधु ।
एतेनैकः केवलं नायमात्मा संसाराब्धेरुद्धृता जन्तवोऽपि ॥ २५ ॥
नष्टा दृष्टिर्नष्टमिष्टं चरित्रं नष्टं ज्ञानं साधुधर्मादि नष्टम् ।
सन्तः पश्यन्त्वत्र मिथ्यान्धकारे त्वत्तः सर्वे केवलज्ञानदीपात् ॥ २६ ॥
तैरानन्दादित्थमानन्द्यमानं स्वर्दन्तीन्द्रारूढजम्भारिमुख्याः ।
आसेदुस्तं दुन्दुभिध्वानवन्तस्ते चत्वारो निर्जराणां निकायाः ॥ २७ ॥
दत्त्वा प्राज्यं नन्दनायाथ राज्यं देवोऽतुच्छप्रीतिरापृच्छ्य बन्धून् ।
दत्तस्कन्धं याप्ययानं सुरेन्द्रैरारुह्यागात्सालपूर्वं वनं सः ॥ २८ ॥
सिद्धान्नत्वा तत्र षष्ठोपवासी मौलौ मूलानीव कर्मद्रुमाणाम् ।
मुष्टिग्राहैः पञ्चभिः कुन्तलानां वृन्दान्युच्चैरुच्चखान क्षणेन ॥ २९ ॥
केशांस्तस्याधत्त माणिक्यपात्रे क्षीराम्भोधिप्रापणायामरेन्द्रः ।
भर्त्रा मूर्ध्नादाय मुक्तान्कथंचित्को वा विद्वान्नाददीतादरेण ॥ ३० ॥

१. भवनवासि-व्यन्तर-ज्योतिष्क-कल्पवासिनो जैनागमप्रसिद्धाः. २. शिबिकाम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रालेयांशौ पुण्यमैत्रीं प्रयाते माघे शुक्ला या त्रयोदश्यनिन्द्या ।
धर्मस्तस्यामात्तदीक्षोऽपराह्णे जातः क्षोणीभृत्सहस्रेण सार्धम् ॥ ३१ ॥
तत्र त्यक्तालंकृतिर्मुक्तवासा रूपं बिभ्रज्जातमात्रानुरूपम् ।
देवो भेजे प्रावृषेण्याम्बुवाहश्रेणीमुक्तस्वर्णशैलोपमानम् ॥ ३२ ॥
गीतं वाद्यं नृत्यमप्यात्मशक्त्या कृत्वा चेतोहारि जम्भारिमुख्याः ।
देवाः सर्वे प्राप्तपुण्यातिरेका नत्वार्हन्तं स्वानि धामानि जग्मुः ॥ ३३ ॥
स्कन्धावारे पाटलीपुत्रनाम्नि क्षोणीभर्तुर्धन्यसेनस्य गेहे ।
क्षीरान्नेनाचारवित्पाणिपात्रे कृत्वा पञ्चाश्चर्यकृत्पारणं सः ॥ ३४ ॥
पुण्यारण्ये प्रांशुके क्वापि देशे नासाप्रान्तन्यस्तनिःस्पन्दनेत्रः ।
कायोत्सर्गं बिभ्रदभ्रान्तचित्तो लोके लेप्याकारशङ्कामकार्षीत्॥३५॥(युग्मम्)
अध्यासीनो ध्यानमुद्रामतन्द्रः स्वामी रेजे लम्बमानोरुबाहुः ।
ये निमग्नाः श्वभ्रगर्भान्धकूपे व्यामोहान्धास्तानिवोद्धर्तुकामः ॥ ३६ ॥
मुक्ताहारः सर्वदोपत्यकान्तारब्धप्रीतिः स्वीकृतानन्तवासाः ।
देवो धुन्वन्विग्रहस्थानरातीन्कान्तारेऽपि प्राप सौराज्यलीलाम् ॥ ३७ ॥
देवोऽक्षामक्षान्तिपाथोदपाथोधारासारैः सारसंपत्फलाय ।
सिञ्चन्नुच्चैः संयमारामचक्रं चक्रे क्रोधोद्दामदावाग्निशान्तिम् ॥ ३८ ॥
भिन्दन्मानं मार्दवेनार्जवेन च्छिन्दन्मायां निःस्पृहत्वास्तलोभः ।
मूलादेवोच्छेत्तुकामः स चक्रे कर्मारीणामाश्रवद्वाररोधम् ॥ ३९ ॥
कुर्वन्गुर्वीं वाङ्मनःकायगुप्तिं रक्षन्साक्षात्स्वं समित्यर्गभाभिः (?) ।
बध्नन्नक्षाण्येष दीर्घैर्गुणौघैश्चित्रं मोक्षायैव बद्धोद्यमोऽभूत् ॥ ४० ॥
तस्यारण्ये ध्याननिष्कम्पमूर्तेर्वक्त्रस्यैवामोदमाघ्रातुकामाः ।
बद्धावासाश्चन्दनस्येव तस्थुः स्वस्थाः स्वैरं स्कन्धबन्धे भुजंगाः ॥ ४१ ॥

---

१. चित्रलिखित इव तस्थौ. २. त्यक्तभोजनः; (पक्षे) मुक्ताहारोऽस्यास्तीति. मौक्तिकहारवानिति यावत्. ३. सर्वदः, अपत्येषु कान्तासु च आरब्धप्रीतिः; (पक्षे) सर्वदा उपत्यकायाः पर्वतासन्नभूमेरन्ते आरब्धप्रीतिः. ४. स्वीकृतानि अनन्तानि वासांसि येन सः; (पक्षे) स्वीकृतमनन्तं वियदेव वासो येन सः. दिगम्बर इति यावत्. ५. युद्धस्थान् शत्रून्; (पक्षे) देहस्थान् कामक्रोधादीन्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्ट्वात्मानं पुद्गलाद्भिन्नरूपं देवो देहे न स्वबुद्धिं बबन्ध।
तेनात्याक्षीत्सोयशीतातपार्तं श्रेयोनिष्ठः काष्ठवद्दूरमेनम्॥ ४२॥
विघ्नं निघ्नन्नाक्षिपन्नेष दोषाञ्जज्ञे स्वामी भाजनं यत्क्षमायाः।
सैषा काचिच्चातुरी तस्य भर्तुश्चित्तेऽस्माकं चित्रमद्यापि दत्ते॥ ४३॥
आसंसारं साहचर्यव्रतस्थं दुःस्थीकुर्वन्रागमागन्तुकेऽपि।
योगे मैत्रीं पक्षपातं च मोक्षे बिभ्रच्चित्रं स्वं चरित्रं स ऊचे॥ ४४॥
तस्याशेषं कर्षतो धीवरस्य स्फारीभूतं मानसान्मोहजालम्।
तत्पाशान्तःपीड्यमानैकमीनो मन्ये त्रासान्निर्ययौ मीनकेतुः॥ ४५॥
कल्पान्तोद्यद्द्वादशद्वादशात्मश्रेणीतेजःपुञ्जतीव्रव्रतेऽस्मिन्।
दृग्व्याघातत्रस्तचित्तेव चक्षुर्नो चिक्षेप प्रत्यहं मोहलक्ष्मीः॥ ४६॥
चक्रे कार्श्यं संयमस्तस्य देहे तन्वानोऽपि ज्योतिरत्यन्तरम्यम्।
माणिक्यस्येवावनीमण्डनार्थं शाणोल्लेखः सम्यगारभ्यमाणः॥ ४७॥
एकं पात्रं सौकुमार्यस्य तीव्रे तेजःपुञ्जे तापसे वर्तमानः।
चण्डज्योतिर्मण्डलातिथ्यभाजो भेजे लक्ष्मीं क्षीणपीयूषरश्मेः॥ ४८॥
भर्गादीनां भग्नगर्वातिरेकः कः श्रीवर्ये मीनकेतुर्वराकः।
अध्यारूढप्रौढिरग्नौ न कुर्याद्रत्नज्योतिःस्तम्भदम्भोनिषेकः॥ ४९॥
भ्रूचापेनाकर्णमाकृष्य मुक्ताः स्वर्गस्त्रीभिस्तत्र दीर्घाः कटाक्षाः।
हृत्संतोषाविर्भवद्वारबाणे बाणाः कामस्येव वैफल्यमीयुः॥ ५०॥
भोगे रोगे काञ्चने वा तृणे वा मित्रे शत्रौ पत्तने वा वने वा।
देवो दृष्टिं निर्विशेषां दधानोऽप्येकः सीमासीद्विशेषज्ञताश्चाः॥ ५१॥
तथ्यं पथ्यं चेदभाषिष्ट किंचित्स्निग्धं शुद्धं चेदभुङ्क्तान्यदत्तम्।
मुक्त्वा नक्तं चेदयासीत्तत्र पश्यन्सर्वं किंचित्तस्य शास्त्रानुरोधि॥ ५२॥
तस्यावश्यं वायुरेकेन्द्रियोऽपि प्रत्याश्रत्तो आप न प्रातिकूल्यम्।
तत्किं चित्रं तत्र पञ्चेन्द्रियाणां सिंहादीनां यन्न दुःशीलभावः॥ ५३॥

---

१. देहात्. २. श्रिया श्रेष्ठस्य; (पक्षे) कैवर्तस्य. ३. अन्तःकरणात्; (पक्षे) सरोविशेषात्. ४. द्वादशात्मा दिवाकरः. ५. वारबाणः कञ्चुकः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्तर्बाह्यैर्दीप्यमानैस्तपोऽग्निज्वालैर्नीत्वा दुर्जराण्याशु पाकम् ।
भुञ्जानोऽसौ कर्मवल्लीफलानि श्लाघ्यः स्वल्पैरप्यहोभिर्बभूव ॥ ५४ ॥
निर्व्यामोहो निर्मदो निष्प्रपञ्चो निःसङ्गोऽयं निर्भयो निर्ममश्च ।
देशे देशे पर्यटन्संयतानां केषां नासीन्मोक्षशिक्षैकहेतुः ॥ ५५ ॥
छद्मस्थोऽसौ वर्षमेकं विहृत्य प्राप्तो दीक्षाकाननं शालरम्यम् ।
देवो मूले सप्तपर्णद्रुमस्य ध्यानं शुक्लं सम्यगालम्ब्य तस्थौ ॥ ५६ ॥
माघे मासे पूर्णमास्यां सपुष्ये कृत्वा धर्मो घातिकर्मव्यपायम् ।
उत्पादान्तध्रौव्यवस्तुस्वभावोद्भासि ज्ञानं केवलं स प्रपेदे ॥ ५७ ॥
भित्त्वा कर्मध्वान्तमभ्युद्गतेऽस्मिन्दत्तानन्दे केवलज्ञानचन्द्रे ।
तत्कालोद्यद्दुन्दुभिध्वानदम्भाद्व्योमाम्भोधिर्गाढमभ्युज्जगर्ज ॥ ५८ ॥
जातं चेतो व्योमवन्नीरजस्कं नृणां पूर्वाद्या इवाशाः प्रसेदुः ।
प्राप द्वेषीवानिलोऽप्यानुकूल्यं किं किं नासीन्निष्कलङ्कं तदानीम् ॥ ५९ ॥
तन्माहात्म्योत्कर्षवृत्त्येव हर्षं बिभ्राणासौ साधुगन्धोदवृष्ट्या ।
तत्कालोद्यत्सस्यसंपच्छलेन क्षोणी तत्राधत्त रोमाञ्चमुच्चैः ॥ ६० ॥
नित्योपात्तानङ्गसङ्गामलीलासाहाय्येन व्यञ्जितात्मापराधम् ।
भीत्येवास्य क्रूरकंदर्पशत्रोः सेवां चक्रे चक्रमस्मिन्नृतूनाम् ॥ ६१ ॥
भाषाभेदैस्तैश्चतुर्भिश्चतुर्धा संसारस्यापारदुःखां प्रवृत्तिम् ।
वक्तुं चातुर्वर्ण्यसंघस्य हेतोर्मन्ये देवोऽसौ चतुर्वक्त्र आसीत् ॥ ६२ ॥
तस्य क्षीणाशातवेद्योदयत्वान्नाभूद्भुक्तिर्नोपसर्गः कदाचित् ।
निःष्पन्दाया ज्ञानदृष्टेरिवापुः पक्ष्मस्पन्दं स्पर्धया नेक्षणानि ॥ ६३ ॥
वृद्धिं प्रापुर्नाङ्गजा वा नखा वा तस्यावश्यं योगनिद्रास्थितस्य ।
का वार्ता वा कर्मणामान्तराणां येषां रेखा नाममात्रावशेषा ॥ ६४ ॥
पादन्यासे सर्वतो न्यस्यमानप्रेङ्खत्पद्माम्भोजलीलाशयेव ।
सेवानम्रप्राणिसंचारलक्ष्या पादाभ्यर्णं नास्य लक्ष्मीर्मुमोच ॥ ६५ ॥

---

१. 'संस्कृतं प्राकृतं चैवापभ्रंशो भूतभाषितम् । इति भाषाश्चतस्रोऽपि यान्ति काव्यस्य कायताम् ॥' इति वाग्भटः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नो दौर्भिक्ष्यं नेतयो नोपसर्गा नो दारिद्र्यं नोपघातो न रोगाः ।
तन्माहात्म्याद्योजनानां शते द्वे नाभूत्किंचित्क्वापि कर्माप्यनिष्टम् ॥ ६६ ॥
नादैर्घण्टासिंहशङ्खानकानां कल्पज्योतिर्भावनव्यन्तरेन्द्राः ।
कर्तुं सेवां ते प्रचेलुर्गुणौघैर्हृत्संलग्नैः कृष्यमाणा इवास्य ॥ ६७ ॥
स्वर्गात्तत्रागच्छतामन्तराले रेजे पङ्क्तिः कापि वैमानिकानाम् ।
शुभ्रीकर्तुं कीर्तिसंपत्सुधाभिर्व्योमैवोच्चैर्मञ्चकाध्यासितानाम् ॥ ६८ ॥
तस्मिन्काले तां सभां धर्मनाथस्येन्द्रादेशाद्व्योम्नि चक्रे कुबेरः ।
यस्या नानारत्नमय्याः प्रमाणं पञ्च प्राहुर्योजनान्यागमज्ञाः ॥ ६९ ॥
नेदीयस्याः प्रेयसा विप्रलम्भव्याख्यादक्षां तेन वेणीं विमोच्य ।
धूलीजालच्छद्मना पार्श्वतोऽस्याः क्षिप्तं मुद्राकङ्कणं मुक्तिलक्ष्म्याः ॥ ७० ॥
ते प्रत्याशं वायुवेल्लद्ध्वजाग्रा मानस्तम्भास्तत्र चत्वार आसन् ।
क्रोधादीनां ये चतुर्णां निरासे संसल्लक्ष्म्यास्तर्जनीकार्यमीयुः ॥ ७१ ॥
तत्पर्यन्ते रत्नसोपानरम्या वाप्यो रेजुस्ताश्चतस्रश्चतस्रः ।
प्रौढेनार्हत्तेजसा यत्र रात्रौ कोकः शोकं नाप कान्तावियोगात् ॥ ७२ ॥
आस्यं तस्याः [1]सालकान्तं दधत्याः शोभामङ्के संसदः स्वां दिदृक्षोः ।
तच्चत्वारि स्फाटिकस्वच्छनीराण्यापुर्लीलादर्पणत्वं सरांसि ॥ ७३ ॥
मन्दान्दोलद्वातलीलाचलोर्मिस्तेभ्योऽप्यग्रे खातिका तोयपूर्णा ।
जैनव्याख्याज्ञातसंसारदुःखत्रस्यन्निष्क्रान्ताहिगर्भेव रेजे ॥ ७४ ॥
अन्तर्लीनैकैकनिष्कम्पभृङ्गप्रेङ्खत्पुष्पा पुष्पवाटी तदूर्ध्वम् ।
दत्ताश्चर्या भूत्रयस्यापि भर्तुर्द्रष्टुं लक्ष्मीं स्फारिताक्षीव रेजे ॥ ७५ ॥
सालः शृङ्गालम्बिनक्षत्रमालस्तस्याः प्रान्ते नायमासीद्विशालः ।
भ्रष्टं किं तु प्रोतरत्नं तदानीमिन्द्रक्षोभात्कुण्डलं स्वर्गलक्ष्म्याः ॥ ७६ ॥
भृङ्गाराद्यैर्मङ्गलद्रव्यवृन्दैः शङ्खध्वानैः सुप्रधानैर्निधानैः ।
द्वारे द्वारे निःस्पृहस्यापि भर्तुर्विश्वैश्वर्यं व्यज्यते स्म प्रभूतेः ॥ ७७ ॥
तस्यैवोच्चैर्गोपुराणां चतुर्णामन्तर्द्वे द्वे रेजतुर्नाट्यशाले ।
यत्रावर्णं शासनं मीनकेतोरेणाक्षीणां लास्यमासीज्जिनेषु ॥ ७८ ॥

१. सालेव प्राकारेण कान्तम्; (पक्षे) अलकान्तैः समेतम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वौ द्वौ मार्गे धूपकुम्भावभूतां यद्वक्रेभ्यो निर्गता धूमराजिः ।
मुक्त्वा देहं ज्ञातुरग्रे भ्रमन्ती भर्तुः कर्मश्यामिकेवावभासे ॥ ७९ ॥
कृत्वा रूपं दंशपोतप्रमाणं भीत्या कोणे क्वापि लोके स्थितस्य ।
पापस्येवोत्सारणार्थं सुगन्धो धूमस्तस्मिन्धूपजन्मोज्जिजृम्भे ॥ ८० ॥
क्रीडोद्यानान्यत्र चत्वारि ताभ्यामासन्नूर्ध्वप्रोल्लसत्पल्लवानि ।
इन्द्रोद्यानं तच्चतुर्यागवृक्षव्याजाज्जेतुं यैरुदस्ताः स्वहस्ताः ॥ ८१ ॥
प्रेङ्खद्दोलासीनसेव्याम्बुधारैर्धारायन्त्रैस्तैर्लतामण्डपैश्च ।
स्वैरक्रीडल्लोकचित्तेक्षणैणास्तेऽप्यारेजुः काञ्चनाक्रीडशैलाः ॥ ८२ ॥
नानारत्नस्तम्भशोभैरथासीत्सालंकारा तोरणैः स्वर्णवेदी ।
रात्रावन्तर्बिम्बितेन्दुग्रहोच्चैरास्थानीव श्रेयसो या विरेजे ॥ ८३ ॥
ऊर्ध्वं तस्यास्तार्क्ष्यहंसोक्षमुख्या दिक्संख्यातास्ता बभुर्वैजयन्त्यः ।
यासु व्योमोद्वेल्लनाकृष्टगङ्गाभ्रान्तिं चक्रुः स्यूतमुक्ताफलाभाः ॥ ८४ ॥
कर्णाकारं गोपुराणां चतुष्कं बिभ्रत्सालस्तत्परं काञ्चनोऽन्यः ।
धर्मव्याख्यामार्हतीं श्रोतुमिच्छन्मन्ये मेरुः कुण्डलीभूय तस्थौ ॥ ८५ ॥
वाञ्छातीतं यच्छतोऽप्यस्य पार्श्वे वाञ्छामात्रत्यागिनः कल्पवृक्षाः ।
तस्मिन्नुच्चैस्तस्थुरुद्धृत्य शाखाः का वा लज्जा हन्त निश्चेतनानाम्॥ ८६ ॥
ऊर्ध्वं तेभ्योऽभूच्चतुर्गोपुराङ्का विश्वानन्दोज्जीविनी वज्रवेदी ।
रेजे पङ्क्तिस्ताद्दशानां दशानां रत्नज्योतिर्ज्यायसी तोरणानाम् ॥ ८७ ॥
स्तूपास्तेषामन्तरन्तर्नवोच्चैस्ते प्रत्येकं रेजुरर्चासनाथाः ।
तत्रैवासन्सन्मुनीनां मनोज्ञा नानासंसन्मण्डपास्तुङ्गतुङ्गाः ॥ ८८ ॥
रुद्धक्रूरानङ्गहेतिप्रचारस्तत्प्राकारः स्फाटिकः प्रादुरासीत् ।
तस्याप्यन्तश्चन्द्रकान्तप्रतिष्ठाः कोष्ठास्तत्र द्वादशासन्गरिष्ठाः ॥ ८९ ॥
वीतग्रन्थाः कल्पनार्योऽप्यथार्या ज्योतिर्भौमा हि स्त्रियो भावनाश्च ।
भौमज्योतिः कल्पदेवा मनुष्यास्तिर्यग्यूथान्येषु तस्थुः क्रमेण ॥ ९० ॥
ऊर्ध्वं तेभ्यो वल्लभं लोचनानां स्थानं दिव्यं गन्धकुट्याख्यमासीत् ।
अन्तस्तस्योद्दाममाणिक्यदीपं रेजे रम्यं काञ्चनं सिंहपीठम् ॥ ९१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नज्योतिर्भासुरे तत्र पीठे तिष्ठन्देवः शुभ्रभामण्डलस्थः ।
क्षीराम्भोधेः सिच्यमानः पयोभिर्भूयो रेजे काञ्चनाद्राविवोच्चैः ॥ ९२ ॥
गायन्नादेनेव भृङ्गाङ्गनानां नृत्यल्लोलैः पल्लवानामिवौघैः ।
किं ब्रूमोऽन्यत्तस्य वृत्तं गुणौघैर्जज्ञे रक्तो यस्य वृक्षोऽप्यशोकः ॥ ९३ ॥
वृष्टिः पौष्पी सा कुतोऽभून्नभस्तः संभाव्यन्ते नात्र पुष्पाणि यस्मात् ।
यद्वा ज्ञातं द्रागनङ्गस्य हस्तादर्हद्भीत्या तत्र बाणा निपेतुः ॥ ९४ ॥
आविर्भूतं यद्भवद्भूतभावि ज्ञानाकारं तुल्यमिन्दुत्रयेण ।
अव्याबाधामातपत्रत्रयं तत्तस्यावोचद्भूत्रयैश्वर्यलक्ष्मीम् ॥ ९५ ॥
छाया कायस्यास्य सेवोपसर्पद्भास्वच्चक्रेणेव भामण्डलेन ।
क्षिप्ता नान्तश्चेत्कथं तत्प्रपेदे तीव्रा चेतस्तापसंपत्प्रशान्तिम् ॥ ९६ ॥
रेजे मुक्तिश्रीकटाक्षच्छटाभा पार्श्वे पङ्क्तिश्चामराणां जिनस्य ।
ज्ञानालोके निष्फलानामिवेन्दोर्भासामुच्चैर्दण्डनिर्यन्त्रितानाम् ॥ ९७ ॥
अप्युद्ग्रीवैः श्रूयमाणा कुरङ्गैः कर्णाभ्यर्णस्फारपीयूषधारा ।
आ गव्यूतिद्वन्द्वमभ्युल्लसन्ती दिव्या भाषा कस्य नासीत्सुखाय ॥ ९८ ॥
क्वेयं लक्ष्मीः क्वेदृशं निःस्पृहत्वं क्वेदं ज्ञानं क्वास्त्यनौद्धत्यमीदृक् ।
रे रे ब्रूत द्राक्कुतीर्था इतीव ज्ञाने भर्तुर्दुन्दुभिर्व्योम्न्यवादीत् ॥ ९९ ॥
लास्योल्लासा वाद्यविद्याविलासा गीतोद्गाराः कर्णपीयूषधाराः ।
स्थाने स्थाने तत्र ते ते बभूवुश्छायाप्यस्मिन्दुर्लभासीद्यदीया ॥ १०० ॥

इति निरुपमलक्ष्मीरष्टभिः प्रातिहार्यै-
रतिशयगुणशाली केवलज्ञानभानुः ।
समवसरणमध्ये धर्मतत्त्वं विवक्षुः
सुरपरिषदि तस्थौ धर्मनाथो जिनेन्द्रः ॥ १०१ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये विंशतितमः सर्गः ।

---

## एकविंशः सर्गः ।

तत्त्वं जगत्त्रयस्यापि बोधाय त्रिजगद्गुरुम् ।
तमापृच्छदथातुच्छज्ञानपण्यापणं गणी ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो भूतभवद्भाविपदार्थव्यक्तिसाक्षिणी ।
निःशेषदोषनिर्मुक्ता त्यक्तमिथ्यापथस्थितिः ॥ २ ॥
विपक्षगर्वसर्वस्वदूरोच्चाटनडिण्डिमः ।
अपारपापसंभारभूधरोपद्रवाशनिः ॥ ३ ॥
स्याद्वादवादसाम्राज्यप्रतिष्ठाप्रसवश्रुतिः ।
अतुल्यधर्ममल्लोरुकरास्फोटस्फुटाकृतिः ॥ ४ ॥
भ्रूविभ्रमकरन्यासश्वासौष्ठस्पन्दवर्जिता ।
वर्णविन्यासशून्यापि वस्तुबोधविधायिनी ॥ ५ ॥
पृथक्पृथगभिप्रायवचसामपि देहिनाम् ।
तुल्यमेकाप्यनेकेषां स्पष्टमिष्टार्थसाधिका ॥ ६ ॥
सर्वाद्भुतमयी सृष्टिः सुधावृष्टिश्च कर्णयोः ।
प्रावर्तत ततो वाणी सर्वविद्येश्वराद्विभोः ॥ ७ ॥ (कुलकम्)
जीवाजीवाश्रवा बन्धसंवरावपि निर्जराः ।
मोक्षश्चेतीह तत्त्वानि सप्त स्युर्जिनशासने ॥ ८ ॥
बन्धान्तर्भाविनोः पुण्यपापयोः पृथगुक्तितः ।
पदार्था नव जायन्ते तान्येव भुवनत्रये ॥ ९ ॥
अमूर्तश्चेतनाचिह्नः कर्ता भोक्तातनुप्रभः ।
ऊर्ध्वगामी स्मृतो जीवः स्थित्युत्पत्तिव्ययात्मकः ॥ १० ॥
सिद्धसंसारिभेदेन द्विप्रकारः स कीर्तितः ।
नरकादिगतेर्भेदात्संसारी स्याच्चतुर्विधः ॥ ११ ॥
नारकः सप्तधा सप्तपृथ्वीभेदेन भिद्यते ।
अधिकाधिकसंक्लेशप्रमाणायुर्विशेषतः ॥ १२ ॥
रत्नशर्करावालुकापङ्कधूमतमःप्रभाः ।
महातमः प्रभा चेति सप्तैताः श्वभ्रभूमयः ॥ १३ ॥
तत्राद्या त्रिंशता लक्षैर्बिलानामतिभीषणा ।
द्वितीया पञ्चविंशत्या तृतीया च तिथिप्रमैः ॥ १४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतुर्थी दशभिर्युक्ता पञ्चमी त्रिभिरुल्बणैः ।
षष्ठी पञ्चोनलक्षेण सप्तमी पञ्चभिर्बिलैः ॥ १५ ॥
एवं नरकलक्षाणामशीतिश्चतुरुत्तरा ।
विज्ञेया तासु दुःखानां न संख्या निपुणैरपि ॥ १६ ॥
षडङ्गुलास्त्रयो हस्ताः सप्त चापानि विग्रहे ।
इयत्येव प्रमा ज्ञेया प्राणिनां प्रथमक्षितौ ॥ १७ ॥
द्वितीयादिष्वतोऽन्यासु द्विगुणद्विगुणोदयः ।
उत्सेधः स्याद्धरित्रीषु यावत्पञ्चधनुःशती ॥ १८ ॥
प्रसरद्दुःखसंतानमन्तर्मातुमिवाक्षमम् ।
वर्धयत्यङ्गमेतेषामधोऽधो धरणीष्वतः ॥ १९ ॥
एक आद्ये द्वितीये च त्रयः सप्त तृतीयके ।
चतुर्थे पञ्चमे च स्युर्दश सप्तदश क्रमात् ॥ २० ॥
षष्ठे द्वाविंशतिर्ज्ञेया त्रयस्त्रिंशच्च सप्तमे ।
आयुर्दुःखापवरके नरके सागरोपमाः ॥ २१ ॥
आद्ये वर्षसहस्राणि दशायुरधमं ततः ।
पूर्वस्मिन्यद्यदुत्कृष्टं निकृष्टं तत्तदग्रिमे ॥ २२ ॥
कदाचिदपि नैतेषां विधिरेधयतीहितम् ।
दुःखिनामनभिप्रेतमिवायुर्वर्धयत्यसौ ॥ २३ ॥
रौद्रध्यानानुबन्धेन बह्वारम्भपरिग्रहाः ।
तत्रौपपादिका जीवा जायन्ते दुःखखानयः ॥ २४ ॥
तेषामालिङ्गिताङ्गानां संततं दुःखसंपदा ।
न कदापि कृतेष्येव सुखश्रीर्मुखमीक्षते ॥ २५ ॥
साश्रुणी लोचने वाणी गद्गदा विह्वलं मनः ।
स्यात्तदेषां कथं दुःखं वर्णयन्ति दयालवः ॥ २६ ॥
सूतवद्भिन्नमप्यङ्गं यन्मिलत्यापदे पुनः ।
दुःखाकरोति मच्चित्तं तेन वार्तापि तादृशाम् ॥ २७ ॥

---

१. पारदवत्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधुमांसासवासक्त्यावगणय्य जिनागमम् ।
कौलादिदाम्भिकाचार्यसपर्याकारि यत्त्वया ॥ २८ ॥
तस्येदं भुज्यतां पक्वं फलमित्यसुरामराः ।
उत्कृत्योत्कृत्य तन्मांसं तन्मुखे प्रक्षिपन्त्यमी ॥ २९ ॥
पाययन्ति च निस्त्रिंशाः प्रतप्तकललं मुहुः ।
घ्नन्ति बध्नन्ति मथ्नन्ति क्रकचैर्दारयन्ति च ॥ ३० ॥
खण्डनं ताडनं तत्रोत्कर्तनं यन्त्रपीडनम् ।
किं किं दुष्कर्मणः पाकात्सहन्ते ते न दुःसहम् ॥ ३१ ॥
कृता श्वभ्रगतेर्भेदात्तत्स्वरूपनिरूपणा ।
व्यावर्ण्यते कियानस्या भेदस्तिर्यग्गतेरपि ॥ ३२ ॥
तिर्यग्योनिर्द्विधा जीवस्त्रसस्थावरभेदतः ।
त्रसा द्वित्रिचतुःपञ्चकरणाः स्युश्चतुर्विधाः ॥ ३३ ॥
स्पर्शसाधारणेष्वेषु नूनमेकैकमिन्द्रियम् ।
वर्धते रसनं घ्राणं चक्षुः श्रोत्रमिति क्रमात् ॥ ३४ ॥
वर्षाणि द्वादशैवायुर्मानं द्वादशयोजनम् ।
विवृणोति प्रकर्षेण जीवो द्वीन्द्रियविग्रहः ॥ ३५ ॥
दिनान्येकोनपञ्चाशदायुरुक्षे शरीरिणि ।
पादोनयोजनं मानं जिनाः प्राहुः प्रकर्षतः ॥ ३६ ॥
आयुर्योजनमानस्य चतुरक्षस्य देहिनः ।
षण्मासप्रमितं प्रोक्तं जिनैः केवललोचनैः ॥ ३७ ॥
सहस्रमेकमुत्सेधो योजनानां प्रकीर्तितः ।
पूर्वकोटिमितं चायुः पञ्चेन्द्रियशरीरिणाम् ॥ ३८ ॥
पृथिवीमारुताप्तेजोवनस्पतिविभेदतः ।
अद्वितीयेन्द्रियाः सर्वे स्थावराः पञ्चकायिकाः ॥ ३९ ॥
द्वाविंशतिः सहस्राणि वर्षाणामायुरादिमे ।
द्वितीये त्रीणि सप्त स्यात्तृतीयेऽपि यथाक्रमम् ॥ ४० ॥

---

१. त्रसाश्चराः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतुर्थे त्रीण्यहान्येव पञ्चमस्य प्रकर्षतः ।
पञ्चेन्द्रियाधिकोत्सेधस्याब्दानामयुतं मतम् ॥ ४१ ॥
आर्तध्यानवशाज्जीवो लब्धजन्मात्र जायते ।
शीतवर्षातपक्लेशवधबन्धादिदुःखभाक् ॥ ४२ ॥
इति तिर्यग्गतेर्भेदो यथागममुदीरितः ।
मानवानां गतेः कोऽपि प्रकारः कथ्यतेऽधुना ॥ ४३ ॥
द्विःप्रकारा नरा भोगकर्मभूभेदतः स्मृताः ।
देवकुर्वादयस्त्रिंशत्प्रसिद्धा भोगभूमयः ॥ ४४ ॥
जघन्यमध्यमोत्कृष्टभेदात्तास्त्रिविधाः क्रमात् ।
द्विचतुःषड्धनुर्दण्डसहस्रोत्तुङ्गमानवाः ॥ ४५ ॥
तास्वेकद्वित्रिपल्यायुर्जीविनो भुञ्जते नराः ।
दशानां कल्पवृक्षाणां पात्रदानार्जितं फलम् ॥ ४६ ॥
कर्मभूमिभवास्तेऽपि द्विधार्यम्लेच्छभेदतः ।
भारताद्याः पुनः पञ्चदशोक्ताः कर्मभूमयः ॥ ४७ ॥
धनुःपञ्चशतैस्तासु सपादैः प्रमितोदयाः ।
उत्कर्षतो मनुष्याः स्युः पूर्वकोटिप्रमायुषः ॥ ४८ ॥
उत्सर्पिण्यवसर्पिण्योः कालयोर्वृद्धिह्रासिनी ।
भरतैरावते स्यातां विदेहस्त्वक्षतोदयः ॥ ४९ ॥
सागरोपमकोटीनां कोटिभिर्दशभिर्मिता ।
आगमज्ञैरिह प्रोक्तोत्सर्पिणी चावसर्पिणी ॥ ५० ॥
सुखमासुखमा प्रोक्ता सुखमा च ततो बुधैः ।
सुखमादुःखमान्यापि दुःखमासुखमा क्रमात् ॥ ५१ ॥
पञ्चमी दुःखमा षष्ठी दुःखमादुःखमा मता ।
प्रत्येकमिति भिद्यन्ते ते षोढा कालभेदतः ॥ ५२ ॥
चतस्रः कोटयस्तिस्रो द्वे च पूर्वादिषु क्रमात् ।
तिसृष्वम्भोधिकोटीनां मानमुक्तं जिनागमे ॥ ५३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऊना सहस्त्रैरब्दानां द्वाचत्वारिंशता ततः ।
चतुर्थ्यम्भोधिकोटीनां कोटिरेका प्रकीर्तिता ॥ ५४ ॥
पञ्चमी वत्सराणां स्यात्सहस्त्राण्येकविंशतिः ।
तत्प्रमाणैव तत्त्वज्ञैर्नूनं षष्ठी प्रतिष्ठिता ॥ ५५ ॥
षोढा षट्कर्मभेदेन ते गुणस्थानभेदतः ।
स्युश्चतुर्दश धात्रीयां म्लेच्छाः पञ्च प्रकीर्तिताः ॥ ५६ ॥
स्वभावमार्दवत्वेन स्वल्पारम्भपरिग्रहाः ।
भवन्त्यत्र नराः पुण्यपापाप्तिप्रक्षयक्रमाः ॥ ५७ ॥
नारीगर्भेऽतिबीभत्से कफामासृङ्मलाविले ।
कुम्भीपाकाधिकासाते(?) जायते कृमिवन्नरः ॥ ५८ ॥
वर्णितेति गतिर्नृणां देवानामपि संप्रति ।
कियत्यपि स्मरानन्दोज्जीविनी वर्णयिष्यते ॥ ५९ ॥
भावनव्यन्तरज्योतिर्वैमानिकविभेदतः ।
देवाश्चतुर्विधास्तेषु भावना दशधोदिताः ॥ ६० ॥
असुराहिसुपर्णाग्निविद्युद्वातकुमारकाः ।
दिग्द्वीपस्तनिताम्भोधिकुमाराश्चेति भेदतः ॥ ६१ ॥
तत्रासुरकुमाराणामुत्सेधः पञ्चविंशतिः ।
चापानि दश शेषाणामप्युदन्वत्परायुषाम् ॥ ६२ ॥
दशसप्तधनुर्माना व्यन्तराः किंनरादयाः ।
शिष्टास्तेऽष्टविधा येषामायुः पल्योपमं परम् ॥ ६३ ॥
ज्योतिष्काः पञ्चधा प्रोक्ताः सूर्यचन्द्रादिभेदतः ।
येषामायुःप्रमाणं च व्यन्तराणामिवाधिकम् ॥ ६४ ॥
वर्षाणामयुतं भौमभावनानामिहावमम् ।
पल्यस्यैवाष्टमो भागो ज्योतिषामायुरीरितम् ॥ ६५ ॥
वैमानिका द्विधा कल्पसंभूतातीतभेदतः ।
कल्पजास्तेऽच्युतादर्वाक्कल्पातीतास्ततः परे ॥ ६६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौधर्मैशाननामानौ धर्मारम्भमहोद्यमौ।
सनत्कुमारमाहेन्द्रौ ब्रह्मब्रह्मोत्तरावपि ॥ ६७ ॥
ततो लान्तवकापिष्ठौ शुक्रशुक्रोत्तरौ परौ।
शताराख्यसहस्रारावानतप्राणतावपि ॥ ६८ ॥
अथारणाच्युतौ कल्पाः षोडशेति प्रकीर्तिताः।
इदानीं तेषु देवानामायुर्मानं च कथ्यते ॥ ६९ ॥
हस्ताः सप्त द्वयोर्मानं षडूर्ध्वं नाकिषु द्वयोः।
चतुर्णां पञ्च चत्वारस्तदूर्ध्वं तावतां क्रमात् ॥ ७० ॥
त्रयः सार्धा द्वयोरूर्ध्वमूर्ध्वमाभ्यां द्वयोस्त्रयः।
इति षोडशकल्पानामूर्ध्वं ग्रैवेयकेष्वपि ॥ ७१ ॥
अधःस्थेषु करौ सार्धौ द्वौ मध्येषूर्ध्वगेषु च।
त्रिषु सार्धकरास्तेभ्यः परे हस्तप्रमाः सुराः ॥ ७२ ॥
सौधर्मैशानयोरायुःस्थितिर्द्वौ सागरौ मतौ।
सनत्कुमारमाहेन्द्रकल्पयोः सप्तसागराः ॥ ७३ ॥
दशैव कल्पयोर्ज्ञेया ब्रह्मब्रह्मोत्तराख्ययोः।
निर्णीता लान्तवे कल्पे कापिष्ठे च चतुर्दश ॥ ७४ ॥
षोडशैव ततः शुक्रमहाशुक्राभिधानयोः।
अष्टादश शतारे च सहस्रारे च निश्चिताः ॥ ७५ ॥
वर्णिता विंशतिर्नूनमानतप्राणताख्ययोः।
उक्ता द्वाविंशतिः प्राज्ञैरारणाच्युतयोरपि ॥ ७६ ॥
सर्वार्थसिद्धिपर्यन्तेष्वतो ग्रैवेयकादिषु।
एकैको वर्धते तावद्यावत्रिंशत्रयाधिका ॥ ७७ ॥
अकामनिर्जराबालतपःसंपत्कयोगतः।
अत्रौपपादिका भूत्वा प्रपद्यन्ते सुराः सुखम् ॥ ७८ ॥
विलासोल्लाससर्वस्वं रतिकोषसमुच्चयम्।
शृङ्गाररससाम्राज्यं भुञ्जते ते निरन्तरम् ॥ ७९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति व्यावर्णितो जीवश्चतुर्गत्यादिभेदतः ।
संप्रत्यजीवतत्त्वस्य किंचिद्रूपं निरूप्यते ॥ ८० ॥
धर्माधर्मौ नभः कालः पुद्गलश्चेति पञ्चधा ।
अजीवः कथ्यते सम्यग्जिनैस्तत्त्वार्थदर्शिभिः ॥ ८१ ॥
षड्द्रव्याणीति वर्ण्यन्ते समं जीवेन तान्यपि ।
विना कालेन तान्येव यान्ति पञ्चास्तिकायताम् ॥ ८२ ॥
धर्मः स तात्त्विकैरुक्तो यो भवेद्गतिकारणम् ।
जीवादीनां पदार्थानां मत्स्यानामुदकं यथा ॥ ८३ ॥
छायेव घर्मतप्तानामश्वादीनामिव क्षितिः ।
द्रव्याणां पुद्गलादीनामधर्मः स्थितिकारणम् ॥ ८४ ॥
लोकाकाशमभिव्याप्य स्थितावेतावनिष्क्रियौ ।
नित्यावप्रेरकौ हेतू मूर्तिहीनावुभावपि ॥ ८५ ॥
पुद्गलादिपदार्थानामवगाहैकलक्षणः ।
लोकाकाशः स्मृतो व्यापी शुद्धाकाशो बहिस्ततः ॥ ८६ ॥
धर्माधर्मैकजीवाः स्युरसंख्येयप्रदेशकाः ।
व्योमानन्तप्रदेशं तु सर्वज्ञैः प्रतिपाद्यते ॥ ८७ ॥
जीवादीनां पदार्थानां परिणामोपयोगतः ।
वर्तनालक्षणः कालोऽनंशो नित्यश्च निश्चयात् ॥ ८८ ॥
कालो दिनकरादीनामुदयास्तत्क्रियात्मकः ।
औपचारिक एवासौ मुख्यकालस्य सूचकः ॥ ८९ ॥
रूपगन्धरसस्पर्शशब्दवन्तश्च पुद्गलाः ।
द्विधा स्कन्धाणुभेदेन त्रैलोक्यारम्भहेतवः ॥ ९० ॥
भूमितैलतमोगन्धकर्माणुप्रकृतिः क्रमात् ।
स्थूलास्थूलादिभेदाः स्युस्तेषां षोढा जिनागमे ॥ ९१ ॥
भाषाहारशरीराख्यप्राणापानादिमूर्तिमत् ।
यत्किंचिदस्ति तत्सर्वं स्थूलं सूक्ष्मं च पुद्गलम् ॥ ९२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथागममजीवस्य कृता रूपनिरूपणा ।
इदानीमाश्रवस्यापि कोषमुन्मुद्रयाम्यहम् ॥ ९३ ॥
शरीरवाङ्मनःकर्मयोग एवाश्रवो मतः ।
शुभाशुभविकल्पोऽसौ पुण्यपापानुषङ्गतः ॥ ९४ ॥
गुरुनिह्नवदोषोक्तिमात्सर्यासादनादयः ।
आश्रयत्वेन विज्ञेया दृग्ज्ञानावृत्तिकर्मणोः ॥ ९५ ॥
दुःखशोकभयाक्रन्दसंतापपरिदेवनैः ।
जीवो बध्नात्यसद्वेद्यं स्वपराभयसंश्रयैः ॥ ९६ ॥
क्षान्तिशौचदयादानसरागसंयमादयः ।
भवन्ति हेतवः सम्यगसद्वेद्यस्य कर्मणः ॥ ९७ ॥
केवलिश्रुतसंघार्हद्धर्माणामविवेकतः ।
अवर्णवाद एवाद्यो दृष्टिमोहस्य संभवः ॥ ९८ ॥
कषायोदयतस्तीव्रपरिणामो मनस्विनाम् ।
चारित्रमोहनीयस्य कर्मणः कारणं परम् ॥ ९९ ॥
श्वभ्रायुषो निमित्तानि बह्वारम्भपरिग्रहाः ।
मायार्तध्यानतामूलं तिर्यग्योनिभवायुषः ॥ १०० ॥
नरायुषोऽपि हेतुः स्यादल्पारम्भपरिग्रहः ।
सरागसंयमत्वादिनिदानं त्रिदशायुषः ॥ १०१ ॥
स्याद्विसंवादनं योगवक्रता च निरत्यया ।
हेतुरशुभस्य नाम्नस्तदन्यस्य तदन्यथा ॥ १०२ ॥
षोडशदृग्विशुद्ध्याद्यास्तीर्थकृन्नामकर्मणः ।
स्वप्रशंसान्यनिन्दाद्या नीचैर्गोत्रस्य हेतवः ॥ १०३ ॥
विपरीताः पुनस्ते स्युरुच्चैर्गोत्रस्य साधकाः ।
अन्तरायः सदानादिर्विघ्ननिवर्तनोदयः ॥ १०४ ॥
रहस्यमिति निर्दिष्टं किमप्याश्रवगोचरम् ।
बन्धतत्त्वप्रबोधोऽयमधुना विधिनोच्यते ॥ १०५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकषायतया दत्ते जीवोऽसंख्यप्रदेशगान् ।
पुद्गलान्कर्मणो योग्यान्बन्धः स इह कथ्यते ॥ १०६ ॥
मिथ्यादृक्च प्रमादाश्च योगाश्चाविरतिस्तथा ।
कषायाश्च स्मृता जन्तोः पञ्च बन्धस्य हेतवः ॥ १०७ ॥
प्रकृतिस्थित्यनुभागप्रदेशानां विभेदतः ।
चतुर्विधः प्रणीतोऽसौ जैनागमविचक्षणैः ॥ १०८ ॥
अष्टौ प्रकृतयः प्रोक्ता ज्ञानावृतिदृगावृती ।
वेद्यं च मोहनीयायुर्नामगोत्रान्तराययुक् ॥ १०९ ॥
तद्भेदाः पञ्च नव द्वावष्टाविंशतिरप्यतः ।
चत्वारो द्विचत्वारिंशद्द्वौ पञ्चापि स्मृताः क्रमात् ॥ ११० ॥
आदितस्तिसृणां प्राज्ञैरन्तरायस्य च स्मृताः ।
सागरोपमकोटीनां त्रिंशत्कोट्यः परा स्थितिः ॥ १११ ॥
सप्ततिर्मोहनीयस्य विंशतिर्नामगोत्रयोः ।
आयुषस्तु त्रयस्त्रिंशद्विज्ञेयाः सागरोपमाः ॥ ११२ ॥
अवरावेदनीयस्य मुहूर्ता द्वादश स्थितिः ।
नाम्नो गोत्रस्य चाष्टौ स्याच्छेषास्त्वन्तर्मुहूर्तकम् ॥ ११३ ॥
भाव्यक्षेत्रादिसापेक्षो विपाकः कोऽपि कर्मणाम् ।
अनुभागो जिनैरुक्तः केवलज्ञानभानुभिः ॥ ११४ ॥
ये सर्वात्मप्रदेशेषु सर्वतो बन्धभेदतः ।
प्रदेशाः कर्मणोऽनन्ताः स प्रदेशः स्मृतो बुधैः ॥ ११५ ॥
इत्येष बन्धतत्त्वस्य चतुर्धा वर्णितः क्रमः ।
पदैः संक्षिप्यते कैश्चित्संवरस्यापि डम्बरः ॥ ११६ ॥
आश्रवाणामशेषाणां निरोधः संवरः स्मृतः ।
कर्म संव्रियते येनेत्यन्वयस्यावलोकनात् ॥ ११७ ॥
आश्रवद्वाररोधेन शुभाशुभविशेषतः ।
कर्म संव्रियते येन संवरः स निगद्यते ॥ ११८ ॥ (इति पाठान्तरम्)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मात्समितिगुप्तिभ्यामनुप्रेक्षानुचिन्तनात् ।
असावुदेति चारित्रादरिषट्कजयादपि ॥ ११९ ॥
किमन्यैर्विस्तरैरेतद्रहस्यं जिनशासने ।
आश्रवः संसृतेर्मूलं मोक्षमूलं तु संवरः ॥ १२० ॥
संवरो विवृतः सैष संप्रति प्रतिपाद्यते ।
जर्जरीकृतकर्मायःपञ्जरा निर्जरा मया ॥ १२१ ॥
दुर्जरं निर्जरत्यात्मा यया कर्म शुभाशुभम् ।
निर्जरा सा द्विधा ज्ञेया सकामाकामभेदतः ॥ १२२ ॥
सा सकामा स्मृता जैनैर्या व्रतोपक्रमैः कृता ।
अकामा स्वविपाकेन यथा श्वभ्रादिवासिनाम् ॥ १२३ ॥
सागारमनगारं च जैनैरुक्तं व्रतं द्विधा ।
अणुमहाव्रतभेदेन तयोः सागारमुच्यते ॥ १२४ ॥
अणुव्रतानि पञ्च स्युस्त्रिप्रकारं गुणव्रतम् ।
शिक्षाव्रतानि चत्वारि सागाराणां जिनागमे ॥ १२५ ॥
सम्यक्त्वं भूमिरेषां यन्न सिध्यन्ति तदुज्झिताः ।
दूरोत्सारितसंसारात्यातपा व्रतपादपाः ॥ १२६ ॥
धर्माप्तगुरुतत्त्वानां श्रद्धानं यत्सुनिर्मलम् ।
शङ्कादिदोषनिर्मुक्तं सम्यक्त्वं तन्निगद्यते ॥ १२७ ॥
तत्र धर्मः स एवाप्तैर्यः प्रोक्तो दशलक्षणः ।
आप्तास्त एव ये दोषैरष्टादशभिरुज्झिताः ॥ १२८ ॥
गुरुः स एव यो ग्रन्थैर्मुक्तो बाह्यैरिवान्तरैः ।
तत्त्वं तदेव जीवादि यदुक्तं सर्वदर्शिभिः ॥ १२९ ॥
शङ्काकाङ्क्षा विचिकित्सा मूढदृष्टिः प्रशंसनम् ।
संस्तवश्चेत्यतीचाराः सम्यग्दृष्टेरुदाहृताः ॥ १३० ॥
अदेवे देवबुद्धिर्या गुरुधीरगुरावपि ।
अतत्त्वे तत्त्वबुद्धिश्च तन्मिथ्यात्वं विलक्षणम् ॥ १३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधुमांसासवत्यागः पञ्चोदुम्बरवर्जनम् ।
अमी मूलगुणाः सम्यग्दृष्टेरष्टौ प्रकीर्तिताः ॥ १३२ ॥
द्यूतं मांसं सुरा वेश्या पापर्द्धिः[1] स्तेयवृत्तिता ।
परदाराभियोगश्च त्याज्यो धर्मधुरंधरैः ॥ १३३ ॥
मोहादमूनि यः सप्त व्यसनान्यत्र सेवते ।
अपारे दुःखकान्तारे संसारे बम्भ्रमीति सः ॥ १३४ ॥
मुहूर्तद्वितयादूर्ध्वं भूयस्तोयमगालितम् ।
शीलयेन्नवनीतं च न देशविरतिः क्वचित् ॥ १३५ ॥
दिनद्वयोषितं तक्रं दधि वा पुष्पितौदनम् ।
आमगोरससंपृक्तं द्विदलं चाद्यान्न शुद्धधीः ॥ १३६ ॥
विद्धं विचलितस्वादं धन्यमन्यद्विरूढकम् ।
तैलमम्भोऽथवाज्यं वा चर्मपात्रापवित्रितम् ॥ १३७ ॥
आर्द्रकन्दं कलिङ्गं वा मूलकं कुसुमानि च ।
अनन्तकायमज्ञातफलं संधानकान्यपि ॥ १३८ ॥
एवमादि यदादिष्टं श्रावकाध्ययने सुधीः ।
तज्जैनीं पालयन्नाज्ञां क्षुत्क्षामोऽपि न भक्षयेत् ॥ १३९ ॥
पापभीरुर्निशाभुक्तिं दिवा मैथुनमप्यसौ ।
मनोवाक्कायसंशुद्ध्या सम्यग्दृष्टिर्विवर्जयेत् ॥ १४० ॥
वर्तमानोऽनया स्थित्या सुसमाहितमानसः ।
भवत्यधिकृतो नूनं श्रावकव्रतपालने ॥ १४१ ॥
हिंसानृतवचःस्तेयस्त्रीमैथुनपरिग्रहात् ।
देशतो विरतिर्ज्ञेया पञ्चधाणुव्रतस्थितिः ॥ १४२ ॥
दिग्देशानर्थदण्डेभ्यो यत्त्रिधा विनिवर्तनम् ।
पोतायते भवाम्भोधौ त्रिविधं तद्गुणव्रतम् ॥ १४३ ॥
शोधनीयन्त्रशस्त्राग्निमुसलोलूखलार्पणम् ।
ताम्रचूडश्वमार्जारशारिकाशुकपोषणम् ॥ १४४ ॥

१. मृगया.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अङ्गारशकटारामभाटकास्फोटजीवनम् ।
तिलतोयेक्षुयन्त्राणां रोपणं दावदीपनम् ॥ १४५ ॥
दन्तकेशनखास्थित्वग्रोम्णां निन्द्यरसस्य च ।
शणलाङ्गललाक्षायःक्ष्वेडादीनां च विक्रयः ॥ १४६ ॥
वापीकूपतडागादिशोषणं कर्षणं भुवः ।
निर्लाञ्छनं भक्षरोधः पशूनामतिभारणम् ॥ १४७ ॥
वनकेलिर्जलक्रीडा चित्रलेप्यादिकर्म वा ।
एवमन्येऽपि बहवोऽनर्थदण्डाः प्रकीर्तिताः ॥ १४८ ॥
सामाजिकमथाद्यं स्याच्छिक्षाव्रतमगारिणाम् ।
आर्तरौद्रे परित्यज्य त्रिकालं जिनवन्दनात् ॥ १४९ ॥
निवृत्तिर्भुक्तभोगानां या स्यात्पर्वचतुष्टये ।
पोषधाख्यं द्वितीयं तच्छिक्षाव्रतमितीरितम् ॥ १५० ॥
भोगोपभोगसंख्यानं क्रियते यदलोलुपैः ।
तृतीयं तत्तदाख्यं स्याद्दुःखदावानलोदकम् ॥ १५१ ॥
गृहागताय यत्काले शुद्धं दानं यतात्मने ।
अन्ते सल्लेखना वान्यतच्चतुर्थं प्रकीर्त्यते ॥ १५२ ॥
व्रतानि द्वादशैतानि सम्यग्दृष्टिर्बिभर्ति यः ।
जानुदघ्नीकृतागाधभवाम्भोधिः स जायते ॥ १५३ ॥
यथागममिति प्रोक्तं व्रतं देशयतात्मनाम् ।
अनागारमतः किंचिद्ब्रूमस्त्रैलोक्यमण्डनम् ॥ १५४ ॥
अनागारं व्रतं द्वेधा बाह्याभ्यन्तरभेदतः ।
षोढा बाह्यं जिनैः प्रोक्तं तावत्संख्यानमान्तरम् ॥ १५५ ॥
वृत्तिसंख्यानमौदर्यमुपवासो रसोज्झनम् (?) ।
रहःस्थितितनुक्लेशौ षोढा बाह्यमिति व्रतम् ॥ १५६ ॥
स्वाध्यायो विनयो ध्यानं व्युत्सर्गो व्यावृतिस्तथा ।
प्रायश्चित्तमिति प्रोक्तं तपः षड्विधमान्तरम् ॥ १५७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यास्तिस्रो गुप्तयः पञ्च ख्याताः समितयोऽपि ताः ।
जननात्पालनात्पोषादष्टौ तन्मातरः स्मृताः ॥ १५८ ॥
निरूपितमिदं रूपं निर्जरायाः समासतः ।
इयमक्षीणसौख्यस्य लक्ष्मीर्मोक्षस्य वर्ण्यते ॥ १५९ ॥
अभावाद्बन्धहेतूनां निर्जरायाश्च यो भवेत् ।
निःशेषकर्मनिर्मोक्षः स मोक्षः कथ्यते जिनैः ॥ १६० ॥
ज्ञानदर्शनचारित्रैरुपायैः परिणामिनः ।
भव्यस्यायमनेकाङ्गविकल्पैरेव जायते ॥ १६१ ॥
तत्त्वस्यावगतिर्ज्ञानं श्रद्धानन्तस्य दर्शनम् ।
पापारम्भनिवृत्तिस्तु चारित्रं वर्ण्यते जिनैः ॥ १६२ ॥
ज्वालाकलापवद्देहस्तूर्ध्वमेरण्डबीजवत् ।
ततः स्वभावतो याति जीवः प्रक्षीणबन्धनः ॥ १६३ ॥
लोकाग्रं प्राप्य तत्रैव स्थितिं बध्नाति शाश्वतीम् ।
ऊर्ध्वं धर्मास्तिकायस्य विप्रयोगान्न यात्यसौ ॥ १६४ ॥
तत्रानन्तमसंप्राप्तमव्याबाधमसन्निभम् ।
प्राग्देहात्किंचिदूनोऽसौ सुखं प्राप्नोति शाश्वतम् ॥ १६५ ॥
इति तत्त्वप्रकाशेन निःशेषामपि तां सभाम् ।
प्रभुः प्रह्लादयामास विवस्वानिव पद्मिनीम् ॥ १६६ ॥
अथ पुण्यैः समाकृष्टो भव्यानां निःस्पृहः प्रभुः ।
देशे देशे तमश्छेत्तुं व्यचरद्भानुमानिव ॥ १६७ ॥
दत्तविश्वावकाशोऽयमाकाशोऽतिगुरुः क्षितेः ।
गन्तुमित्याददतस्तेन स्थानमुच्चैर्धियामुना ॥ १६८ ॥
अनपायापि वा प्राप्तुं पादच्छायां नभस्तले ।
उपकण्ठं लुलोठास्य पादयोः कमलोत्करः ॥ १६९ ॥
यत्तदा विदधे तस्य पादयोः पर्युपासनम् ।
अद्यापि भाजनं लक्ष्म्यास्तेनायं कमलाकरः ॥ १७० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिलकं तीर्थकृल्लक्ष्म्यास्तस्य प्राह पुरो भ्रमत् ।
धर्मचक्रं जगच्चक्रे चक्रवर्तित्वमक्षतम् ॥ १७१ ॥
विश्वप्रकाशकस्यास्य तेजोभिर्व्यर्थतां गतः ।
सेवार्थं संचचाराग्रे धर्मचक्रच्छलाद्रविः ॥ १७२ ॥
यत्रातिशयसंपन्नो विजहार जिनेश्वरः ।
तत्र रोगग्रहातङ्कशोकशङ्कापि दुर्लभा ॥ १७३ ॥
निष्कलाभा बभूवुस्ते विपक्षा इव सज्जनाः ।
प्रजा इव भुवोऽप्यासन्निष्कण्टकपरिग्रहाः ॥ १७४ ॥
के विपक्षा वराकास्ते प्रातिकूल्यविधौ प्रभोः ।
महाबलोऽपि यद्वायुः प्राप तस्यानुकूलताम् ॥ १७५ ॥
हेमरम्यं वपुः पञ्चचत्वारिंशद्धनुर्मितम् ।
बिभ्रद्देवैः श्रितो रेजे स्वर्णशैल इवापरः ॥ १७६ ॥
द्वाचत्वारिंशदेतस्य सभायां गणिनोऽभवन् ।
नवैव तीक्ष्णबुद्धीनां शतानि पूर्वधारिणाम् ॥ १७७ ॥
शिक्षकाणां सहस्राणि चत्वारि सप्तभिः शतैः ।
सह षड्भिः शतैस्त्रीणि सहस्राण्यधिबोधिनाम् ॥ १७८ ॥
केवलज्ञानिनां पञ्चचत्वारिंशच्छतानि च ।
मनःपर्ययनेत्राणां तावन्ति क्षपितांहसाम् ॥ १७९ ॥
सप्तैव च सहस्राणि विक्रयर्द्धिमुपेयुषाम् ।
शतैरष्टाभिराश्लिष्टे द्वे सहस्रे च वादिनाम् ॥ १८० ॥
अर्जिकाणां सहस्राणि षट्चतुर्भिः शतैः सह ।
श्रावकाणां च लक्षे द्वे शुद्धसम्यक्त्वशालिनाम् ॥ १८१ ॥
श्राविकाणां तु चत्वारि लक्षाणि क्षपितैनसाम् ।
निर्जराणां तिरश्चां च संख्याप्यत्र न बुध्यते ॥ १८२ ॥
इत्याश्वास्य चतुर्विधेन महता संघेन संभूषितः
सैन्येनेव विपक्षवादिवदनाक्रष्टामशेषां महीम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृप्यन्मोहचमूं विजित्य विजयस्तम्भायमानं तदा
सम्मेदाचलमाससाद विजयश्रीधर्मनाथः प्रभुः ॥ १८३ ॥
तत्रासाद्य सितांशुभोगसुभगां चैत्रे चतुर्थीं तिथिं
यामिन्यां स नवोत्तरैर्यमवतां साकं शतैरष्टभिः ।
सार्धद्वादशवर्षलक्षपरमारम्यायुषः प्रक्षये
ध्यानध्वस्तसमस्तकर्मनिगलो जातस्तदानीं क्षणात् ॥ १८४ ॥
अभजदथ विचित्रैर्वाक्प्रसूनोपचारैः
प्रभुरिह हरिचन्द्राराधितो मोक्षलक्ष्मीम् ।
तदनु तदनुयायी प्राप्तपर्यन्तपूजो-
पचितसुकृतराशिः स्वं पदं नाकिलोकः ॥ १८५ ॥

इति महाकविश्रीहरिचन्द्रविरचिते धर्मशर्माभ्युदये महाकाव्ये एकविंशः सर्गः ।

---

श्रीमानमेयमहिमास्ति स नोमकानां
वंशः समस्तजगतीवलयावतंसः ।
हस्तावलम्बनमवाप्य यमुल्लसन्ती
वृद्धापि न स्खलति दुर्गपथेषु लक्ष्मीः ॥ १ ॥
मुक्ताफलस्थितिरलंकृतिषु प्रसिद्ध-
स्तत्रार्द्रदेव इति निर्मलमूर्तिरासीत् ।
कायस्थ एव निरवद्यगुणग्रहः स-
न्नेकोऽपि यः कुलमशेषमलंचकार ॥ २ ॥
लावण्याम्बुनिधिः कलाकुलगृहं सौभाग्यसद्भाग्ययोः
क्रीडावेश्म विलासवासवलभी भूषास्पदं संपदाम् ।
शौचाचारविवेकविस्मयमही प्राणप्रिया शूलिनः
शर्वाणीव पतिव्रता प्रणयिनी रथ्येति तस्याभवत् ॥ ३ ॥
अर्हत्पदाम्भोरुहचञ्चरीकस्तयोः सुतः श्रीहरिचन्द्र आसीत् ।
गुरुप्रसादादमला बभूवुः सारस्वते स्रोतसि यस्य वाचः ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्तेन शक्तेन च लक्ष्मणेन निर्व्याकुलो राम इवानुजेन ।
यः पारमासादितबुद्धिसेतुः शास्त्राम्बुराशेः परमाससाद ॥ ५ ॥
पदार्थवैचित्र्यरहस्यसंपत्सर्वस्वनिर्वेशमयात्प्रसादात् ।
वाग्देवतायाः समवेदि सभ्यैर्यः पश्चिमोऽपि प्रथमस्तनूजः ॥ ६ ॥
स कर्णपीयूषरसप्रवाहं रसध्वनेरध्वनि सार्थवाहः ।
श्रीधर्मशर्माभ्युदयाभिधानं महाकविः काव्यमिदं व्यधत्त ॥ ७ ॥

एष्यत्यसारमपि काव्यमिदं मदीय-
मादेयतां जिनपतेरनघैश्चरित्रैः ।
पिण्डं मृदः स्वयमुदस्य नरा नरेन्द्र-
मुद्राङ्कितं किमु न मूर्धनि धारयन्ति ॥ ८ ॥

दक्षैः साधु परीक्षितं नवनवोल्लेखार्पणेनादरा-
द्यच्चेतःकषपट्टिकासु शतशः प्राप्तप्रकर्षोदयम् ।
नानाभङ्गिविचित्रभावघटनासौभाग्यशोभास्पदं
तन्नः काव्यसुवर्णमस्तु कृतिनां कर्णद्वयीभूषणम् ॥ ९ ॥

जीयाज्जैनमिदं मतं शमयतु क्रूरानपीयं कृपा
भारत्या सह शीलयत्वविरतं श्रीः साहचर्यव्रतम् ।
मात्सर्यं गुणिषु त्यजन्तु पिशुनाः संतोषलीलाजुषः
सन्तः सन्तु भवन्तु च श्रमविदः सर्वे कवीनां जनाः ॥ १० ॥

**समाप्तोऽयं ग्रन्थः ।**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# धर्मशर्माभ्युदयस्यैकोनविंशसर्गस्थचित्राणामुद्धारः ।

## १ गोमूत्रिकाबन्धः। (श्लोकः ७८)

स वा जि सिं धु र ग्रा मा न्सं श्र मा द भि धा वि तः



ज वा द सिं स्फु र द्धा मा बि भ्र न्ना द म धा त्त तः

## ३ सर्वतोभद्रम्। (श्लोकः ८६)

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भ | रं | या | म | म | या | रं | भ |
| रं | जि | ता | द | द | ता | जि | रं |
| या | ता | क्ष | मा | मा | क्ष | ता | या |
| म | द | मा | र | र | मा | द | म |
| म | द | मा | र | र | मा | द | म |
| या | ता | क्ष | मा | मा | क्ष | ता | या |
| रं | जि | ता | द | द | ता | जि | रं |
| भ | रं | या | म | म | या | रं | भ |

## २ अर्धभ्रमः। (श्लोकः ८४)

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ज | घा | न | क | र | बा | ली | य |
| घा | ते | ना | रे | र्व | लं | ब | ली |
| न | ना | स्ता | ते | नि | रा | लं | बा |
| क | रे | ते | ना | व | नि | र्व | रः |

## ४ मुरजबन्धः। (श्लोकः ९४)




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ५ षोडशदलपद्मबन्धः। (श्लोकौ १८।१९)




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ६ चक्रबन्धः। (श्लोकौ १०१।१०२)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

७ चक्रबन्धः। (श्लोकः १०४.)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# काव्यमाला ।

## श्रीमानतुङ्गाचार्यविरचितं
## भक्तामरस्तोत्रम् ।

भक्तामरप्रणतमौलिमणिप्रभाणा-
मुद्द्योतकं दलितपापतमोवितानम् ।
सम्यक्प्रणम्य जिनपादयुगं युगादा-
वालम्बनं भवजले पततां जनानाम् ॥ १ ॥

---

१. भक्तामरस्तोत्रप्रणेता मानतुङ्गाचार्यो मालवदेशान्तर्गतोज्जयिनीनगर्यां वृद्धभोजमहीपतिसमये बाणमयूरयोः समकालिक आसीदिति भक्तामरस्तोत्रटीकानामुपोद्धाते समुपलभ्यते. तेन ख्रिस्ताब्दीयसप्तमशतकपूर्वभागो बाणभट्टसमय एव मानतुङ्गसमय इत्यवसीयते. मेरुतुङ्गप्रणीतप्रबन्धचिन्तामणौ तु 'अथ यदा मालमण्डले श्रीभोजराजो राज्यं चकार तदात्र गुर्जरधरित्र्यां चौलुक्यचक्रवर्ती श्रीभीमः पृथिवीं शशास' इत्यस्ति. तदनन्तरं भोजसभायां बाणमयूराभ्यां सह मानतुङ्गाचार्यस्य विवादादि भक्तामरस्तोत्रनिर्माणं च वर्णितमस्ति. भीमभोजराजौ तु ख्रिस्ताब्दीयैकादशशतक आस्तामिति गुजरातदेशीयेतिहासे स्फुटमेव. स एव मानतुङ्गस्य काल इत्यपि वक्तुं शक्यते, एवं किंवदन्तीनां परस्परविसंवादे संदिग्ध एव मानतुङ्गसमयः. एतादृश्यो जनश्रुतयस्तु समयादिनिर्णये नातीवोपयुक्ता इत्यसकृदुक्तमेव. स्तोत्रं चैतद्दिगम्बरैः श्वेताम्बरैश्च श्रद्धया पठ्यते. किं तु दिगम्बरा अष्टचत्वारिंशत्पद्यघटितं श्वेताम्बराश्चतुश्चत्वारिंशत्पद्यात्मकं च पठन्ति. तत्रैकत्रिंशपद्यानन्तरं 'गम्भीरताररव—' इत्यादि पद्यचतुष्टयं दिगम्बरैरधिकमुद्धोष्यते. अस्माकं तु चतुश्चत्वारिंशत्पद्यात्मकमेव स्तोत्रमाचार्येण प्रणीतमित्येव भाति यतो भक्तामरस्तोत्रानुकरणप्रवृत्तः सिद्धसेनदिवाकरोऽपि कल्याणमन्दिरस्तोत्रं चतुश्चत्वारिंशच्छ्लोकैरेव निर्मितवान्. अथ च भक्तामरसमस्यापूर्तिस्तोत्रमपि चतुश्चत्वारिंशत्पद्यात्मकमेव दृश्यते. गम्भीरेत्यादि चत्वारि पद्यानि तु केनचन पण्डितंमन्येन निर्माय मणिमालायां काचशकलानीव मानतुङ्गकवितायां प्रवेशितानीत्यपि तद्विलोकनमात्रेणैव कवित्वमर्मविद्भिर्विद्वद्भिर्बोद्धुं शक्यते. टीकाश्चास्य स्तवस्य श्वेताम्बरैर्दिगम्बरैश्च निर्मिता भूयस्यो वर्तन्ते. तत्र दिगम्बरा मानतुङ्गाचार्यं दिगम्बरं श्वेताम्बराश्च श्वेताम्बरं वदन्ति. उपोद्धातस्तु टीकासु प्रायः समान एव वर्तते. कैश्चन टीकाकारैः प्रतिश्लोकं मन्त्रस्तत्प्रभावकथा च लिखितास्ति. ते च मन्त्रास्तत्तत्पद्येभ्यः कथं निर्गता इति त एव जानन्ति. मन्त्रशास्त्ररीत्या तु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



य: संस्तुत: सकलवाङ्मयतत्त्वबोधा-
दुद्भूतबुद्धिपटुभि: सुरलोकनाथै: ।
स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारै:
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २ ॥ (युग्मम्)

बुद्ध्या विनापि विबुधार्चितपादपीठ
स्तोतुं समुद्यतमतिर्विगतत्रपोऽहम् ।
बालं विहाय जलसंस्थितमिन्दुबिम्ब-
मन्य: क इच्छति जन: सहसा ग्रहीतुम् ॥ ३ ॥

---

तेभ्य: श्लोकेभ्यस्तेषां मन्त्राणामुद्धारो दुष्कर एव. अस्माभिस्तु टीकाचतुष्कमुपलब्धम्—तत्र (१) श्वेताम्बरेण गुणचन्द्रसूरिशिष्यगुणाकरेण प्रणीता टीका समीचीना. अस्यां चतुश्चत्वारिंशत्पद्यानि व्याख्यातानि. प्राय: पद्यानन्तरं मन्त्रस्तत्प्रभावकथा च वर्णितास्ति. टीकानिर्माणसमयस्तु समाप्तौ 'वर्षे षड्विंशाधिकचतुर्दशशतीमिते (१४२६) च वर्षर्तौ । मासि नभस्ये रचिता सरस्वतीपत्तने विवृति: ॥' इत्थमुक्त:. नागार्जुनप्रणीतयोगरत्नावल्याष्टीकाकारो गुणाकरस्त्वस्माद्भिन्न:. यतस्तट्टीकान्ते 'श्रीमन्नृपविक्रमतो द्वादशनवषड्भिरङ्किते (१२९६) वर्षे । रचिता गुणाकरेण श्वेताम्बरभिक्षुणा विवृति: ॥' इति टीकानिर्माणकालो वर्तते. (२) तपागच्छीयहीरविजयसूरिशिष्यकनककुशलप्रणीता टीका संक्षिप्ता उपोद्घातप्रभावकथाभी रहिता च. अत्रापि चतुश्चत्वारिंशत्पद्यान्येव व्याख्यातानि. समाप्तौ च 'श्रीमत्तपगणगगनाङ्गणदिनमणिहीरविजयसूरीणाम् । शिष्याणुना विरचिता वृत्तिरियं कनककुशलेन ॥ नयनशररसेन्दु(१६५२)-मिते वर्षे सुविराटनाम्नि वरनगरे । बालजनविबोधार्थं विजयदशम्यां हि सुसमाप्ता ॥' एतदार्यायुग्मं वर्तते. (३) इयं टीका कर्तृनामरहिता सामान्या उपोद्घातमात्रसमेता वर्तते. एतत्प्रणेतापि कश्चन श्वेताम्बर एव प्रतीयते. यतोऽनेन मानतुङ्गाचार्यो बृहद्गच्छाधीश: श्वेताम्बरश्चासीदित्युक्तमस्ति. किंत्वयमष्टचत्वारिंशच्छ्लोकान्व्याख्यातवानित्यस्य श्वेताम्बरत्वे मनाक्संदेह:. (४) इयं टीका १६६७ संवत्सरे दिगम्बरभट्टारकरत्नचन्द्रेण प्रणीता. अत्रापि तादृश एवोपोद्घातोऽनुष्टुप्पद्यघटितस्तादृश्य एव प्रभावकथाश्च वर्तन्ते. मानतुङ्गाचार्यो दिगम्बर आसीदित्यप्यत्रास्ति. किं तु टीकाकार: सुतरामप्रौढ:. एतट्टीकाचतुष्टयमस्मभ्यं सूरतनगरवासिनास्मन्मित्रेण केवलदासात्मजभगवानदासश्रेष्ठिना प्रहितम्. द्वित्राणि मूलपुस्तकानि त्वस्माभिर्जयपुरेऽधिगतानि. तदाधारेणास्माभिरेतत्स्तोत्रमुद्रणमारब्धमिति शुभम्.

१. श्रीनाभेयमिति गुणाकर:. वृषभमिति रत्नकुशल:. श्रीआदिनाथमिति कर्तृनामरहितटीका,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वक्तुं गुणान्गुणसमुद्र शशाङ्ककान्ता-
न्कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या ।
कल्पान्तकालपवनोद्धतनक्रचक्रं
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ॥ ४ ॥
सोऽहं तथापि तव भक्तिवशान्मुनीश
कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।
प्रीत्यात्मवीर्यमविचार्य मृगो मृगेन्द्रं
नाभ्येति किं निजशिशोः परिपालनार्थम् ॥ ५ ॥
अल्पश्रुतं श्रुतवतां परिहासधाम
त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् ।
यत्कोकिलः किल मधौ मधुरं विरौति
तच्चारुचूतकलिकानिकरैकहेतु ॥ ६ ॥
त्वत्संस्तवेन भवसंततिसंनिबद्धं
पापं क्षणात्क्षयमुपैति शरीरभाजाम् ।
आक्रान्तलोकमलिनीलमशेषमाशु
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ७ ॥
मत्वेति नाथ तव संस्तवनं मयेद-
मारभ्यते तनुधियापि तव प्रभावात् ।
चेतो हरिष्यति सतां नलिनी दलेषु
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ८ ॥
आस्तां तव स्तवनमस्तसमस्तदोषं
त्वत्संकथापि जगतां दुरितानि हन्ति ।
दूरे सहस्रकिरणः कुरुते प्रभैव
पद्माकरेषु जलजानि विकासभाञ्जि ॥ ९ ॥
नात्यद्भुतं भुवनभूषणभूत नाथ
भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुल्या भवन्ति भवतो ननु तेन किं वा
भूत्याश्रितं य इह नात्मसमं करोति ॥ १० ॥
दृष्ट्वा भवन्तमनिमेषविलोकनीयं
नान्यत्र तोषमुपयाति जनस्य चक्षुः ।
पीत्वा पयः शशिकरद्युति दुग्धसिन्धोः
क्षारं जलं जलनिधे रसितुं क इच्छेत् ॥ ११ ॥
यैः शान्तरागरुचिभिः परमाणुभिस्त्वं
निर्मापितस्त्रिभुवनैकललामभूत ।
तावन्त एव खलु तेऽप्यणवः पृथिव्यां
यत्ते समानमपरं नहि रूपमस्ति ॥ १२ ॥
वक्त्रं क्व ते सुरनरोरगनेत्रहारि
निःशेषनिर्जितजगत्रितयोपमानम् ।
बिम्बं कलङ्कमलिनं क्व निशाकरस्य
यद्वासरे भवति पाण्डुपलाशकल्पम् ॥ १३ ॥
संपूर्णमण्डलशशाङ्ककलाकलाप-
शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।
ये संश्रितास्त्रिजगदीश्वरनाथमेकं
कस्तान्निवारयति संचरतो यथेष्टम् ॥ १४ ॥
चित्रं किमत्र यदि ते त्रिदशाङ्गनाभि-
र्नीतं मनागपि मनो न विकारमार्गम् ।
कल्पान्तकालमरुता चलिताचलेन
किं मन्दराद्रिशिखरं चलितं कदाचित् ॥ १५ ॥
निर्धूमवर्तिरपवर्जिततैलपूरः
कृत्स्नं जगत्रयमिदं प्रकटीकरोषि ।
गम्यो न जातु मरुतां चलिताचलानां
दीपोऽपरस्त्वमसि नाथ जगत्प्रकाशः ॥ १६ ॥

१. 'मन्दरो मेरुः । युगान्ते सर्वपर्वतानां क्षोभो भवति न तु मेरोः' इति टीकाकृतः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नास्तं कदाचिदुपयासि न राहुगम्यः
स्पष्टीकरोषि सहसा युगपज्जगन्ति ।
नाम्भोधरोदरनिरुद्धमहाप्रभावः
सूर्यातिशायिमहिमासि मुनीन्द्र लोके ॥ १७ ॥

नित्योदयं दलितमोहमहान्धकारं
गम्यं न राहुवदनस्य न वारिदानाम् ।
विभ्राजते तव मुखाब्जमनल्पकान्ति
विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥ १८ ॥

किं शर्वरीषु शशिनाह्नि विवस्वता वा
युष्मन्मुखेन्दुदलितेषु तमःसु नाथ ।
निष्पन्नशालिवनशालिनि जीवलोके
कार्यं कियज्जलधरैर्जलभारनम्रैः ॥ १९ ॥

ज्ञानं यथा त्वयि विभाति कृतावकाशं
नैवं तथा हरिहरादिषु नायकेषु ।
तेजः स्फुरन्मणिषु याति यथा महत्त्वं
नैवं तु काचशकले किरणाकुलेऽपि ॥ २० ॥

मन्ये वरं हरिहरादय एव दृष्टा
दृष्टेषु येषु हृदयं त्वयि तोषमेति ।
किं वीक्षितेन भवता भुवि येन नान्यः
कश्चिन्मनो हरति नाथ भवान्तरेऽपि ॥ २१ ॥

स्त्रीणां शतानि शतशो जनयन्ति पुत्रा-
न्नान्या सुतं त्वदुपमं जननी प्रसूता ।
सर्वा दिशो दधति भानि सहस्ररश्मिं
प्राच्येव दिग्जनयति स्फुरदंशुजालम् ॥ २२ ॥

त्वामामनन्ति मुनयः परमं पुमांस-
मादित्यवर्णममलं तमसः परस्तात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं
नान्यः शिवः शिवपदस्य मुनीन्द्र पन्थाः ॥ २३ ॥
त्वामव्ययं विभुमचिन्त्यमसंख्यमाद्यं
ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम्[1] ।
योगीश्वरं विदितयोगमनेकमेकं
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २४ ॥
बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधा-
त्त्वं शंकरोऽसि भुवनत्रयशंकरत्वात् ।
धातासि धीर शिवमार्गविधेर्विधाना-
द्व्यक्तं त्वमेव भगवन्पुरुषोत्तमोऽसि ॥ २५ ॥
तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ
तुभ्यं नमः क्षितितलामलभूषणाय ।
तुभ्यं नमस्त्रिजगतः परमेश्वराय
तुभ्यं नमो जिन भवोदधिशोषणाय ॥ २६ ॥
को विस्मयोऽत्र यदि नाम गुणैरशेषै-
स्त्वं संश्रितो निरवकाशतया मुनीश ।
दोषैरुपात्तविविधाश्रय[2]जातगर्वैः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७ ॥
उच्चैरशोकतरुसंश्रितमुन्मयूख-
माभाति रूपममलं भवतो नितान्तम् ।
स्पष्टोल्लसत्किरणमस्ततमोवितानं
बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥ २८ ॥
सिंहासने मणिमयूखशिखाविचित्रे
विभ्राजते तव वपुः कनकावदातम् ।
बिम्बं वियद्विलसदंशुलतावितानं
तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९ ॥

---

१. मदनस्य क्षयहेतुम्. २. 'विबुधाश्रय' इति पाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुन्दावदातचलचामरचारुशोभं
विभ्राजते तव वपुः कलधौतकान्तम् ।
उद्यच्छशाङ्करुचिनिर्झरवारिधार-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३० ॥

छत्रत्रयं तव विभाति शशाङ्ककान्त-
मुच्चैःस्थितं स्थगितभानुकरप्रतापम् ।
मुक्ताफलप्रकरजालविवृद्धशोभं
प्रख्यापयत्त्रिजगतः परमेश्वरत्वम् ॥ ३१ ॥

[1गम्भीरताररवपूरितदिग्विभाग-
स्त्रैलोक्यलोकशुभसंगमभूतिदक्षः ।
सद्धर्मराजजयघोषणघोषकः स-
न्खे दुन्दुभिर्न2दति ते यशसः प्रवादी ॥ ३२ ॥

मन्दारसुन्दरनमेरुसुपारिजात-
संतानकादिकुसुमोत्करवृष्टिरुद्धा3 ।
गन्धोदबिन्दुशुभमन्दमरुत्प्रयाता
दिव्या दिवः पतति ते वचसां ततिर्वा ॥ ३३ ॥

शुंभत्प्रभावलयभूरिविभा विभोस्ते
लोकत्रये द्युतिमतां द्युतिमाक्षिपन्ती ।
प्रोद्यद्दिवाकरनिरन्तरभूरिसंख्या
दीप्त्या जयत्यपि निशामपि सोमसौम्याम् ॥ ३४ ॥

स्वर्गापवर्गगममार्गविमार्गणेष्टः
सद्धर्मतत्त्वकथनैकपटुस्त्रिलोक्याः ।
दिव्यध्वनिर्भवति ते विशदार्थसर्व-
भाषास्वभावपरिणामगुणप्रयोज्यः ॥ ३५ ॥]

---

१. गम्भीरेत्यादिपद्यचतुष्टयं श्वेताम्बरैर्न व्याख्यातम्. अस्माकमप्येतत्प्रक्षिप्तमेव भाति. २. 'ध्वनति'. ३. उद्धा प्रशस्ता. मतल्लिकादयः शब्दाः समासान्तर्गता एव प्रशस्तवाचकाः. उद्धशब्दस्तु समासं विनापीति रामाश्रम्यां द्रष्टव्यम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उन्निद्रहेमनवपङ्कजपुञ्जकान्ती
पर्युल्लसन्नखमयूखशिखाभिरामौ ।
पादौ पदानि तव यत्र जिनेन्द्र धत्तः
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३६ ॥

इत्थं यथा तव विभूतिरभूज्जिनेन्द्र
धर्मोपदेशनविधौ न तथापरस्य ।
यादृक्प्रभा दिनकृतः प्रहतान्धकारा
तादृक्कुतो ग्रहगणस्य विकासिनोऽपि ॥ ३७ ॥

श्च्योतन्मदाविलविलोलकपोलमूल-
मत्तभ्रमद्भ्रमरनादविवृद्धकोपम् ।
ऐरावताभमिभमुद्धतमापतन्तं
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३८ ॥

भिन्नेभकुम्भगलदुज्ज्वलशोणिताक्त-
मुक्ताफलप्रकरभूषितभूमिभागः ।
बद्धक्रमः क्रमगतं हरिणाधिपोऽपि
नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३९ ॥

कल्पान्तकालपवनोद्धतवह्निकल्पं
दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिङ्गम् ।
विश्वं जिघत्सुमिव संमुखमापतन्तं
त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥ ४० ॥

रक्तेक्षणं समदकोकिलकण्ठनीलं
क्रोधोद्धतं फणिनमुत्फणमापतन्तम् ।
आक्रामति क्रमयुगेण निरस्तशङ्क-
स्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥ ४१ ॥

---

१. ओषधिविशेषः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वल्गत्तुरङ्गगजगर्जितभीमनाद-
माजौ बलं बलवतामपि भूपतीनाम् ।
उद्यद्दिवाकरमयूखशिखापविद्धं
त्वत्कीर्तनात्तम इवाशु भिदामुपैति ॥ ४२ ॥

कुन्ताग्रभिन्नगजशोणितवारिवाह[1]-
वेगावतारतरणातुरयोधभीमे ।
युद्धे जयं विजितदुर्जयजेयपक्षा-
स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ४३ ॥

अम्भोनिधौ क्षुभितभीषणनक्रचक्र[2]-
पाठीनपीठभयदोल्बणवाडवाग्नौ ।
रङ्गत्तरङ्गशिखरस्थितयानपात्रा-
स्त्रासं विहाय भवतः स्मरणाद्व्रजन्ति ॥ ४४ ॥

उद्भूतभीषणजलोदरभारभुग्नाः[3]
शोच्यां दशामुपगताश्च्युतजीविताशाः ।
त्वत्पादपङ्कजरजोमृतदिग्धदेहा
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४५ ॥

आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गा
गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।
त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः
सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४६ ॥

मत्तद्विपेन्द्रमृगराजदवानलाहि-
सङ्ग्रामवारिधिमहोदरबन्धनोत्थम् ।
तस्याशु नाशमुपयाति भयं भियेव
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४७ ॥

---

१. वारिवाहा जलप्रवाहाः. २. 'चक्रे' इति पाठः. ३. 'भग्नाः,' 'मग्नाः' इति च पाठः.

२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तोत्रस्रजं तव जिनेन्द्र गुणैर्निबद्धां
भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।
धत्ते जनो य इह कण्ठगतामजस्रं
तं [1]मानतुङ्गमवशा समुपैति लक्ष्मीः ॥ ४८ ॥

इति श्रीमानतुङ्गाचार्यविरचितं भक्तामरस्तोत्रम् ।

---

## श्रीसिद्धसेनदिवाकरप्रणीतं

## [2]कल्याणमन्दिरस्तोत्रम् ।

कल्याणमन्दिरमुदारमवद्यभेदि
भीताभयप्रदमनिन्दितमङ्घ्रिपद्मम् ।
संसारसागरनिमज्जदशेषजन्तु-
पोतायमानमभिनम्य जिनेश्वरस्य ॥ १ ॥
यस्य स्वयं सुरगुरुर्गरिमाम्बुराशेः
स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुम् ।

---

१. मानतुङ्गमिति स्वकीयं नामाप्याचार्येण युक्त्या चरमपद्ये निवेशितम्. २. कल्याणमन्दिरस्तोत्रं सिद्धसेनदिवाकरेण प्रणीतमिति प्रसिद्धिरस्ति. स्तोत्रान्तिमपद्ये तु कुमुदचन्द्र इति कर्तुर्नाम लभ्यते. तच्च सिद्धसेनदिवाकरस्य गुरुणा दीक्षावसरे विहितं नामेति स्तोत्रटीकाकर्ता वक्ति. सिद्धसेनदिवाकरो विक्रमादित्यसमय उज्जयिन्यामागत इत्यादि प्रबन्धचिन्तामणौ विक्रमादित्यप्रबन्धे वर्तते. स च श्वेताम्बर आसीदित्यपि तत एव प्रतीयते. दिगम्बरास्तु दिगम्बरमेनं वदन्ति. खिस्ताब्दीयषष्ठशतकोद्भूतः श्रीवराहमिहिराचार्यो बृहज्जातकस्य सप्तमेऽध्याये कंचन सिद्धसेननामानं गणकं स्मरति, स चायमेव सिद्धसेनदिवाकरः स्यात्. अन्येऽपि द्वित्राः सिद्धसेना जैनेषु प्रसिद्धाः सन्ति. कल्याणमन्दिरस्तोत्रं तु दिगम्बराः श्वेताम्बराश्च पठन्ति. किं तु भक्तामरस्तोत्रवदस्य भूयस्यष्टीकाः प्रतिपद्यं मन्त्रास्तत्प्रभावकिंवदन्त्यश्च नातीव प्रचरिताः सन्ति. मध्ये प्रक्षिप्तश्लोका अपि न दृश्यन्ते. अस्मद्दृष्टेषु निखिलेष्वपि पुस्तकेषु चतुश्चत्वारिंशत्पद्यान्येव वर्तन्ते. एतन्मुद्रणावसरे चास्माभिरेकं कर्तृनामरहितसंक्षिप्तटीकासमेतमपरं हिन्दीभाषान्तरसहितमिति पुस्तकद्वयं भगवान्दासश्रेष्ठितः प्राप्तम्. द्वित्राणि मूलपुस्तकानि चेति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थेश्वरस्य [1]कमठस्मयधूमकेतो-
स्तस्याहमेष किल संस्तवनं करिष्ये ॥ २ ॥ (युग्मम्)
सामान्यतोऽपि तव वर्णयितुं स्वरूप-
मस्मादृशाः कथमधीश भवन्त्यधीशाः ।
धृष्टोऽपि कौशिकशिशुर्यदि वा दिवान्धो
रूपं प्ररूपयति किं किल घर्मरश्मेः ॥ ३ ॥
मोहक्षयादनुभवन्नपि नाथ मर्त्यो
नूनं गुणान्गणयितुं न तव क्षमेत ।
कल्पान्तवान्तपयसः प्रकटोऽपि यस्मा-
न्मीयेत केन जलधेर्ननु रत्नराशिः ॥ ४ ॥
अभ्युद्यतोऽस्मि तव नाथ जडाशयोऽपि
कर्तुं स्तवं लसदसंख्यगुणाकरस्य ।
बालोऽपि किं न निजबाहुयुगं वितत्य
विस्तीर्णतां कथयति स्वधियाम्बुराशेः ॥ ५ ॥
ये योगिनामपि न यान्ति गुणास्तवेश
वक्तुं कथं भवति तेषु ममावकाशः ।
जाता तदेवमसमीक्षितकारितेयं
जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ॥ ६ ॥
आस्तामचिन्त्यमहिमा जिन संस्तवस्ते
नामापि पाति भवतो भवतो जगन्ति ।
तीव्रातपोपहतपान्थजनान्निदाघे
प्रीणाति पद्मसरसः सरसोऽनिलोऽपि ॥ ७ ॥
हृद्वर्तिनि त्वयि विभो शिथिलीभवन्ति
जन्तोः क्षणेन निबिडा अपि कर्मबन्धाः ।

---

१. कमठो नाम पार्श्वनाथप्रभोस्तपोविघ्नकर्ता कश्चन दैत्य आसीत्. पार्श्वनाथस्यानुजन्मैव शत्रुभूतः कमठ इत्यपि केचिद्वदन्ति. 'शठकमठकृतोपद्रवाबाधितस्य' इति पार्श्वनाथस्तवेऽपि पार्श्वनाथविशेषणम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्यो भुजंगममया इव मध्यभाग-
मभ्यागते वनशिखण्डिनि चन्दनस्य ॥ ८ ॥
मुच्यन्त एव मनुजाः सहसा जिनेन्द्र
रौद्रैरुपद्रवशतैस्त्वयि वीक्षितेऽपि ।
गोस्वामिनि[1] स्फुरिततेजसि दृष्टमात्रे
चौरैरिवाशु पशवः प्रपलायमानैः ॥ ९ ॥
त्वं तारको जिन कथं भविनां त एव
त्वामुद्वहन्ति हृदयेन यदुत्तरन्तः ।
यद्वा दृतिस्तरति[2] यज्जलमेष नून-
मन्तर्गतस्य मरुतः स किलानुभावः ॥ १० ॥
यस्मिन्हरप्रभृतयोऽपि हतप्रभावाः
सोऽपि त्वया रतिपतिः क्षपितः क्षणेन ।
विध्यापिता[3] हुतभुजः पयसाथ येन
पीतं न किं तदपि दुर्धरवाडवेन ॥ ११ ॥
स्वामिन्ननल्पगरिमाणमपि प्रपन्ना-
स्त्वां जन्तवः कथमहो हृदये दधानाः ।
जन्मोदधिं लघु तरन्त्यतिलाघवेन
चिन्त्यो न हन्त महतां यदि वा प्रभावः ॥ १२ ॥
क्रोधस्त्वया यदि विभो प्रथमं निरस्तो
ध्वस्तास्तदा वद कथं किल कर्मचौराः ।
प्लोषत्यमुत्र यदि वा शिशिरापि लोके
नीलद्रुमाणि विपिनानि न किं हिमानी ॥ १३ ॥
त्वां योगिनो जिन सदा परमात्मरूप-
मन्वेषयन्ति हृदयाम्बुजकोषदेशे ।

---

१. सूर्ये. २. चर्मभस्त्रा. ३. निर्वाणं नीताः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूतस्य निर्मलरुचेर्यदि वा किमन्य-
  [1]दक्षस्य सं[2]भवपदं ननु कर्णिकायाः ॥ १४ ॥
ध्यानाज्जिनेश भवतो भविनः क्षणेन
  देहं विहाय परमात्मदशां व्रजन्ति ।
तीव्रानलादुपलभावमपास्य लोके
  चामीकरत्वमचिरादिव धातुभेदाः ॥ १५ ॥
अन्तः सदैव जिन यस्य विभाव्यसे त्वं
  भव्यैः कथं तदपि नाशयसे शरीरम् ।
एतत्स्वरूपमथ मध्यविवर्तिनो हि
  यद्विग्रहं प्रशमयन्ति महानुभावाः ॥ १६ ॥
आत्मा मनीषिभिरयं त्वदभेदबुद्ध्या
  ध्यातो जिनेन्द्र भवतीह भवत्प्रभावः ।
पानीयमप्यमृतमित्यनुचिन्त्यमानं
  किं नाम नो विषविकारमपाकरोति ॥ १७ ॥
त्वामेव वीततमसं परवादिनोऽपि
  नूनं विभो हरिहरादिधिया प्रपन्नाः ।
किं [3]काचकामलिभिरीश सितोऽपि शङ्खो
  नो गृह्यते विविधवर्णविपर्ययेण ॥ १८ ॥
धर्मोपदेशसमये सविधानुभावा-
  दास्तां जनो भवति ते त[4]रुरप्यशोकः ।
अभ्युद्गते दिनपतौ समहीरुहोऽपि
  किं वा विबोधमुपयाति न जीवलोकः ॥ १९ ॥
चित्रं विभो कथमवाङ्मुखवृन्तमेव
  विष्वक्पतत्यविरला सुरपुष्पवृष्टिः ।

---

१. अक्षस्य पद्मबीजस्य. २. 'संभविपदं' इति पाठः. ३. काचकामलादयो नेत्ररोगास्तद्युक्तैः. ४. श्रीपार्श्वनाथोऽशोकवृक्षतले स्थितवान्. 'उच्चैरशोकतरुसंश्रितं' इति भक्तामरस्तवेऽपि.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वद्गोचरे सुमनसां यदि वा मुनीश
गच्छन्ति नूनमध एव हि बन्धनानि ॥ २० ॥
स्थाने गभीरहृदयोदधिसंभवायाः
पीयूषतां तव गिरः समुदीरयन्ति ।
पीत्वा यतः परमसंमदसङ्गभाजो
भव्या व्रजन्ति तरसाप्यजरामरत्वम् ॥ २१ ॥
स्वामिन्सुदूरमवनम्य समुत्पतन्तो
मन्ये वदन्ति शुचयः सुरचामरौघाः ।
येऽस्मै नतिं विदधते मुनिपुंगवाय
ते नूनमूर्ध्वगतयः खलु शुद्धभावाः ॥ २२ ॥
श्यामं गभीरगिरमुज्ज्वलहेमरत्न-
सिंहासनस्थमिह भव्यशिखण्डिनस्त्वाम् ।
आलोकयन्ति रभसेन नदन्तमुच्चै-
श्चामीकराद्रिशिरसीव नवाम्बुवाहम् ॥ २३ ॥
उद्गच्छता तव शितिद्युतिमण्डलेन
लुप्तच्छदच्छविरशोकतरुर्बभूव ।
सांनिध्यतोऽपि यदि वा तव वीतराग
नीरागतां व्रजति को न सचेतनोऽपि ॥ २४ ॥
भो भोः प्रमादमवधूय भजध्वमेन-
मागत्य निर्वृतिपुरीं प्रति सार्थवाहम् ।
एतन्निवेदयति देव जगत्त्रयाय
मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते ॥ २५ ॥
उद्द्योतितेषु भवता भुवनेषु नाथ
तारान्वितो विधुरयं विहताधिकारः ।
मुक्ताकलापकलितोरुसितातपत्र-
व्याजात्त्रिधा धृततनुर्ध्रुवमभ्युपेतः ॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वेन प्रपूरितजगत्त्रयपिण्डितेन
कान्तिप्रतापयशसामिव संचयेन ।
माणिक्यहेमरजतप्रविनिर्मितेन
सालत्रयेण[1] भगवन्नभितो विभासि ॥ २७ ॥

दिव्यस्रजो जिन नमत्त्रिदशाधिपाना-
मुत्सृज्य रत्नरचितानपि मौलिबन्धान् ।
पादौ श्रयन्ति भवतो यदि वापरत्र
त्वत्संगमे सुमनसो न रमन्त एव ॥ २८ ॥

त्वं नाथ जन्मजलधेर्विपराङ्मुखोऽपि
यत्तारयस्यसुमतो निजपृष्ठलग्नान् ।
युक्तं हि पार्थिवनिपस्य[2] सतस्तवैव
चित्रं विभो यदसि कर्मविपाकशून्यः[3] ॥ २९ ॥

विश्वेश्वरोऽपि जनपालक दुर्गतस्त्वं
किं वाक्षरप्रकृतिरप्यलिपिस्त्वमीश ।
अज्ञानवत्यपि सदैव कथंचिदेव
ज्ञानं त्वयि स्फुरति विश्वविकासहेतुः ॥ ३० ॥

प्राग्भारसंभृतनभांसि रजांसि रोषा-
दुत्थापितानि कमठेन शठेन यानि ।
छायापि तैस्तव न नाथ हता हताशो
ग्रस्तस्त्वमीभिरयमेव परं दुरात्मा ॥ ३१ ॥

यद्गर्जदूर्जितघनौघमदभ्रभीम-
भ्रश्यत्तडिन्मुसलमांसलघोरधारम् ।
दैत्येन मुक्तमथ दुस्तरवारि दध्रे
तेनैव तस्य जिन दुस्तरवारिकृत्यम्[4] ॥ ३२ ॥

---

१. प्राकारत्रयेण. २. पार्थिवश्चासौ निपो घटः. 'पार्थिवनिभस्य,' 'पार्थिवभवस्य' इति च पाठः. ३. घटस्तु वह्निकृतपाकेन शून्यस्तारयितुमसमर्थो भवति. ४. तरवारिः खड्गः. 'विमलतरवारिधारात्रासितराजहंसमण्डलः' इति वासवदत्ताश्लेषः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्वस्तोर्ध्वकेशविकृताकृति मर्त्यमुण्ड-
प्रालम्बभृद्भयदवक्त्रविनिर्यदग्निः ।
प्रेतव्रजः प्रति भवन्तमपीरितो यः
सोऽस्याभवत्प्रतिभवं भवदुःखहेतुः ॥ ३३ ॥

धन्यास्त एव भुवनाधिप ये त्रिसंध्य-
माराधयन्ति विधिवद्विधुतान्यकृत्याः ।
भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः
पादद्वयं तव विभो भुवि जन्मभाजः ॥ ३४ ॥

अस्मिन्नपारभववारिनिधौ मुनीश
मन्ये न मे श्रवणगोचरतां गतोऽसि ।
आकर्णिते तु तव गोत्र[1]पवित्रमन्त्रे
किं वा विपद्विषधरी सविधं समेति ॥ ३५ ॥

जन्मान्तरेऽपि तव पादयुगं न देव
मन्ये मया महितमीहितदानदक्षम् ।
तेनेह जन्मनि मुनीश पराभवानां
जातो निकेतनमहं मथिताशयानाम् ॥ ३६ ॥

नूनं न मोहतिमिरावृतलोचनेन
पूर्वं विभो सकृदपि प्रविलोकितोऽसि ।
मर्मा[2]विधो विधुरयन्ति हि मामनर्थाः
प्रोद्यत्प्रबन्धगतयः कथमन्यथैते ॥ ३७ ॥

आकर्णितोऽपि महितोऽपि निरीक्षितोऽपि
नूनं न चेतसि मया विधृतोऽसि भक्त्या ।
जातोऽस्मि तेन जनबान्धव दुःखपात्रं
यस्मात्क्रियाः प्रतिफलन्ति न भावशून्याः ॥ ३८ ॥

त्वं नाथ दुःखिजनवत्सल हे शरण्य
कारुण्यपुण्यवसते वशिनां वरेण्य ।

---

१. गोत्रं नाम. २. मर्मभेदकाः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्त्या नते मयि महेश दयां विधाय
दुःखाङ्कुरोद्दलनतत्परतां विधेहि ॥ ३९ ॥

निःसंख्यसारशरणं शरणं शरण्य-
मासाद्य सादितरिपुप्रथितावदानम् ।
त्वत्पादपङ्कजमपि प्रणिधानवन्ध्यो
वन्ध्योऽस्मि चेद्भुवनपावन हा हतोऽस्मि ॥ ४० ॥

देवेन्द्रवन्द्य विदिताखिलवस्तुसार
संसारतारक विभो भुवनाधिनाथ ।
त्रायस्व देव करुणाह्रद मां पुनीहि
सीदन्तमद्य भयदव्यसनाम्बुराशेः ॥ ४१ ॥

यद्यस्ति नाथ भवदङ्घ्रिसरोरुहाणां
भक्तेः फलं किमपि संततसंचितायाः ।
तन्मे त्वदेकशरणस्य शरण्य भूयाः
स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥ ४२ ॥

इत्थं समाहितधियो विधिवज्जिनेन्द्र
सान्द्रोल्लसत्पुलककञ्चुकिताङ्गभागाः ।
त्वद्बिम्ब[1]निर्मलमुखाम्बुजबद्धलक्ष्या
ये संस्तवं तव विभो रचयन्ति भव्याः ॥ ४३ ॥

जननयनकुमुदचन्द्र प्रभास्वराः स्वर्गसंपदो भुक्त्वा ।
ते विगलितमलनिचया अचिरान्मोक्षं प्रपद्यन्ते ॥ ४४ ॥ (युग्मम्)

इति श्रीसिद्धसेनदिवाकरविरचितं पार्श्वनाथस्य कल्याणमन्दिरस्तोत्रम् ॥

## श्रीवादिराज[2]प्रणीतं
## एकीभावस्तोत्रम् ।

एकीभावं गत इव मया यः स्वयं कर्मबन्धो
घोरं दुःखं भवभवगतो दुर्निवारः करोति ।

---

१. बिम्बं प्रतिमा. २. वादिराजस्य देशकालौ न ज्ञायेते, किं त्वेतत्प्रणीतमेकीभावस्तोत्रं दिगम्बरा एव पठन्ति. अस्य स्तवस्य कर्तृनामरहितैका संक्षिप्तावचूरिस्त्रीणि मूलपुस्तकानि चास्माभिर्जयपुर एव समधिगतानि.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्याप्यस्य त्वयि जिनरवे भक्तिरुन्मुक्तये चे-
ज्जेतुं शक्यो भवति न तया कोऽपरस्तापहेतुः ॥ १ ॥
ज्योतीरूपं दुरितनिवहध्वान्तविध्वंसहेतुं
त्वामेवाहुर्जिनवर चिरं तत्त्वविद्याभियुक्ताः ।
चेतोवासे भवसि च मम स्फारमुद्भासमान-
स्तस्मिन्नंहः कथमिव तमो वस्तुतो वस्तुमीष्टे ॥ २ ॥
आनन्दाश्रुस्नपितवदनं गद्गदं चाभिजल्प-
न्यश्चायेत[1] त्वयि दृढमनाः स्तोत्रमन्त्रैर्भवन्तम् ।
तस्याभ्यस्तादपि च सुचिरं देहवल्मीकमध्या-
न्निष्कास्यन्ते विविधविषमव्याधयः काद्रवेयाः ॥ ३ ॥
प्रागेवेह त्रिदिवभवनादेष्यता भव्यपुण्या-
त्पृथ्वीचक्रं कनकमयतां देव निन्ये त्वयेदम् ।
ध्यानद्वारं मम रुचिकरं स्वान्तगेहं प्रविष्ट-
स्तत्किं चित्रं जिन वपुरिदं[2] यत्सुवर्णीकरोषि ॥ ४ ॥
लोकस्यैकस्त्वमसि भगवन्निर्निमित्तेन बन्धु-
स्त्वय्येवासौ सकलविषया शक्तिरप्रत्यनीका ।
भक्तिस्फीतां चिरमधिवसन्मामिकां चित्तशय्यां
मय्युत्पन्नं कथमिव ततः क्लेशयूथं सहेथाः ॥ ५ ॥
जन्माटव्यां कथमपि मया देव दीर्घं भ्रमित्वा
प्राप्तैवेयं तव नयकथा स्फारपीयूषवापी ।
तस्या मध्ये हिमकरहिमव्यूहशीते नितान्तं
निर्मग्नं मां न जहति कथं दुःखदावोपतापाः ॥ ६ ॥
पादन्यासादपि च पुनतो यात्रया ते त्रिलोकीं
हेमाभासो भवति सुरभिः श्रीनिवासश्च पद्मः ।

---

१. पूजयेत्. 'चायृ पूजानिशामनयोः'. २. कुष्ठरोगाक्रान्तं मदीयं शरीरमिति टीकाकारः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वाङ्गेण स्पृशति भगवंस्त्वय्यशेषं मनो मे
श्रेयः किं तत्स्वयमहरहर्यन्न मामभ्युपैति ॥ ७ ॥
पश्यन्तं त्वद्वचनममृतं भक्तिपात्र्या पिबन्तं
कर्मारण्यात्पुरुषमसमानन्दधाम प्रविष्टम् ।
त्वां दुर्वारस्मरमदहरं त्वत्प्रसादैकभूमिं
क्रूराकाराः कथमिव रुजाकण्टका निर्लुठन्ति ॥ ८ ॥
पाषाणात्मा तदितरसमः केवलं रत्नमूर्ति-
र्मानस्तम्भो भवति च परस्तादृशो रत्नवर्गः ।
दृष्टिप्राप्तो हरति स कथं मानरोगं नराणां
प्रत्यासत्तिर्यदि न भवतस्तस्य तच्छक्तिहेतुः ॥ ९ ॥
हृद्यः प्राप्तो मरुदपि भवन्मूर्तिशैलोपवाही
सद्यः पुंसां निरवधि रुजाधूलिबन्धं धुनोति ।
ध्यानाहूतो हृदयकमलं यस्य तु त्वं प्रविष्ट-
स्तस्याशक्यः क इह भुवने देव लोकोपकारः ॥ १० ॥
जानासि त्वं मम भवभवे यच्च यादृक्च दुःखं
जातं यस्य स्मरणमपि मे शस्त्रवन्निष्पिनष्टि ।
त्वं सर्वेशः सकृप इति च त्वामुपेतोऽस्मि भक्त्या
यत्कर्तव्यं तदिह विषये देव एव प्रमाणम् ॥ ११ ॥
प्रापद्दैवं तव नुतिपदैर्जीवकेनोपदिष्टैः[1]
पापाचारी मरणसमये सारमेयोऽपि सौख्यम्[2] ।
कः संदेहो यदुपलभते वासवश्रीप्रभुत्वं
जल्पञ्जाप्यैर्मणिभिरमलैस्त्वन्नमस्कारचक्रम् ॥ १२ ॥
शुद्धे ज्ञाने शुचिनि चरिते सत्यपि त्वय्यनीचा
भक्तिर्नो चेदनवधि सुखावञ्चिका कुञ्चिकेयम् ।

---

१. 'जीवकेन क्षत्रियवंशचूडामणि श्रीसत्यंधरमहाराजपुत्रेणेति टीकाकारः'. २. सौख्यमित्यस्य दैवमिति विशेषणम्. सारमेयः श्वा.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शक्योद्धाटं भवति हि कथं मुक्तिकामस्य पुंसो
मुक्तिद्वारं परिदृढमहामोहमुद्राकवाटम् ॥ १३ ॥

प्रच्छन्नः खल्वयमघमयैरन्धकारैः समन्ता-
त्पन्था मुक्तेः स्थपुटितपदः क्लेशगर्तैरगाधैः ।
तत्कस्तेन व्रजति सुखतो देव तत्त्वावभासी
यद्यग्रेऽग्रे न भवति भवद्भारतीरत्नदीपः ॥ १४ ॥

आत्मज्योतिर्निधिरनवधिर्द्रष्टुरानन्दहेतुः
कर्मक्षोणीपटलपिहितो योऽनवाप्यः परेषाम् ।
हस्ते कुर्वन्त्यनतिचिरतस्तं भवद्भक्तिभाजः
स्तोत्रैर्बन्धप्रकृतिपरुषोद्दामधात्रीखनित्रैः ॥ १५ ॥

प्रत्युत्पन्नानयहिमगिरेरायता चामृताब्धे-
र्या देव त्वत्पदकमलयोः संगता भक्तिगङ्गा ।
चेतस्तस्यां मम रुचिवशादाप्लुतं क्षालितांहः-
कल्माषं यद्भवति किमियं देव संदेहभूमिः ॥ १६ ॥

प्रादुर्भूत स्थिरपदसुख त्वामनुध्यायतो मे
त्वय्येवाहं स इति मतिरुत्पद्यते निर्विकल्पा ।
मिथ्यैवेयं तदपि तनुते तृप्तिमभ्रेषरूपां
दोषात्मानोऽप्यभिमतफलास्त्वत्प्रसादाद्भवन्ति ॥ १७ ॥

मिथ्यावादं मलमपनुदन्सप्तभङ्गीतरङ्गै-
र्वागम्भोधिर्भुवनमखिलं देव पर्येति यस्ते ।
तस्यावृत्तिं सपदि विबुधाश्चेतसैवाचलेन
व्यातन्वन्तः सुचिरममृतासेवया तृप्नुवन्ति ॥ १८ ॥

---

१. तत्त्वैः सप्तसंख्यैरवभासते यः. २. प्रकृतिस्थित्यनुभागप्रदेशा बन्धप्रकृतय इति टीका. ३. स्याद्वादनयहिमाचलात्. ४. स्यादस्ति, स्यान्नास्ति, स्यादस्ति नास्ति, स्यादवक्तव्यम्, स्यादस्त्यवक्तव्यम्, स्यान्नास्त्यवक्तव्यम्, स्यादस्ति च नास्ति चावक्तव्यं च इति सप्त भङ्गाः स्याद्वादनये प्रसिद्धाः. ५. चेतोरूपपर्वतेनावृत्तिं मथनम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आहार्येभ्यः स्पृहयति परं यः स्वभावादहृद्यः
शस्त्रग्राही भवति सततं वैरिणा यश्च शक्यः ।
सर्वाङ्गेषु त्वमसि सुभगस्त्वं न शक्यः परेषां
तत्किं भूषावसनकुसुमैः किं च शस्त्रैरुदस्त्रैः ॥ १९ ॥
इन्द्रः सेवां तव सुकुरुतां किं तया श्लाघनं ते
तस्यैवेयं भवलयकरी श्लाघ्यतामातनोति ।
त्वं निस्तारी जननजलधेः सिद्धिकान्तापतिस्त्वं
त्वं लोकानां प्रभुरिति तव श्लाघ्यते स्तोत्रमित्थम् ॥ २० ॥
वृत्तिर्वाचामपरसदृशी न त्वमन्येन तुल्य-
स्तुत्युद्गाराः कथमिव ततस्त्वय्यमी नः क्रमन्ते ।
मैवं भूवंस्तदपि भगवन्भक्तिपीयूषपुष्टा-
स्ते भव्यानामभिमतफलाः पारिजाता भवन्ति ॥ २१ ॥
कोपावेशो न तव न तव क्वापि देव प्रसादो
व्याप्तं चेतस्तव हि परमोपेक्षयैवानपेक्षम् ।
आज्ञावश्यं तदपि भुवनं संनिधिर्वैरहारी
क्वैवंभूतं भुवनतिलक प्राभवं त्वत्परेषु ॥ २२ ॥
देव स्तोतुं त्रिदिवगणिकामण्डलीगीतकीर्तिं
तोतूर्ति त्वां सकलविषयज्ञानमूर्तिं जनो यः ।
तस्य क्षेमं न पदमटतो जातु जोहूर्ति पन्था-
स्तत्त्वग्रन्थस्मरणविषये नैष मोमूर्ति मर्त्यः ॥ २३ ॥
चित्ते कुर्वन्निरवधिसुखज्ञान दृग्वीर्यरूपं
देव त्वां यः समयनियमादादरेण स्तवीति ।
श्रेयोमार्गं स खलु सुकृती तावता पूरयित्वा
कल्याणानां भवति विषयः पञ्चधा पञ्चितानाम् ॥ २४ ॥

---

१. बाह्यभूषणादिभ्यः. २. प्रभुत्वम्. ३. स्तोतुं तोतूर्ति त्वरितो भवति. ४. कुटिलो भवति. ५. संदेहं प्राप्नोति. ६. विस्तृतानाम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्तिप्रह्वमहेन्द्रपूजितपद त्वत्कीर्तने न क्षमाः
सूक्ष्मज्ञानदृशोऽपि संयमभृतः के हन्त मन्दा वयम् ।
अस्माभिस्तवनच्छलेन तु परस्त्वय्यादरस्तन्यते
स्वात्माधीनसुखैषिणां स खलु नः कल्याणकल्पद्रुमः ॥ २५ ॥
वादिराजमनु शाब्दिकलोको वादिराजमनु तार्किकसिंहः ।
वादिराजमनु काव्यकृतस्ते वादिराजमनु भव्यसहायः ॥ २६ ॥

इति श्रीवादिराजकृतमेकीभावस्तोत्रम् ॥

---

## श्रीधनंजयप्रणीतं

# विषापहारस्तोत्रम् ।

स्वात्मस्थितः सर्वगतः समस्तव्यापारवेदी विनिवृत्तसङ्गः ।
प्रवृद्धकालोऽप्यजरो वरेण्यः पायादपायात्पुरुषः पुराणः ॥ १ ॥
परैरचिन्त्यं युगभारमेकः स्तोतुं वहन्योगिभिरप्यशक्यः ।
स्तुत्योऽद्य मेऽसौ वृषभो न भानोः किमप्रवेशे विशति प्रदीपः ॥ २ ॥
तत्याज शक्रः शकनाभिमानं नाहं त्यजामि स्तवनानुबन्धम् ।
स्वल्पेन बोधेन ततोऽधिकार्थं वातायनेनेव निरूपयामि ॥ ३ ॥
त्वं विश्वदृश्वा सकलैरदृश्यो विद्वानशेषं निखिलैरवेद्यः ।
वक्तुं कियान्कीदृश इत्यशक्यः स्तुतिस्ततोऽशक्तिकथा तवास्तु ॥ ४ ॥
व्यापीडितं बालमिवात्मदोषैरुल्लाघतां लोकमवापिपस्त्वम् ।
हिताहितान्वेषणमान्द्यभाजः सर्वस्य जन्तोरसि बालवैद्यः ॥ ५ ॥

---

१. सर्वेऽपि शाब्दिकास्तार्किकश्रेष्ठाः कवयः सज्जनाश्च वादिराजान्यूना इत्यात्मप्रशंसां कविः कृतवानिति तात्पर्यम्. २. द्विःसंधानकाव्यकर्ता कश्चिदन्योऽयमेव धनंजय इति न निश्चयः. स्तोत्रस्यास्य द्वित्राणि मूलपुस्तकानि कर्तृनामरहिता टीका चासादितास्माभिः. ३. एक एवान्यपुरुषैर्मनसाप्यस्मरणीयं प्राणिप्राणधारणोपायप्रदर्शनस्वरूपं युगभारं वहन्धारयन्निति टीका. ४. त्वां स्तोतुमहं शक्त इत्यभिमानम्. ५. स्वल्पाद्बोधात्. ६. स्वल्पेनापि गवाक्षेण बृहदपि पर्वतादि यथा विलोक्यते तद्वदहं स्वल्पेनापि बोधेनाधिकार्थं निरूपयामीति तात्पर्यम्. ७. प्रापितवानसि.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दाता न हर्ता[१] दिवसं विवस्वानद्यश्व इत्यच्युत दर्शिताशः ।
सव्याज्यमेवं गमयत्यशक्तः क्षणेन दत्सेऽभिमतं नताय ॥ ६ ॥
उपैति भक्त्या सुमुखः सुखानि त्वयि स्वभावाद्विमुखश्च दुःखम् ।
सदावदातद्युतिरेकरूपस्तयोस्त्वमादर्श इवावभासि ॥ ७ ॥
अगाधताब्धेः स यतः पयोधिर्मेरोश्च तुङ्गा प्रकृतिः स यत्र[२] ।
द्यावापृथिव्योः पृथुता तथैव व्याप त्वदीया भुवनान्तराणि ॥ ८ ॥
तवानवस्था[३] परमार्थतत्त्वं त्वया न गीतः पुनरागमश्च[४] ।
दृष्टं विहाय त्वमदृष्टमैषीर्विरुद्धवृत्तोऽपि समञ्जसस्त्वम् ॥ ९ ॥
स्मरः सुदग्धो भवतैव तस्मिन्नुद्धूलितात्मा यदि नाम शंभुः ।
अशेत वृन्दोपहतोऽपि विष्णुः किं गृह्यते येन भवानजागः ॥१०॥
स नीरजाः[६] स्यादपरोऽघवान्वा तद्दोषकीर्त्यैव न ते गुणित्वम् ।
स्वतोऽम्बुराशेर्महिमा न देव स्तोकापवादेन जलाशयस्य[७] ॥ ११ ॥
कर्मस्थितिं जन्तुरनेकभूमिं नयत्यमुं सा च परस्परस्य ।
त्वं नेतृभावं हि तयोर्भवाब्धौ जिनेन्द्रनौनाविकयोरिवाख्यः[८] ॥१२॥
सुखाय दुःखानि गुणाय दोषान्धर्माय पापानि समाचरन्ति ।
तैलाय बालाः सिकतासमूहं निपीडयन्ति स्फुटमत्वदीयाः[९] ॥ १३ ॥
विषापहारं मणिमौषधानि मन्त्रं समुद्दिश्य रसायनं च ।
भ्राम्यन्त्यहो न त्वमिति स्मरन्ति पर्यायनामानि तवैव तानि ॥ १४ ॥
चित्ते न किंचित्कृतवानसि त्वं देवः कृतश्चेतसि येन सर्वम् ।
हस्ते कृतं तेन जगद्विचित्रं सुखेन जीवत्यपि चित्तवाह्यः ॥ १५ ॥

---

१. सूर्यो न ददाति नापहरति केवलमद्यश्व इत्याशां दर्शयन्नशक्तः सन्सव्याजं दिवसं गमयति, केवलं कालक्षेपं करोतीत्यर्थः. अन्यत्राशा दिशः. २. यत्र स मेरुर्वर्तते तत्रैव तुङ्गा प्रकृतिर्नान्यत्र. ३. तव मतेऽनवस्था परमार्थतत्त्वं वर्तते. ४. पुनरावृत्तिः. ५. वाञ्छितवानसि. ६. पापरहितः स ब्रह्मादिदेवसमूहः. ७. सरोवरादेः स्तोकापवादेन स्वल्पमेतदिति निन्दया समुद्रस्य महत्त्वं न ख्याप्यते स तु स्वभावेनैव महान्. ८. जीवकर्मणोरन्योन्यस्य नेतृभावं भवाब्धौ त्वमाख्यः कथितवानसि, यथा समुद्रे नौका नाविकं नयति नाविकश्च नौकां तद्वत्. ९. त्वत्तः पराङ्मुखाः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिकालतत्त्वं त्वमवैस्त्रिलोकीस्वामीति संख्यानियतेरमीषाम् ।
बोधाधिपत्यं प्रति नाभविष्यंस्तेऽन्येऽपि चेद्व्याप्स्यदमूनपीदम् ॥ १६ ॥
नाकस्य पत्युः परिकर्म रम्यं नागम्यरूपस्य तवोपकारि ।
तस्यैव हेतुः स्वसुखस्य भानोरुद्बिभ्रतच्छत्रमिवादरेण ॥ १७ ॥
क्कोपेक्षकस्त्वं क्क सुखोपदेशः स चेत्किमिच्छाप्रतिकूलवादः ।
क्कासौ क्क वा सर्वजगत्प्रियत्वं तन्नो यथातथ्यमवेविचं ते ॥ १८ ॥
तुङ्गात्फलं यत्तदकिंचनाच्च प्राप्यं समृद्धान्न धनेश्वरादेः ।
निरम्भसोऽप्युच्चतमादिवाद्रेर्नैकापि निर्याति धुनी पयोधेः ॥ १९ ॥
त्रैलोक्यसेवानियमाय दण्डं दध्रे यदिन्द्रो विनयेन तस्य ।
तत्प्रातिहार्यं भवतः कुतस्त्यं तत्कर्मयोगाद्यदि वा तवास्तु ॥ २० ॥
श्रिया परं पश्यति साधु निःस्वः श्रीमान्न कश्चित्कृपणं त्वदन्यः ।
यथा प्रकाशस्थितमन्धकारस्थायीक्षतेऽसौ न तथा तमःस्थम् ॥ २१ ॥
स्ववृद्धिनिःश्वासनिमेषभाजि प्रत्यक्षमात्मानुभवेऽपि मूढः ।
किं चाखिलज्ञेयविवर्तिबोधस्वरूपमध्यक्षमवैति लोकः ॥ २२ ॥
तस्यात्मजस्तस्य पितेति देव त्वां येऽवगायन्ति कुलं प्रकाश्य ।
तेऽद्यापि नन्वाश्मनमित्यवश्यं पाणौ कृतं हेम पुनस्त्यजन्ति ॥ २३ ॥
दत्तस्त्रिलोक्यां पटहोऽभिभूताः सुरासुरास्तस्य महान्स लाभः ।
मोहस्य मोहस्त्वयि को विरोद्धुर्मूलस्य नाशो बलवद्विरोधः ॥ २४ ॥
मार्गस्त्वयैको ददृशे विमुक्तेश्चतुर्गतीनां गहनं परेण ।
सर्वं मया दृष्टमिति स्मयेन त्वं मा कदाचिद्भुजमालुलोक ॥ २५ ॥
स्वर्भानुरर्कस्य हविर्भुजोऽम्भः कल्पान्तवातोऽम्बुनिधेर्विघातः ।
संसारभोगस्य वियोगभावो विपक्षपूर्वाभ्युदयास्त्वदन्ये ॥ २६ ॥
अजानतस्त्वां नमतः फलं यत्तज्जानतोऽन्यं न तु देवतेति ।
हरिन्मणिं काचधिया दधानस्तं तस्य बुद्ध्या वहतो न रिक्तः ॥ २७ ॥

---

१. अवजानन्ति. २. पाषाणोद्भवम्. ३. नरदेवतिर्यगादीनाम्. ४. काचम्. ५. हरिन्मणेः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रशास्तवाचश्चतुराः कषायैर्दग्धस्य देवव्यवहारमाहुः ।
गतस्य दीपस्य हि नन्दितत्वं दृष्टं कपालस्य च मङ्गलत्वम् ॥ २८ ॥
नानार्थमेकार्थमदस्त्वदुक्तं हितं वचस्ते निशमय्य वक्तुः ।
निर्दोषतां के न विभावयन्ति ज्वरेण मुक्तः सुगमः स्वरेण ॥ २९ ॥
न क्वापि वाञ्छा ववृते च वाक्ते काले क्वचित्कोऽपि तथा नियोगः ।
न पूरयाम्यम्बुधिमित्युदंशुः स्वयं हि शीतद्युतिरभ्युदेति ॥ ३० ॥
गुणा गभीराः परमाः प्रसन्ना बहुप्रकारा बहवस्तवेति ।
दृष्टोऽयमन्तः स्तवने न तेषां गुणो गुणानां किमतः परोऽस्ति ॥ ३१ ॥
स्तुत्या परं नाभिमतं हि भक्त्या स्मृत्या प्रणत्या च ततो भजामि ।
स्मरामि देवं प्रणमामि नित्यं केनाप्युपायेन फलं हि साध्यम् ॥ ३२ ॥
ततस्त्रिलोकीनगराधिदेवं नित्यं परं ज्योतिरनन्तशक्तिम् ।
अपुण्यपापं परपुण्यहेतुं नमाम्यहं वन्द्यमवन्दितारम् ॥ ३३ ॥
अशब्दमस्पर्शमरूपगन्धं त्वां नीरसं तद्विषयावबोधम् ।
सर्वस्य मातारममेयमन्यैर्जिनेन्द्रमस्मार्यमनुस्मरामि ॥ ३४ ॥
अगाधमन्यैर्मनसाप्यलङ्घ्यं निष्किंचनं प्रार्थितमर्थवद्भिः ।
विश्वस्य पारं तमदृष्टपारं पतिं जनानां शरणं व्रजामि ॥ ३५ ॥
त्रैलोक्यदीक्षागुरवे नमस्ते यो वर्धमानोऽपि निजोन्नतोऽभूत् ।
प्राग्गण्डशैलः पुनरद्रिकल्पः पश्चान्न मेरुः कुलपर्वतोऽभूत् ॥ ३६ ॥
स्वयंप्रकाशस्य दिवा निशा वा न बाध्यता यस्य न बाधकत्वम् ।
न लाघवं गौरवमेकरूपं वन्दे विभुं कालकलामतीतम् ॥ ३७ ॥
इति स्तुतिं देव विधाय दैन्याद्वरं न याचे त्वमुपेक्षकोऽसि ।
छायातरुं संश्रयतः स्वतः स्यात्कश्छायया याचितयात्मलाभः ॥ ३८ ॥

१. पूर्वापरविरोधरहितार्थम्. २. प्रवृत्ता. ३. उत्कृष्टाः. ४. स्वयमेवोन्नतः, न तु क्रमेण वर्धमानः. वर्धमान इति च महावीरस्वामिनो नामान्तरम्. यथा मेरुः पूर्वं गण्डशैलतुल्यस्तदनन्तरं पर्वतकल्पस्ततः कुलपर्वतोऽभूदिति न क्रमः. उत्पत्तिसमकालमेव कुलपर्वतत्वं मेरोः. एवं जिनोऽपि जन्मनैवोन्नतो न तु नामानुरूपं क्रमेण वर्धमान इति तात्पर्यम्.

४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथास्ति दित्सा यदि वोपरोधस्त्वय्येव सक्तां दिश भक्तिबुद्धिम् ।
करिष्यते देव तथा कृपां मे को वात्मपोष्ये सुमुखो न सूरिः ॥ ३९ ॥
वितरति विहिता यथाकथंचिज्जिन विनताय मनीषितानि भक्तिः ।
त्वयि नुतिविषया पुनर्विशेषाद्दिशति सुखानि यशो धनं जयं च ॥ ४० ॥

इति श्रीधनंजयकृतं विषापहारस्तोत्रम् ॥

---

## श्रीभूपालकविप्रणीता

# जिनचतुर्विंशतिका ।

श्रीलीलायतनं महीकुलगृहं कीर्तिप्रमोदास्पदं
वाग्देवीरतिकेतनं जयरमाक्रीडानिधानं महत् ।
स स्यात्सर्वमहोत्सवैकभवनं यः प्रार्थितार्थप्रदं
प्रातः पश्यति कल्पपादपदलच्छायं जिनाङ्घ्रिद्वयम् ॥ १ ॥

शान्तं वपुः श्रवणहारि वचश्चरित्रं
सर्वोपकारि तव देव ततः श्रुतज्ञाः ।
संसारमारवमहास्थलरुन्दसान्द्र-
च्छायामहीरुह भवन्तमुपाश्रयन्ते ॥ २ ॥

स्वामिन्नद्य विनिर्गतोऽस्मि जननीगर्भान्धकूपोदरा-
दद्योद्घाटितदृष्टिरस्मि फलवज्जन्मास्मि चाद्य स्फुटम् ।
त्वामद्राक्षमहं यदक्षयपदानन्दाय लोकत्रयी-
नेत्रेन्दीवरकाननेन्दुममृतस्यन्दिप्रभाचन्द्रिकम् ॥ ३ ॥

निःशेषत्रिदशेन्द्रशेखरशिखारत्नप्रदीपावली
सान्द्रीभूतमृगेन्द्रविष्टरतटीमाणिक्यदीपावलिः ।
क्वेयं श्रीः क्व च निःस्पृहत्वमिदमित्यूहातिगस्त्वादृशः
सर्वज्ञानदृशश्चरित्रमहिमा लोकेश लोकोत्तरः ॥ ४ ॥

---

१. द्वित्राणि मूलपुस्तकान्येका च टीकास्य स्तोत्रस्यास्माभिः समासादिता. तत्र टीकायां तत्कर्तुर्नाम नास्ति. २. पण्डिताः. ३. रुन्दा विस्तीर्णा. ४. सिंहासनस्य.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्यं शासनकारिनाकपति यत्त्यक्तं तृणावज्ञया
हेलानिर्दलितत्रिलोकमहिमा यन्मोहमल्लो जितः ।
लोकालोकमपि (?) स्वबोधमुकुरस्यान्तः कृतं यत्त्वया
सैषाश्चर्यपरम्परा जिनवर क्वान्यत्र संभाव्यते ॥ ५ ॥
दानं ज्ञानधनाय दत्तमसकृत्पात्राय सद्वृत्तये
चीर्णान्युग्रतपांसि तेन सुचिरं पूजाश्च बह्व्यः कृताः ।
शीलानां निचयः सहामलगुणैः सर्वैः समासादितो
दृष्टस्त्वं जिन येन दृष्टिसुभगः श्रद्धापरेण क्षणम् ॥ ६ ॥
प्रज्ञापारमितः स एव भगवान्पारं स एव श्रुत-
स्कन्धाब्धेर्गुणरत्नभूषण इति श्लाघ्यः स एव ध्रुवम् ।
नीयन्ते जिन येन कर्णहृदयालंकारतां त्वद्गुणाः
संसाराहिविषापहारमणयस्त्रैलोक्यचूडामणे ॥ ७ ॥
जयति दिविजवृन्दान्दोलितैरिन्दुरोचि-
र्निचयरुचिभिरुच्चैश्चामरैर्वीज्यमानः ।
जिनपतिरनुरज्यन्मुक्तिसाम्राज्यलक्ष्मी-
युवतिनवकटाक्षक्षेपलीलां दधानैः ॥ ८ ॥
देवः श्वेतातपत्रत्रयचमरिरुहाशोकभाश्चक्रभाषा-
पुष्पौघासारसिंहासनसुरपटहैरष्टभिः प्रातिहार्यैः । (?)
साश्चर्यैर्भ्राजमानः सुरमनुजसभाम्भोजिनीभानुमाली
पायान्नः पादपीठीकृतसकलजगत्पालमौलिर्जिनेन्द्रः ॥ ९ ॥
नृत्यत्स्वर्दन्तिदन्ताम्बुरुहवननटन्नाकनारीनिकायः
सद्यस्त्रैलोक्ययात्रोत्सवकरनिनदातोद्यमाद्यन्निलिम्पः ।
हस्ताम्भोजातलीलाविनिहितसुमनोदामरम्यामरस्त्री-
काम्यः कल्याणपूजाविधिषु विजयते देव देवागमस्ते ॥ १० ॥

---

१. आज्ञाविधेयः शक्रो यस्मिन्. २. चमरिरुहं चामरम्, भाश्चक्रं भामण्डलम्, भाषा दिव्यध्वनिः. 'अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामरमासनं च । भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणाम् ॥' इति शान्तिपाठे पद्यम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्षुष्मानहमेव देव भुवने नेत्रामृतस्यन्दिनं
त्वद्वक्त्रेन्दुमतिप्रसादसुभगैस्तेजोभिरुद्भासितम् ।
येनालोकयता मयानतिचिराच्चक्षुः कृतार्थीकृतं
द्रष्टव्यावधिवीक्षणव्यतिकरव्याजृम्भमाणोत्सवम् ॥ ११ ॥

कैन्तोः सकान्तमपि मल्लमवैति कश्चि-
न्मुग्धो मुकुन्दमरविन्दजमिन्दुमौलिम् ।
मोघीकृतत्रिदशयोषिदपाङ्गपात-
स्तस्य त्वमेव विजयी जिनराजमल्लः ॥ १२ ॥

किसलयितमनल्पं त्वद्विलोकाभिलाषा-
त्कुसुमितमतिसान्द्रं त्वत्समीपप्रयाणात् ।
मम फलितममन्दं त्वन्मुखेन्दोरिदानीं
नयनपथमवाप्ताद्देव पुण्यद्रुमेण ॥ १३ ॥

त्रिभुवनवनपुष्प्यत्पुष्पकोदण्डदर्प-
प्रसरदवनवाम्भोमुक्तिसूक्तिप्रसूतिः ।
स जयति जिनराजव्रातजीमूतसङ्घः
शतमखशिखिनृत्यारम्भनिर्बन्धबन्धुः ॥ १४ ॥

भूपालस्वर्गपालप्रमुखनरसुरश्रेणिनेत्रालिमाला-
लीलाचैत्यस्य चैत्यालयमखिलजगत्कौमुदीन्दोर्जिनस्य ।
उत्तंसीभूतसेवाञ्जलिपुटनलिनीकुड्मलास्त्रिः परीत्य
श्रीपादच्छाययापस्थितभवदवथुः संश्रितोऽस्मीव मुक्तिम् ॥१५॥

देव त्वदङ्घ्रिनखमण्डलदर्पणेऽस्मि-
न्नर्घ्ये निसर्गरुचिरे चिरदृष्टवक्त्रः ।
श्रीकीर्तिकान्तिधृतिसंगमकारणानि
भव्यो न कानि लभते शुभमङ्गलानि ॥ १६ ॥

---

१. कामस्य. २. मायन्. ३. जिनानां गणधरदेवानां राजानस्तेषां व्रातः समूह एव मेघसंघ इति टीका. ४. वृक्षविशेषस्य. ५. अपस्थितो दूरीभूतः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जयति सुरनरेन्द्रश्रीसुधानिर्झरिण्याः
कुलधरणिधरोऽयं जैनचैत्याभिरामः ।
प्रविपुलफलधर्मानोकहाग्रप्रवाल-
प्रसरशिखरशुम्भत्केतनः श्रीनिकेतः ॥ १७ ॥

विनमदमरकान्ताकुन्तलाक्रान्तकान्ति-
स्फुरितनखमयूखद्योतिताशान्तरालः ।
दिविजमनुजराजव्रातपूज्यक्रमाब्जो
जयति विजितकर्मारातिजालो जिनेन्द्रः ॥ १८ ॥

सुप्तोत्थितेन सुमुखेन सुमङ्गलाय
द्रष्टव्यमस्ति यदि मङ्गलमेव वस्तु ।
अन्येन किं तदिह नाथ तवैव वक्त्रं
त्रैलोक्यमङ्गलनिकेतनमीक्षणीयम् ॥ १९ ॥

त्वं धर्मोदयतापसाश्रमशुकस्त्वं काव्यबन्धक्रम-
क्रीडानन्दनकोकिलस्त्वमुचितः श्रीमल्लिकाषट्पदः ।
त्वं पुन्नागकथारविन्दसरसीहंसस्त्वमुत्तंसकैः
कैर्भूपाल न धार्यसे गुणमणिस्रग्मालिभिर्मौलिभिः ॥ २० ॥

शिवसुखमजरश्रीसंगमं चाभिलष्य
स्वमभि नियमयन्ति क्लेशपाशेन केचित् ।
वयमिह तु वचस्ते भूपतेर्भावयन्त-
स्तदुभयमपि शश्वल्लीलया निर्विशामः ॥ २१ ॥

देवेन्द्रास्तव मज्जनानि विदधुर्देवाङ्गना मङ्गला-
न्यापेठुः शरदिन्दुनिर्मलयशो गन्धर्वदेवा जगुः ।
शेषाश्चापि यथानियोगमखिलाः सेवां सुराश्चक्रिरे
तत्किं देव वयं विदध्म इति नश्चित्तं तु दोलायते ॥२२ ॥

देव त्वज्जननाभिषेकसमये रोमाञ्चसत्कञ्चुकै-
र्देवेन्द्रैर्यदनर्ति नर्तनविधौ लब्धप्रभावैः स्फुटम् ।

---

१. हे जगत्पालक.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किंचान्यत्सुरसुन्दरीकुचतटप्रान्तावनद्धोत्तम-
प्रेङ्खद्वल्लकिनादझंकृतमहो तत्केन संवर्ण्यते ॥ २३ ॥
देव त्वत्प्रतिबिम्बमम्बुजदलस्मेरेक्षणं पश्यतां
यत्रास्माकमहो महोत्सवरसो दृष्टेरियान्वर्तते ।
साक्षात्तत्र भवन्तमीक्षितवतां कल्याणकाले तदा
देवानामनिमेषलोचनतया वृत्तः स किं वर्ण्यते ॥ २४ ॥
दृष्टं धाम रसायनस्य महतां दृष्टं निधीनां पदं
दृष्टं सिद्धरसस्य सद्म सदनं दृष्टं च चिन्तामणेः ।
किं दृष्टैरथवानुषङ्गिकफलैरेभिर्मयाद्य ध्रुवं
दृष्टं मुक्तिविवाहमङ्गलगृहं दृष्टे जिनश्रीगृहे ॥ २५ ॥
दृष्टस्त्वं जिनराजचन्द्र विकसद्भूपेन्द्रनेत्रोत्पले
स्नातं त्वन्नुतिचन्द्रिकाम्भसि भवद्विद्वच्चकोरोत्सवे ।
नीतश्चाद्य निदाघजः क्लमभरः शान्तिं मया गम्यते
देव त्वद्गतचेतसैव भवतो भूयात्पुनर्दर्शनम् ॥ २६ ॥

इति श्रीभूपालकविप्रणीता जिनचतुर्विंशतिका ॥
समाप्तेयं जिनपञ्चस्तवी ॥

---

## श्रीदेवनन्दिप्रणीतं

# सिद्धिप्रियस्तोत्रम्[२] ।

सिद्धिप्रियैः प्रतिदिनं प्रतिभासमानै-[३]
र्जन्मप्रबन्धमथनैः प्रतिभासमानैः[४] ।
श्रीनाभिराजतनुभूपदवीक्षणेन[५]
प्राप्ते जनैर्वितनुभूपदवी[६] क्षणेन ॥ १ ॥
येन स्मरास्त्रनिकरैरपराजितेन
सिद्धिर्वधूर्ध्रुवमबोधि पराजितेन[७] ।

---

१. जन्माभिषेके. २. स्तोत्रस्यास्य त्रिचतुराणि मूलपुस्तकान्येवोपलब्धानि टीका तु न प्राप्ता. एकस्मिन्मूलपुस्तके टिप्पणं वर्तते तदेवात्रोद्धृतम्. ३. देदीप्यमानैः. ४. प्रतिभयानुपमैः. ५. नाभिराजतनुभूर्ऋषभनाथस्वामी तच्चरणविलोकनेन. ६. वितनवो मुक्तास्तेषां भूर्मोक्षभूमिस्तस्याः पदवी मार्गो रत्नत्रयात्मकः. ७. परा उत्कृष्टा, अजितेन एतन्नाम्ना जिनेन.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संवृद्धधर्मसुधिया कविराजमानः (?)
क्षिप्रं करोतु यशसा स विराजमानः ॥ २ ॥
श्रुत्वा वचांसि तव [1]संभवकोमलानि
नो तृप्यति प्रवरसंभव कोऽमलानि ।
[2]देवैप्रमुक्तसुमनोभवनाशनानि
स्वार्थस्य संसृतिमनोभवनाशनानि ॥ ३ ॥
यस्मिन्विभाति कलहंसरवैरशोक-
श्छिन्द्यात्स भिन्नभवमत्सरवैरशोकः ।
देवोऽभिनन्दनजिनो गुरु मेऽघजालं
शम्पेव पर्वततटं गुरुमेघजालम् ॥ ४ ॥
येन स्तुतोऽसि गतकुन्तल तापहार
चक्रासिचापशरकुन्तलतापहार ।
भव्य प्रभो सुमतिनाथ [3]वैरानतेन
[4]कामाश्रिता सुमतिनाथ वरा न तेन ॥ ५ ॥
मोहप्रमादमदकोपरतापनाशः (?)
पञ्चेन्द्रियाश्वदमकोऽपरतापनाशः ।
पद्मप्रभुर्दिशतु मे कमलां वराणां
मुक्तात्मनां विगतशोकमलाम्बराणाम् ॥ ६ ॥
ये त्वां नमन्ति विनयेन महीनभोगाः
श्रीमत्सुपार्श्व [5]विनयेनमहीनभोगाः ।
ते भक्तभव्यसुरलोक विमानमाया
ईशा भवन्ति [6]सुरलोकविमानमायाः ॥ ७ ॥
आकर्ण्य तावकवचोऽवनिनायकोऽपि
शान्तिं मनः समधियावनिनाय कोपि[7] ।

---

१. संभवेति जिननाम. २. हे देव प्रमुक्तसुमनोभवन, अश(स)नानि प्रेरकाणि स्वार्थस्य. ३. हे वर, आनतेन. ४. लक्ष्मीः. ५. विनयस्येनं प्रभुम् अहीनभोगाः. ६. देवलोकव्योमयानश्रियः. ७. कोपयुक्तं मनः शान्तिमवनिनाय.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चन्द्रप्रभ प्रभजति स्म रमा[1] विना शं[2]
दोर्दण्डमण्डितरतिस्मरमाविनाशम्[3] ॥ ८ ॥
श्रीपुष्पदन्त जिनजन्मनि काममाशा
यामि प्रिये वितनुतां च निकाममाशाः ।
इत्थं रतिं निगदतातनुना सुराणां
स्थानं व्यधायि हृदये तनुना[4] सुराणाम्[5] ॥ ९ ॥
श्रीशीतलाधिप तवाधिसभं जनानां
भव्यात्मनां प्रसृतसंसृतिभञ्जनानाम् ।
प्रीतिं करोति विततां सुरसारमुक्ति-[6]
मुक्तात्मनां जिन यथा सुरसार[7] मुक्तिः ॥ १० ॥
पादद्वये मुदितमानसमानतानां
श्रेयन्मुने विगतमान समानतानाम्[8] ।
शोभां करोति तव कांचन भा सुराणां
देवाधिदेव मणिकाञ्चनभासुराणाम् ॥ ११ ॥
घोरान्धकारनरकक्षतवारणानि
श्रीवासुपूज्यजिन दक्ष तवारणानि[9] ।
मुक्त्यै भवन्ति भवसागरतारणानि
वाक्यानि चित्तभवसागरतारणानि[10] ॥ १२ ॥
भव्यप्रजाकुमुदिनीविधुरञ्जनानां[11]
हन्ता विभासि दलयन्विधुरं जनानाम् ।
इत्थं स्वरूपमखिलं तव ये विदन्ति
राज्यं भजन्ति विमलेश्वर तेऽविदन्ति[12] ॥ १३ ॥

---

१. द्वितीयाबहुवचनम्. २. सुखम्. ३. दोर्दण्डमण्डितरतेः स्मरस्य माया लक्ष्म्याश्च विनाशो यस्मिन्सुखे. मोक्षसुखमिति भावः. ४. सूक्ष्मेण. ५. सुशब्दां रतिम्. ६. सुरसा-अरं-उक्तिः. ७. हे सुरश्रेष्ठ. ८. मानत्वेन सहवर्तमानानाम्. ९. अरणानि गुद्धनिषेधकानि. १०. चित्तभवमायाः कामलक्ष्म्या गरता विषत्वं तां रणन्ति कथयन्ति तानि. ११. कल्मषाणाम्. १२. विगता दन्तिनो यस्मात्तद्विदन्ति, न विदन्ति अविदन्ति. हस्तियुक्तं राज्यमित्यर्थः.

For Private and Personal Use Only

स्वर्गापवर्गसुखपात्र [1]जिनाति मात्रं
  यस्त्वां स्मरन्भुवनमित्र जिनाति [2]मात्रम् ।
श्रीमन्ननन्त वर निर्वृति[3]कान्त कान्तां
  भव्यः स याति पदवीं [4]व्रतिकान्तकान्ताम् ॥ १४ ॥

जन्माभिषेकमकरोत्सुरराजनामा
  यस्याश्रितो गुणगणैः सुरराज [5]नामा ।
धर्मः करोत्वनलसं प्रति बोधनानि
  सिद्ध्यै मनः सपदि संप्रति वो धनानि ॥ १५ ॥

नास्तानि यानि महसा विधुनामितानि
  चेतस्तमांसि तपसा विधुनामि तानि ।
इत्याचरन्वरतपो [6]गतकामिनीति
  शान्तिः पदं दिशतु मेऽ[7]गतकामिनीति ॥ १६ ॥

कुन्थुः क्षितौ क्षितिपतिर्[8]गतमानसेनः
  पूर्वं पुनर्मुनिरभूद्धतमानसेनः ।
योऽसौ करोतु मम जन्तुदयानिधीनां
  संवर्धनानि विविधर्द्धि[9]चुदयानि धीनाम् ॥ १७ ॥

या ते शृणोति नितरामुदितानि दानं
  यच्छत्यभीप्सति न वा मुदिता निदानम् ।
सा नो करोति जनता जनकोपितापि
  चित्तं [10]जिनार गुणभाजन कोपि[11] तापि ॥ १८ ॥

मल्लेर्वचांस्यनिकृतीनि [12]संभावनानि
  धर्मोपदेशनकृतीनि [13]संभावनानि ।

---

१. जीर्यते वृद्धो भवति. २. मां मोक्षलक्ष्मीं त्रायते मात्रस्तम्. ३. मुक्तिप्रभो. ४. हे व्रतिक व्रतदानदक्ष, अन्तकान्तां यमस्य विनाशकां पदवीम्. ५. ना पुरुषो गुणगणैः अमा सह सुष्ठु रराज. ६. गता कामिनां नीतिर्यस्मात्तपसः. ७. अगता न प्राप्ता कामिन्य ईतयश्च यत्र तादृशं पदम्. ८. अप्रमाणा सेना यस्य. ९. आगामिवाञ्छाम्. १०. हे जिन, हे अर. ११. कोपयुक्तं तापयुक्तं च चित्तं नो करोति. १२. भावनया सहितानि. १३. सभाया अवनानि.

५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुर्वन्तु भव्यनिवहस्य नभोगतानां
मङ्क्षु श्रियं कृतमुदं जनभोगतानाम् ॥ १९ ॥
संस्तूयसे शुभवता मुनिना यकेन
नीतो जिनाशु भवता मुनिनायकेन ।
नाथेन नाथ मुनिसुव्रत मुक्तमानां
मुक्तिं चरन्स मुनिसुव्रतमुक्तमानाम् ॥ २० ॥
चित्तेन मेरुगिरिधीर दयालुनासि
सर्वोपकारकृतधीरदया लुनासि ।
इत्थं स्तुतो नमिमुनिर्मम तापसानां
लक्ष्मीं करोतु मम निर्ममतापसानाम् ॥ २१ ॥
येनोद्धश्रृङ्गगिरनारगिराविनापि
नेमिः स्तुतोऽपि पशुनापि गिरा विनापि ।
कंदर्पदर्पदलनः क्षतमोहतान-
स्तस्य श्रियो दिशतु दक्षतमोऽहता नः ॥ २२ ॥
गन्धर्वयक्षनरकिंनर दृश्यमानः
प्रीतिं करिष्यति न किं नरदृश्यमानः ।
भानुप्रभाप्रविकसत्कमलोपमायां
पार्श्वः प्रसूतजनताकमलोऽपमायाम् ॥ २३ ॥
श्रीवर्धमानवचसा परमाकरेण
रत्नत्रयोत्तमनिधेः परमाकरेण ।
कुर्वन्ति यानि मुनयोऽजनता हि तानि
वृत्तानि सन्तु सततं जनताहितानि ॥ २४ ॥

१. देवानां जनभोगस्य तानो विस्तारो यस्यां तां श्रियं भव्यनिवहस्य कुर्वन्तु. २. यकेन येन. ३. कथितप्रमाणाम्. ४. निःशेषेण ममतामपश्यन्तीति निर्ममताप-सास्तेषाम्. ५. उद्धशब्दः प्रशंसावचनः. प्रशस्तशिखरे गिरिनारिपर्वते. ६. इना कामेनापि. ७. मनुष्यमात्रदृष्टौ. ८. प्रसूता प्रकटीकृता जनतार्थं कमला लक्ष्मीर्येन. ९. श्रीमहावीरस्वामिवाक्येन. १०. परमेणाकरेण खनिरूपेण. ११. परलक्ष्मीकरेण. १२. जनतातो बहिर्भूताः. अलौकिका इत्यर्थः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृत्तात्समुल्लसितचित्तवचःप्रसूतेः
श्रीदेवनन्दिमुनिचित्तवचः प्रसूतेः ।
यः पाठकोऽल्पतरजल्पकृतेस्त्रिसंध्यं
लोकत्रयं समनुरञ्जयति त्रिसंध्यम् (?) ॥ २५ ॥

तुष्टिं देशनया जनस्य मनसो येन स्थितं दित्सता
सर्वं वस्तु विजानता शमवता येन क्षता कृच्छ्रता ।
भव्यानन्दकरेण येन महतां तत्त्वप्रणीतिः कृता
तापं हन्तु जिनः स मे शुभधियां तातः सतामीशिता ॥ २६ ॥[1]

इति श्रीदेवनन्दिप्रणीतं सिद्धिप्रियस्तोत्रम् ।

---

## श्रीसोमप्रभाचार्यविरचिता

(सिन्दूरप्रकरापरपर्याया)

# सूक्तिमुक्तावली ।[2]

सिन्दूरप्रकरस्तपः करिशिरःक्रोडे कषायाटवी-
दावार्चिर्निचयः प्रबोधदिवसप्रारम्भसूर्योदयः ।
मुक्तिस्त्रीकुचकुम्भकुङ्कुमरसः श्रेयस्तरोः पल्लव-
प्रोल्लासः क्रमयोर्[3]नखद्युतिभरः पार्श्वप्रभोः पातु वः ॥ १ ॥

सन्तः सन्तु मम प्रसन्नमनसो वाचां विचारोद्यताः
सूतेऽम्भः कमलानि तत्परिमलं वाता वितन्वन्ति यत् ।
किं वाभ्यर्थनयानया यदि गुणोऽस्त्यासां ततस्ते स्वयं
कर्तारः प्रथनं न चेदथ यशःप्रत्यर्थिना तेन[4] किम् ॥ २ ॥

---

१. चक्रबन्धपद्यमेतत्. तत्र तृतीयवलये 'देवनन्दिकृतिः' इत्युद्ध्रियते. २. अस्याः सूक्तिमुक्तावल्या मुद्रणावसरे पुस्तकत्रयमस्माभिरासादितम्. तत्र प्रथमं जयपुरीयविद्याविभागाध्यक्ष 'मास्टर् ऑव् आर्ट्स्' इत्युपाधिमण्डितश्रीयुक्तहरिदासशास्त्रिणां त्रयोदशपत्रात्मकं शुद्धं नातिनवीनं च क-संज्ञकम्. द्वितीयं संवेगिसाधुसत्तमशमदमादिभूषितनिष्परिग्रहश्रीशान्तिविजयाभिधानां जैनमुनीनां पत्रत्रयात्मकं प्राचीनं शुद्धं च ख-संज्ञकम्. तृतीयमपि पूर्वोक्तमुनीनामेव द्वादशपत्रात्मकं प्राचीनं नातिशुद्धं गुर्जरभाषासंकीर्णया कर्तृनामरहितया संक्षिप्तटीकया समेतं ग-संज्ञकम्. ३. पादयोः. ४. प्रथनेन.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ धर्मप्रक्रमः ।[5]

त्रिवर्गसंसाधनमन्तरेण पशोरिवायुर्विफलं नरस्य ।
तत्रापि धर्मं प्रवरं वदन्ति न तं विना यद्भवतोऽर्थकामौ ॥ ३ ॥

यः प्राप्य दुष्प्रापमिदं नरत्वं धर्मं न यत्नेन करोति मूढः ।
क्लेशप्रबन्धेन स लब्धमब्धौ चिन्तामणिं पातयति प्रमादात् ॥ ४ ॥

स्वर्णस्थाले क्षिपति स रजः पादशौचं विधत्ते
पीयूषेण प्रवरकरिणं वाहयत्येधभारम्[1] ।
चिन्तारत्नं विकिरति कराद्वायसोड्डायनार्थं
यो दुष्प्रापं गमयति मुधा मर्त्यजन्म प्रमत्तः ॥ ५ ॥

ते धत्तूरतरुं वपन्ति भवने प्रोन्मूल्य कल्पद्रुमं
चिन्तारत्नमपास्य काचशकलं स्वीकुर्वते ते जडाः ।
विक्रीय द्विरदं गिरीन्द्रकरणिं[2] क्रीणन्ति ते रासभं
ये लब्धं परिहृत्य धर्ममधमा धावन्ति भोगाशया ॥ ६ ॥

अपारे संसारे कथमपि समासाद्य नृभवं
न धर्मं यः कुर्याद्विषयसुखतृष्णातरलितः ।
ब्रुडन्[3]पारावारे प्रवरमपहाय प्रवहणं
स मुख्यो मूर्खाणामुपलमुपलब्धुं प्रयतते ॥ ७ ॥

भक्तिं तीर्थकरे गुरौ जिनमते संघे[4] च हिंसानृत-
स्तेयाब्रह्मपरिग्रहव्युपरमं क्रोधाद्यरीणां जयम् ।
सौजन्यं गुणिसङ्गमिन्द्रियदमं दानं तपोभावनां
वैराग्यं च कुरुष्व निर्वृतिपदे यद्यस्ति गन्तुं मनः ॥ ८ ॥

अथ पूजाप्रक्रमः[5] ।

पापं लुम्पति दुर्गतिं दलयति व्यापादयत्यापदं
पुण्यं संचिनुते श्रियं वितनुते पुष्णाति नीरोगताम् ।

---

१. काष्ठभारम्. २. पर्वततुल्यम्. 'गिरीन्द्रसदृशं' इति क-पाठः. ३. मज्जन्. ४. साधुसमूहे. ५. 'पूजाद्वारम्' ग. क-पुस्तके तु प्रक्रमविभागो नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौभाग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः
स्वर्गं यच्छति निर्वृतिं च रचयत्यर्चार्हतां निर्मिता ॥ ९ ॥
स्वर्गस्तस्य गृहाङ्गणं सहचरी साम्राज्यलक्ष्मीः शुभा
सौभाग्यादिगुणावलिर्विलसति स्वैरं वपुर्वेश्मनि ।
संसारः सुतरः शिवं करतलक्रोडे लुठत्यञ्जसा
यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः ॥ १० ॥
कदाचिन्नातङ्कः[1] कुपित इव पश्यत्यभिमुखं
विदूरे दारिद्र्यं चकितमिव नश्यत्यनुदिनम् ।
विरक्ता कान्तेव त्यजति कुगतिः सङ्गमुदयो
न मुञ्चत्यभ्यर्णं सुहृदिव जिनार्चां रचयतः ॥ ११ ॥
यः पुष्पैर्जिनमर्चति स्मितसुरस्त्रीलोचनैः सोऽर्च्यते
यस्तं वन्दत एकशस्त्रिजगता सोऽहर्निशं वन्द्यते ।
यस्तं स्तौति परत्र वृत्रदमनस्तोमेन[2] स स्तूयते
यस्तं ध्यायति क्लृप्तकर्मनिधनः स ध्यायते योगिभिः ॥ १२ ॥

अथ गुरुप्रक्रमः[3] ।

अवद्यमुक्ते[4] पथि यः प्रवर्तते प्रवर्तयत्यन्यजनं च निस्पृहः ।
स[5] सेवितव्यः स्वहितैषिणा गुरुः स्वयं तरंस्तारयितुं क्षमः परम् ॥ १३ ॥
विदलयति कुबोधं बोधयत्यागमार्थं
सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति ।
अवगमयति कृत्याकृत्यभेदं गुरुर्यो
भवजलनिधिपोतस्तं विना नास्ति कश्चित् ॥ १४ ॥
पिता माता भ्राता प्रियसहचरी सूनुनिवहः
सुहृत्स्वामी माद्यत्करिभटरथाश्वः परिकरः ।
निमज्जन्तं जन्तुं नरककुहरे रक्षितुमलं
गुरोर्धर्माधर्मप्रकटनपरात्कोऽपि न परः ॥ १५ ॥

---

१. रोगः. २. इन्द्रसमूहेन. ३. 'गुरुद्वारम्' ग. ४. निर्दोषे. ५. 'स एव सेव्यः' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं ध्यानेन भवत्वशेषविषयत्यागैस्तपोभिः कृतं
पूर्णं भावनयालमिन्द्रियजयैः पर्याप्तमाप्तागमैः।
किं त्वेकं भवनाशनं कुरु गुरुप्रीत्या गुरोः शासनं
सर्वे येन विना विनाथबलवत्स्वार्थाय नालं गुणाः॥ १६॥

अथ जिनमतप्रक्रमः।

न देवं नादेवं न शुभगुरुमेनं न कुगुरुं
न धर्मं नाधर्मं न गुणपरिणद्धं न विगुणम्।
न कृत्यं नाकृत्यं न हितमहितं नापि निपुणं
विलोकन्ते लोका जिनवचनचक्षुर्विरहिताः॥ १७॥

मानुष्यं विफलं वदन्ति हृदयं व्यर्थं वृथा श्रोत्रयो-
र्निर्माणं गुणदोषभेदनकलां तेषामसंभाविनीम्।
दुर्वारं नरकान्धकूपपतनं मुक्तिं बुधा दुर्लभां
सार्वज्ञः समयो दयारसमयो येषां न कर्णातिथिः॥ १८॥

पीयूषं विषवज्जलं ज्वलनवत्तेजस्तमःस्तोमव-
न्मित्रं शात्रववत्स्रजं भुजगवच्चिन्तामणिं लोष्टवत्।
ज्योत्स्नां ग्रीष्मजघर्मवत्स मनुते कारुण्यपण्यापणं
जैनेन्द्रं मतमन्यदर्शनसमं यो दुर्मतिर्मन्यते॥ १९॥

धर्मं जागरयत्यघं विघटयत्युत्थापयत्युत्पथं
भिन्ते मत्सरमुच्छिनत्ति कुनयं मश्नाति मिथ्यामतिम्।
वैराग्यं वितनोति पुष्यति कृपां मुष्णाति तृष्णां च य-
त्तज्जैनं मतमर्चति प्रथयति ध्यायत्यधीते कृती॥ २०॥

अथ संघप्रक्रमः।

रत्नानामिव रोहणक्षितिधरः खं तारकाणामिव
स्वर्गः कल्पमहीरुहामिव सरः पङ्केरुहाणामिव।

---

१. 'दमैः' क. २. स्वामिरहितसैन्यवत्. ३. 'जिनमतद्वारम्' ग. ४. 'संघद्वारम्' ग. ५. 'रोहणः' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाथोधिः पयसामिवेन्दुमहसां स्थानं गुणानामसा-
वित्यालोच्य विरच्यतां भगवतः संघस्य पूजाविधिः ॥ २१ ॥
यः संसारनिरासलालसमतिर्मुक्त्यर्थमुत्तिष्ठते
यं तीर्थं कथयन्ति पावनतया येनास्ति नान्यः समः ।
यस्मै तीर्थपतिर्नमस्यति सतां यस्माच्छुभं जायते
स्फूर्तिर्यस्य परा वसन्ति च गुणा यस्मिन्स संघोऽर्च्यताम् २२
लक्ष्मीस्तं स्वयमभ्युपैति रभसात्कीर्तिस्तमालिङ्गति
प्रीतिस्तं भजते मतिः प्रयतते तं लब्धुमुत्कण्ठया ।
स्वःश्रीस्तं परिरब्धुमिच्छति मुहुर्मुक्तिस्तमालोकते
यः संघं गुणसंघकेलिसदनं श्रेयोरुचिः सेवते ॥ २३ ॥
यद्भक्तेः फलमर्हदादिपदवीमुख्यं कृषेः सस्यव-
च्चक्रित्वत्रिदशेन्द्रतादि तृणवत्प्रासङ्गिकं गीयते ।
शक्तिं यन्महिमस्तुतौ न दधते वाचोऽपि वाचस्पतेः
संघः सोऽघहरः पुनातु चरणन्यासैः सतां मन्दिरम् ॥ २४ ॥

अथाहिंसाप्रक्रमः ।

क्रीडाभूः सुकृतस्य दुष्कृतरजःसंहारवात्या भवो-
दन्वन्नौर्व्यसनाग्निमेघपटली संकेतदूती श्रियाम् ।
निःश्रेणिस्त्रिदिवौकसः[२] प्रियसखी मुक्तेः कुगत्यर्गला
सत्त्वेषु क्रियतां कृपैव भवतु क्लेशैरशेषैः परैः ॥ २५ ॥
यदि ग्रावा तोये तरति तरणिर्यद्युदयते
प्रतीच्यां सप्तार्चिर्यदि भजति शैत्यं कथमपि ।
यदि क्ष्मापीठं स्यादुपरि सकलस्यापि जगतः
प्रसूते सत्त्वानां तदपि न वधः क्वापि सुकृतम् ॥ २६ ॥
स कमलवनमग्नेर्वासरं भास्वदस्ता-
दमृतमुरगवक्त्रात्साधुवादं विवादात् ।

१. 'सुखं' ख. २. 'निःश्रेणी त्रिदिवौकसां' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुगपगममजीर्णाज्जीवितं कालकूटा-
दभिलषति वधाद्यः प्राणिनां धर्ममिच्छेत् ॥ २७ ॥
आयुर्दीर्घतरं वपुर्वरतरं गोत्रं गरीयस्तरं
वित्तं भूरितरं बलं बहुतरं स्वामित्वमुच्चैस्तरम् ।
आरोग्यं विगतान्तरं त्रिजगति श्लाघ्यत्वमल्पेतरं
संसाराम्बुनिधिं करोति सुतरं चेतः कृपार्द्रान्तरम् ॥ २८ ॥

अथासत्यप्रक्रमः ।

विश्वासायतनं विपत्तिदलनं दैवैः कृताराधनं
मुक्तेः पथ्यदनं[1] जलाग्निशमनं व्याघ्रोरगस्तम्भनम् ।
श्रेयःसंवननं समृद्धिजननं सौजन्यसंजीवनं
कीर्तेः केलिवनं प्रभावभवनं सत्यं वचः पावनम् ॥ २९ ॥
यशो यस्माद्भस्मीभवति वनवह्नेरिव वनं
निदानं दुःखानां यदवनिरुहाणां जलमिव ।
न यत्र स्याच्छायातप[2] इव तपःसंयमकथा
कथंचित्तन्मिथ्यावचनमभिधत्ते न मतिमान् ॥ ३० ॥
असत्यमप्रत्ययमूलकारणं कुवासनासद्म समृद्धिवारणम् ।
विपन्निदानं परवञ्चनोर्जितं कृतापराधं कृतिभिर्विवर्जितम् ॥ ३१ ॥
तस्याग्निर्जलमर्णवः स्थलमरिर्मित्रं सुराः किंकराः
कान्तारं नगरं गिरिर्गृहमहिर्माल्यं मृगारिर्मृगः ।
पातालं बिलमस्त्रमुत्पलदलं व्यालः[3] सृगालो विषं
पीयूषं विषमं समं च वचनं सत्याञ्चितं वक्ति यः ॥ ३२ ॥

अथ स्तेयप्रक्रमः ।

तमभिलषति सिद्धिस्तं वृणीते समृद्धि-
स्तमभिसरति कीर्तिर्मुञ्चते तं भवार्तिः ।
स्पृहयति सुगतिस्तं नेक्षते दुर्गतिस्तं
परिहरति विपत्तं यो न गृह्णात्यदत्तम् ॥ ३३ ॥

---

१. मार्गोपयुक्तं भोजनम्. शम्बलमिति यावत्. २. आतपे छायेव. ३. दुष्टगजः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अदत्तं नादत्ते कृतसुकृतकामः किमपि यः
शुभश्रेणिस्तस्मिन्वसति कलहंसीव कमले ।
विपत्तस्माद्दूरं व्रजति रजनीवाम्बरमणे-
र्विनीतं विद्येव त्रिदिवशिवलक्ष्मीर्भजति तम् ॥ ३४ ॥

यन्निर्वर्तितकीर्तिधर्मनिधनं सर्वागसां साधनं
प्रोन्मीलद्वधबन्धनं विरचितक्लिष्टाशयोद्बोधनम्[1] ।
दौर्गत्यैकनिबन्धनं कृतसुगत्याश्लेषसंरोधनं
प्रोत्सर्पत्प्रधनं जिघृक्षति न तद्धीमानदत्तं धनम् ॥ ३५ ॥

परजनमनःपीडाक्रीडावनं वधभावना-
भवनमवनिव्यापिव्यापल्लताघनमण्डलम् ।
कुगतिगमने मार्गः स्वर्गापवर्गपुरार्गलं
नियतमनुपादेयं स्तेयं नृणां हितकाङ्क्षिणाम् ॥ ३६ ॥

अथ शीलप्रक्रमः ।

दत्तस्तेन जगत्यकीर्तिपटहो गोत्रे मषीकूर्चक-
श्चारित्रस्य जलाञ्जलिर्गुणगणारामस्य दावानलः ।
संकेतः सकलापदां शिवपुरद्वारे कपाटो दृढः
शीलं येन निजं विलुप्तमखिलं त्रैलोक्यचिन्तामणिः ॥ ३७ ॥[2]

व्याघ्रव्यालजलानलादिविपदस्तेषां व्रजन्ति क्षयं
कल्याणानि समुल्लसन्ति विबुधाः सांनिध्यमध्यासते ।
कीर्तिः स्फूर्तिमियर्ति[3] यात्युपचयं धर्मः प्रणश्यत्यघं
स्वर्निर्वाणसुखानि संनिदधते ये शीलमाबिभ्रते ॥ ३८ ॥

हरति कुलकलङ्कं लुम्पते पापपङ्कं
सुकृतमुपचिनोति श्लाघ्यतामातनोति ।
नमयति सुरवर्गं हन्ति दुर्गोपसर्गं
रचयति शुचि शीलं स्वर्गमोक्षौ सलीलम् ॥ ३९ ॥

---

१. 'क्लिष्टाशयोद्दीपनम्' ख. २. 'कामार्तस्त्यजति प्रमोदयमिदाशर्मा परस्त्रीं न यः' इति क-पुस्तके चतुर्थः पादः. ३. गच्छति.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोयत्यग्निरपि स्रजत्यहिरपि व्याघ्रोऽपि सारङ्गति
व्यालोऽप्यश्वति पर्वतोऽप्युपलति क्ष्वेडोऽपि पीयूषति ।
विघ्नोऽप्युत्सवति प्रियत्यरिरपि क्रीडातडागत्यपां-
नाथोऽपि स्वगृहत्यटव्यपि नृणां शीलप्रभावाद्ध्रुवम् ॥ ४० ॥

अथ परिग्रहप्रक्रमः ।

कालुष्यं जनयञ्जडस्य[1] रचयन्धर्मद्रुमोन्मूलनं
क्लिश्नन्नीतिकृपाक्षमाकमलिनीं लोभाम्बुधिं वर्धयन् ।
मर्यादातटमुद्रुजञ्शुभमनोहंसप्रवासं दिश-
न्किं न क्लेशकरः परिग्रहनदीपूरः प्रवृद्धिं गतः ॥ ४१ ॥

कलहकलभविन्ध्यः कोपगृध्रश्मशानं
व्यसनभुजगरन्ध्रं द्वेषदस्युप्रदोषः ।
सुकृतवनदवाग्निर्मार्दवाम्भोदवायु-
र्नयनलिनतुषारोऽत्यर्थमर्थानुरागः ॥ ४२ ॥

प्रत्यर्थी प्रशमस्य मित्रमधृतेर्मोहस्य विश्रामभूः
पापानां खनिरापदां पदमसद्ध्यानस्य लीलावनम् ।
व्याक्षेपस्य निधिर्मदस्य सचिवः शोकस्य हेतुः कलेः
केलीवेश्म परिग्रहः परिहृतेर्योग्यो विविक्तात्मनाम् ॥ ४३ ॥

वह्निस्तृप्यति नेन्धनैरिह यथा नाम्भोभिरम्भोनिधि-
स्तद्वल्लोभघनो[2] घनैरपि धनैर्जन्तुर्न संतुष्यति ।
न त्वेवं मनुते विमुच्य विभवं निःशेषमन्यं भवं
यात्यात्मा तदहं मुधैव विदधाम्येनांसि भूयांसि किम् ॥ ४४ ॥

अथ क्रोधप्रक्रमः ।

यो मित्रं मधुनो विकारकरणे संत्राससंपादने
सर्पस्य प्रतिबिम्बमङ्गदहने[3] सप्तार्चिषः सोदरः ।
चैतन्यस्य निषूदने विषतरोः सब्रह्मचारी चिरं
स क्रोधः कुशलाभिलाषकुशलैर्निर्मूलमुन्मूल्यताम् ॥ ४५ ॥

---

१. जलस्य मूर्खस्य च. २. 'मोहघनो' क. ३. 'अन्यदहने' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फलति कलितश्रेयःश्रेणीप्रसूनपरम्परः
प्रशमपयसा सिक्तो मुक्तिं तपश्चरणद्रुमः ।
यदि पुनरसौ प्रत्यासत्तिं प्रकोपहविर्भुजो
भजति लभते भस्मीभावं तदा विफलोदयः ॥ ४६ ॥

संतापं तनुते भिनत्ति विनयं सौहार्दमुत्सादय-
त्युद्वेगं जनयत्यवद्यवचनं सूते विधत्ते कलिम् ।
कीर्तिं कृन्तति दुर्मतिं वितरति व्याहन्ति पुण्योदयं
दत्ते यः कुगतिं स हातुमुचितो रोषः सदोषः सताम् ॥ ४७ ॥

यो धर्मं दहति द्रुमं दव इवोन्मथ्नाति नीतिं लतां
दन्तीवेन्दुकलां विधुंतुद इव क्लिश्नाति कीर्तिं नृणाम् ।
स्वार्थं वायुरिवाम्बुदं विघटयत्युल्लासयत्यापदं
तृष्णां घर्म इवोचितः कृतकृपालोपः स कोपः कथम् ॥ ४८ ॥

अथ मानप्रक्रमः ।

यस्मादाविर्भवति विततिर्दुस्तरापन्नदीनां
यस्मिञ्शिष्टाभिरुचितगुणग्रामनामापि नास्ति ।
यश्च व्याप्तं वहति वधधीधूम्यया क्रोधदावं
तं मानाद्रिं परिहर दुरारोहमौचित्यवृत्तेः ॥ ४९ ॥

शमालानं भञ्जन्विमलमतिनाडीं विघटय-
न्किरन्दुर्वाक्पांशूत्करमगणयन्नागमसृणिम् ।
भ्रमन्नुर्व्यां स्वैरं विनयवनवीथीं विदलय-
ञ्जनः कं नानर्थं जनयति मदान्धो द्विप इव ॥ ५० ॥

औचित्याचरणं विलुम्पति पयोवाहं नभस्वानिव
प्रध्वंसं विनयं नयत्यहिरिव प्राणस्पृशां जीवितम् ।
कीर्तिं कैरविणीं मतङ्गज इव प्रोन्मूलयत्यञ्जसा
मानो नीच इवोपकारनिकरं हन्ति त्रिवर्गं नृणाम् ॥ ५१ ॥

मुष्णाति यः कृतसमस्तसमीहितार्थं
संजीवनं विनयजीवितमङ्गभाजाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जात्यादिमानविषजं विषमं विकारं
तं मार्दवामृतरसेन नयस्व शान्तिम् ॥ ५२ ॥

अथ मायाप्रक्रमः ।

कुशलजननवन्ध्यां सत्यसूर्यास्तसंध्यां
कुगतियुवतिमालां मोहमातङ्गशालाम् ।
शमकमलहिमानीं दुर्यशोराजधानीं
व्यसनशतसहायां दूरतो मुञ्च मायाम् ॥ ५३ ॥

विधाय मायां विविधैरुपायैः परस्य ये वञ्चनमाचरन्ति ।
ते वञ्चयन्ति त्रिदिवापवर्गसुखान्महामोहसखाः स्वमेव ॥ ५४ ॥

मायामविश्वासविलासमन्दिरं दुराशयो यः कुरुते धनाशया ।
सोऽनर्थसार्थं न पतन्तमीक्षते यथा विडालो लगुडं पयः पिबन् ॥ ५५ ॥

मुग्धप्रतारणपरायणमुज्जिहीते
यत्पाटवं कपटलम्पटचित्तवृत्तेः ।
जीर्यत्युपप्लवमवश्यमिहाप्यकृत्वा
नापथ्यभोजनमिवामयमायतौ तत् ॥ ५६ ॥

अथ लोभप्रक्रमः ।

यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते ।
सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसंचरं
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ॥ ५७ ॥

मूलं मोहविषद्रुमस्य सुकृताम्भोराशिकुम्भोद्भवः
क्रोधाग्नेररणिः प्रतापतरणिप्रच्छादने तोयदः ।
क्रीडासद्मकलेर्विवेकशशिनः स्वर्भानुरापन्नदी-
सिन्धुः कीर्तिलताकलापकलभो लोभः पराभूयताम् ॥ ५८ ॥

निःशेषधर्मवनदाहविजृम्भमाणे
दुःखौघभस्मनि विसर्पदकीर्तिधूमे ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाढं धनेन्धनसमागमदीप्यमाने
लोभानले शलभतां लभते गुणौघः ॥ ५९ ॥

जातः कल्पतरुः पुरः सुरगवी तेषां प्रविष्टा गृहे
चिन्तारत्नमुपस्थितं करतले प्राप्तो निधिः संनिधिम् ।
विश्वं वश्यमवश्यमेव सुलभाः स्वर्गापवर्गश्रियो
ये संतोषमशेषदोषदहनध्वंसाम्बुदं बिभ्रते ॥ ६० ॥

अथ सुजनप्रक्रमः ।

वरं क्षिप्तः पाणिः कुपितफणिनो वक्रकुहरे
वरं झम्पापातो ज्वलदलनकुण्डे विरचितः ।
वरं प्रासप्रान्तः सपदि जठरान्तर्विनिहितो
न जन्यं दौर्जन्यं तदपि विपदां सद्म विदुषा ॥ ६१ ॥

सौजन्यमेव विदधाति यशश्चयं च
स्वश्रेयसं च विभवं च भवक्षयं च ।
दौर्जन्यमावहसि यत्कुमते तदर्थं
धान्येऽनलं क्षिपसि तज्जलसेकसाध्ये ॥ ६२ ॥

वरं विभववन्ध्यता सुजनभावभाजां नृणा-
मसाधुचरितार्जिता न पुनरूर्जिताः संपदः ।
कृशत्वमपि शोभते सहजमायतौ सुन्दरं
विपाकविरसा न तु श्वयथुसंभवा स्थूलता ॥ ६३ ॥

न ब्रूते परदूषणं परगुणं वक्त्यल्पमप्यन्वहं
संतोषं वहते परर्द्धिषु पराबाधासु धत्ते शुचम् ।
स्वश्लाघां न करोति नोज्झति नयं नौचित्यमुल्लङ्घय-
त्युक्तोऽप्यप्रियमक्षमां न रचयत्येतच्चरित्रं सताम् ॥ ६४ ॥

अथ गुणिसङ्गप्रक्रमः ।

धर्मं ध्वस्तदयो यशश्च्युतनयो वित्तं प्रमत्तः पुमा-
न्काव्यं निष्प्रतिभस्तपः शमदमैः[1] शून्योऽल्पमेधः श्रुतं ।

---

१ 'शमदयाशून्यो' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्त्वालोकमलोचनश्चलमना ध्यानं च वाञ्छत्यसौ
यः सङ्गं गुणिनां विमुच्य विमतिः कल्याणमाकाङ्क्षति ॥ ६५ ॥
हरति कुमतिं भिन्ते मोहं करोति विवेकितां
वितरति रतिं सूते नीतिं तनोति विनीतताम् ।
प्रथयति यशो धत्ते धर्मं व्यपोहति दुर्गतिं
जनयति नृणां किं नाभीष्टं गुणोत्तमसंगमः ॥ ६६ ॥
लब्धुं बुद्धिकलापमापदमपाकर्तुं[1] विहर्तुं पथि
प्राप्तुं कीर्तिमसाधुतां विधुवितुं धर्मं समासेवितुम् ।
रोद्धुं पापविपाकमाकलयितुं स्वर्गापवर्गश्रियं
चेत्त्वं चित्त समीहसे गुणवतां सङ्गं तदङ्गीकुरु ॥ ६७ ॥
हिमति महिमाम्भोजे चण्डानिलत्युदयाम्बुदे
द्विरदति दयारामे[2] क्षेमक्षमाभृति वज्रति ।
समिधति कुमत्यग्नौ कन्दत्यनीतिलतासु यः
किमभिलषतां श्रेयः श्रेयान्स[3] निर्गुणि संगमः ॥ ६८ ॥

अथेन्द्रियप्रक्रमः ।

आत्मानं कुपथेन निर्गमयितुं यः सूकलाश्वायते[4]
कृत्याकृत्यविवेकजीवितहृतौ यः कृष्णसर्पायते ।
यः पुण्यद्रुमखण्डखण्डनविधौ स्फूर्जत्कुठारायते
तं लुप्तव्रतमुद्रमिन्द्रियगणं[5] जित्वा शुभंयुर्भव ॥ ६९ ॥
प्रतिष्ठां यन्निष्ठां नयति नयनिष्ठां विघटय-
त्यकृत्येष्वाधत्ते मतिमतपसि प्रेम तनुते ।
विवेकस्योत्सेकं विदलयति दत्ते च विपदं
पदं तद्दोषाणां करणनिकुरुम्बं कुरु वशे ॥ ७० ॥
धत्तां मौनमगारमुज्झतु विधिप्रागल्भ्यमभ्यस्यता-
मस्त्वन्तर्वणमा[6]गमश्रममुपादत्तां तपस्तप्यताम् ।

१. 'अपाहर्तुं' ख. २. 'दमारामे' ख. ३. 'श्रेयः' क-ख. ४. 'शूकल' क. 'सूकलाश्वायते दुर्विनीततुरंग इवाचरति' इति टीका. ५. इन्द्रियसमूहम्. ६. वने तिष्ठतु.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेयःपुञ्जनिकुञ्जभञ्जनमहावातं न चेदिन्द्रिय-
व्रातं जेतुमवैति भस्मनि हुतं जानीत सर्वं ततः ॥ ७१ ॥

धर्मध्वंसधुरीणम[1]भ्रमरसावारीणमापत्प्रथा-
लंकर्मीणमशर्मनिर्मितिकलापारीणमेकान्ततः ।
स[2]र्वान्नीनमनात्मनीनम[3]नयात्यन्तीनमिष्टे[4] यथा-
कामीनं कु[5]पथाध्वनीनमजयन्नक्षौघमक्षेमभाक् ॥ ७२ ॥

अथ लक्ष्मीस्वभावप्रक्रमः ।

निम्नं गच्छति निम्नगेव नितरां निद्रेव वि[6]ष्कम्भते
चैतन्यं मदिरेव पुष्यति मदं धूम्येव धत्तेऽन्धताम् ।
चापल्यं चपलेव चुम्बति दवज्वालेव तृष्णां नय-
त्युल्लासं कुलटाङ्गनेव कमला स्वैरं परिभ्राम्यति ॥ ७३ ॥

दायादाः स्पृहयन्ति तस्करगणा मुष्णन्ति भूमीभुजो
गृह्णन्ति च्छलमाकलय्य हुतभुग्भस्मीकरोति क्षणात् ।
अम्भः प्लावयते क्षितौ विनिहितं यक्षा हरन्ते हठा-
द्दुर्वृत्तास्तनया नयन्ति निधनं धिग्बह्वधीनं धनम् ॥ ७४ ॥

नीचस्यापि चिरं चटूनि रचयन्त्यायान्ति नीचैर्नतिं
शत्रोरप्यगुणात्मनोऽपि विदधत्युच्चैर्गुणोत्कीर्तनम् ।
निर्वेदं न विदन्ति किंचिदकृतज्ञस्यापि सेवाक्रमे
कष्टं किं न मनस्विनोऽपि मनुजाः कुर्वन्ति वित्तार्थिनः ॥७५॥

लक्ष्मीः सर्पति नीचमर्णवपयःसङ्गादिवाम्भोजिनी-
संसर्गादिव कण्टकाकुलपदा न क्वापि धत्ते प[7]दम् ।
चैतन्यं विषसंनिधेरिव नृणामुज्जासयत्यञ्जसा
धर्मस्थाननियोजनेन गुणिभिर्ग्राह्यं तदस्याः फलम् ॥ ७६ ॥

---

१. 'शान्तरसाच्छादनम्' इति टीका. २. 'सर्वभक्षकम्' इति टीका. ३. 'अनयेऽत्यन्तगामिनं' इति टीका. ४. 'इष्टे वस्तुनि यथाकामीनं यथाभिलाषिणम्' इति टीका. ५. 'कुमत' क. ६. 'विनाशयति' इति टीका. ७. रतिम्' क.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ दानप्रक्रमः ।

चारित्रं चिनुते तनोति विनयं ज्ञानं नयत्युन्नतिं
पुष्णाति प्रशमं तपः प्रबलयत्युल्लासयत्यागमम् ।
पुण्यं कन्दलयत्यघं दलयति स्वर्गं ददाति क्रमा-
न्निर्वाणश्रियमातनोति निहितं पात्रे पवित्रं धनम् ॥ ७७ ॥

दारिद्र्यं न तमीक्षते न भजते दौर्गत्यमालम्बते
नाकीर्तिर्न पराभवोऽभिलषते न व्याधिरास्कन्दति ।
दैन्यं नाद्रियते दुनोति न दरः क्लिश्नन्ति नैवापदः
पात्रे यो वितरत्यनर्थदलनं दानं निदानं श्रियाम् ॥ ७८ ॥

लक्ष्मीः कामयते मतिर्मृगयते कीर्तिस्तमालोकते
प्रीतिश्चुम्बति सेवते सुभगता नीरोगतालिङ्गति ।
श्रेयःसंहतिरभ्युपैति वृणुते स्वर्गोपभोगस्थिति-
र्मुक्तिर्वाञ्छति यः प्रयच्छति पुमान्पुण्यार्थमर्थं निजम् ॥ ७९ ॥

तस्यासन्ना रतिरनुचरी कीर्तिरुत्कण्ठिता श्रीः
स्निग्धा बुद्धिः परिचयपरा चक्रवर्तित्वऋद्धिः ।
पाणौ प्राप्ता त्रिदिवकमला कामुकी मुक्तिसंप-
त्सप्तक्षेत्र्यां (?) वपति विपुलं वित्तबीजं निजं यः ॥ ८० ॥

अथ तपःप्रक्रमः ।

यत्पूर्वार्जितकर्मशैलकुलिशं यत्कामदावानल-
ज्वालाजालजलं यदुग्रकरणग्रामाहिमन्त्राक्षरम् ।
यत्प्रत्यूहतमःसमूहदिवसं यल्लब्धिलक्ष्मीलता-
मूलं तद्द्विविधं यथाविधि तपः कुर्वीत वीतस्पृहः ॥ ८१ ॥

यस्माद्विघ्नपरम्परा विघटते दास्यं सुराः कुर्वते
कामः शाम्यति दाम्यतीन्द्रियगणः कल्याणमुत्सर्पति ।
उन्मीलन्ति महर्द्धयः कलयति ध्वंसं चयः कर्मणां
स्वाधीनं त्रिदिवं शिवं च भवति श्लाघ्यं तपस्तन्न किम् ॥ ८२ ॥

---

१. 'धिनोति' ख. २. 'पवित्रे' ख.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कान्तारं न यथेतरो ज्वलयितुं दक्षो दवाग्निं विना
दावाग्निं न यथापरः शमयितुं शक्तो विनाम्भोधरम् ।
निष्णातः पवनं विना निरसितुं नान्यो यथाम्भोधरं
कर्मौघं तपसा विना किमपरो[1] हन्तुं समर्थस्तथा ॥ ८३ ॥

संतोषस्थूलमूलः प्रशमपरिकरस्कन्धबन्धप्रपञ्चः
पञ्चाक्षीरोधशाखः[2] स्फुरदभयदलः शीलसंपत्प्रवालः ।
श्रद्धाम्भःपूरसेकाद्विपुलकुलबलैश्वर्यसौन्दर्यभोगः[3]
स्वर्गादिप्राप्तिपुष्पः शिवपदफलदः स्यात्तपःकल्पवृक्षः[4] ॥ ८४ ॥

अथ भावनाप्रक्रमः ।

नीरागे तरुणीकटाक्षितमिव त्यागव्यपेतप्रभोः
सेवाकष्टमिवोपरोपणमिवाम्भोजन्मनामश्मनि ।
विष्वग्वर्षमिवोषरक्षितितले दानार्हदर्चातपः-
स्वाध्यायाध्ययनादि निष्फलमनुष्ठानं विना भावनाम् ॥ ८५ ॥

सर्वं ज्ञीप्सति पुण्यमीप्सति दयां धित्सत्यघं भित्सति[5]
क्रोधं दित्सति[6] दानशीलतपसां साफल्यमादित्सति ।
कल्याणोपचयं चिकीर्षति भवाम्भोधेस्तटं लिप्सते
मुक्तिस्त्रीं परिरिप्सते यदि जनस्तद्भावयेद्भावनाम् ॥ ८६ ॥

विवेकवनसारिणीं प्रशमशर्मसंजीवनीं
भवार्णवमहातरीं मदनदावमेघावलीम् ।
चलाक्षमृगवागुरां गुरुकषायशैलाशनिं
विमुक्तिपथवेसरीं[7] भजत भावनां किं परैः ॥ ८७ ॥

घनं दत्तं वित्तं जिनवचनमभ्यस्तमखिलं
क्रियाकाण्डं चण्डं रचितमवनौ सुप्तमसकृत् ।

---

१. 'अपरं हर्तुं समर्थ' ख-ग. २. पञ्चेन्द्रियाणि पञ्चाक्षी. ३. 'निस्तारभोगः' ग. ४. 'तपःपादपोऽयम्' क-ग. ५. 'मित्सति' क-ग. ६. 'खण्डयितुमिच्छति' इति टीका. ७. मार्गोपयुक्तामश्वतरीम्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तपस्तीव्रं तप्तं चरणमपि चीर्णं चिरतरं
न चेच्चित्ते भावस्तुषवपनवत्सर्वमफलम् ॥ ८८ ॥

अथ वैराग्यप्रक्रमः ।

यदशुभरजःपाथो दृप्तेन्द्रियद्विरदाङ्कुशं
कुशलकुसुमोद्यानं माद्यन्मनःकरिशृङ्खला ।
विरतिरमणीलीलावेश्म स्मरज्वरभेषजं
शिवपथरथस्तद्वैराग्यं विमृश्य भवाभयः ॥ ८९ ॥

चण्डानिलः स्फुरितमब्दचयं दवार्चि-
र्वृक्षव्रजं तिमिरमण्डलमर्कबिम्बम् ।
वज्रं महीध्रनिवहं नयते यथान्तं
वैराग्यमेकमपि कर्म तथा समग्रम् ॥ ९० ॥

नमस्या देवानां चरणवरिवस्या शुभगुरो-
स्तपस्या निःसीमक्रमपदमुपास्या गुणवताम् ।
निषद्यारण्ये स्यात्करणदमविद्या च शिवदा
विरागः क्रूरागःक्षपणनिपुणोऽन्तः स्फुरति चेत् ॥ ९१ ॥

भोगान्कृष्णभुजंगभोगविषमान्राज्यं रजःसंनिभं
बन्धून्बन्धनिबन्धनानि विषयग्रामं विषान्नोपमम् ।
भूतिं भूतिसहोदरां तृणतुलं स्त्रैणं विदित्वा त्यजं-
स्तेष्वासक्तिमनाविलो विलभते मुक्तिं विरक्तः पुमान् ॥ ९२ ॥

---

जिनेन्द्रपूजा गुरुपर्युपास्तिः सत्त्वानुकम्पा शुभपात्रदानम् ।
गुणानुरागः श्रुतिरागमस्य नृजन्मवृक्षस्य फलान्यमूनि ॥ ९३ ॥

त्रिसंध्यं देवार्चां विरचय चयं प्रापय यशः
श्रियः पात्रे वापं जनय नयमार्गे नय मनः ।
स्मरक्रोधाद्यारीन्दलय कलय प्राणिषु दयां
जिनोक्तं सिद्धान्तं शृणु वृणु जवान्मुक्तिकमलाम् ॥ ९४ ॥

---

१. 'चारित्रं' इति टीका.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत्वार्हत्पदपूजनं यतिजनं नत्वा विदित्वागमं
हित्वा सङ्गमधर्मकर्मठधियां पात्रेषु दत्त्वा धनम् ।
गत्वा पद्धतिमुत्तमक्रमजुषां जित्वान्तरारिव्रजं
स्मृत्वा पञ्चनमस्क्रियां[1] कुरु करक्रोडस्थमिष्टं सुखम् ॥ ९५ ॥

प्रसरति यथा कीर्तिर्दिक्षु क्षपाकरसोदरा-
भ्युदयजननी याति स्फीतिं यथा गुणसंततिः ।
कलयति यथा वृद्धिं धर्मः कुकर्महतिक्षमः
सुलभकुशले[2] न्याय्ये कार्ये तथा पथि वर्तनम् ॥ ९६ ॥[3]

भवारण्यं मुक्त्वा[4] यदि जिगमिषुर्मुक्तिनगरीं
तदानीं मा कार्षीर्विषयविषवृक्षेषु वसतिम् ।
यतश्छायाप्येषां प्रथयति महामोहमचिरा-
दयं जन्तुर्यस्मात्पदमपि न गन्तुं प्रभवति ॥ ९७ ॥

सोमप्रभाचार्यमभा[5] च लोके वस्तु प्रकाशं कुरुते यथाशु ।
तथायमुच्चैरुपदेशलेशः शुभोत्सवज्ञानगुणांस्तनोति ॥ ९८ ॥

[6]अभजदजितदेवाचार्यपट्टोदयाद्रि-
द्युमणिविजयसिंहाचार्यपादारविन्दे ।
मधुकरसमतां यस्तेन सोमप्रभेण
व्यरचि मुनिप[7]नेत्रा सूक्तिमुक्तावलीयम् ॥ ९९ ॥

इति श्रीसोमप्रभाचार्यविरचिता सिन्दूरप्रकरापरपर्याया सूक्तिमुक्तावली ।

---

१. जिनमतप्रसिद्धां पञ्चपरमेष्ठिनमस्कृतिम्. २. 'कुशलसुलभे' क-ख. ३. एतच्छ्लोकानन्तरं क-पुस्तके 'करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमनं मुखे सत्या वाणी श्रुतमधिगतं च श्रवणयोः । हृदि स्वच्छा वृत्तिर्विजयि भुजयोः पौरुषमहो विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥' अयं श्लोकोऽधिकः. ४. 'विमुच्यैनं दूरे भव जनमनः शर्मसदनम्' ख. ५. 'सोमप्रभाचार्यमभा च यन्न पुंसां तमःपङ्कमपाकरोति । तदप्यमुष्मिन्नुपदेशलेशे निशम्यमानेऽनिशमेति नाशम् ॥' अयं क-पुस्तकपाठः शृङ्गारवैराग्यतरङ्गिणीधृतपाठसमानः. अत्र ग्रन्थकर्त्रा सोमप्रभाचार्य इति स्वकीयं नाम युक्त्या निवेशितम्. ६. अयं श्लोकः ख-ग-पुस्तकयोर्नास्ति. ७. मुनीन्द्रनायकेन.

For Private and Personal Use Only

## श्रीजम्बूगुरुविरचितं

# जिनशतकम्[1] ।

श्रीमद्भिः स्वैर्महोभि[2]र्भुवनमविभुवत्तापयत्येष शश्व-
त्तत्स्वप्यसादृशेषु प्रभुषु किमिति [3]सन्मन्युनेवोपरक्ताः ।
सूर्यं वीर्या[4]द्दुर्हार्यादभिभवितुमिवाभीशवो यस्य दीप्राः
प्रोत्सर्पन्त्यङ्घ्रियुग्मप्रभवनखभुवः स श्रिये स्ताज्जिनो वः ॥ १ ॥

[5]संसारापारनीरेश्वरगुरुनिरयाशर्मपङ्कौघमग्ना-
नुद्धर्तुं सत्त्वसार्थानिव [6]नखजमृजाजीर्णरज्जूर्यदीयाः ।
पादाः [7]प्रासीसरन्तः प्रकटितकरुणाः प्रार्थितार्थान्समर्था
भर्तुं[8] तीर्थाधिपोऽसौ पृथुदवथुपथप्रस्थितिं वो रुणद्धु ॥ २ ॥

प्रोद्यद्दीप्रप्रभाढ्यक्रमनखमुकुरक्रोडसंक्रान्तबिम्बं
वक्त्रं वृत्तस्य शत्रुः स्वकमधिकरुचिं बिभ्रदभ्रान्तचेताः ।
पश्यञ्शीतांशुकान्तं प्रणतिकरणतो न व्यरंसीत्प्रमोदा-
द्यस्यासौ श्रीजिनेन्द्रो द्रुतमतनुतमस्तानवं वस्तनोतु ॥ ३ ॥

मार्तण्डश्चण्डभावं दधदहनि हिनस्त्यस्तदोषोऽपि पादै-
र्बध्नात्यह्नाय रात्रौ पुनरलिपटलैरारटन्तीं रटद्भिः ।
मा[9]मम्भोजन्मधाम्नि स्थिततनुलतिकामेवमालोच्य लक्ष्मी-
रुद्विग्नै[10]र्वापविघ्नं [11]क्रमकजमगमद्यस्य सोऽव्याज्जिनो वः ॥ ४ ॥

---

१. शतकस्यास्यैकं सटीकं मनोहरमपर्युषितं नातिशुद्धं चाष्टादशपत्रात्मकं पुस्तकं श्रीशान्तिविजयमुनिभिरस्मभ्यं दत्तम्. तत्र नागेन्द्रकुलोद्भूतसाम्बमुनिप्रणीता समीचीना टीका वर्तते. स च साम्बष्टीकासमाप्तौ 'शरदां सपञ्चविंशे शतदशके (१०२५) स्वातिभे च रविवारे । विवरणमिदं समाप्तं वैशाखसितत्रयोदश्याम् ॥' इत्थमात्मनो ग्रन्थनिर्माणसमयं वदति. द्वितीयं तु मूलमात्रं शुद्धं पत्रचतुष्टयात्मकं प्राचीनं पुस्तकं जोधपुरनगरपाठशालाध्यापकपण्डितरामकर्णशर्मभिः प्रहितम्. टीकामुद्रणं तु पुस्तकान्तराभावाद्दुष्करमिति मत्वा ततः संक्षिप्तमुपयोगिटिप्पणमात्रमेवात्रोद्धृतम्. २. अस्वामिकमिव. ३. सन्नुत्पद्यमानश्चासौ मन्युस्तेन. ४. हर्तुमशक्यात्. ५. अपारसंसारसमुद्र एव महानरकदुःखं तदेव पङ्कौघस्तत्र मग्नान्. ६. नखोत्पन्ना दीप्तय एवाजीर्णा नवा रज्जवः. ७. प्रसारितवन्तः. ८. शीघ्रम्. ९. कमलरूपगृहे. १०. निरुपद्रवं यथा स्यात्. ११. चरणकमलम्.

निर्विघ्नान्विघ्ननिघ्नानतिघनघृणया श्लाघ्यघोषानघोषा-
न्घोराघौघैर्[1]अनुद्धापघनसुघटिताञ्शीघ्र[2]मुद्धाङ्घ्रिपाणीन् ।
[3]अर्घोपघ्नान[4]नर्घान्घटयति लघिमालिङ्गितान्वोऽलघिष्ठा-
ञ्श्लाघ्यं यस्याङ्घ्रियुग्मं विघटयतु घनं सोऽघसंघातमर्हन् ॥ ५ ॥
रक्तस्त्यक्तस्मरोऽपि [5]प्रतिभयभयकृन्निर्भयत्वप्रदोऽपि
[6]प्रायश्चित्तग्रहीता सततनिरतिचारोऽपि यत्पादपद्मः ।
वैकुण्ठाभ्यर्चितोऽपि प्रकट[7]मपचितः पण्डितैः खण्डितांहा-
स्तन्यादन्याय्यवृत्तिव्यपगमगुरुतां वः स [8]निर्ग्रन्थनाथः ॥ ६ ॥
स्वान्तारण्यं शरण्याश्रयणमिति यदध्यास्त विध्वस्तशङ्क-
स्तद्धर्मध्यानधूमध्वजजवजनितात्यन्तसंतापतप्तम् ।
संत्यज्यासह्यदाहादिव [9]चरणसरोऽशिश्रियत्सत्सरोजं
यस्यातिप्रौढरागद्विरद उरुरजः सोऽस्यतात्तीर्थपो वः ॥ ७ ॥
जङ्घोद्यत्स्कन्धबुध्नोद्गतलसदरुणाभाङ्गुलीपल्लवाढ्या-
न्प्रेङ्खन्तीभिर्नखार्चिर्निचयरुचिरसन्मञ्जरीभिर्युतान्वः ।
प्रेक्ष्य प्राप्तेप्सितार्थैर्भुवि [10]बलवदवाक्कल्पवृक्षाः किमेवं
विद्वद्भिः शङ्क्यते[11]ऽङ्घ्रीनतुलफलयुजो यस्य सोऽर्हन्मुदेऽस्तु ॥ ८ ॥
क्षोणीं क्षान्त्या क्षिपन्तः क्षणिकरतिकरस्त्रीकटाक्षाक्षताक्षा
मोक्षक्षेत्राभिकाङ्क्षाः क्षपितशुभशताक्षेमविक्षेपदक्षाः ।

---

१. अनुद्धा अप्रशस्ता अपघना अङ्गानि. २. प्रशस्तहस्तपादान्. ३. अर्घेण पूजया आश्रितान्. ४. पूजारहितान्. ५. भयानकभयकर्ता. भयानकभयं कृन्ततीति विरोधपरिहारः. ६. सततं निरन्तरं गृहीतस्य व्रतस्यैकदेशतो भङ्गोऽतिचारः. स निर्गतो यस्मात्सोऽपि प्रायश्चित्तग्रहीतेति विरोधः. प्रायो बाहुल्येन चित्तस्य ग्रहीता आवर्जकः सततं निरतिचारश्चानतिक्रमणीयश्चेति परिहारः. ७. अपचितोऽपचयं नीत इति विरोधः. अपचितः पूजित इति परिहारः. ८. निर्ग्रन्थास्तपस्विनस्तेषां नाथो जिनः. ९. चरणयोः कमलरूपाणि लाञ्छनानि भवन्ति. यस्य हृदयं वीतरागं चरणौ च सरागाविति तात्पर्यम्. १०. बलवदत्यर्थमवाञ्चोऽधोमुखाः कल्पवृक्षाः. ११. पूजायां बहुवचनम्.

अक्षोभाः क्षीणरूक्षाक्षरपटुवचना भिक्षवो[1] मङ्क्ष्वलक्ष्मीं
साक्षाद्वीक्ष्य क्षिपन्ति क्षपयतु स जिनः क्षय्यपक्षं यदङ्घ्री ॥ ९ ॥
तन्वाना वैनतेय[2]श्रियमहित[3]वृषोत्कर्षमोषिप्रतापाः
कामं कौमोदकीना[4]शरणशरणदा नीरजो[5]दारगाः ।
सद्यः प्रद्युम्न[6]युक्ताः सदसि[7]कृतमुदो यत्क्रमा[8]श्चक्रिणो वा
भ्राजन्ते भ्राजिताशाः[9] सुखमखिलमसौ श्रीजिनो वो विधेयात् ॥ १० ॥
यत्पादौ पादपौ वा शुचिरुचिनिचिताम्भोजपुञ्जालवालौ
स्वःसन्मूर्धाधिरूढोद्भटमुकुटकुटै[10]र्निर्यदंशूदभारैः ।
संसिक्तौ शोणरत्नप्रतिमनखरुचः सत्प्रवालावलीव-
द्धत्तः शुद्धिं विधेयादधिकमधिपतिः श्रीजिनानामसौ वः ॥ ११ ॥
द्यां द्युत्योद्द्योत्य मुद्यद्[11]द्युसदधिपमता विद्युदुद्द्योतजेत्र्या-
विद्योनद्याद्य[12]सद्योनय उपदधते संयमोद्यान[13]मोदम् ।
दुर्भेद्यावद्यमुद्यद्द्युमणिमिव समाच्छाद्य वन्द्याभिवन्द्याः
सद्यो यत्पादकंदा[14] द्यतु स जिनपतिर्वोऽतिनिन्द्यामविद्याम् ॥ १२ ॥
निर्वाणापूर्वदेशप्रगमकृतधियां शुद्धबुद्ध्यध्वगानां
मार्गाचिख्यासयैषा त्रिभुवनविभुना प्रेषिता किं नु लोकैः ।
आलोक्यारेकि[15]तैवं चरणनखभवा वो विर्भावि[16]र्भवन्ती
यस्य श्रेयांसि स श्रीजिनपतिरपतिः पाप्मभाजां विदध्यात् ॥ १३ ॥

---

१. भिक्षवो यतयो यदङ्घ्री साक्षाद्वीक्ष्य मङ्क्षु शीघ्रमलक्ष्मीं क्षिपन्ति स जिनः क्षय्यपक्षं शत्रुपक्षं क्षपयतु. २. वै निश्चयेन नते प्राणिनि अयश्रियं शुभावहविधिसंपत्तिम्; (पक्षे) वैनतेयो गरुडः. ३. अहितो विरुद्धो यो वृषो धर्मः; (पक्षे) वृषोऽरिष्टासुरः. ४. कौ भूमौ मोदस्य कीनाशो नाशको यो रणस्तत्र शरणदाः; (पक्षे) कौमोदकी गदा तस्या इनाः प्रभवोऽशरणशरणदाश्च. ५. नीरजेष्विवोदारो रागो येषु; (पक्षे) नीरजः शङ्खः. ६. प्रकृष्टं द्युम्नं तेजः; (पक्षे) प्रद्युम्नो वासुदेवपुत्रः. ७. सदसि सभायाम्; (पक्षे) संश्वासावसिः खड्गो नन्दकस्तेन कृता मुद्येषाम्. ८. क्रमाः पादा वासुदेवा इव. ९. पूरितमनोरथाः. १०. कुटो घटः. ११. मुदं यन्गच्छन्. १२. विद्यैव नदी तस्या आद्याः सद्योनयः शोभनान्युत्पत्तिस्थानानि. १३. संश्चासौ यमश्च (नियमसहचरः) स एवोद्यानं तस्य मोदं पुष्टिलक्षणम्. १४. कं जलं ददतीति कंदा मेघाः. पादा एव कंदाः. कमित्यव्ययं जलवाचकम्. १५. आरेकिता उत्प्रेक्षिता. १६. आविर्भवन्ती ऊर्ध्वं गच्छन्ती.

शोभामम्भोरुहाणामपहरति करोत्युद्धवं कौशिकस्या-
नुष्णैः पुष्णाति पादैः कुमुदमसुमतां नोपतापाय दृष्टेः ।
प्राज्याजेयप्रतापं सततमिनतया युक्तमप्यन्यरूपं
युग्मं यत्पादयोः स्तात्स भवदविभवाभावकृत्तीर्थनाथः ॥ १४ ॥

दूरे दूरेपसो वो वसतिमसुभृतां साधयन्तौ धयन्तौ
वारी वारीतिमङ्क्षी नतसुरमहादेवराजौ वराजौ ।
यस्यायस्याप्तिहेतू जयमुपनयतो मोहितानां हितानां
दध्यार्दध्यामतेजाः स भुवि जिनवरोऽनन्तमोदं तमोदम् ॥ १५ ॥

कृत्वाधः पादयोर्मा निरतिशयशमश्रीसमालिङ्गिताङ्गः
स्वस्थस्तिष्ठत्यनिष्ठः कथमयमधुनेतीव संचिन्त्य सृष्टा ।
ऊर्ध्वं बाणाशनिर्वा मृदुहृदयभिदे भाति रागेण गाढं
यस्य प्रेङ्खन्नखालीद्युतिरतनुरतिं रातु स श्रीजिनो वः ॥ १६ ॥

चार्वाचारोक्तिचुञ्चुप्रवचनचतुराचार्यचक्रस्य चञ्च-
न्नो[12] च्येताचण्डरोचीरुचिरुचिररुचिर्यस्य वाचां प्रपञ्चैः ।
उच्चैश्चञ्चूर्यमाणश्चरणगुणचयश्चा[13]रुचित्तार्चितार्च-
श्चेतःशौचं चिनोतूचितमचलमसौ चारुचेष्टो जिनो वः ॥ १७ ॥

पद्भ्यां भूभृद्गुरुभ्यां भ्रमति भृशमभीभ्रंशयन्हेलयायं
कोऽस्मन्मूर्धोद्धृतां गामिति फणिसमितेः सक्रुधः क्रोधवह्नेः ।
ज्वाला निर्यान्त्यधस्तात्किमिति सुजनता शङ्कते लोकयन्ती
भव्यानव्याद्भयेभ्यो निखिलनखरुचो यस्य योगीश्वरोऽसौ ॥ १८ ॥

---

१. इन्द्रस्योलूकस्य च. २. कोः पृथिव्या मुदम्. ३. सूर्यत्वेन प्रभुत्वेन च. ४. दुष्टं च तद्रेपः पापं तस्माद्दूरे स्थानेऽसुमतां वसतिं साधयन्तौ. स्वर्गप्रदावित्यर्थः. ५. वारीव जलमिव अरीतिं शत्रूपद्रवं धयन्तौ पिबन्तौ. नाशयन्तावित्यर्थः. ६. श्रेष्ठयुद्धे मोहितानां हितानां भक्तानां जयमुपनयतः. ७. यस्याङ्घ्री आयस्य लाभस्याप्तिहेतू. ८. अकृशतेजाः. ९. ऊर्ध्वं क्षिप्ता. १०. बाणावलीव. ११. कामेन. १२. यस्य चरणगुणचयो नोच्येत वक्तुं न शक्येत. अतिप्राचुर्यात्. १३. चारुचित्तैरिन्द्रादिभिरर्चिता अर्चा मूर्तिर्यस्य स जिनः. १४. पातालमुद्भिद्य.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रख्याताद्च्युतश्रीवरवसतितया शेषकान्त्योपगूढा-
त्सन्मीनात्क्षीरनीरेश्वरत इव यदङ्घ्र्योर्युगान्निर्गता भा।
वेलेव प्लावयन्ती नखमणिकिरणोन्मिश्रिता श्रीमदब्ज-
श्रेणीं विश्वंभरावद्भवदनभिमतं तीर्थपोऽसौ भिनत्तु ॥ १९ ॥
मा पप्तत्तप्यभावात्कलिकलिलभराक्रान्तमत्यन्तमेत-
त्पातालापारपङ्के त्रिभुवनभवनं द्रागितीवावधार्य।
त्वष्ट्रावष्टम्भनार्थं प्रचुरभरसहौ निर्मिमाते यदङ्घ्री
वज्रस्तम्भाविवासौ निखिलसुखखनीर्वो विधत्तां यतीन्द्रः ॥ २० ॥
दुर्गे स्वर्गापवर्गाध्वनि सदरितया स्यन्दनः सस्यदाग-
स्तिग्मांशूत्तप्तजन्तून्प्रति वरविटपी छायया संयुतत्वात्।
सद्भूत्याहूतिमन्त्रः सति धननिधने व्यक्तवर्णत्वतो वः
सिद्ध्यध्वन्यध्वनीनानवतु स मुनिपः पादपद्मो यदीयः ॥ २१ ॥
यत्पादैः पारिजातक्षितिरुहमहिमा हानिमानीयतेऽहि-
भ्रातृव्यायाप्ययोषाः प्रमदभरनमन्मस्तकस्रस्तदाम्नः।
द्राग्भूयो भूषयद्भिः शुचिरुचिनखरुङ्मञ्जरीकर्णपूरैः
पापाकूपारवारिप्रतरणपटुतां तीर्थकृद्वः स दध्यात् ॥ २२ ॥
सर्वोर्वीभृत्प्रबर्हप्रणतिपरशिरःश्रेणिचूडामणिद्यु-
त्संदोहालीढमूढम्रदिम नखमयूखोल्लसत्केसरालि।
वल्गवङ्गुल्यग्रपत्रं सकमलममलं पादयुग्मं यदीयं
भात्यादित्योस्रमिश्रं नलिनमिव स वोऽवद्यमर्हन्हिनस्तु ॥ २३ ॥
प्राज्यप्रौढप्रमादप्रतिभटनिधनप्राप्तदीप्रप्रतापा-
न्प्रोच्चैः प्रीतिं प्रयान्ति प्रतिकलममलान्प्राणिनः प्रेक्षमाणाः।

---

१. शेषनागस्य कान्त्या अशेषया पूर्णया कान्त्या च. २. सन्तो विद्यमाना मीना लाञ्छनरूपा यत्र. ३. क्षीरसमुद्रात्. ४. पादतलवर्तिनीं लाञ्छनरूपां पद्मपङ्क्तिं विश्वम्भरावद्भूमिवत्. ५. तपश्चरणाभावात्. ६. नरककर्दमे त्रिभुवनरूपं गृहं मा पतत्र पततु. ७. विधात्रा. ८. सचक्रयुक्ततया. ९. सह स्यदेन वेगेन यदागः पापं तदेव तिग्मांशुः. १०. अहिर्वृत्रासुरस्तस्य भ्रातृव्यः शत्रुरिन्द्रस्तस्यायाप्या अनवद्या योषाः स्त्रियोऽप्सरसः. ११. द्युत्संदोहो दीप्तिसमूहः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्ताप्रान्तप्रसादान्प्रणमदसुमतां यत्क्रमान्सत्प्रणम्या-
न्प्राणिप्राणप्रियाणि प्रवितरतु जिनः स प्रशान्तप्रयासम् ॥ २४ ॥
उज्जृम्भाम्भोजगर्भश्रितमिति परमेष्ठीयते निष्ठितार्थै
त्रैलोक्यत्रासहन्त्र्या नरकरिपुतयानन्तमूर्तीयते वः ।
सद्भूतिभ्राजितत्वाद्वृषभगतितया चाद्रिजेशायते य-
त्पादाम्भोजं स सद्यो भवतु भवभयाभोगभित्केवलीशः ॥ २५ ॥
इति श्रीजम्बूकविविरचिते जिनशतके जिनपादवर्णनं नाम प्रथमः परिच्छेदः ।

---

कोषाढ्येऽपि द्रढिम्ना विरहितमहिमन्युत्कटे कण्टकैर्मे
सक्ते व्यक्तं जडौघैः सुचिरमनुचितं सद्रजस्यत्र वस्तुम् ।
पद्मं पद्मा स्वसद्मेत्युदितविपदिव प्रोज्झ्य यत्रानुलिल्ये
छेका दानच्छलेन त्रिजगदधिपतेर्वः पुनीतात्स हस्तः ॥ १ ॥
प्रध्वस्ताशर्मधर्मप्रणयनविधये व्यापृतः प्राणिपूगा-
न्कालव्यालावलुप्तौ प्रतिसमवसृतौ भ्रान्तिमन्तस्तनोति ।
यः संहर्तुं विषार्तिं किमयमिह चलत्येवमाखण्डलस्य
ख्यातं सौख्यं स दत्तां जिनवृषभनरेन्द्रस्य पाणिर्द्रुतं वः ॥ २ ॥
भाभिर्योऽम्भोजशोभामभिभवति भृशं बिभ्रदुद्भूतभव्यं
भूषाभावं सभाया भवभवभयभिद्भूरिभीभारभाजाम् ।
भर्तुर्भद्रस्य पाणिस्त्रिभुवनभवनोद्भासनोद्भूतभूते-
र्भूयाद्भूत्यै स भूतेर्ऋभुविभुविभवाधीशभूभर्तृभाजः ॥ ३ ॥
कल्पान्तेऽनल्पभासः प्रलयमसुमतां यूयमुच्चैर्विघातं
कृत्वायुर्गोत्रनाम्नामपि कुरुत किल द्वादशैकत्वमेत्य ।
नित्यं पञ्चापि कुर्मो वयमिति हसितार्का इवोद्भान्ति भासा
प्रेङ्खन्तौ यन्नखाः स्तात्स शिवशतकरोऽर्हत्करः प्रोल्लसन्वः ॥ ४ ॥

---

१. शिष्टाशेषप्रयोजनम्. २. केवलं सर्वद्रव्यपर्यायग्राहकमप्रतिहतं ज्ञानं तद्वतामीशो जिनः. ३. चतुरा. ४. सांवत्सरिकमहादानव्याजेन. ५. जिनवृषभ एव नरेन्द्रो विषवैद्यः. ६. लक्ष्म्याः. ७. ऋभवो देवास्तद्विभुरिन्द्रः. विभवाधीशः कुबेरः. भूभर्तारो राजानः तान्भजते तस्या भूतेः. ८. जिनपक्षे प्रकृष्टो लयो मोक्षः. ९. व्याख्यायाम्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गीर्वाणैर्निर्मितोर्वीरुहबहलदलश्यामलाभीशुजालै-
जींमूतैः प्रावृषेण्यैरिव नभसि सदस्याततै यः समन्तात्।
विद्युत्पुञ्जायमानः स्फुरदरुणरुचा दृश्यते त्रैदशैर्व-
स्त्राणाय स्तात्स हस्तस्तनुरहितजितः साधु बोधोद्यतोऽद्य ॥ ५ ॥
चञ्चच्चक्रोऽप्यचक्रूष्णो विवरयुततलोऽप्यस्तरन्ध्रानुषङ्गः
सत्कार्योऽप्यस्तकृत्यो विलसितकमलोऽप्यङ्ग दोषाकरो नो।
यः सार्वज्ञः सुपर्वा शय इति महिमापीक्ष्यते नो विरोधी
वध्यात्स ध्यानवृद्धेर्निधनकरमरं वस्तु वः स्तूयमानः ॥ ६ ॥
द्वारं व्यस्तार्गलं वः परमपदपुरो दर्शयाम्येत यूयं
श्रोतॄञ्जन्तूनिवैवं गदितुमतिगुरुभ्राम्यतीतस्ततो यः।
पर्षद्युत्कर्षवत्यां प्रवचनकरणानेहसि श्रीजिनस्य
स्ताद्धस्तो वः प्रशस्तः प्रणिपतनकृतावादृतानां स वृद्ध्यै ॥ ७ ॥
वज्रिन्वज्रं समस्ति प्रकटतरमिदं मेऽपि मा गर्वितो भू-
र्यक्ष क्षिप्रं जहीहि त्वमपि निधिमदं शङ्खपद्मौ यतः स्तः।
अम्लानौ मय्यपीमाविति परिहसतीवोच्छलद्भिर्मयूखै-
र्व्याख्यायां यन्नखेभ्योऽखिलसुखकृदसावस्तु वो जैनहस्तः ॥ ८ ॥
जेताजावूर्जितौजा विजयिजविगजभ्राजि सद्वाजिराज्यां
तेजोभाजां जजौर्जाविजितजनजितां स्वौजसा दुर्जनानाम्।
योऽन्यञ्जोऽजातजाड्यो जगति जिनशयो जम्भजित्पूजितौजा
अज्यायो जन्मबीजं जयतु सरजसौर्जित्यजित्सोऽञ्जसा वः ॥ ९ ॥
भित्त्वा दोषानुषङ्गं जनवनजवनं बोधयामीद्धधाम्ना
मोत्कर्षं सूर्य कार्षीरिति मम पुरतो दर्पतो हन्त यत्तत्।

---

१. उर्वीरुहोऽत्राशोकः. २. त्रिदशसमूहैः. ३. मदनजयिनः. ४. हस्तपक्षे विवराः पक्षिश्रेष्ठा हंसादयस्तच्चिह्नाङ्कितः. ५. सत्कारार्हैः. ६. कमलो हरिणः. ७. शयो हस्तः. ८. हे कुबेर. ९. 'जजि युद्धे'। जजन्तीति जजा योधास्तेषामूर्जा बलं तेनाविजितं जनं जयन्ति ये तेषाम्. १०. न विद्यते न्यञ्ज उपतापो रोगो वा यस्य. ११. हस्तः. १२. अ-श्रेष्ठम्. १३. कर्म. १४. सह रजसा वर्तन्ते सरजसाः सरागा अज्ञानिनो मिथ्यादृष्टयस्ते-षामौर्जित्यं बलवत्त्वं जयतीति सः. १५. जनरूपकमलवनम्.

For Private and Personal Use Only

साक्षाद्दोषं[1] श्रितोऽपि श्रमणग[2]णगुरोर्बोधयेऽहं महिम्ने-
तीव प्रेङ्खन्सदोऽन्तः प्रणिगदति करो यः स वो [3]वामहास्तु ॥१०॥
स्निग्धं मूर्ध्नोऽलिनीलद्युतिकचनिचयं प्रोद्धरन्धैर्यराशे-
र्निर्मूलं लोकभर्तुश्च[4]रणकृतमतेर्भाति यः पाणिपद्मः ।
अन्तर्वर्त्यर्तिकृत्कि [5]शिति कलि[6]लमिदं कर्षतीहैष एवं
देवैरारे[7]क्यमाणो भवदशिवशताशर्म स स्राक् [8]शृणातु ॥ ११ ॥
[9]दक्षं दीक्षां जिघृक्षोर्मदनश[10]रंनुदो देहतो दीप्रदीप्तीः
सत्स्वर्णालंकृतीर्यः सरससुमनसः कल्पवृक्षादिवोच्चैः ।
पाणिः प्रोत्तारयन्वः सरसिरुहरुचिः सन्नखांशुप्रसूनो
मालाकारायतेऽसौ स्यतु कुमतिमलं प्रा[11]णमत्कंधराणाम् ॥ १२ ॥
यः कालः शोणिमानं दधदपि निधने कल्मषस्योल्बणस्य
द्रष्टृणां दृष्टमात्रः सरुगपि नितरां नीरुगात्मा[12]प्तसक्तः ।
लक्ष्मीदानेन तृष्णाछिदपि तनुमतामग्रहस्तोऽजडोऽसौ
मुष्याद्दोषानशेषान्कलुषितवपुषां वो विरुद्धात्मकोऽपि ॥ १३ ॥
मघ्यप्यस्मिन्स[13]र्यारौ प्रभवति भुवने भूभृतः किं कराणां
पातैरुत्तापयन्ति क्षितिमि[14]ति किं भव[15]द्भूमभामादिवालम् ।
रक्तः शक्त्या स्फुरन्वो निगडित इव यो भूषणा[16]लीनकाले
व्याधेरव्यात्स पाणिः सदुप[17]लवलयामुक्तितो मु[18]क्तिभाजः ॥ १४ ॥
मा भूदन्तःपुरस्त्रीकठिनकुचभिदाकारिणी [19]रागभाक्त्वा-
त्सक्तैतस्मिन्नखाली स्मरविकृतिहृतः सर्वदास्ये[20]तं कीव ।

---

१. भुजम्. २. जिनस्य. ३. प्रतिकूलहन्ता. ४. चरणं प्रव्रज्या. ५. कृष्णम्. ६. पापम्. ७. आशङ्क्यमानः. ८. हिनस्तु. ९. शीघ्रं यथा स्यात्. १०. जिनस्य. ११. प्रकर्षेणानमन्ती कंधरा येषाम्. १२. आप्तो जिनस्तस्य सक्तस्तदीयः. १३. गर्वनाशके. १४. इतकि इति । अकजागमः. १५. भवञ्जायमानो भूम्ना बाहुल्येन यो भामः क्रोधस्तस्मादिव. १६. ग्रहणकाले. १७. सन्तः शोभना उपला मणयो येषु तानि वलयानि तेषामामुक्तिः परिधानं ततः. १८. जिनस्य. १९. रागो मन्मथासक्तिरपि. २०. इतीव । प्रागवदकजागमः.

मुद्राभिर्मुद्रितोऽलंकरणविधिकृता वज्रिणार्हत्करो यः
सोऽहांस्यह्नाय हन्तु प्रविहितविनतेर्भक्तिभाजो जनस्य ॥ १५ ॥
स्रष्टाजस्रं श्रियो यः शिवपुरप[1]थिकासद्महानोचितायाः
कोषाधीशैर्निशान्ते [2]नमुचिरिपुगिरासद्म[3]हा नो [4]चिंतायाः ।
आनीयानीय नित्यं परमगुरुकरः पर्व[5]शैलीक्ष[6]याय-
प्राप्तेर्हेतुः प्रधानो भवतु स भवतां [7]पर्वशालीक्षयाय ॥ १६ ॥
युक्ता यस्मिन्नृजिम्ना मसृ[8]णितपरुषोऽग्रेऽर्धचन्द्रायमाणा-
नङ्गुल्यः संदधानाः सघृणिनखमणी[10]न्द्रांघिमोद्धस्वरूपाः ।
पुष्पेषोर्निर्जितस्येषव इव वि[11]षमाः संग्रहीता विभान्ति
[12]क्षेपीयः पातकान्तं प्रजनयतु स वः पाणिरर्हद्ध्वजस्थः ॥ १७ ॥
ब्रध्नेनापीद्धधाम्ना परिहृतमिदमालोक्य पातालमूलं
सव्यालत्वात्करालं तिमिरभरभृतं भीरुणेवेति यस्य ।
वीक्ष्यन्तेऽधो विविक्षन्त्य इव ननु भुवो भ्राजनार्थं नखाभा-
स्तस्य ध्यानकाले दलयतु दुरितं वः स जैनेन्द्रपाणिः ॥ १८ ॥
यो नान्वीतो जडिम्ना नयति न [13]कुमुदं नंदथुं दीप्यमानो
न ज्योतिर्ज्यानियुक्तोऽहनि मलिनतमं लक्ष्म धत्ते न मध्ये ।
सोल्लासं नो [14]नदीनं जनयति लभते धाम दोषोदयान्नो
सोऽपूर्वो यन्नखेन्दुश्च[15]रमतनुशयो योग्यतां वो युनक्तु ॥ १९ ॥
अर्थव्यक्तिं विविक्तां विदधति बहवो यां करा हारिदश्वा
विश्वस्मिंस्तीव्ररूपाः प्रशममितवतैकाकिना सा मयापि ।

---

१. शिवपुरपथिकाश्च तेऽसद्मानोऽनगारास्तेषां हानं त्यागस्तस्योचिताया योग्यायाः. २. इन्द्रवचनेन. ३. असद्महा नो किं तु सद्महाः सत्तेजोविशिष्टः करः. ४. पूरितायाः. ५. पर्वयुक्तः. ६. ईक्षया दर्शनेनायस्य शुभावहविधेः प्राप्तेर्हेतुः. ७. पर्वाण्युत्सवानि श्यन्ति तनूकुर्वन्तीति पर्वशा विपक्षास्तेषामाली पङ्क्तिस्तस्याः क्षयाय. ८. ऋजुत्वेन. ९. श्लक्ष्णग्रन्थयः. १०. दीर्घत्वेन प्रशस्तरूपाः. ११. पञ्चसंख्याकाः. १२. क्षिप्रतरम्. १३. कुत्सितां मुदम्. १४. समुद्रम्. पक्षे दीनं न. १५. चरमतनुर्जिनस्तस्य हस्तः.

प्रोच्चैर्निष्पाद्यतेऽमुं स्मयमिव वहता धार्यते [1]वैजयन्ती
येनासौ युष्मदाधेर्वधकरणपटु[2]र्बुद्धसक्तः करोऽस्तु ॥ २० ॥
श्रद्धालोर्यो विधत्ते विविधबुधधृतीरेधयन्बोधवृद्ध्या
धैर्यं धामर्द्धिमिद्धां धनमपनिधनं शुद्धबुद्धिं धरित्रीम् ।
व्याधिध्वंसं पुरंध्रीर्जितविबुधवधूर्धर्मवृद्धेः समृद्धिं
[3]धर्मोक्तौ वः स धत्तां धियमधिकधृतिं प्रोद्धृतो बौद्धहस्तः ॥ २१ ॥
[4]ज्येष्ठासक्तं [5]संचित्रं [6]गुरुमहिम[7]पुनर्वस्वपोढात्मकं नो
नित्यं [8]सत्कृत्तिकं यज्जनित[9]वृषतुलं व्यक्तमीनं सकुम्भम् ।
व्योमेवाभाति किं तु [10]प्रविरहितमलं शून्यवृत्त्यात्युदात्तं
छिन्द्यात्कृच्छ्राणि तद्वः सुमृदु करतलं निर्वृतेरीश्वरस्य ॥ २२ ॥
दारिद्र्याद्रेर्महेन्द्रप्रहरणसमतां यो विभेदे बिभर्ति
प्राकाश्ये विश्ववेश्मोदरविवरगतस्यार्थजातस्य दीपः ।
हस्तालम्बोऽव[11]लम्बो गुरुतरनरकागाधकूपप्रपाते
[12]पातात्पातात्स हस्तस्तमसि तततमे वो विनेतुस्त्रिलोक्याः ॥ २३ ॥
यः प्रोद्यद्विद्रुमद्युत्कररुहमणिमन्मस्तकाङ्गुल्यहीन्द्रः
सत्सत्त्वो[13]ऽपारिजातः पुनर[14]सुरतनुः साधुमुक्ताफलश्रीः ।
चक्रे हस्तः [15]समुद्रो दशशतनयनेनो[16]न्मुदा मूर्ध्नि मेरोः
कृच्छ्रोच्छ्रायं छिनत्तु प्रतिहतसुषमं वः स जेतुः स्मरस्य ॥ २४ ॥
सत्स्कन्धाबद्धमूला[17]वृजितभुजलतालग्नमम्लानरूपं
बिभ्रद्बन्धूककान्ति करतलमचलं पल्लवभ्रान्तिभाग्भिः ।

---

१. जयपताका का मया सह स्पर्धेत्येवंरूपा. २. बुद्धो जिनस्तत्संबन्धी. ३. धर्मोक्तौ धर्मकथने प्रोद्धृत ऊर्ध्वीकृतः. ४. ज्येष्ठेषु वृद्धेष्वेवोपदेशार्थमासक्तम्. ५. शङ्खचक्रादि चित्रसहितम्. ६. गुरुर्महिमा यस्य. ७. पुनःपुनरपि वसुना तेजसा अपोढात्मकं रहितात्मकं नो. ८. सती शोभना कृत्तिश्चर्म यस्य. ९. वृषतुलामीनकुम्भा रेखात्मकाः. १०. शून्यवृत्त्या अलमत्यर्थं प्रविरहितम्. व्योमपक्षे तु ज्येष्ठाचित्रागुरुपुनर्वसुकृत्तिकावृषतुलामीनकुम्भशब्दाः प्रसिद्धार्थाः. व्योम शून्यं भवति. ११. अस्खलितः. १२. रक्षतात्. १३. अपगतशत्रुसमूहः पारिजातरहितश्च. १४. असून्रातीत्यसुरा प्राणप्रदा तनुर्यस्य । पक्षे सुरारहितदेहः. १५. मुद्रासहितः सागरश्च. १६. उद्गतहर्षेण. १७. अवृजिता सरला.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मौग्ध्यात्सारङ्गशावैर्वनगहनभुवि ध्यानवृत्तेर्विधातुः
सिद्धेर्लेलिह्यते यत्तदवतु पतनादापदन्तः सदा वः ॥ २९ ॥

इति श्रीजम्बूकविविरचिते जिनशतके जिनहस्तवर्णनं नाम द्वितीयः परिच्छेदः ।

---

मल्लक्ष्म्या क्षिप्तदीप्ति प्रलपदलिरवैर्वारिणीन्दीवरं वो
मङ्क्षु शक्त्या वियुक्तं सदलमपि जये वाञ्छतीत्युच्छलच्छ्रि ।
हर्षोत्कर्षात्प्रफुल्लं किमिदमिति जनैः कल्प्यतेऽनल्पधीभि-
र्यच्चक्षुर्वीक्ष्यमाणं क्षणमहितहर्ति तत्तनोत्वाप्तवक्रम् ॥ १ ॥

भास्वान्भास्वानपि स्वैर्घृणिभिरनणुभिर्यत्तमोऽनुत्तमं नो
नेता नेतुं तनुत्वं तदतनिम मनो मोहयन्मानवानाम् ।
मुष्णद्धिष्ण्यं गुणानामगुणमपि मुखं खण्डितामूर्तिकीर्ते-
स्तथ्यं पथ्यं प्रथीयः प्रदिशतु दशनाभीशुभिः शोभितं वः ॥ २ ॥

यस्य स्यादन्तरात्मा कलितमलिनिमा चञ्चलश्च स्वभावा-
त्तुल्यर्द्धि स्पर्धयान्यं क्रमत इति सहीतीव धात्रा व्यधायि ।
मर्यादार्थं यदन्तर्निहितनयनयोः सेतुबन्धायमानो
नासावंशो जिनास्यं दिशतु शमर्शनैः शाश्वतं तद्भवच्छ्यः ॥ ३ ॥

सोत्कण्ठाः कण्ठपीठोल्लुठितजरठरुक्तारहाराभिरामा
बिभ्रत्योऽदभ्रमूर्तिस्तनभरमबलाः स्वर्भुवो याः समायुः ।
ध्यानध्वंसं विधातुं विकृतिमकृत यत्प्रत्युत प्रेक्ष्यमाणं
तास्वेवास्यं जिनस्य प्रणुदतु तदघं वः स्वरूपश्रियैव ॥ ४ ॥

स्पष्टं जुष्टं ललाटं विकटतरमतिस्निग्धलम्बालकान्तैः
कान्तं शान्तं दृशां शं दिशदनुकुरुते दृश्यमानाङ्कपङ्कम् ।
यस्योद्यत्पार्वणेणाङ्कनशकलमलं तद्भवद्भाग्यपुष्टि
द्रेष्टुर्दुष्टाष्टकर्मद्विष उपचिनुतादास्यमस्यत्तमांसि ॥ ५ ॥

---

१. सदलं सपरिकरमपि. २. आप्तस्य जिनस्य मुखम्. ३. समर्थः. ४. अगुणं तमोगुणादिरहितमपि गुणानां सौन्दर्यादीनां धिष्ण्यम्. ५. खण्डिता अमूर्तेः कामस्य कीर्तिर्येन तस्य जिनस्य. ६. अतिशयेन पृथु. ७. एव. ८. शं सुखम्. ९. शीघ्रम्. १०. स्वर्गोत्पन्नाः. ११. समागताः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दर्पं कंदर्पशत्रोष्टसिति भगवता भ्रंशयित्वा यदाप्तं
क्रोधाद्वेधा विधायोद्धृतविततगुणं कार्मुकं तत्किमेतत् ।
आस्ते न्यस्तं लसद्भ्रूयुगलमिति नृभिर्भाव्यते यत्र वक्रं
तद्द्रष्टुर्विष्टपान्तर्गतनिखिलपदार्थाननर्थं हताद्वः ॥ ६ ॥
यत्कान्त्या त्याजितश्रीः क्षितिपतिरिव सत्कोषपत्रोरुदण्डै-
राढ्योऽपि क्षीणदार्ढ्यो वसति वनभुवि व्रीडयेवाब्जखण्डः ।
तन्मौनीन्द्रं[1] विनिद्रं स्फुरदधरदलं कण्ठनालोपलीनं
दृग्भृङ्गासङ्गि गुर्वीं ग्लपयतु विपदं सन्मुखं युष्मदीयाम् ॥ ७ ॥
शान्तं श्वेतांशुशोचिःशुचिदशनमशं[2] स्वदृशां दृश्यमानं
विश्वक्लेशोपशान्ति दिशदतिविशदश्लोकराशि[3] प्रकाशम् ।
निःशेषश्रीनिशान्तं शरणमशरणे नाशिताशेषशङ्कं
दिश्याद्वः शोभिताशं शिवमुपशमिनामीशितुः शश्वदास्यम् ॥ ८ ॥
दुष्टारिष्टानि दृष्टेऽप्यकृतविकृतिकान्येव निर्नामकानि
क्षीयन्ते दक्षमक्ष्णां प्रविकसनकृति प्राणियूथस्य यत्र ।
नैशानीवांशुमालिन्यलिकुलमलिनान्यन्धकाराणि बन्धो-
रूर्ध्वाधोमध्यलोकश्रितजनसमितेरास्यमस्त्वघं तत् ॥ ९ ॥
व्यालम्बालोलनीलालकजलदयुजो राजमानाद्धिमानी-
शुभ्रैर्दन्तैः[4] सदन्तैर्वरविवरभृतः[5][6] प्रस्फुरद्गण्डशैलात्[7] ।
यस्माद्गौः[8] शुद्धवर्णा प्रभवति सुमनोमानसं नन्दयन्ती
तज्जैनेन्द्रं हिमाद्रेरिव दिविजनदी वो नुदत्वास्यमेनः ॥ १० ॥
दुर्बोधो दुर्विधेर्यः[9] प्रवररदमणीन्धारयन्मध्यसंस्था-
नस्तश्रेष्ठौष्ठमुद्रो व्यसनशतशमप्रत्यलावाप्तिरुच्चैः[10] ।

१. मुनीन्द्रसंबन्धि. २. न शमशं दुःखम्. ३. स्पष्टतरयशःसमूहम्. ४. दन्ता अग्रे निर्गताः पर्वतैकदेशा अपि. ५. सत्पर्यन्तैः. ६. विवरं मुखान्तरालं गुहाश्च. ७. गण्डावेव शैलाविति मुखपक्षे. ८. गङ्गा. ९. भाग्यहीनैः. १०. व्यसनशतशमे प्रत्यला समर्था अवाप्तिर्यस्य सः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुप्रापः प्रायशोऽस्मिञ्जिनवदननिधिर्बुद्धतत्त्वैः सुतत्त्वै-
स्तत्त्वार्थं सत्वरं वस्त्वरयतु स गुरुर्बोद्धुमध्यामरूपम् ॥ ११ ॥
किं बिम्बं पद्मबन्धोर्नहि दहनमहस्तन्मनाग्नेदमिन्दो-
स्तर्हि स्यात्सत्कलङ्कं तदपि न विकलं लाञ्छनेनैतदेवम्।
दृष्ट्वा द्वेष्टुर्बलस्य प्रमुदितहृदयास्तर्कयन्तेऽतिमुग्धा
वध्वो मूर्ध्न्यद्रिभर्तुर्यदजितलपनं वस्तदेनस्तृणेढु ॥ १२ ॥
मान्ये मान्येन कारि स्वदृगशुभतरात्रेतिकृष्णातिकृष्णा
चक्रे चक्रे दिशां यत्सिततरयशसि भ्रूलताराऽलतारा।
रक्षारक्षालिनीवेत्यवहितविधिना यत्र पापात्त्रपापा-
दव्यादव्यापदास्यं तदमरणगुरोर्वः सदन्तं सदन्तम् ॥ १३ ॥
वक्षस्याधोक्षजे श्रीः परिवसति सदेतिप्रसिद्धिं वृथार्था-
मत्यर्थं भावयन्तोऽभिलषितविभवावाप्तितः कल्पयन्ति।
साक्षाल्लक्ष्मीरिहास्तेऽनवरतमिति यद्दर्शने याचकौघा-
स्तद्वक्त्रं वैतरागं गुरुगदगहनध्वंसनाद्वो धिनोतु ॥ १४ ॥
श्रीमत्पौरंदरं दृग्नलिनघनवनं वानमप्यन्यदीप्ति
प्रत्यक्षत्वेक्षणेन श्रवणपरिकरः स्वातिरक्तो बुधप्रीः।
स्वाभिर्यो दीधितीभिः कुरुत इतितरामाचरन्नप्यचण्ड-
श्चण्डांशोः कर्म धर्माधिपलपनविधुर्वो विरुद्धं स वध्यात् ॥ १५ ॥
सद्बाणं सालकान्तं शिशिरघनतरच्छायमन्तर्द्विजानां
राज्यापूर्णं सदन्तच्छदलसदलिकं काननं वाननं वः।

---

१. प्रकटतरम्. २. दाहात्मकतेजोविशिष्टम्. ३. इन्द्रस्य. ४. अजितस्य जिनस्य लपनं मुखम्. ५. हिनस्तु. ६. कृष्णादप्यतिकृष्णा. ७. दिशां समूहे यद्वच्छत्सिततरं यशो यस्य. ८. कुटिलकनीनिका दृक्. ९. अरक्षा न विद्यते अन्या रक्षा यस्याः सा रक्षा. १०. अवहितेन धात्रा. ११. त्रपामापयति प्रापयति तस्मात्. १२. निरुपद्रवम्. १३. जिनस्य. १४. दन्तैः सहितम्. १५. शोभनप्रान्तम्. १६. म्लानमपि. १७. प्रत्यक्षत्वेन यदीक्षणं तेन. १८. श्रवणौ कर्णौ श्रवणं च नक्षत्रम्. १९. शोभना आतिर्गतिः. २०. बुधान्प्रीणयति. २१. अतिशयेन. २२. मुखपक्षे बाणः शब्दः. २३. दन्तानां पक्षिणां च पङ्क्त्या. २४. इवार्थे वा.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संतप्तिं सप्तसप्तेरिव विषमगतेरागसोऽतीव गुर्वी-
मुन्मूल्यान्मन्मथानुन्मथितमुनिगणप्रष्ठकण्ठस्थलस्थम् ॥ १६ ॥
यद्यप्यन्तर्न दत्ते स्थितिमयममदो नस्तथाप्येष सेव्यो
भव्यत्वात्सर्वदोर्व्यां बहिरपि निरतैः पूर्वपृक्तेरितीव ।
लग्नो रागो गरीयस्यधरवरमणौ यत्र चित्रातिचण्ड-
त्रासात्संसारतो द्राङ्मृतिजननुदस्त्रायतां वस्तदास्यम् ॥ १७ ॥
दैवान्मालिन्ययोगेऽप्यतिचपलतया योऽवदातानुयातः
पार्श्वस्थारक्तवर्णो भवति स लभते भूरिशोभां सुवृत्तः ।
स्थैर्यं लब्धा समाधौ ब्रुवदिव युगलं तारयोर्लोचनान्त-
र्यत्रैवं राजते तन्मुखमुपशमयत्वार्हतं गर्हितं वः ॥ १८ ॥
बाहुश्रुत्यं दधद्भिर्बहुधवलगुणः संगतो गीयते य-
स्त्यादर्थानर्थदर्शीत्यवितथमिव तत्कर्तुमालक्ष्यतेऽक्ष्णोः ।
कर्णाभ्यर्णोपसर्पि द्वितयमुपवहद्राघिमाणं यदीयं
योगीशस्याननं तच्छकलयतु कलां काश्मलीं हेलया वः ॥ १९ ॥
राजीव त्वं निजर्द्ध्या जयसि बहुरजः सत्कथं कथ्यतां मा-
मृक्षेश क्षीयमाणस्त्वमपि किल मया स्पर्धसे सार्धमेवम् ।
सद्गन्धश्वासलुब्धभ्रमदलिपटलप्रोच्छलद्व्राणतो य-
द्वक्तीव व्यक्तमेक्तान्स्नपयतु रजसा वस्तदर्हन्मुखाब्जम् ॥ २० ॥
यत्सौम्यत्वात्स्वकीयां क्षरदमृतरसां सौम्यतां न्यूनवृत्ति
व्यालोक्यालोकिताशः कृशतनुरविशत्स्वश्रियोऽन्तर्द्धिमिच्छुः ।
स व्रीडत्वादिवेन्दुर्मृडविकटजटाजूटरौद्राटवीं वो
यच्छत्वच्छिन्नवाञ्छं सुषममितमृतेराननं तन्मनोहृत् ॥ २१ ॥
लावण्यार्णः प्रपूर्णं चलदृगनिमिषं राजहंसोपजीव्यं
भ्राम्यद्भ्रूयुग्मभङ्गं त्रिदशमुनिगणासेवनीयं प्रसन्नम् ।

---

१. पूर्वसंबन्धात्. २. अरुणत्वं मानसो विकारश्च. ३. निकटस्था अनुरक्ता वर्णा ब्राह्मणादयो यस्य. ४. शब्दतः. ५. रजसा पापेनाक्तान् लिप्तान्. ६. शोभनम्. ७. गतमरणस्य जिनस्य.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सच्छङ्कं मानसाह्वं सर इव तरसा मानसस्यातनोति
प्रह्लत्तिं[1] वीक्षितं यत्तदरिविहतये वः शमीशास्यमस्तु ॥ २२ ॥
सेवां कर्तुं किमेतौ मिहिरहिमरुची पार्श्वयोरे[2]तदात्त-
स्वश्रीलिप्साकुलाङ्गाविति मनसि सतां शेमुषी प्रादुरस्ति ।
निर्वर्ण्या[3]कीर्णदीप्तिप्रतिहततमसी कुण्डले गण्डलग्ने
यत्सत्कर्णापिनद्धे नयतु शिवपदं तन्मुनीन्द्राननं वः ॥ २३ ॥
अम्लानं मौलिमालोल्ललितकपिलरुग्धूलिलुब्धालिजालं
व्यालोलारालकालालकम[4]मलकलालाञ्छनं यद्विलोक्य ।
लेखाली[5] लालिता[6]लं प्रबल[7]बलकुलोन्मूलिना शैलराजे[8]
प्रह्वत्वा लीलया वो दलयतु कलिलं लोलदृक्तज्जिनास्यम् ॥ २४ ॥
यद्वक्त्रासत्ययुक्तः सुरवरदयिताख्यातिमांस्त्वं पवित्रो[9]
गोभृद्गोत्रस्य[10] हन्ता बल[11]भिदहमपि त्वत्समानं तथैव ।
तस्माद्दर्पावलेपं जहिहि हरिमितीवाहसत्सस्मितैर्य-
त्तद्वो द्वन्द्वा[12]नि विद्वद्वरगुरुवदनं सुप्रसन्नं पिनष्टु ॥ २५ ॥

इति श्रीजम्बूकविविरचिते जिनशतके जिनमुखवर्णनं नाम तृतीयः परिच्छेदः ।

---

ब्राह्मी[13] ब्रह्मा[14]धिभर्तुः कृतरतिरसकृद्वैबुधानां[15] विशुध्द्या
गुर्वी भास्वत्सुवर्णाव[16]नरुचिखचिता चारुचामीकराद्रेः ।
चूडा वा रोचमाना दिवि दिवसपते[17]र्भानुसीमानमुच्चै-
रुल्लङ्घ्यालङ्घनीया बृ[18]हदवमवने व[19]न्यवह्नीयतां वः ॥ १ ॥

---

१. परितोषम्. २. एतेन मुखेन आत्ता गृहीता या स्वश्रीः सूर्याचन्द्रमसोः स्वकीया शोभा तस्या लब्धुमिच्छा तया आकुलमङ्गं ययोः. ३. विलोक्य. ४. अमलकलः पूर्णिमा चन्द्रस्तस्येवासमन्ताल्लाञ्छनम्. ५. देवपङ्क्तिः. ६. अत्यर्थं लालिता. ७. इन्द्रेण. ८. मेरौ. ९. पविं वज्रं त्रायते पवित्रः. १०. गोत्राख्यस्य कर्मण इति जिनपक्षे. ११. बलं संनहनाख्यं कर्म. १२. सकलोपद्रवान्. १३. वाणी. १४. ब्रह्म परमपदं तस्याधिभर्ता जिनः. १५. देवसमूहानाम्. १६. अवने रक्षणे या रुचिः; मेरुचूडापक्षे तु वनस्य रुचिस्तया खचिता. १७. सूर्यस्य किरणसीमाम्. १८. महतामवमानां पापानां वने. १९. दावानलायताम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इन्द्रैर्विद्राणनिद्रं श्रितविधि विबुधैः सार्थकं ऋक्षनाथैः
सिद्धैः [1]साध्यार्थसिद्ध्यै धुतदिति दितिजैः साधुभिः साधितार्थम् ।
गन्धर्वैर्गीतगर्भं कृतकरमुकुलैः श्रूयमाणानणीयो
जैनी गौर्गौरवं वोऽतनुभुवनकुटीकोटरान्तः करोतु ॥ २ ॥
या [2]मन्दारैरशोकैः प्रविकचसुमनःशोभितैर्भिक्षुवृक्षै-
स्तुङ्गैर्[3]नीरागमानैः सततमुपचिता भारती वैतरागी ।
स्वच्छायाच्छिन्नतापा विहितशुभफलालंकृतारामलेखा-
[4]तुल्या कल्याणमाल्यैर्बहुभिरिह तनूर्भूषयत्वाशु सा वः ॥ ३ ॥
यूथैर्या [5]संयतानां सुदृढनियमनान्मोक्षमाकाङ्क्षमाणै-
र्गुप्तैः संसृत्यटव्याश्रयणगमनतः संश्रितत्वादितीह ।
कारागारानुकाराप्यघनतरतमा निर्भया भ्रष्टबन्धा
साधीयोधीधनर्द्धेरतिसमधिकतां सा क्रियात्सिद्धगीर्वः ॥ ४ ॥
संसारोदन्वदम्भस्य[6]मितिमृतिमहोर्मिण्यगण्योद्भवौर्व-
व्युद्धीमे लोभकुम्भीनसविषमतले मज्जतो जन्तुराशीन् ।
प्रत्यप्रान्तप्रथिम्नि स्मरमकरवति ब्राह्म्यजिह्मस्वरूपा
निर्व्याजं [7]नाव्यते या यतिपतिगदिता सा हताद्वो द्विषन्तम् ॥५॥
नामीष्टं विष्टपान्तः प्रति चरमचरं प्राणिनं प्राणितव्या-
दन्यद्वस्त्वित्यवेत्य स्वमिव तदपि भो रक्षता क्षुद्रभावाः ।
भद्रं भोक्तुं विमुक्त्यां यदि मतिरिति याकर्ण्यते कर्णरन्ध्रैः
सा श्रीयोगीन्द्रगीर्वः प्रबलयतु बलं कालमल्लं विजेतुम् ॥ ६ ॥
[8]द्रव्यादेशेन नित्यं यदितरदपि तत्पर्ययादेशतोऽस्मि-
न्वस्त्वेवं यैकमेव प्रकटयति नयद्वन्द्वतो द्विप्रकारम् ।

---

१. साध्यस्यार्थस्य सिद्ध्यै धुता दितिः खण्डनं यत्र. २. मन्दं आरं अरिसमूहो येषाम्. ३. नीरं पानीयं तस्यागमः प्राप्तिस्तेनानाः प्राणा येषां तैः; भिक्षुपक्षे तु रागमानाभ्यां रहितैः. ४. उपवनराजीसमाना. ५. संयतास्तपस्विनो बद्धाश्च. ६. अमितयो मृतयो मरणान्येव महान्तस्तरङ्गा यत्र. ७. नौरिवाचरति. ८. या वागस्मिञ्जगति एकमेव वस्तु द्विप्रकारं द्विभेदं प्रकटयति प्रतिपादयति । कुतः । नयद्वन्द्वं नययुग्मं द्रव्यास्तिकनयः पर्यायास्तिकनयश्च तस्मात् । एवमित्यनेन प्रकारेण । यन्मृदादिवस्तु द्रव्यादेशनयापेक्षया नित्यं तत्पर्ययादेशत इतरदनित्यम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुग्राहोग्रग्रहास्यप्रपतिततनुभृत्स्तोममुन्मोचयन्ती
चेतोभूप्रच्युतिं वः सुमतियतिपुरोगस्य सा वाग्विधेयात् ॥ ७ ॥
निर्दोषा सन्निशीथाप्यवितथरचना सत्यहीनापि नित्यं
सद्गुप्तिर्मोक्षदापि श्रुतयममहिमाप्युन्नतासत्कृतान्ता ।
द्विष्टार्था सार्थकापि स्खलितपरमताप्युन्नतासत्तमाया-
मारोप्यात्सा पदव्यां प्रशमिपरिवृढब्राह्म्यलं वोऽविलम्बम् ॥ ८ ॥
सत्या सत्यानताङ्गे तनुमति भविका सर्वदा सर्वदाग-
स्तानेऽस्तानेकशर्मण्यपि विनिपतिते स्तूयमानायमाना ।
नाशं नाशङ्कितार्था भवतु कविशतैः पूरितार्शारिताशा
गौर्वो गौर्वामपङ्के मुनिपलपनभूर्वः सदावासदावा ॥ ९ ॥
वाचो वोऽर्चामचिन्त्याचलचरणरुचेश्चूचुरन्मा चिराया-
त्युच्चैस्ताश्चोरयन्त्यो रुचिमतिशुचयो नीचवाक्तारकाणाम् ।
याश्चण्डाश्चण्डवर्चोरुच इव निचितं चित्तभूध्वान्तचित्या
सच्चेतोम्भोजचक्रं प्रचुररुचिचितं कुर्वते चित्रचाराः ॥ १० ॥
श्रोतॄन्वृन्दारकादीन्प्रणिहितकरणानादराद्देशनायां
संसद्यासाद्य सद्यः परिणमति वचोऽर्हन्मुखान्निर्गतं सत् ।
तेषां भाषाविशेषैर्विषमिव विषदाद्भूविभागान्विभिन्ना-
न्स्वैः स्वैर्वर्णैः सुवर्णं यदनुगुणयतात्स्वश्रुतौ तन्मनो वः ॥ ११ ॥
या वारिक्षीरयोर्वा प्रकृतिपुरुषयोः श्लिष्टयोस्त्रोटयन्ती
संबन्धं निर्विबन्धं ललितपदगती रामरामेव रम्या ।
सा वः शुक्लाभदेहा दहतु महदपि क्षुद्रपक्षद्रुमाणां
वृन्दं वृन्दारकादीश्वरसभसरसीभूषणा वाग्जिनस्य ॥ १२ ॥

---

१. निशीथो ग्रन्थविशेषः. २. सती शोभना अहीना च. ३. असन्नविद्यमानः कृतान्तो यमो यस्याम्; अन्यत्र सत्कृतान्ता शोभनसिद्धान्ता. ४. द्विष्टोऽर्थो द्रव्यादिर्यया. ५. सर्वं ददातीति सर्वदा. ६. पापविस्तारे. ७. वामपङ्के मिथ्यादृष्टिरूपकर्दमे नाशमयमाना गच्छन्ती. ८. अरितां शत्रुतां श्यति सा. ९. सदावासो मोक्षस्तं ददति ते ज्ञानादयस्तानवति सा. १०. मदनान्धकारसमूहेन. ११. पर्यायान्तरमनुभवति. १२. जलमिव. १३. जलदात्. १४. कर्मजीवयोः. १५. मनोहरवनितेव.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृध्नुत्वात्तत्त्वगन्धाधिगमविषयतः संपतद्भिः समुद्भिः
सद्भिः सद्भिर्द्विरेफैरिव मधुररवैश्चारुपक्षैः सुदक्षैः ।
यत्प्राप्य प्राप्यते शं [1]स्वरिनकरिमदाम्भोवद्[2]दाप्तं वचो व-
स्तत्क्लेशाश्लेषशोषोपशमकृतिविधिं [3]प्रत्यलंभूष्णु भूयात् ॥ १३ ॥
नानावर्णैर्विचित्रा रुचिरगुणशतैः कल्पितानल्पशोभा
शुद्धाधिक्यान्महार्घा हृदि मुदमधिकं संदधाना ग्रहीतुः ।
[4]शाटं वः सत्पटीवो[5]त्कटकटुकफलाकार्यशीतस्य गौद्रा-
क्संपर्कात्कुर्वती श्रीसुखमतितनुतात्सा [6]जितोत्सेकमूर्तेः ॥ १४ ॥
प्रोत्खातासंख्यदुःखाखिलजनसुखकृत्खण्डिताखण्डखेदं
खड्गाभा मूर्खमुख्यप्रखलमुखरताशाखिशाखा [7]विलेखे ।
ख्याता वाग्लेखसंख्याप्रमुखशतमखाभ्यर्चिता खण्डशो वः
[8]सख्यं [9]प्रेङ्खन्मनोभूविशिखमुखभिदः खण्डयत्वस्खलन्ती ॥ १५ ॥
वर्णैः पूर्णा[10]प्यवर्णा [11]कुंजनपरिचिताप्याप्तलोकै[12]र्विनूता
साराप्युच्चै[13]रसारा [14]रतिसुखकृदपि प्रास्तकंदर्पदर्पा ।
या [15]संनिष्ठाप्यनिष्ठा प्रविदितजगतो [16]भारतीनां रतीनां
सा युष्माकं निमित्तं त्वरितमुपदधात्वित्यनेकप्रकारा ॥ १६ ॥
भद्रा द्रोणी [17]समुद्रे द्रविणवरनिधिर्द्रा[18]गर्धनायेऽपिधानः
स्वापस्त्वा[19]नूपपातापदि परिपततां [20]कूबरी दुर्गमार्गे ।
युद्धे साध्वायुधश्रीः शशिसमयशसां योनिरो[21]र्यार्यगीर्या
सा युष्माकं महाधिप्रधनविधुरताध्वस्तयेऽस्तु प्रशस्ता ॥ १७ ॥

---

१. इन्द्रगजदानोदकवत्. २ आप्तो जिनस्तस्येदमाप्तम्. ३. समर्थम्. ४. नाशम्. ५. उत्कटकटुकं फल यस्य तादृशं यदकार्यं दुष्कर्म तदेव शीतं तस्य. ६. जितगर्वा मूर्तिर्यस्य । शान्ताकृतेरित्यर्थः. ७. छेदने. ८. मोहरूपं प्रेम. ९. जिनस्य. १०. शुक्लादिवर्णरहिता. ११. भूमिस्थलोकैः. १२. अभिष्टुता. १३. सारो गमनं तद्रहिता । स्थिरेत्यर्थः. १४. रतिसुखं कृन्ततीति विरोधपरिहारः. १५. सन्निष्पत्तिर्नाशरहिता च. १६. भारती वाणी ईनां लक्ष्मीणां रतीनां च निमित्तं त्वरितमुपदधातु. १७. नौका. १८. धनाभिलाषेऽपिधानो मुद्रणरहितो द्रवणवरनिधिः. १९. निर्जलदेशगमनापदि स्वापः शोभनजलम्. २०. रथः. २१. आर्याणां तपस्विनामर्यः स्वामी जिनस्तस्य गीः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमानं बिभ्रतोऽपि प्रकटयति झटित्योजसा स्वेन हानिं
स्नेहस्योच्चैः पतङ्गप्रभृतितनुमतोऽवन्त्यनित्यत्वशून्या।
यान्यादृक्षेव साक्षात्कृतनयनपथातीतवस्तुस्वरूपा
दैपी वर्तिः कुवृत्तीरपहरतुतरामर्हतां वागसौ वः॥ १८॥

ज्योतिर्मैत्रं न यत्र प्रविचरति रुचिर्नैन्दवी न प्रकाश्यं
यद्भासां चित्रभानोरनणुमणिरुचां गोचरे यच्च नैव।
वस्तु प्रत्यक्षयन्ती तदपि मुदमितैः प्राप्तरूपैर्नुता या
सार्हद्भारत्यरत्या वियुततनुलतान्वः क्रियादक्रमेण॥ १९॥

सालंकारां करोति श्रुतिमति विशदन्यायरत्नोद्भटश्रि
श्रीमद्भिर्धार्यमाणं गतमतिविभवैर्दुर्लभं भास्वराङ्गम्।
सद्वृत्तोदात्तरूपं व्युपरतविकृतेर्यत्तुलां कुण्डलस्य
क्षिप्रं बिभ्रत्क्रियाद्वो वचनमुपचितिं चिन्तितानां तदर्च्यम्॥२०॥

नाश्रेयांसि श्रितानां न भयतरलता श्रूयते श्राद्धदेवा-
दश्रीणां नाश्रयोऽश्रु स्तुतिरपि न नवा विस्रसा न श्रमो वः।
नाविश्रम्भश्रुतिर्न श्रवणकटुवचो यत्र तत्स्थानमीयुः
श्रुत्वा यां श्रीजिनस्याश्रियमभिभवताद्गौरसौ स्राक् श्रुतीष्टा॥२१॥

मिथ्यादृक्पाथसान्तर्भृतगुरुविपदावर्तगर्तं गरीयः-
सर्पत्कंदर्पसर्पं प्रचरितकुनयानेकनक्रादिचक्रम्।
यत्प्राप्य प्रोत्तरन्ति प्रततमपि भवाम्भोनिधिं साधुबन्धं
पातात्पोतायमानं तदवमपतनाज्जैनचन्द्रं वचो वः॥ २२॥

सोन्मुद्भिर्जन्मवद्भिः शिखिभिरिव समाकर्णिता निर्णयन्ती
क्लेशग्रीष्मोष्मशोषं स्वमहिमभवनात्संहरन्ती रजांसि।
विस्फूर्जन्नीतिधारानिकरपतनतः प्रावृषा या समाना
मांनारेर्माननामाप्यपनुदतु भवत्स्वाशु सा सूनृता वाक्॥ २३॥

---

१. पण्डितैः. २. शीघ्रम्। विशदा न्याया नीतय एव रत्नानि. ३. जिनस्य. ४. यमात्. ५. जरा. ६. रक्षतात्. ७. पापपातात्. ८. अपनयन्ती. ९. स्वकीयमाहात्म्यभावात्. १०. जिनस्य.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्मीर्वा दुग्धसिन्धोर्धरणिधरवराज्जह्नुकन्येव मान्या
श्यामेशाच्चन्द्रिकेवाभिनवजलधरादम्भसः श्रीरिवोच्चैः ।
ध्वान्ताबन्धोरहःश्रीरिव समुदभवद्भारती रत्यधीन्द्रं
द्रोग्धुर्या सा निधेयादधरितविबुधाधीशराज्ये पदे वः ॥ २४ ॥
नाक्षेमं क्षुद्रपक्षात्क्षणमपि लभते संभ्रमेणेह बिभ्र-
त्कण्ठे निर्लोठ्य शाठ्यं कुदृशमसदृशोद्भासितां भ्रंशयन्तीम् ।
यां रक्षां वा विवेकी बहुविधविपदां भेदिकां दैन्यशून्या-
न्युष्मान्मान्योग्रगस्याननवनजशया वागसौ द्राग्विधेयात् ॥ २५ ॥

इति श्रीजम्बूगुरुविरचिते जिनशतके जिनवाग्वर्णनं नाम चतुर्थः परिच्छेदः ।

## समाप्तमिदं जिनशतकम् ।

---

## श्रीपद्मानन्दकविप्रणीतं

# वैराग्यशतकम् ।

त्रैलोक्यं युगपत्कराम्बुजलुठन्मुक्तावदालोकते
जन्तूनां निजया गिरा परिणमद्यः सूक्तमाभाषते ।
स श्रीमान्भगवान्विचित्रविधिभिर्देवासुरैरर्चितो
वीतत्रासविलासहासरभसः पायाज्जिनानां पतिः ॥ १ ॥
यैः क्षुण्णाः प्रसरद्विवेकपविना कोपादिभूमीभृतो
योगाभ्यासपरश्वधेन मथितो यैर्मोहधात्रीरुहः ।
बद्धः संयमसिद्धमन्त्रविधिना यैः प्रौढकामज्वर-
स्तान्मोक्षैकसुखानुषङ्गरसिकान्वन्दामहे योगिनः ॥ २ ॥
यैस्त्यक्ता किल शाकिनीवदसमप्रेमाञ्चिता प्रेयसी
लक्ष्मीः प्राणसमापि पन्नगवधूवत्प्रोज्झिता दूरतः ।

---

१. ध्वान्तशत्रोः. २. रत्यधीन्द्रं कामं द्रोग्धुर्द्वेष्टुर्जिनात्. ३. इव. ४. जिनस्य. ५. मुखकमलस्था. ६. कवेरस्य देशकालौ न ज्ञायेते. एकमेव पुस्तकमस्य शतकस्य प्रायः शुद्धं पत्रचतुष्टयात्मकं संवेगिसाधुसत्तमश्रीशान्तिविजयमुनिभिरस्मभ्यं प्रहितं तदाधारेणैतन्मुद्रणं विहितम्. ७. वज्रेण.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुक्तं चित्रगवाक्षराजिरुचिरं वल्मीकवन्मन्दिरं
निःसङ्गत्वविराजिताः क्षितितले नन्दन्तु ते साधवः ॥ ३ ॥
यः परवादे मूकः परनारीवक्त्रवीक्षणेऽप्यन्धः ।
पङ्गुः परधनहरणे स जयति लोके महापुरुषः ॥ ४ ॥
आक्रोशेन न दूयते न च चटुप्रोक्त्या समानन्द्यते
दुर्गन्धेन न बाध्यते न च सदामोदेन संप्रीयते ।
स्त्रीरूपेण न रज्यते न च मृतश्वानेन विद्विष्यते
माध्यस्थ्येन विराजितो विजयते कोऽप्येष योगीश्वरः ॥ ५ ॥
मित्रे नन्दति नैव नैव पिशुने वैरातुरो जायते
भोगे लुभ्यति नैव नैव तपसि क्लेशं समालम्बते ।
रत्ने रज्यति नैव नैव दृषदि प्रद्वेषमापद्यते
येषां शुद्धहृदां सदैव हृदयं ते योगिनो योगिनः ॥ ६ ॥
सौन्दर्यैकनिधेः कलाकुलविधेर्लावण्यपाथोनिधेः
पीनोत्तुङ्गपयोधरालसगतेः पातालकन्याकृतेः[1] ।
कान्ताया नवयौवनाञ्चिततनोर्यैरुज्झितः संगमः
सम्यग्ध्यानसगोचरे चरति किं तेषां हताशः स्मरः ॥ ७ ॥
शृङ्गारामृतसेकशाद्वलरुचिर्वक्रोक्तिपत्रान्विता
प्रोद्गच्छत्सुमनोभिषङ्गसुभगा स्त्रीणां कथावल्लरी ।
यैर्ब्रह्मव्रतपावकेन परितो भस्मावशेषीकृता
किं तेषां विषमायुधः प्रकुरुते रोषप्रकर्षेऽपि रे ॥ ८ ॥
आताम्रायतलोचनाभिरनिशं संतर्ज्य संतर्ज्य च
क्षिप्तस्तीक्ष्णकटाक्षमार्गणगणो मत्ताङ्गनाभिर्भृशम् ।
तेषां किं नु विधास्यति प्रशमितप्रद्युम्नलीलात्मनां
येषां शुद्धविवेकवज्रफलकं पार्श्वे परिभ्राम्यति ॥ ९ ॥
अग्रे सा गजगामिनी प्रियतमा पृष्ठेऽपि सा दृश्यते
धात्र्यां सा गगनेऽपि सा किमपरं सर्वत्र सा सर्वदा ।

---

१. नागकन्यातुल्यायाः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आसीद्यावदनङ्गसंगतिरसस्तावत्तवेयं स्थितिः
संप्रत्यास्यपुरःसरामपि न तां द्रष्टासि कोऽयं लयः ॥ १० ॥
योगे पीनपयोधराञ्चिततनोर्विच्छेदने बिभ्यतां
मानस्यावसरे चटूक्तिविधुरं दीनं मुखं बिभ्रताम् ।
विश्लेषस्मरवह्निनानुसमयं दन्दह्यमानात्मनां
भ्रातः सर्वदशासु दुःखगहनं धिक्कामिनां जीवितम् ॥ ११ ॥
मध्ये स्वां कृशतां कुरङ्गकदृशो भ्रूनेत्रयोर्वक्रतां
कौटिल्यं चिकुरेषु रागमधरे मान्द्यं गतिप्रक्रमे ।
काठिन्यं कुचमण्डले तरलतामक्ष्णोर्निरीक्ष्य स्फुटं
वैराग्यं न भजन्ति मन्दमतयः कामातुरा ही नराः ॥ १२ ॥
पाण्डुत्वं गमितान्कचान्प्रतिहतां तारुण्यपुण्यश्रियं
चक्षुः क्षीणबलं कृतं श्रवणयोर्बाधिर्यमुत्पादितम् ।
स्थानभ्रंशमवापिताश्च जरया दन्तास्थिमांसत्वचः
पश्यन्तोऽपि जडा हहा हृदि सदा ध्यायन्ति तां प्रेयसीम् १३
अन्यायार्जितवित्तवत्क्वचिदपि भ्रष्टं समस्तै रदै-
स्तापक्रान्ततमालपत्रवदभूदङ्गं वलीभङ्गुरम् ।
केशेषु क्षणचन्द्रवद्धवलिमा व्यक्तं श्रितो यद्यपि
स्वैरं धावति मे तथापि हृदयं भोगेषु मुग्धं हहा ॥ १४ ॥
उद्गृणन्ति प्रपञ्चेन योषितो गद्गदां गिरम् ।
तामामनन्ति प्रेमोक्तिं कामग्रहिलचेतसः ॥ १५ ॥
यावद्दुष्टरसक्षयाय नितरां नाहारलौल्यं जितं
सिद्धान्तार्थमहौषधैर्निरुपमश्चूर्णो न जीर्णो हृदि ।
पीतं ज्ञानलघूदकं न विधिना तावत्स्मरोत्थो ज्वरः
शान्तिं याति न तात्त्विकीं हृदय हे शेषैरलं भेषजैः ॥ १६ ॥
शृङ्गारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसि
प्रद्युम्नप्रियबान्धवे चतुरवाङ्मुक्ताफलोदन्वति ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मीनिधौ
धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥ १७ ॥
सम्यक्परिहृता येन कामिनी गजगामिनी ।
किं करिष्यति रुष्टोऽपि तस्य वीरवरः स्मरः ॥ १८ ॥
लज्जेयं प्रलयं प्रयाति झटिति ब्रह्मव्रतं भ्रश्यति
ज्ञानं संकुचति स्मरज्वरवशात्पश्यामि यावत्प्रियाम् ।
यावत्तु स्मृतिमेति नारकगतेः पाकक्रमो भीषण-
स्तावत्तत्त्वनिरीक्षणात्प्रियतमाप्येषा विषौघायते ॥ १९ ॥
कारुण्येन हता वधव्यसनिता सत्येन दुर्वाच्यता
संतोषेण परार्थचौर्यपटुता शीलेन रागान्धता ।
नैर्ग्रन्थ्येन परिग्रहग्रहिलता यैर्यौवनेऽपि स्फुटं
पृथ्वीयं सकलापि तैः सुकृतिभिर्मन्ये पवित्रीकृता ॥ २० ॥
यत्राब्जोऽपि(?) विचित्रमञ्जरिभरव्याजेन रोमाञ्चितो
दोलारूढविलासिनीविलसितं चैत्रे विलोक्याद्भुतम् ।
सिद्धान्तोपनिषन्निषण्णमनसां येषां मनः सर्वथा
तस्मिन्मन्मथबाधया न मथितं धन्यास्त एव ध्रुवम् ॥ २१ ॥
स्वाध्यायोत्तमगीतिसंगतिजुषः संतोषपुष्पाञ्चिताः
सम्यग्ज्ञानविलासमण्डपगताः सद्ध्यानशय्यां श्रिताः ।
तत्त्वार्थप्रतिबोधदीपकलिकाः क्षान्त्यङ्गनासङ्गिनो
निर्वाणैकसुखाभिलाषिमनसो धन्या नयन्ते निशाम् ॥ २२ ॥
किं लोलाक्षि कटाक्षलम्पटतया किं स्तम्भजृम्भादिभिः
किं प्रत्यङ्गनिदर्शनोत्सुकतया किं प्रोल्लसच्चाटुभिः ।
आत्मानं प्रतिबाधसे त्वमधुना व्यर्थं मदर्थं यतः
शुद्धध्यानमहारसायनरसे लीनं मदीयं मनः ॥ २३ ॥
सज्ज्ञानमूलशाली दर्शनशाखश्च येन वृत्ततरुः ।
श्रद्धाजलेन सिक्तो मुक्तिफलं तस्य स ददाति ॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रोधाद्युग्रचतुष्कषायचरणो व्यामोहहस्तः सखे
रागद्वेषनिशातदीर्घदशनो दुर्वारमारोद्धुरः ।
सज्ज्ञानाङ्कुशकौशलेन स महामिथ्यात्वदुष्टद्विपो
नीतो येन वशं वशीकृतमिदं तेनैव विश्वत्रयम् ॥ २५ ॥

दृश्यन्ते बहवः कलासु कुशलास्ते च स्फुरत्कीर्तये
सर्वस्वं वितरन्ति ये तृणमिव क्षुद्रैरपि प्रार्थिताः ।
धीरास्तेऽपि च ये त्यजन्ति झटिति प्राणान्कृते स्वामिनो
द्वित्रास्ते तु नरा मनः समरसं येषां सुहृद्वैरिणोः ॥ २६ ॥

हृदयं सदयं यस्य भाषितं सत्यभूषितम् ।
कायः परहितोपायः कलिः कुर्वीत तस्य किम् ॥ २७ ॥

नास्त्यसद्भाषितं यस्य नास्ति भङ्गो रणाङ्गनात् ।
नास्तीति याचके नास्ति तेन रत्नवती क्षितिः ॥ २८ ॥

आनन्दाय न कस्य मन्मथकथा कस्य प्रिया न प्रिया
लक्ष्मीः कस्य न वल्लभा मनसि नो कस्याङ्गजः क्रीडति ।
ताम्बूलं न सुखाय कस्य न मतं कस्यान्नशीतोदकं
सर्वाशाद्रुमकर्तनैकपरशुर्मृत्युर्न चेत्स्याज्जनोः ॥ २९ ॥

भार्येयं मधुराकृतिर्मम मम प्रीत्यन्वितोऽयं सुतः
स्वर्णस्यैष महानिधिर्मम ममासौ बन्धुरो बान्धवः ।
रम्यं हर्म्यमिदं ममेत्थमनया व्यामोहितो मायया
मृत्युं पश्यति नैव दैवहतकः क्रुद्धं पुरश्चारिणम् ॥ ३० ॥

कष्टोपार्जितमत्र वित्तमखिलं द्यूते मया योजितं
विद्या कष्टतरं गुरोरधिगता व्यापारिता कुस्तुतौ ।
पारम्पर्यसमागता च विनयो वामेक्षणायां कृतः
सत्पात्रे किमहं करोमि विवशः कालेऽद्य नेदीयसि ॥ ३१ ॥

आत्मा यद्विनियोजितो न विनये नोग्रं तपः प्रापितो
न क्षान्त्या समलंकृतः प्रतिकलं सत्येन न प्रीणितः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वं निन्दसि नैव कर्महतकं प्राप्ते कृतान्तक्षणे
दैवायैव ददासि जीव नितरां शापं विमूढोऽसि रे ॥ ३२ ॥
बालो यौवनसंपदा परिगतः क्षिप्रं क्षितौ लक्ष्यते
वृद्धत्वेन युवा जरापरिणतो व्यक्तं समालोक्यते ।
सोऽपि क्कापि गतः कृतान्तवशतो न ज्ञायते सर्वथा
पश्यैतद्यदि कौतुकं किमपरैस्तैरिन्द्रजालैः सखे ॥ ३३ ॥
द्वारं दन्तिमदप्रवाहनिवहैर्येषामभूत्पङ्किलं
ग्रासाभाववशान्न संचरति यद्रङ्कोऽपि तेषां पुनः (?) ।
येऽभूवन्विमुखाः स्वकुक्षिभरणे तेषामकस्मादहो
यच्च श्रीरिह दृश्यतेऽतिविपुला तत्कर्मलीलायितम् ॥ ३४ ॥
नापत्यानि न वित्तानि न सौधानि भवन्त्यहो ।
मृत्युना नीयमानस्य पुण्यपापे परं पुरः ॥ ३५ ॥
ब्रूतेऽहंकृतिनिग्रहं मृदुतया पश्चात्करिष्याम्यहं
प्रोद्यन्मारविकारकन्दकदनं पञ्चेन्द्रियाणां जयात् ।
व्यामोहप्रसरावरोधनविधिं सद्ध्यानतो लीलया
नो जानाति हरिष्यतीह हतकः कालोऽन्तराले किल ॥ ३६ ॥
बद्धा येन दशाननेन नितरां खट्वैकदेशे जरा
द्रोणाद्रिश्च समुद्धृतो हनुमता येन स्वदोर्लीलया ।
श्रीरामेण च येन राक्षसपतिस्त्रैलोक्यवीरो हतः
सर्वे तेऽपि गताः क्षयं विधिवशात्कान्येषु तद्भोः कथा ॥३७॥
सर्वभक्षी कृतान्तोऽयं सत्यं लोके निगद्यते ।
रामदेवादयो धीराः सर्वे क्काप्यन्यथा गताः ॥ ३८ ॥
मिथ्यात्वानुचरे विचित्रगतिभिः संचारितस्योद्भटै-
रत्युग्रभ्रममुद्गराहतिवशात्संमूर्छितस्यानिशम् ।
संसारेऽत्र नियन्त्रितस्य निगडैर्मायामयैश्चोरव-
न्मुक्तिः स्यान्मम सत्वरं कथमतः सद्वृत्तवित्तं विना ॥ ३९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुष्प्रापं मकराकरे करतलाद्रत्नं निमग्नं यथा
संसारेऽत्र तथा नरत्वमथ तत्प्राप्तं मया निर्मलम् ।
भ्रातः पश्य विमूढतां मम हहा नीतं यदेतन्मुधा
कामक्रोधकुबोधमत्सरकुधीमायामहामोहतः ॥ ४० ॥

येनेह क्षणभङ्गुरेण वपुषा क्लिन्नेन सर्वात्मना
सद्व्यापारवियोजितेन परमं निर्वाणमप्याप्यते ।
प्रीतिस्तेन हहा सखे प्रियतमावक्रेन्दुरागोद्भवा
क्रीता स्वल्पसुखाय मूढमनसा कोट्या मया काकिणी ॥४१॥

क्रीडाकारि परोपहासवचनं तुष्ट्यै परव्यंसनं
कान्ता काञ्चनसुन्दराङ्गलतिका कान्तैव पृथ्वीतले ।
भव्यो द्रव्यसमर्जने किल महारम्भोद्यमः किं तु रे
भेदच्छेदनताडनादिविधिना रौद्रो महारौरवः ॥ ४२ ॥

कंदर्पप्रसरप्रशान्तिविधये शीलं न संशीलितं
लोभोन्मूलनहेतवे स्वविभवो दत्तो न पात्रे मुदा ।
व्यामोहोन्मथनाय सद्गुरुगिरां तत्त्वं न चाङ्गीकृतं
दुष्प्रापो नृभवो मया हतधिया हा हारितो हारितः ॥ ४३ ॥

सौख्यं मित्रकलत्रपुत्रविभवभ्रंशादिभिर्भङ्गुरं
कासश्वासभगंदरादिभिरिदं व्याप्तं वपुर्व्याधिभिः ।
भ्रातस्तूर्णमुपैति संनिधिमसौ कालः करालाननः
कष्टं किं करवाण्यहं तदपि यच्चित्तस्य पापे रतिः ॥ ४४ ॥

संसारे गहनेऽत्र चित्रगतिषु भ्रान्त्यानया सर्वथा
रे रे जीवन सोऽस्ति कश्चन जगन्मध्ये प्रदेशो ध्रुवम् ।
यो नासस्तव भूरिजन्ममरणैस्तत्किं न तेऽद्यापि ही
निर्वेदो हृदि विद्यते यदनिशं पापक्रियायां रतिः ॥ ४५ ॥

नो स्कन्धेन समुन्नतेन धरसे चारित्रगन्त्र्या धुरं
पृष्ठेनोपचितेन नैव वहसे प्रोच्चैरहिंसाभरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिथ्या त्वन्निवयं (?) पदाहतिवशाद्धो गाहसे त्वं यत-
श्चेतस्तद्गतशङ्क साङ्कवृषवन्निन्द्यं परिभ्राम्यसि ॥ ४६ ॥
प्राप्ते सत्कुलजन्ममानवभवे निर्दोषरत्नोपमे
नीरोगादिसमस्तवस्तुनिचये पुण्येन लब्धे सति ।
नोपात्तं किमपि प्रमादवशतस्तत्त्वं त्वया मुक्तये
रे जीवात्र ततोऽतिदुःखविषमे संसारचक्रे भ्रमः ॥ ४७ ॥
क्रोधो न्यक्कृतिभाजनं न विहतो नीतो न मानः क्षयं
माया नैव हता हताश नितरां लोभो न संक्षोभितः ।
रे तीव्रोत्कटकूटचित्तवशग स्वान्त त्वया हारितं
हस्ताप्तं फलमाशु मानवभवश्रीकल्पवृक्षोद्भवम् ॥ ४८ ॥
बाल्ये मोहमहान्धकारगहने मग्नेन मूढात्मना
तारुण्ये तरुणीसमाहृतहृदा भोगैकसंगेच्छुना ।
वृद्धत्वेऽपि जराभिभूतकरणग्रामेण निःशक्तिना
मानुष्यं किल दैवतः कथमपि प्राप्तं हतं हा मया ॥ ४९ ॥
यस्मै त्वं लघु लङ्घसे जलनिधिं दुष्टाटवीं गाहसे
मित्रं वञ्चयसे विलुम्पसि निजं वाक्यक्रमं मुञ्चसि ।
तद्वित्तं यदि दृश्यते स्थिरतया कस्यापि पृथ्वीतले
रे रे चञ्चलचित्त वित्तहतक व्यावर्ततां (?) मे तदा ॥ ५० ॥
अज्ञानाद्रितटे क्वचित्क्वचिदपि प्रद्युम्नगर्तान्तरे
मायागुल्मतले क्वचित्क्वचिदहो निन्दानदीसंकटे ।
मोहव्याघ्रभयातुरं हरिणवत्संसारघोराटवी-
मध्ये धावति पश्य सत्वरतरं कष्टं मदीयं मनः ॥ ५१ ॥
सच्चारित्रपवित्रदारुरचितं शीलध्वजालंकृतं
गुर्वाज्ञागुणगुम्फनाद्दृढतरं सद्बोधपोतं श्रितः ।
मोहग्राहभयंकरं तर महासंसारवारांनिधिं
यावन्न प्रतिभिद्यते स्तनतटाघातैः कुरङ्गीदृशाम् ॥ ५२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं भस्मप्रतिलेपनेन वपुषो धूमस्य पानेन किं
वस्त्रत्यागजुगुप्सया किमनया किं वा त्रिदण्डाप्यहो ।
किं स्कन्धेन नतेन कम्बलभराज्जापस्य किं मालया
वामाक्षीमभिधावमानमनिशं चेतो न चेद्रक्षितम् ॥ ९३ ॥

रोद्धुं बालमृणालतन्तुभिरसौ मत्तेभमुज्जृम्भते
भेत्तुं वज्रमणीञ्शिरीषकुसुमप्रान्तेन संनह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः सतां पथि खलान्सूक्तैः सुधास्यन्दिभिः॥९४॥

मुक्त्वा दुर्मतिमेदिनीं गुरुगिरा संशील्य शीलाचलं
बद्ध्वा क्रोधपयोनिधिं कुटिलतालङ्कां क्षपित्वा क्षणात् ।
नित्वा मोहदशाननं निधनतामाराध्य वीरव्रतं
श्रीमद्राम इव द्युमुक्तिवनितायुक्तो भविष्याम्यहम् ॥ ९५ ॥

आहारैर्मधुरैर्मनोहरतरैर्हारैर्विहारैर्वरैः
केयूरैर्मणिरत्नचारुशिखरैर्दारैरुदारैश्च किम् ।
प्राणान्पद्मदलाग्रवारितरलाञ्ज्ञात्वा जवाज्जीव रे
दानं देहि विधेहि शीलतपसी निर्वेदमास्वादय ॥ ९६ ॥

ज्ञात्वा बुद्बुदभङ्गुरं धनमिदं दीपप्रकम्पं वपु-
स्तारुण्यं तरलेक्षणाक्षितरलं विद्युच्चलं दोर्बलम् ।
रे रे जीव गुरुप्रसादवशतः किंचिद्विधेहि द्रुतं
दानध्यानतपोविधानविषयं पुण्यं पवित्रोचितम् ॥ ९७ ॥

श्रीखण्डपादपेनेव कृतं स्वं जन्म निष्फलम् ।
जिह्मगानां द्विजिह्वानां संबन्धमनुरुन्धता ॥ ९८ ॥

किं तर्केण वितर्कितेन शतशो ज्ञातेन किं छन्दसा
किं पीतेन सुधारसेन बहुधा स्वाध्यायपाठेन किम् ।
अभ्यस्तेन च लक्षणेन किमहो ध्यानं न चेत्सर्वथा
लोकालोकविलोकनैककुशलज्ञाने हृदि ब्रह्मणः ॥ ९९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मां बाल्यादपि निर्निमित्तनिबिडप्रोद्भूतसख्यश्रियं
दम्भारम्भ विहाय सत्वरतरं दूरान्तरं गम्यताम् ।
पश्योन्मीलति मेऽधुना शुभवशाज्ज्ञानोष्णरश्मिप्रभा
प्रालेयोत्करवद्भवन्त(द्भवतं त)मनया द्रक्ष्याम्यहं त्वां कथम्॥६०॥

कारुण्यान्न सुधारसोऽस्ति हृदय द्रोहान्न हालाहलं
वृत्तादस्ति न कल्पपादप इह क्रोधान्न दावानलः ।
संतोषादपरोऽस्ति न प्रियसुहृल्लोभान्न चान्यो रिपु-
र्युक्तायुक्तमिदं मया निगदितं यद्रोचते तत्त्यज ॥ ६१ ॥

औचित्यांशुकशालिनीं हृदय हे शीलाङ्गरागोज्ज्वलां
श्रद्धाध्यानविवेकमण्डनवतीं कारुण्यहाराङ्किताम् ।
सद्बोधाञ्जनरञ्जिनीं परिलसच्चारित्रपत्राङ्कुरां
निर्वाणं यदि वाञ्छसीह परमक्षान्तिप्रियां तद्भज ॥ ६२ ॥

यत्रार्तिर्न मतिभ्रमो न न रतिः ख्यातिर्न नैवोन्नति-
र्न व्याधिर्न धनं·········· न वधो ध्यानं न नाध्येषणा ।
नो दास्यं न विलास·······वदनं हास्यं च लास्यं च नो
तत्सांसारिकपुण्यपापरहितं ध्येयं पदं धीधनाः ॥ ६३ ॥

तावद्भानुकराः प्रकाशनपरा यक्षेश्वरोऽप्यर्थवा-
न्संपूर्णेन्दुमुखीप्रिया प्रियमहीमाधुर्यहृद्या च···· ।
························································
························································ ॥ ६४ ॥

························································ हृदये ।
मन्त्ररहस्योद्गारी मन्त्रीव स दूरतस्त्याज्यः ॥ ६५ ॥

धर्मोऽयं निहतः प्रमादवशतः प्राप्तेऽपि मानुष्यके
कार्पण्येन विडम्बितौ सति धने यैरर्थकामावपि ।
अत्यन्तं चलचित्तनिग्रहपरैरप्याप्यते वा न वा
मोक्षः शाश्वतिकः प्रसादसदनं तेषां दवीयान्पुनः ॥ ६६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आकाशेऽपि चिराय ति[ष्ठति] शिला मन्त्रेण तन्त्रेण वा
बाहुभ्यामपि तीर्यते जलनिधिर्वेधाः प्रसन्नो यदा ।
दृश्यन्ते ग्रहयोगतः सुरपथे प्राह्णेऽपि ताराः स्फुटं
हिंसायां पुनराविरस्ति नियतं गन्धोऽपि न श्रेयसः ॥ ६७ ॥

निशानां च दिनानां च यथा ज्योतिर्विभूषणम् ।
सतीनां च यतीनां च तथा शीलमखण्डितम् ॥ ६८ ॥

मायया राजते वेश्या शीलेन कुलबालिका ।
न्यायेन मेदिनीनाथः सदाचारतया यतिः ॥ ६९ ॥

यावद्व्याधिविवाधया विधुरतामङ्गं न संसेवते
यावच्चेन्द्रियपाटवं न हरति क्रूरा जरा राक्षसी ।
तावन्निष्कलनिश्चलामलपदं कर्मक्षयायाधुना
ध्येयं ध्यानविचक्षणैः स्फुटतरं हृत्पद्मसद्मोदरे ॥ ७० ॥

अज्ञानावृतचेतसो मम महाव्यामूढतां ........
कृत्वा धर्मधनं हृतं यदनिशं वाराणसीधूर्तवत् ।
युक्तं तद्विहितं त्वयेदमपि ते युक्तं भवेद्धि द्रुतं
मां पुण्याप्तगुरुप्रसादमधुना संत्यज्य निर्गच्छ रे ॥ ७१ ॥

तन्नो नागपतेर्भुजंगवनिताभोगोपचारैः परै-
स्तन्नो श्रीसविलाससंगमशतैः सारैर्मुरारेः किल ।
तन्नो वज्रधरस्य देववनिताक्रीडारसैर्निर्भरै-
र्यत्सौख्यं बत वीतकाममनसां तत्त्वार्थतो योगिनाम् ॥ ७२ ॥

मध्यक्षामतया योषित्तपः क्षामतया यतिः ।
मुखक्षामतया चाश्वो राजते न तु भूषणैः ॥ ७३ ॥

तन्व्या श्रोत्ररसा[यनेन वचसा] सप्रेम संभाषितः
सर्पत्कोपविपाकपाटलरुचा संवीक्षितश्चक्षुषा ।
सद्योगान्न तिलाग्रमात्रमपि यः संक्षोभितुं शक्यते
रागद्वेषविवर्जितो विजयते कोऽप्येष योगीश्वरः ॥ ७४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आताम्रायतलोचनातुरमिदं न्यक्कारवाङ्निन्दितं
बद्धभ्रूकुटिभालभीममधरप्रस्पन्ददुर्दर्शनम्।
व्यालोलालकसंकुलं कृशतनोः कोपेऽपि कान्तं मुखं
पश्यन्ति स्मरविह्वलीकृतहृदो ही कामिनां मूढता॥ ७५॥
कौशल्यं प्रविलीयते विकलता सर्वाङ्गमाश्लिष्यते
ज्ञानश्रीः प्रलयं प्रयाति कुमतिः प्रागल्भ्यमभ्यस्यति।
धर्मोऽपि प्रपलायते कलयति स्थेमानमंहः परं
यस्माच्छोकवशात्कथं स विदुषां संसेवितुं युज्यते॥ ७६॥
क्व कफार्तं मुखं नार्याः क्व पीयूषनिधिः शशी।
आमनन्ति तयोरैक्यं कामिनो मन्दबुद्धयः॥ ७७॥
पाशे कुरङ्गनिवहो न पतत्यविद्वा-
न्दाहात्मतामकलयञ्शलभः प्रदीपे।
जानन्नहं पुनरमून्करिकर्णलोला-
न्भोगांस्त्यजामि न तथापि क एष मोहः॥ ७८॥
ज्ञानमेव परं मित्रं काम एव परः परः।
अहिंसैव परो धर्मो योषिदेव परा जरा॥ ७९॥
धिक्कंदर्प जगत्त्रयीविजयिनो दोःस्थामविस्फूर्जितं
विद्वान्कः किल तावकीनमधुना व्यालोकतामाननम्।
दृष्ट्वा यौवनमित्र·········भवान्सपञ्जराराक्षसी-
वक्रान्तःपतितं विमुञ्चति न यः कोदण्डकेलिक्रमम्॥ ८०॥
तृष्णावारितरङ्गभङ्गविलसत्कौटिल्यवल्लीरुह-
स्तिर्यक्प्रेक्षितवाक्प्रपञ्चकबरीपाशभ्रुवः पल्लवाः।
यस्यां मान्ति न तुच्छके हृदि ततः स्थानं बहिः कुर्वते
कस्तांश्चञ्चलचक्षुषः कुशलधीः संसेवितुं वाञ्छति॥ ८१॥
रे रे मोहहताश तावकमिदं धिक्पौरुषोज्जृम्भितं
विस्रब्धं भवसागरे किल भवान्संयम्य मां क्षिप्तवान्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संप्रत्याप्तगुरूपदेशफलकः पारं प्रयातोऽस्म्यहं
शौटीर्यं तव विद्यते यदधुना दोष्णोस्तदा दर्शय ॥ ८२ ॥
रे कंदर्प किमाततज्यमधुना धत्से धनुस्त्वं मुधा
किं भ्रूलास्यकलासु पक्ष्मलदृशः प्रागल्भ्यमभ्यस्यथ ।
वैराग्याम्बुजिनीप्रबोधनपटुः प्रध्वस्तदोषाकरः
खेलत्येष विवेकचण्डकिरणः कस्त्वादृशामुत्सवः ॥ ८३ ॥
अन्यं प्रियालापपथं नयन्ते किंचित्कटाक्षैरपरं स्पृशन्ति ।
अन्यं हृदा कंचन मन्त्रयन्ते धिग्योषितां चञ्चलचित्तवृत्तिम् ॥ ८४ ॥
याच्ञायै वचनक्रमं रचयतः पादौ परिभ्रान्तये
नेत्रे रोषकषायितानि वदनान्यालोकितुं स्वामिनाम् ।
धातश्चेन्न दयालुता तव हृदि स्थानं बबन्ध क्षणं
तत्किं हन्त परिश्रमोऽपि निकटीभूयं(?) न संपन्नवान् ॥८५॥
रक्षाकृते धनलवस्य विमूढचेता
लो[भाज्जनः] किमपि संतनुते प्रयत्नम् ।
तल्लक्षकोटिभिरनाप्यमपीदमायुः
कालो निकृन्तति न तन्ननु शङ्कतेऽपि ॥ ८६ ॥
बन्धो क्रोध विधेहि किंचिदपरं स्वस्याधिवासास्पदं
भ्रातर्मान भवानपि प्रचलतु त्वं देवि माये व्रज ।
हंहो लोभ सखे यथाभिलषितं गच्छ द्रुतं वश्यतां
नीतः शान्तरसस्य संप्रति लसद्वाचा गुरूणामहम् ॥ ८७ ॥
मनो न वैराग्यतरङ्गितं चेद्वृथा तदा दानतपःप्रयासः ।
लावण्यमङ्गे यदि नाङ्गनानां मुधा तदा विभ्रमवल्गितानि ॥ ८८ ॥
विश्वाः कलाः परिचिता यदि तास्ततः किं
तप्तं तपो यदि तदुग्रतरं ततः किम् ।
कीर्तिः कलङ्कविकला यदि सा ततः कि-
मन्तर्विवेककलिका यदि नोल्लास ॥ ८९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्फूर्जल्लोभकरालवक्रकुहरो हुंकारगुञ्जारवः
कामक्रोधविलोललोचनयुगो मायानखश्रेणिभाक् ।
स्वैरं यत्र स बम्भ्रमीति सततं मोहाह्वयः केसरी
तां संसारमहाटवीं प्रतिवसन्को नाम जन्तुः सुखी ॥ ९० ॥

एकः स वैवस्वत एव देवः शौटीर्यशाली च महाव्रती च ।
पशौ च गीर्वाणपतौ च यस्या विभिन्नमुद्रस्य दृशः पतन्ति ॥९१॥

एतानि तानि मदनज्वलनेन्धनानि
दूरीकुरुष्व मयि वक्रविलोकितानि ।
उन्मीलति स्म ललिताङ्ग्यधुना स एव
मन्मानसे शुचिविवेककलाविलासः ॥ ९२ ॥

प्रत्यक्षो नरकः स एष वसुधापीठे परायत्तते-
त्येवं पूत्कुरुते जनः प्रतिकलं सर्वोऽपि विद्वानिह ।
तन्नारी (?) वशवर्तिनोऽपि विषयान्कण्डूतिकल्पानयं
रोमाञ्चाङ्कुरचर्विताङ्गलतिकः किं नाम नैवोज्झति ॥ ९३ ॥

ता एवैताः कुवलयदृशः सैष कालो वसन्त-
स्ता एवान्तः शुचिवनभुवस्ते वयं ते वयस्याः ।
किं तूद्भूतः स खलु हृदये तत्त्वदीपप्रकाशो
येनेदानीं हसति हृदयं यौवनोन्मादलीलाः ॥ ९४ ॥

को देवो वीततमाः कः सुगुरुः शुद्धमार्गसंभाषी ।
किं परमं विज्ञानं स्वकीयगुणदोषविज्ञानम् ॥ ९५ ॥

यत्कारुण्यहिरण्यजं न न च यत्सन्मार्गताम्रोद्भवं
नो यत्संयमलोहजन्म न च यत्संतोषमृत्स्नामयम् ।
यद्योग्यं न तपोविधानदहनज्वालावलीतेजसां
सिद्धिं याति कथं नृधान्यनिकरस्तस्मिन्कुपात्रे श्रितः ॥ ९६ ॥

हे मोहाहत जीव हुं शृणु वचः श्रद्धास्ति चेत्कथ्यतां
प्राप्तं किंचन सत्फलं भवमहाटव्यां त्वया भ्राम्यता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रातर्नैव तथाविधं किमपि तन्निर्वाणदं तर्हि किं
शून्यं पश्यसि पङ्गुवन्ननु गतं नोपक्रमे तिष्ठति ॥ ९७ ॥
शौक्ल्ये हंसबकोटयोः सति समे यद्वद्गतावन्तरं
कार्ष्ण्ये कोकिलकाकयोः किल यथा भेदो भृशं भाषिते ।
पैत्ये हेमहरिद्रयोरपि यथा मूल्ये विभिन्नार्घता
मानुष्ये सदृशे तथार्यखलयोर्दूरं विभेदो गुणैः ॥ ९८ ॥
त्वद्दृष्टिपातनिहताः खलु तेऽन्य एव
धैर्यव्रतं सुतनु ये परिमार्जयन्ति ।
अन्ये त्वमी शुचिविवेकपवित्रचित्ता-
स्तत्किं विडम्बयसि मन्मथविभ्रमैः स्वम् ॥ ९९ ॥
संपत्स्यते मम कदाचन तद्दिनं किं
सद्ध्यामरूढमनसः सततं भवेयुः ।
आनन्दबिन्दुविशदानि सुधामयानि
यत्रेक्षितानि मयि मुक्तिमृगेक्षणायाः ॥ १०० ॥
ललितं सत्यसंयुक्तं सुव्यक्तं सततं मितम् ।
ये वदन्ति सदा तेषां स्वयं सिद्धैव भारती ॥ १०१ ॥
सिक्तः श्रीजिनवल्लभस्य सुगुरोः शान्तोपदेशामृतैः
श्रीमन्नागपुरे चकार सदनं श्रीनेमिनाथस्य यः ।
श्रेष्ठी श्रीधनदेव इत्यभिधया ख्यातश्च तस्याङ्गजः
पद्मानन्दशतं(इति) व्यधत्त सुधियामानन्दसंपत्तये ॥ १०२ ॥
संपूर्णेन्दुमुखीमुखे न च न च श्वेतांशुबिम्बोदये
श्रीखण्डद्रवलेपने न च न च द्राक्षारसास्वादने ।
आनन्दः स सखे न च क्वचिदसौ किं भूरिभिर्भाषितैः
पद्मानन्दशते श्रुते किल मया यः स्वादितः स्वेच्छया ॥ १०३ ॥

इति श्रीपद्मानन्दप्रणीतं वैराग्यशतकम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीजिनप्रभसूरिविरचितः
# सिद्धान्तागमस्तवः[1] ।

सावचूरिः ।

ध्यायन्ति श्रीविशेषाय गतावेशा लयेन यम् ।
स्तुतिद्वारा जयश्रीदः श्रीवीरगुरुगो रवः ॥

पुरा श्रीजिनप्रभसूरिभिः प्रतिदिनं नवस्तवनिर्माणपुरःसरं निरवद्याहारग्रहणाभिग्रहवद्भिः प्रत्यक्षपद्मावतीदेवीवचसामभ्युदयिनं श्रीतपागच्छं विभाव्य भगवतां श्रीसोमतिलकसूरीणां स्वशैक्षशिष्यादिपठनविलोकनाद्यर्थं यमकश्लेषचित्रच्छन्दोविशेषादिनवनवभङ्गीसुभगाः सप्तशतीमिताः स्तवा उपदीकृता निजनामाङ्किताः । तेष्वयं सर्वसिद्धान्तस्तवो बहूपयोगित्वाद्विव्रियते—

नत्वा गुरुभ्यः श्रुतदेवतायै सुधर्मणे च श्रुतभक्तिनुन्नः ।
निरुद्धनानावृजिनागमानां जिनागमानां स्तवनं तनोमि ॥ १ ॥

गुरुभ्यः श्रुतदेवतायै सरस्वत्यै सुधर्मणे च पञ्चमगणधराय नत्वा । त्रिषु नतिक्रिया । 'अभिप्रेयत्वाच्चतुर्थी' इति सूत्रेण संप्रदानाच्चतुर्थी । श्रुतभक्तिप्रेरितोऽहं निरुद्धा रुद्धा नाना अविरतिकषायादिभिर्बहुविधानां वृजिनानां पापानामागमाः प्रसरणानि यैस्तेषां जिनागमानां श्रीवीरसिद्धान्तानां स्तवनं तनोमि करोमि ॥

सामायिकादिकषडध्ययनस्वरूप-
मावश्यकं शिवरमावदनात्मदर्शम् ।
निर्युक्तिभाष्यवरचूर्णिविचित्रवृत्ति-
स्पष्टीकृतार्थनिवहं हृदये वहामि ॥ २ ॥

अवश्यकरणादावश्यकम् । सामायिकादिकानि सामायिक-चतुर्विंशतिस्तव-वन्दनक-प्रतिक्रमण-कायोत्सर्ग-प्रत्याख्यानरूपाणि यानि षडध्ययनानि तत्स्वरूपम् । शिवरमाया (मोक्षलक्ष्म्याः) वदनात्मदर्शं दर्पणतुल्यम् । पुनः किंविशिष्टम् । निर्युक्तिः श्रीभद्रबाहुकृता एकत्रिंशच्छतप्रमाणा । भाष्यं सूत्रार्थप्रपञ्चनम् । वरावचूर्णिरष्टादशसहस्रप्रमाणा पूर्वर्षिविहिता । विचित्रवृत्तिरनुगतार्थकथनं द्वाविंशतिसहस्रप्रमाणम् । एताभिः स्पष्टीकृतोऽर्थनिवहो यस्य तथाविधं हृदये वहामि स्मरामि ॥

युक्तिमुक्तास्वातिनीरं प्रमेयोर्मिमहोदधिम् ।
विशेषावश्यकं स्तौमि महाभाष्यापराह्वयम् ॥ ३ ॥

---

१. स्तोत्रस्यास्यैकमेवाष्टपत्रात्मकं सटीकं पुस्तकं संवेगिसाधुवरश्रीशान्तिविजयमुनीनां सकाशादधिगतम्. तच्च नातिशुद्धं शतवर्षप्राचीनमिवानुमीयते. तदाधारेणैतन्मुद्रणं विहितमस्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तय एव मुक्ता मौक्तिकानि तासां निष्पादकत्वात्स्वातिनीरम् । प्रमेयाः पदार्थास्त एवोर्मयः कल्लोलास्तेषां महोदधिम् । महाभाष्यमित्यपर आह्वयो यस्य तद्विशेषावश्यकं स्तौमि ॥

दशवैकालिकं मेरुमिव रोचिष्णुचूलिकम् ।
प्रीतिक्षेत्रं सुमनसां सत्कल्याणमयं स्तुमः ॥ ४ ॥

विकालेनापराह्णरूपेण निर्वृत्तानि वैकालिकानि दशाध्ययनानि यत्र तत् शय्यंभवसूरिकृतं दशवैकालिकं मेरुमिव रोचिष्णू चूलिके इह खञ्चूलिपञ्रूपे यत्र । पक्षे चत्वारिंशद्योजनमाना । सुमनसामुत्तमानां पक्षे देवानां प्रीतिस्थानम् । सत्कल्याणमयं श्रेयोमयं पक्षे सुवर्णमयं स्तुमः ॥

उद्धामुपोद्धातविकल्पकालभेदप्रभेदप्रतिभेदरूपाम् ।
मिताभिधानाममिताभिधेयां नौम्योघनिर्युक्तिममोघयुक्तिम् ॥ ५ ॥

उद्धां प्रशस्यां मिताभिधानां स्तोकशब्दाममिताभिधेयां बह्वर्थाममोघयुक्तिं सफलयुक्तिमोघनिर्युक्तिं नौमि स्तौमि । किंविशिष्टाम् । उपोद्घातः शास्त्रस्यादिस्तस्य विकल्पा द्वाराणि 'उद्देसे निद्देसे निग्गमे' इत्यादीनि षड्विंशतिः । तत्र विकल्परूपास्तस्य भेदा एकादश नामस्थापनाद्रव्यादयः 'दव्वे अद्धअहाउ अउवक्कमे इत्यादिगाथोक्तास्तेषु षष्ठभेदस्योपक्रमकालस्य प्रभेदौ सामाचार्युपक्रमकालः यथायुष्कोपक्रमकालश्च । तयोः प्रथमस्य त्रयः प्रतिभेदाः ओघसामाचारी इच्छाकारादिदशविधसामाचारी पदविभागसामाचारी च त्रिषु ओघःसामान्यं संक्षेपाभिधानरूपा सामाचारी तद्रूपा ओघनिर्युक्तिः श्रीभद्रबाहुस्वामिना नवमपूर्वात्तृतीयादाचाराभिधवस्तुनो विंशतितमप्राभृतान्निर्व्यूढा सांप्रतिकसाधूनां हितायास्मिन्काले स्थिरीकृता श्रीआवश्यकनिर्युक्तौ गणधरवादस्याग्रे संप्रति च सुखपाठाय पृथग्ग्रन्थरूपा विहितास्ति ताम् ॥

पिण्डविधिप्रतिपत्तावखण्डपाण्डित्यदानदुर्ललिताम् ।
ललितपदश्रुतिमिष्टामभिष्टुमः पिण्डनिर्युक्तिम् ॥ ६ ॥

पिण्डस्याहारस्य विधिर्दोषरहितत्वेन विशुद्धस्तज्ज्ञाने संपूर्णकौशलवितरणसक्तां ललितानां सुकोमलानां पदानां श्रुतिः श्रवणं तया मिष्टां(मृष्टां) मधुरां पिण्डनिर्युक्तिं वयमभिष्टुमः ॥

प्रवचननाटकनान्दी प्रपञ्चितज्ञानपञ्चकसतत्त्वा ।
अस्माकममन्दतमं कन्दलयतु नन्दिरानन्दम् ॥ ७ ॥

प्रवचनं जिनमतमेव नाटकं तत्र नान्दी द्वादशतूर्यनिर्घोषः । तन्मूलत्वान्नाटकस्य । प्रपञ्चितं प्रकटीकृतं ज्ञानपञ्चकस्य मतिश्रुतावधिमनःपर्ययकेवलज्ञानरूपस्य सतत्त्वं स्वरूपं यया सा नन्दिरस्माकममन्दतमं बहुतरमानन्दं कन्दलयतु वर्धयतु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अनुयोगद्वाराणि** द्वाराणीवापुनर्भवपुरस्य ।
जीयासुः श्रुतसौधाधिरोहसोपानरूपाणि ॥ ८ ॥

श्रुतमेव सौधं गृहं तदरोहे सोपानरूपाणि अपुनर्भवपुरस्य मोक्षनगरस्य द्वाराणीवानुयोगद्वाराणि जीयासुः ॥

अनवमनवमरससुधाह्लादिनीं **षट्त्रिंशदुत्तराध्ययिनीम्** ।
अञ्चामि पञ्चचत्वारिंशत**मृषिभाषितानि** तथा ॥ ९ ॥

अनवमो रम्यो यो नवमो रसः शान्ताख्यः स एव सुधामृतं तस्य ह्रदिनीं नदीं षट्त्रिंशद्यान्युत्तराणि प्रधानान्यध्ययनानि [यस्यां] तामहमञ्चयामि पूजयामि । तथा पञ्चचत्वारिंशतं श्रीनेमिपार्श्वश्रीवीरतीर्थवर्तिभिर्नारदादिभिः प्रणीतानध्ययनविशेषान् ॥

उच्चैस्तरोदञ्चितपञ्चचूड**माचार**माचारविचारचारु ।
महापरिज्ञास्थनभोगविद्यमाद्यं प्रपद्ये गमनं गजेन्द्रम् ॥ १० ॥

आचारविचारचारु योगानुष्ठानपूर्वं यथा स्यादेवम् आचारप्रतिपादकत्वादाचारं नामाद्यमङ्गमहं प्रपद्ये श्रये । किंविशिष्टम् । उच्चैस्तरा: शब्दार्थाभ्यामतिशायिन्य उदञ्चिताः प्रकटीकृता पञ्च चूडा येन तत् । उक्तशेषानुवादिनोऽधिकारविशेषाश्चूडासंज्ञाः । पुनः किंविशिष्टम् । महापरिज्ञानामाध्यायनं तत्रस्था आकाशगामिनीविद्या तस्य । तत एवोद्धृत्य श्रीवज्रस्वामिना प्रभावना कृता ॥

त्रिषष्टिसंयुक्तशतत्रयीमितप्रवाददर्पाद्रिविभेदह्लादिनीम् ।
द्वयश्रुतस्कन्धमयं शिवश्रिये कृतस्पृहः **सूत्रकृदङ्ग**माद्रिये ॥ ११ ॥

श्रुतस्कन्धद्वयरूपं सूत्रकृदङ्गं शिवश्रिये कृतस्पृहोऽहमाद्रिये आश्रयामि । किंविशिष्टम् । त्रिषष्ट्यधिकशतत्रयीमिता ये प्रवादिनः क्रियावादिप्रभृतयस्तेषां दर्पाद्रिविभेदे ह्लादिनीं वज्रसमम् ॥

**स्थानाङ्गाय** दशस्थानस्थापिताखिलवस्तुने ।
नमामि कामितफलप्रदानसुरशाखिने ॥ १२ ॥

कामितफलप्रदानसुरशाखिने तिष्ठन्ति प्रतिपाद्यजीवादयः पदार्था [येषु] इति स्थानान्यधिकारविशेषाः । तथाहि—'तनुइन्दा..............कम्म बन्धन्ति' इत्यादयः । एवमेतेषु दशस्थानेषु स्थापितान्यखिलवस्तूनि यत्र तस्मै स्थानाङ्गायाहं नमामि । 'विवक्षातः कारकाणि भवन्ति' इति न्यायात्स्थानाङ्गायेति संप्रदानम् ॥

तत्तत्संख्याविशिष्टार्थप्ररूपणपरायणम् ।
संस्तुमः **समवायाङ्गं** समवायैः स्तुतं सताम् ॥ १३ ॥

तास्ता एकादिदशान्ताः संख्यास्ताभिर्विशिष्टा येऽर्थास्तेषां प्ररूपणं कथनं तत्र परायणं तत्परं सतां समवायैः समूहैः स्तुतं समवायाङ्गं वयं स्तुमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



या षट्त्रिंशत्सहस्रान्प्रतिविधिसजुषां बिभ्रती प्रश्नवाचां
चत्वारिंशच्छतेषु प्रथयति परितः श्रेणिमुद्देशकानाम् ।
रङ्गद्भङ्गोत्तरङ्गानयगमगहना दुर्विगाहा **विवाह-**
**प्रज्ञप्ती** पञ्चमाङ्गं जयति भगवती सा विचित्रार्थकोषः ॥ १४ ॥

या प्रतिविधिरुत्तरं तेन सहितानां प्रश्नवाचां षट्त्रिंशत्सहस्रान्बिभ्रती दधती या चत्वारिंशच्छतेष्वधिकारविशेषेषूद्देशकानां श्रेणिं परितः सर्वतः प्रथयति सा विवाहप्रज्ञप्ती नाम्नी पञ्चमाङ्गं रङ्गन्तो ये भङ्गा रचनाविशेषास्तैरुत्तरङ्गा उत्कल्लोला तया युक्तयो गमाः सदृशपाठास्तैर्गहना ग्रन्थिला अकुशलैर्दुर्विगाहा विचित्रार्थकोषो जयति । भगवतीति पूज्याभिधानम् ॥

कथानकानां यत्रार्धचतस्रः कोटयः स्थिताः ।
सोत्क्षिप्तादिज्ञातहृद्या **ज्ञातधर्मकथाः** श्रये ॥ १५ ॥

यत्रार्धचतस्रः कथानकानां कोटयः स्थिता सा ज्ञातधर्मकथा नाम षष्ठमङ्गमुत्क्षिप्तादिभिर्ज्ञातैर्दृष्टान्तैर्हृद्या श्रियेऽस्तु (श्रये) ॥

आनन्दादिश्रमणोपासकदशकेतिवृत्तसुभगार्थाः ।
**विशदामुपासकदशा** भावदृशं मम दिशन्तु सदा ॥ १६ ॥

आनन्दादयः श्रमणोपासकास्तेषां दशकं तस्येतिवृत्तानि चरितानि तैः सुभागार्थी उपासकदशा नाम सप्तमाङ्गं विशदां भावदृशं मम सदा दिशन्तु ॥

महर्षिमहासतीनां गौतमपद्मावतीपुरोगाणाम् ।
अधिकृतशिवान्तसुकृताः **स्मरतोच्चैरन्तकृद्दशाः** कृतिनः ॥ १७ ॥

गौतमपद्मावतीप्रमुखाणां महर्षीणां महासतीनामधिकृतानि प्रकटितानि शिवान्तानि सुकृतानि यासु ता अन्तकृद्दशा हे कृतिनः, उच्चैर्यूयं स्मरत ॥

गुणैर्यदध्ययनकलापकीर्तिता अनुत्तरा प्रशमिषु जालिमुख्यकाः ।
अनुत्तरश्रियमभजन्**ननुत्तरोपपातिकोपपददशाः** श्रयामि ताः ॥१८॥

यदध्ययनकलापे कीर्तिताः कथिताः प्रशमिषु ऋषिषु गुणैश्चारित्रादिभिरनुत्तराः प्रधानाः । जालिमुख्यका जालिर्नाम ऋषिः स एव मुख्यो येषां ते जालिमुख्यकाः । स्वार्थे कप्रत्ययः । अणुत्तराणि विजयादीनि पञ्चविमानानि तेषां श्रियमभजन् । अनुत्तरोपपातिकमित्युपपदं पूर्वपदं यासां ता अनुत्तरोपपातिकदशा अहं श्रयामि ॥

अङ्गुष्ठाद्यवतरदिष्टदेवतानां विद्यानां भवनमुदात्तवैभवानाम् ।
निर्णीताश्रयविधिसंवरस्वरूपा **प्रश्नव्याकरणदशा** दिशन्तु शं नः ॥१९॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अङ्गुष्ठादिषु आदिशब्दाद्दीपजलादिष्ववतारोऽवतरणं तेन दिष्टाः कथिता देवता यासां तासामुदात्तवैभवानामुत्कृष्टमहिम्नां विद्यानां भवनं स्थानम् । आश्रवविधिः कर्म पुद्गलानां संवरस्तन्निरोधः । निर्णीतं तयोः स्वरूपं यासु ताः प्रश्नव्याकरणदशा दशमाङ्गं नोऽस्माकं शं सुखं दिशतु ॥

ज्ञातैर्मृगापुत्रसुबाहुवादिभिः शासद्विपाकं सुखदुःखकर्मणाम् ।
द्विः पङ्क्तिसंख्याध्ययनोपशोभितं श्रीमद्विपाकश्रुतमस्तु नः श्रिये ॥ २० ॥

मृगापुत्रसुबाहुवादिभिर्दृष्टान्तैः सुखदुःखकर्मणां विपाकं परिणामं शासच्छिक्षयत् । ज्ञापयदित्यर्थः । केषाम् । भव्यजीवानामिति गम्यम् । विंशत्यध्ययनालंकृतं श्रीमद्विपाकश्रुतमेकादशमङ्गं नः श्रियेऽस्तु । सुबाहुवादिभिरित्यत्र 'इवर्णादेः' इत्यनेन सूत्रेण परतो वत्वम् । एतान्यप्येकादशान्यङ्गानि श्रीसुधर्मस्वामिना रचितानि । अन्येषां गणभृतां पूर्वनिर्वृतत्वेन सर्वगणधरशिष्याणामेतद्वाचनाग्रहणात् । अत एवादौ श्रीसुधर्मा नमस्कृतः ॥

प्रणिधाय यत्प्रवृत्ता शास्त्रान्तरवर्णनातिदेशततिः ।
नमतौपपातिकं तत्प्रकटयदुपपादवैचित्रीम् ॥ २१ ॥

यत्प्रणिधाय स्मृत्वा शास्त्रान्तरेषु पदार्थवर्णनातिदेशनाततिः श्रेणिः प्रवृत्ताः । अतिदेशोऽन्यत्र विस्तरेण प्ररूपितस्य वस्तुनः संक्षेपेण कथनम् । तदुपपातिकमाचाराङ्गोपाङ्गं देवनारकाणामुपपाद उत्पादस्तस्य वैचित्रीं प्रकटयत् हे विद्वांसः, यूयं नमत । आचाराङ्गस्य शास्त्रपरिज्ञाध्ययनाख्ये द्वे शतके । सूत्रमिदं 'एवमेगे सिनोनायं भवइ' इत्यादि । अत्र सूत्रे यदौपपातिकत्वमात्मनो निर्दिष्टं तदत्र प्रपञ्चयत इत्यर्थः । अङ्गस्योपसमीप उपाङ्गम् ॥

सूर्याभवैभवविभावनहृष्टतीर्थ-
प्रश्नादनन्तरमिनानननिर्गतेन ।
केशिप्रदेशिचरितेन विराजि राज-
प्रश्नीयमिद्धमुपपत्तिशतैर्महामि ॥ २२ ॥

सूर्याभदेवस्य वैभवमृद्धिस्तस्य विभावनेनेक्षणेन हृष्टं यत्तीर्थं प्रथमगणधरश्चतुर्विधः संघो वा तस्य प्रश्नात्पृच्छाया अनन्तरमिनस्य श्रीवीरस्याननं मुखं ततो निर्गतेन । केशी गणभृत् प्रदेशी च राजा तयोश्चरितेन विराजि शोभि । उपपत्तिशतैर्युक्तिशतैरिद्धं दीप्तं राजप्रश्नीयं सूत्रकृदुपाङ्गमहं महामि । प्रदेशी केशिना प्रतिबोधितो देवत्वमाप्य श्रीवीरं वन्दितुं समवसृतौ गतः तत्रात्यद्भुतं तस्य तेजो वीक्ष्य श्रीसंघेन प्रश्नः कृतः सर्वेभ्यो देवेभ्यो किमित्ययमुत्कृष्ट इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जीवाजीवनिरूपिद्वेधाप्रतिपत्तिनवककमनीयम् ।**
**जीवाभिगमाध्ययनं ध्यायेमासुगमगमगहनम् ॥ २३ ॥**

जीवाजीवनिरूपिण्यो या द्वेधा द्विप्रकाराः प्रतिपत्तयोऽधिकारास्तासां नवकेन रम्यम् । असुगमा विषमा ये गमास्तैर्गहनं जीवाभिगमाध्ययनं स्थानाङ्गोपाङ्गं ध्यायेम । जीवाना-मुपलक्षणादजीवानामप्यभिगमो ज्ञानं यत्र तत् ॥

**षट्त्रिंशता पदैर्जीवाजीवभावविभावनीम् ।**
**प्रज्ञापनां पनायामि श्यामार्यस्यामलं यशः ॥ २४ ॥**

षट्त्रिंशता पदैरधिकारैर्जीवाजीवभावप्ररूपिकां प्रज्ञापनां समवायाङ्गोपाङ्गं पनायामि स्तौमि । श्यामार्यस्य कालिकाचार्यस्यामलं यशः । तत्र तदधिकारात् ॥

**विवृताद्यद्वीपस्थितिजिनजनिमहचक्रिदिग्विजयविधये ।**
**भगवति जम्बूद्वीपप्रज्ञप्ते तुभ्यमस्तु नमः ॥ २५ ॥**

हे भगवति, जम्बूद्वीपप्रज्ञप्ते, पञ्चमाङ्गोपाङ्ग·········विवृता प्रकटिता आद्यद्वीपस्य स्थितिर्जिनजन्ममहश्चक्रिणो दिग्विजयविधिश्च यया सा । तुभ्यं नमोऽस्तु ॥

**प्रणमामि चन्द्रसूर्यप्रज्ञप्ती यमलजातके नव्ये ।**
**गुम्फवपुषैव नवरं नातिभिदार्थात्मनापि ययोः ॥ २६ ॥**

चन्द्रसूर्यप्रज्ञप्ती चन्द्रसूर्यविचारप्रतिपादके यमलजातके सहजाते नवरं केवलं गुम्फ-वपुषैव गुम्फेनैव नव्ये भिन्नग्रन्थरूपे अहं प्रणमामि । ययोरर्थात्मनापि नातिभिदा भेदः । अपिशब्दाच्छब्दतोऽपि ॥

**कालादिकुमाराणां महाहवारम्भसंभृतैर्दुरितैः ।**
**दर्शितनरकातिथ्या निरयावलिका विजेषीरन् ॥ २७ ॥**

कालादिदशकुमाराणां चेटककोणिकवैरे महाहवारम्भसंभृतैर्महायुद्धारम्भोपार्जितैः पापैर्दर्शितं नरकातिथ्यं नरकभवप्राप्तिर्याभिस्ता निरयावलिका विजेषीरन्विजयन्ताम् । तत्र कालादिकुमाराणां वर्णनात् ॥

**पद्मादयः कल्पवतंसभूयमुपेयिवांसः सुकृतैः शमीशाः ।**
**यत्रोदिताः श्रेणिकराजवंश्या उपास्महे कल्पवतंसिकास्ताः ॥ २८ ॥**

श्रेणिकराजवंश्याः पद्मादयः शमीशा ऋषयः सुकृतैः कल्पवतंसभूयं देवत्वमुपेयिवांसः प्राप्ता यत्रोदिताः कथितास्ताः कल्पवतंसिका वयमुपास्महे । ············ ॥

**चन्द्रसूर्यबहुपुत्रिकादिभिर्यत्र संयमविराधनाफलम् ।**
**भुज्यमानमगृणाद्गणाधिपः पुष्पिकाः शमभिपुष्पयन्तु नः ॥ २९ ॥**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्र संयमविराधनायाः फलं चन्द्रसूर्यौ राजानौ पूर्वभवे गृहीतदीक्षौ बहुपुत्रिकानपत्या पूर्वभवे प्रव्रजिता......'अगृणाज्जगाद ताः पुष्पिकाः शं सुखमभिपुष्पयन्तूत्फुल्लयन्तु । यत्र ग्रन्थेऽङ्गिनो गृहवासत्यागेन संयमभावपुष्पिता वर्णिताः (?) ॥

श्रीह्रीप्रभृतिदेवीनां चरित्रं यत्र सूत्रितम् ।
ताः सन्तु मे प्रसादानुकूलिकाः **पुष्पचूलिकाः** ॥ ३० ॥

श्रीह्रीप्रभृतिदेवीनां चरित्रं परिवारादिस्वरूपं यत्र सूत्रितं कथितं ताः पुष्पचूलिका मे मम प्रसादानुकूलिकाः प्रसादतत्पराः सन्तु ॥

वृष्णीनां निषधादीनां द्वादशानां यशःस्रजः ।
पुष्णन्तु भक्तिनिष्ठानां दशां **वृष्णिदशाः** शुभाम् ॥ ३१ ॥

निषधादीनां राज्ञां वृष्णीनामन्धक......वृष्णिदशा भक्तिपरायणानां शुभां दशां पुष्णन्तु ॥

नन्द्यनुयोगद्वारयोः पूर्वं कथनादार्याद्वयेन त्रयोदशप्रकीर्णकानि स्तौति—

वन्दे **मरणसमाधिं प्रत्याख्याने** महातुरोपपदे ।
**संस्तारचन्द्रवेध्यकभक्तपरिज्ञाचतुःशरणम्** ॥ ३२ ॥
**वीरस्तवदेवेन्द्रस्तवगच्छाचार**मपि च **गणिविद्याम्** ।
**द्वीपाब्धिप्रज्ञप्तिं तण्डुलवैतालिकं** च नुमः ॥ ३३ ॥

अहं वन्दे मरणसमाधिम् । प्रत्याख्याने महा इति आतुर इत्युपपदे ययोस्ते । महाप्रत्याख्यानमातुरप्रत्याख्यानं च । संस्तार-चन्द्रवेध्यक-भक्तपरिज्ञा-चतुःशरणमिति समाहारः । वीरस्तवं-देवेन्द्रस्तवं-गच्छाचारं गणिविद्यां द्वीपाब्धिप्रज्ञप्तिं तण्डुलवैतालिकं च वयं नुमः । सर्वेषां नामार्थाः पाक्षिकसूत्रावचूर्णौ सन्ति ॥

शिवाध्वदीपायोद्घातानुद्घातारोपणात्मने ।
चित्रोत्सर्गापवादाय **निशीथाय** नमोनमः ॥ ३४ ॥

मोक्षमार्गदीपाय उद्घातो गुरुप्रायश्चित्तविशेषः । अनुद्घातस्तु तद्विपरीतः । लघुरित्यर्थः । तयोरारोपणमुचितस्थाने प्रयोजनं तदात्मा स्वरूपं यस्य स तस्मै उद्घातानुद्घातारोपणात्मने । चित्रा विविधा उत्सर्गापवादा यत्र । उत्सर्गो मुख्यमार्गः । अपवादः करणे प्रतिषिद्धसेवा । निशीथमर्धरात्रस्तद्वद्रहोभूतं यदध्ययनं तन्निशीथं तस्मै निशीथाचाराङ्गपञ्चमचूडायै नमोनमः ॥

निर्युक्तिभाष्यप्रमुखैर्निबन्धैः सहस्रशाखीकृतवाच्यजातम् ।
**दशाश्रुतस्कन्ध**मनात्तगन्धं परैः सकल्पव्यवहारमीडे ॥ ३५ ॥

निर्युक्तिभाष्यप्रमुखैर्निबन्धैः सहस्रशाखीकृतं विस्तारितं वाच्यजातं यत्र तं दशाध्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यनानां श्रुतस्कन्धं दशाश्रुतस्कन्धं परैः परमतिभिरनात्तगन्धम् । कल्पः साध्वाचारस्तत्प्रतिपादको ग्रन्थोऽपि कल्पः । व्यवहारः प्रतीतार्थस्तत्प्रतिपादको ग्रन्थोऽपि व्यवहारः । ताभ्यां सह वर्तते यः स कल्पव्यवहारस्तमीडे स्तुवे ॥

षट्सप्तपङ्क्तिविंशतिषड्गुणसप्तप्रकारकल्पानाम् ।
विस्तारयिता कल्पितफलदः स्तात्पञ्चकल्पो नः ॥ ३६ ॥

षट् सप्त पङ्क्तिर्दशा विंशतिः षड्गुणसप्त द्विचत्वारिंशत् एतत्प्रकारा ये कल्पास्तेषां विस्तारयिता पञ्चकल्पो नोऽस्माकं कल्पितफलदो वाञ्छितफलप्रदः स्तात् ॥

लेभे यद्व्यवहारेणाधुनान्त्येनापि मुख्यता ।
तं जीतकल्पमाकल्पकल्पं तीर्थश्रियः श्रये ॥ ३७ ॥

अन्त्येनापि यद्व्यवहारेण यदाचारेणाधुना मुख्यता लेभे । एतदाधारेणैव प्रायश्चित्तविधिप्रवृत्तेः । तं जीतकल्पं तीर्थश्रियः शासनरमाया आकल्पकल्पं वेषतुल्यं श्रये । व्यवहाराः पञ्च । आगमः श्रुतमाज्ञा धारणा जीतं चेति सन्ति । ............... । एवं जीतव्यवहारोऽन्त्यः ॥

अञ्चामि पञ्चघनवप्रमाणमाचाम्लसाध्यं कुमतैरबाध्यम् ।
महानिशीथं महिमौषधीनां निशीथिनीशं शिववीथिभूतम् ॥ ३८ ॥

पञ्चघनवतिः पञ्चचत्वारिंशत् तत्प्रमाणैराचाम्लैः (?) साध्यम् । कुमतैरबाध्यम् । महिमान ओषध्यस्तासां निशीथिनीशं चन्द्रम् । वृद्धिप्रापकत्वात् । मोक्षमार्गभूतं महानिशीथमञ्चामि पूजयामि ॥

निर्युक्तिभाष्यवार्तिकसंग्रहणीचूर्णिटिप्पनकटीका ।
सर्वेषामप्येषां चेतसि निवसन्तु नः सततम् ॥ ३९ ॥

निर्युक्तिः सूत्रोक्तार्थभेदप्ररूपिका । भाष्यं सूत्रोक्तार्थप्रपञ्चकम् । वार्तिकमुक्तानुक्तदुरुक्तार्थानां चिन्ताकारि । संग्रहणी सूत्रार्थस्य संग्राहिका । चूर्णिरवचूर्णिः । टिप्पनकं विषमपदव्याख्या । टीका निरन्तरव्याख्या । एता एषां सर्वेषामपि पूर्वोक्तग्रन्थानां नश्चेतसि सततं निवसन्तु ॥

परिकर्मसूत्रपूर्वानुयोगगतपूर्वचूलिकाभेदम् ।
ध्यायामि दृष्टिवादं कालिकमुत्कालिकं श्रुतं चान्यत् ॥ ४० ॥

परिकर्म सप्तभेदम् । सूत्राणि द्वादशभेदानि । पूर्वानुयोगो द्विधा प्रथमानुयोगः कालानुयोगः । प्रथमे जिनचक्रिदशारचरितानि । कालानुयोगेऽर्थतो जिनैः शब्दतो गणधरैश्च पूर्वं रचितत्वात् पूर्वाणि चतुर्दशापि पूर्वगतम् । चूलिका उक्तशेषबाष्पा (?) । एते पञ्च भेदा यस्य तम् । दृष्टयो दर्शनानि तासां वदनं दृष्टिवादस्तं ध्यायामि । च पुनर-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यत्कालिकमगाढायोगसाध्यमुत्कालिकमनागाढायोगसाध्यं ध्यायामि। श्रुतं हि द्विधा—अङ्गप्रविष्टमनङ्गप्रविष्टं च। ········ ॥

यस्या भवन्त्यवितथा अद्याप्येकोनषोडशादेशाः।
सा भगवती प्रसीदतु ममाङ्गविद्यानवद्यविधिसाध्या ॥ ४१ ॥

यस्या अद्याप्येकोनषोडश पञ्चदशादेशाः स्वप्नादिष्वतीतानागतवर्तमानकथनान्यवितथाः सत्या भवन्ति सा अङ्गविद्या भगवती अनवद्यविधिसाध्या मम प्रसीदतु ॥

वन्दे विशेषणवतीं संमतिनयचक्रवालतत्त्वार्थान्।
ज्योतिष्करण्डसिद्धप्राभृतवसुदेवहिण्डींश्च ॥ ४२ ॥

विशेषणवती संपत्। एतान्ग्रन्थानहं वन्दे ॥

कर्मप्रकृतिप्रमुखाण्यपराण्यपि पूर्वसूरिचरितानि।
समयसुधाम्बुधिपृषतान्परिचिनुमः प्रकरणानि चिरम् ॥ ४३ ॥

कर्मस्वरूपप्रतिपादको ग्रन्थः कर्मप्रकृतिः। तत्प्रमुखाण्यपराण्यप्यनुक्तानि पूर्वसूरिचरितानि प्रकरणानि चिरं परिचिनुमः सुपरिचितानि कुर्मः। सिद्धान्तोदधिबिन्दुप्रायाणि ॥

व्याकरणच्छन्दोलंकृतिनाटककाव्यतर्कगणितानि।
सम्यग्दृष्टिपरिग्रहपूतं जयति श्रुतज्ञानम् ॥ ४४ ॥

व्याकरणादिकं मिथ्यादृग्भिः कृतमपि सम्यग्दृष्टयो देवास्तैः परिग्रहः स्वीकृतिस्तया पूतं श्रुतज्ञानं जयति ॥

सर्वश्रुताभ्यन्तरगां कृतैनस्तिरस्कृतिं पञ्चनमस्कृतिं च।
तीर्थप्रवृत्तेः प्रथमं निमित्तमाचार्यमन्त्रं च नमस्करोमि ॥ ४५ ॥

कृतपापतिरस्कारां सर्वसिद्धान्तमध्यगां पञ्चनमस्कृतिं पञ्चनमस्कारं शासनप्रवृत्तेः प्रथमं निमित्तमाचार्यमन्त्रं च नमस्करोमि ॥

इति भगवतः सिद्धान्तस्य प्रसिद्धफलप्रथां
गुणगणकथां कण्ठे कुर्याज्जिनप्रभवस्य यः।
वितरतितरां तस्मै तोषाद्वरं श्रुतदेवता
स्पृहयति च सा मुक्तिश्रीस्तत्समागमनोत्सवम् ॥ ४६ ॥

इत्यमुना प्रकारेण भगवतः सिद्धान्तस्य जिनप्रभवस्य जिनप्रणीतस्य यः पुरुषो गुणा ···········माहात्म्यादयस्तेषां गणः समूहस्तस्य कथां जल्पनमेतत्स्तवरूपां कण्ठे कुर्यात्पठति। कथंभूताम्। प्रसिद्धा सर्वविद्भिर्ज्ञाता फलानां 'कुत्रचिन्नगरे बहुपद्मपरि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृतं महापुण्डरीकं देवताधिष्ठितं सरस्यास्ते तच्च केनापि ग्रहीतुं न शक्यते । राज्ञोक्तं य एतदानयति तद्धर्ममहं प्रतिपद्य इति । यदा परतीर्थिकैरुपक्रमेणाप्यादातुं न शक्तं मन्त्रिणा जैनर्षिराकारितः । तेन च सचित्तजलास्पर्शिना (?) त्रिः प्रदक्षिणीकृत्य पालिस्थेनैव 'उप्पाहि पुण्डरीया' इत्यादि पुण्डरीकाध्ययनं पेठे । ततस्तत्पुण्डरीकमुत्प्लुत्य राज्ञोऽङ्के पपात । तदनु सपरिकरो राजा जैनोऽजनि ।' इत्यादीनां प्रथा विस्तारो यस्यास्तां प्रसिद्धफलप्रथाम् । तस्मै श्रुतदेवता वरं वितरति दत्ते । सा मुक्तिश्रीस्तत्समागमनोत्सवं स्पृहयति । अत्र पूर्वार्धे जिनप्रभवस्येति सिद्धान्तविशेषणेन कविरौद्धत्यपरिहाराय गुप्तं जिनप्रभेति स्वनामाभिहितवान् ॥

आदिगुप्ताभिधानस्य[1] गुरोः पादप्रसादतः ।
पदविच्छेदरूपेयं विवृतिर्लिखिता मिता ॥

इति श्रीजिनप्रभविरचितः सावचूरिः सिद्धान्तागमस्तवः ।

---

## आत्मनिन्दाष्टकम्[2] ।

श्रुत्वा श्रद्धाय सम्यक्छुभगुरुवचनं वेश्मवासं निरस्य
प्रव्रज्याथो पठित्वा बहुविधतपसा शोषयित्वा शरीरम् ।
धर्मध्यानाय यावत्प्रभवति समयस्तावदाकस्मिकीयं
प्राप्ता मोहस्य धाटी तडिदिव विषमा हा हताः कुत्र यामः ॥ १ ॥

एकेनापि महाव्रतेन यतिनः खण्डेन भग्नेन वा
दुर्गत्यां पततो न सोऽपि भगवानीष्टे स्वयं रक्षितुम् ।
हत्वा तान्यखिलानि दुष्टमनसो वर्तामहे ये वयं
तेषां दण्डपदं भविष्यति कियज्जानाति तत्केवली ॥ २ ॥

कट्यां चोलपटं तनौ सितपटं कृत्वा शिरोलुञ्चनं
स्कन्धे कम्बलिकां रजोहरणकं निक्षिप्य कक्षान्तरे ।
वक्त्रे वस्त्रमथो विधाय ददतः श्रीधर्मलाभाशिषं
वेषाडम्बरिणः स्वजीवनकृते विद्मो गतिं नात्मनः ॥ ३ ॥

भिक्षापुस्तकवस्त्रपात्रवसतिप्रावारलुब्धा यथा
नित्यं मुग्धजनप्रतारणकृते कष्टेन खिद्यामहे ।

---

१. पुस्तकेऽवचूरिकृतो नाम नोपालब्धम्. २. एतदष्टकमस्मभ्यं बृहत्खरतरगच्छमण्डनायमानजङ्गमयुगप्रधानभट्टारकश्री १०६ श्रीपूज्यजिनमुक्तिसूरिभिः सांप्रतं जयपुरमलंकुर्वद्भिर्दत्तमस्ति. तत्र च पुस्तके कर्तुर्नाम नास्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मारामतया तथा क्षणमपि प्रोज्झ्य प्रमादद्विषं
स्वार्थाय प्रयतामहे यदि तदा सर्वार्थसिद्धिर्भवेत् ॥ ४ ॥
पाखण्डानि सहस्रशो जगृहिरे ग्रन्था भृशं पेठिरे
लोभाज्ञानवशात्तपांसि बहुधा मूढैश्चिरं तेपिरे ।
क्वापि क्वापि कथंचनापि गुरुभिर्भूत्वा मदो भेजिरे
कर्मक्लेशविनाशसंभवविमुख्या(मुखा)न्यद्यापि नो लेभिरे ॥ ५ ॥
किं भावी नारकोऽहं किमुत बहुभवी दूरभव्यो न भव्यः
किं वाहं कृष्णपक्षी किमचरमगुणस्थानकं(?) कर्मदोषात् ।
वह्निज्वालेव शिक्षा व्रतमपि विषवत्खड्गधारा तपस्या
स्वाध्यायः कर्णसूची यम इव विषमः संयमो यद्विभाति ॥ ६ ॥
वस्त्रं पात्रमुपाश्रयं बहुविधं भैक्षं चतुर्धौषधं
शय्यापुस्तकपुस्तकोपकरणं शिष्यं च शिक्षामपि ।
गृह्णीमः परकीयमेव सुतरामाजन्मवृद्धा वयं
यास्यामः कथमीदृशेन तपसा तेषां हहा निष्क्रयम् ॥ ७ ॥
अन्तर्मत्सरिणां बहिः शमवतां प्रच्छन्नपापात्मनां
नद्यम्भःकृतशुद्धिमद्यपवणिग्दुर्वासनाशात्मिनाम्(?) ।
पाखण्डव्रतधारिणां बकदृशां मिथ्यादृशामीदृशां
बद्धोऽहं धुरि तावदेव चरितैस्तन्मे हहा का गतिः ॥ ८ ॥
येषां दर्शनवन्दनप्रणमनस्पर्शप्रशंसादिना
मुच्यन्ते तमसा निशा इव सिते पक्षे प्रजास्तत्क्षणात् ।
तादृक्षो अपि सन्ति केऽपि मुनयस्तेषां नमस्कुर्महे
संविग्ना वयमात्मनिन्दनमिदं कुर्मः पुनर्बोधये ॥ ९ ॥
रागो मे स्फुरति क्षणं क्षणमथो वैराग्यमुज्जृम्भते
द्वेषो मां भजति क्षणं क्षणमथो मैत्री समालिङ्गति ।
दैन्यं पीडयति क्षणं क्षणमथो हर्षोऽपि मां बाधते
कोपेयं कृपणोऽकृपापरिवृतैः(?) कार्यं हहा कर्मभिः ॥ १० ॥

इत्यात्मनिन्दाष्टकम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीजिनवल्लभसूरिविरचितं

समसंस्कृतप्राकृतं

# [१]श्रीमहावीरस्वामिस्तोत्रम् ।

भावारिवारणनिवारणदारुणोरु-
कण्ठीरवं मलयमन्दरसारधीरम् ।
वीरं नमामि कलिकालकलङ्कपङ्क-
संभारसंहरणतुङ्गतरङ्गतोयम् ॥ १ ॥

बाढं विसारिगरिमा महिमा तवेह
बुद्धो न देवगुरुणा न पुरंदरेण ।
तं कोऽवगन्तुमखिलं जडिमालयोऽह-
मिच्छामि किं तु तव देव गुणाणुमेव ॥ २ ॥

सन्तो गुणा गुणिगुरो तव हासहंस-
नीहारहारधवला बहुलीभवन्ति ।
ते सोमसूरहरिहीरविरञ्चिबुद्ध-
मायाविदेवनिवहेन मलीमसा वा ॥ ३ ॥

देवं भवन्तमवहाय दुरन्तमोह-
संछन्नबुद्धिमिहिरा इह भूरिकालम् ।
संसारनीरनिलये बहु संसरन्तो
विन्दन्ति जन्तुनिवहा नहि सिद्धिभावम् ॥ ४ ॥

सासूयसंगमसुरोरुसमूढदम्भ-
संरम्भसंतमससंचयचण्डभासम् ।
हिंसासरोरुहतमीरमणं चिरोढा-
हंकारकन्दलदलीकरणासिदण्डम् ॥ ५ ॥

वन्देऽहमिन्दुदलभालममन्दभद(?)-
संदोहमन्दिरवरं दरकन्दकोलम् ।

---

१. स्तोत्रस्यास्यैकमेव पुस्तकं संवेगिसाधुवरश्रीशान्तिविजयमुनिभिरस्मभ्यं दत्तम्. पुस्तकान्तरं टीका वा नोपलब्धेति क्वचित्क्वचित्संदेह वर्तते.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गम्भीरसंभवजरामरणोरुनीर-
संसारसागरतरीकरणिं च वीरम् ॥ ६ ॥ (युग्मम्)

उद्दामकामभरभङ्गुरमङ्गभङ्ग-
संसङ्गबन्धुरमुरोरुहभारखिन्नम् ।
देहं सलीलपरिरिङ्खणमञ्जुशिञ्जि-
मञ्जीरचारुचरणं सरसं वहन्ती ॥ ७ ॥

संगेयताललयचञ्चुरचारचारी-
संचारिणी करणबन्धकलासु सज्जा ।
उन्नालनीररुहकोमलबाहुवल्ली
भल्लीव विद्धबहुकामिकुरङ्गसंघा ॥ ८ ॥

हेलाविलोलमणिकुण्डललीढगल्ला
कङ्केल्लिपल्लवकरा वरकम्बुकण्ठी ।
केलीललामरमणी रमणीयहावा
नालं निहन्तुमिह ते विमलाभिसंधिम्॥९॥(विशेषकम्)

संचारिकिंनरगणारववेणुवीणा-
संरावभिन्नकलगेयरवाभिरामा ।
आकालभाविकुगुरूहकुधीकुदेव-
संबन्धबुद्धहरणी तव देव वाणी ॥ १० ॥

संदेहदावजलवाहमजीवजीव-
भावावभासतरणिं भवसिन्धुनावम् ।
आगामिकेवलरमातरुणीविवाहा
देवागमं तव नरा विमला महन्ति ॥ ११ ॥

देवा महापरिमलं तरलालिजाल-
झंकारहारि तव वीर सभासु भूरि ।
फुल्लारविन्दनवसुन्दरसिन्दुवार-
मन्दारकुन्दकबरं कुसुमं किरन्ति ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःसीमभीमभवसंभवरूढगूढ-
संमोहभूवलयदारणसारसीरम् ।
वीरं कुवासमलहारिसुवारिपूर-
मुत्तुङ्गमारकरिकेसरिणं नमामि ॥ १३ ॥

भिन्दन्तमन्तरणकारणमन्तरायं
संरुद्धरोगसमवायमलोभमायम् ।
उच्छिन्नमोहतिमिरावरणावसायं
वीरं नमामि नवहेमसमिद्धकायम् ॥ १४ ॥

वन्दारुवासवसुरासुरभासुरालं-
कारामलच्छविपरागसमुद्धुराणि ।
सेवामि ते चरणवारिरुहाणि भूरि-
संदेहरेणुहरणोरुसमीर वीर ॥ १५ ॥

अञ्चामि ते चरणतामरसालिलीला
संघायि पञ्चममहागणधारिवाणी (?) ।
संबन्धबुद्धिकरुणालयलिङ्गसिद्ध-
संधावलीदमिगणं चरणं चरन्तम् ॥ १६ ॥ (?)

उच्चण्डधारकरवालकरारिवार-
विच्छिन्नकुम्भगलनालकरालनागे ।
कुन्तासितोमरविभिन्नपरासुदेहे
कङ्कालसंकुलभयावहभूमिभागे ॥ १७ ॥

सावेगहुंकरणडामरमुण्डरुण्ड-
कीलाललालसविहंगकुलावरुद्धे ।
आबद्धबाणविसरे सहसा नुवन्तो
वीरं नरा रणभरेऽरिबलं जयन्ति ॥ १८ ॥(युगलकम्)

आसन्नसिद्धिकमलापरिरम्भलम्भ-
दम्भोलिपाणिमिव मोहगिरिं किरन्तम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संपत्तिकारणममङ्गलमूलकीलं
सेवन्ति के न भगवन्तमघं हरन्तम् ॥ १९ ॥
आयासभङ्गडमरामयसंपराय-
चोरारिमारिविरहेण चिराय देव ।
भूमण्डले सुनगरानिगमा (?) विहार-
चारेण ते परममुद्भवमामनन्ति ॥ २० ॥
निःसङ्ग निःसमर निःसम निःसहाय
नीराग नीरमण नीरस नीररंस ।
हे वीर धीरिमनिवासनिरुद्धघोर-
संसारचार जय जीवसमूहबन्धो ॥ २१ ॥
उल्लासितारतरलामलहारिहारा
नारीगणा बहुविलासरसालसा मे ।
संसारसंसरणसंभवभीनिमित्तं
चित्तं हरन्ति भण किं करवाणि देव ॥ २२ ॥
इच्छामहासलिलकामगुणालवालं
चिन्तादलं समलचित्तमहीसमुत्थम् ।
संभोगफुल्लमिव मोहतरुं लसन्तं
हे वीरसिन्धुर समुद्धर मे समूलम् ॥ २३ ॥
संपन्नसिद्धिपुरसंगममङ्गलाय
मायोरुवारिरुहिणीवरकुञ्जराय ।
वीराय ते चरमकेवलपुंगवाय
कामं नमोऽसमदयादमसत्तमाय ॥ २४ ॥
हे देव किंकरमिमं परिभावयेह
मज्जन्तमुद्धुरजवे भवसिन्धुपूरे ।
उत्तारणाय कुरु वीर करावलम्बं
भूयोऽसमञ्जसनिरन्तरचारिणो मे ॥ २५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुसमयतरुमालाभङ्गसंहारवायो
कुनयकुवलयालीचूरणे(चूर्णने) मत्तनाग ।
तव गुणकणगुम्फे मे परीणाममित्थं
विमलमपरिहीणं हे महावीर पाहि ॥ २६ ॥

अनयनिबिडे पीडागाढे भयावहदुःसहे
विरहविरसे लज्जापुञ्जे रमे भवपञ्जरे ।
निरयकुहरंगामी हाहं न सिद्धिमहापुरी-
सरलसरणिं सेवे मूढो गिरं तव वीर हे ॥ २७ ॥

निरीहं गन्तारं परमभुवि मन्तारमखिलं
निहन्तारं हेलाकलिकलह.......... ।
भवन्तं नन्तारो नहि खलु निमज्जन्ति भवभी-
महापारावारे मरणभयकल्लोलकलिले ॥ २८ ॥

एवं सेवापरिहरहया (?) लोलचूलामणीद्ध-
च्छायालीढं खरकिरणभाभिन्नमम्भोरुहं वा ।
चित्तागारे चरणकमलं ते चिरं धारिणो मे
सिद्धावासं बहुभवभयारम्भरीणाय देहि ॥ २९ ॥

इत्थं ते समसंस्कृतस्तवमहं प्रस्तावयामासिवा-
नाशंसे जिनवीर नेन्द्रपदवीं न प्राज्यराज्यश्रियम् ।
लीलाभाञ्जि[1] न वल्लभप्रणयिनीवृन्दानि किं त्वर्थये
नाथेदं प्रथय प्रसादविषदां दृष्टिं दयालो मयि ॥ ३० ॥

इति श्रीजिनवल्लभसूरिप्रणीतं समसंस्कृतप्राकृतं श्रीमहावीरस्वामिस्तोत्रम् ।

---

१. जिनवल्लभेति ग्रन्थकर्तुर्नामापि.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीहेमचन्द्राचार्यविरचितं

अन्ययोगव्यवच्छेदिकाद्वात्रिंशिकाख्यं[1]

# श्रीमहावीरस्वामिस्तोत्रम् ।

अनन्तविज्ञानमतीतदोषमबाध्यसिद्धान्तममर्त्यपूज्यम् ।
श्रीवर्धमानं जिनमाप्तमुख्यं स्वयंभुवं स्तोतुमहं यतिष्ये ॥ १ ॥
अयं जनो नाथ तव स्तवाय गुणान्तरेभ्यः स्पृहयालुरेव ।
विगाहतां किं तु यथार्थवादमेकं परीक्षाविधिदुर्विदग्धः ॥ २ ॥
गुणेष्वसूयां दधतः परेऽमी मा शिश्रियन्नाम भवन्तमीशम् ।
तथापि संमील्य विलोचनानि विचारयन्तां नयवर्त्म सत्यम् ॥ ३ ॥
स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो भावा न भावान्तरनेयरूपाः ।
परात्मतत्त्वादतथात्मतत्त्वा द्वयं वदन्तोऽकुशलाः स्खलन्ति ॥ ४ ॥
आदीपमाव्योम समस्वभावं स्याद्वादमुद्रानतिभेदिवस्तु ।
तन्नित्यमेवैकमनित्यमन्यदिति त्वदाज्ञाद्विषतां प्रलापाः ॥ ५ ॥
कर्तास्ति कश्चिज्जगतः स चैकः स सर्वगः स स्ववशः स नित्यः ।
इमाः कुहेवाकविडम्बनाः स्युस्तेषां न येषामनुशासकस्त्वम् ॥ ६ ॥
न धर्मधर्मित्वमतीव भेदे वृत्त्यास्ति चेन्न त्रितयं चकास्ति ।
इहेदमित्यस्ति मतिश्च वृत्तौ न गौणभावोऽपि च लोकबाधः ॥ ७ ॥
सतामपि स्यात्क्वचिदेव सत्ता चैतन्यमौपाधिकमात्मनोऽन्यत् ।
न संविदानन्दमयी च मुक्तिः सुसूत्रमासूत्रितमत्वदीयैः ॥ ८ ॥
यत्रैव यो दृष्टगुणः सतत्र कुम्भादिवन्निष्प्रतिपक्षमेतत् ।
तथापि देहाद्बहिरात्मतत्त्वमतत्त्ववादोपहताः पठन्ति ॥ ९ ॥
स्वयं विवादग्रहिले वितण्डा पाण्डित्यकण्डूलमुखे जनेऽस्मिन् ।
मायोपदेशात्परमर्म भिन्दन्नहो विरक्तो मुनिरन्यदीयः ॥ १० ॥

---

१. अस्या अन्ययोगव्यवच्छेदिकाद्वात्रिंशिकाया एकं कर्तृनामरहितटीकासमेतं नातिशुद्धं पुस्तकमग्रिमायाश्चायोगव्यवच्छेदिकाद्वात्रिंशिकाया मूलमात्रमेकमस्मभ्यं श्रीशान्तिविजयमुनिवरैरर्पितम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न धर्महेतुर्विहितापि हिंसा नोत्सृष्टमन्यार्थमपोद्यते च ।
स्वपुत्रघातान्नृपतित्वलिप्सासब्रह्मचारि स्फुरितं परेषाम् ॥ ११ ॥
स्वार्थावबोधक्षम एव बोधः प्रकाशते नार्थकथान्यथा तु ।
परे परेभ्यो भयतस्तथापि प्रपेदिरे ज्ञानमनात्मनिष्ठम् ॥ १२ ॥
माया सती चेद्द्वयतत्त्वसिद्धिरथासती हन्त कुतः प्रपञ्चः ।
मायैव चेदर्थसहा च तत्किं माता च वन्ध्या च भवत्परेषाम् ॥ १३ ॥
अनेकमेकात्मकमेव वाच्यं द्वयात्मकं वाचकमप्यवश्यम् ।
अतोऽन्यथा वाचकवाच्यक्लृप्तावतावकानां प्रतिभाप्रमादः ॥ १४ ॥
चिदर्थशून्या च जडा च बुद्धिः शब्दादि तन्मात्रजमम्बरादि ।
न बन्धमोक्षौ पुरुषस्य चेति कियज्जडैर्न ग्रथितं विरोधि ॥ १५ ॥
न तुल्यकालः फलहेतुभावो हेतौ विलीने न फलस्य भावः ।
न संविदद्वैतपथेऽर्थसंविद्विलूनशीर्णं सुगतेन्द्रजालम् ॥ १६ ॥
विना प्रमाणं परवन्न शून्यः स्वपक्षसिद्धेः पदमश्नुवीत ।
कुप्येत्कृतान्तः स्पृशते प्रमाणमहो सुदृष्टं त्वदसूयिदृष्टम् ॥ १७ ॥
कृतप्रणाशाकृतकर्मभोगभवप्रमोक्षस्मृतिभङ्गदोषान् ।
उपेक्ष्य साक्षात्क्षणभङ्गमिच्छन्नहो महासाहसिकः परस्ते ॥ १८ ॥
सा वासना सा क्षणसंततिश्च नाभेदभेदानुभयैर्घटेते ।
ततस्तटादर्शिशकुन्तपोतन्यायात्त्वदुक्तानि परे श्रयन्तु ॥ १९ ॥
विनानुमानेन पराभिसंधिमसंविदानस्य तु नास्तिकस्य ।
न सांप्रतं वक्तुमपि क्व चेष्टा क्व दृष्टमात्रं च हहा प्रमादः ॥ २० ॥
प्रतिक्षणोत्पादविनाशयोगि स्थिरैकमध्यक्षमपीक्षमाणः ।
जिन त्वदाज्ञामवमन्यते यः स वातकी नाथ पिशाचकी वा ॥ २१ ॥
अनन्तधर्मात्मकमेव तत्त्वमतोऽन्यथा सत्त्वमसूपपादम् ।
इति प्रमाणान्यपि ते कुवादिकुरङ्गसंत्रासनसिंहनादाः ॥ २२ ॥
अपर्ययं वस्तु समस्यमानमद्रव्यमेतच्च विविच्यमानम् ।
आदेशभेदोदितसप्तभङ्गमदीदृशस्त्वं बुधरूपवेद्यम् ॥ २३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपाधिभेदोपहितं विरुद्धं नार्थेष्वसत्त्वं सदवाच्यते च ।
इत्यप्रबुध्यैव विरोधभीता जडास्तदेकान्तहताः पतन्ति ॥ २४ ॥
स्यान्नाशि नित्यं सदृशं विरूपं वाच्यं न वाच्यं सदसत्तदेव ।
विपश्चितां नाथ निपीततत्त्वसुधोद्गतोद्गारपरम्परेयम् ॥ २५ ॥
य एव दोषाः किल नित्यवादे विनाशवादेऽपि समास्त एव ।
परस्परध्वंसिषु कण्टकेषु जयत्यधृष्यं स्मरशासनं ते ॥ २६ ॥
नैकान्तवादे सुखदुःखभोगौ न पुण्यपापे न च बन्धमोक्षौ ।
दुर्नीतिवादव्यसनासिनैवं परैर्विलुप्तं जगदप्यशेषम् ॥ २७ ॥
सदेव सत्स्यात्सदिति त्रिधार्थो मीयेत दुर्नीतिनयप्रमाणैः ।
यथार्थदर्शी तु नयप्रमाणपथेन दुर्नीतिपथं त्वमास्यः ॥ २८ ॥
मुक्तोऽपि वाभ्येतु भवं भवो वा भवस्थशून्योऽस्तु मितात्मवादे ।
षड्जीवकायं त्वमनन्तसंख्यमाख्यस्तथा नाथ यथा न दोषः ॥ २९ ॥
अन्योन्यपक्षप्रतिपक्षभावाद्यथा परे मत्सरिणः प्रवादाः ।
नयानशेषानविशेषमिच्छन्नपक्षपाती समयस्तथा ते ॥ ३० ॥
वाग्वैभवं ते निखिलं विवेक्तुमाशास्महे चेन्महनीयमुख्य ।
लङ्घेम जङ्घालतया समुद्रं वहेम चन्द्रद्युतिपानतृष्णाम् ॥ ३१ ॥

इदं तत्त्वातत्त्वव्यतिकरकरालेऽन्धतमसे
जगन्मायाकारैरिव हतपरैर्हा विनिहितम् ।
तदुद्धर्तुं शक्तो नियतमविसंवादिवचन-
स्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः ॥ ३२ ॥

इति श्रीहेमचन्द्रसूरिविरचितमन्ययोगव्यवच्छेदिकाद्वात्रिंशिकाख्यं श्रीमहावीरस्वामिस्तोत्रम् ।

---

## श्रीहेमचन्द्राचार्यविरचितं
अयोगव्यवच्छेदिकाद्वात्रिंशिकाख्यं
# श्रीमहावीरस्वामिस्तोत्रम् ।

अगम्यमध्यात्मविदामवाच्यं वचस्विनामक्षवतां परोक्षम् ।
श्रीवर्धमानाभिधमात्मरूपमहं स्तुतेर्गोचरमानयामि ॥ १ ॥

---

१. हेमचन्द्र इति ग्रन्थकर्तुर्नामापि.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तुतावशक्तिस्तव योगिनां न किं गुणानुरागस्तु ममापि निश्चलः ।
इदं विनिश्चित्य तव स्तवं वदन्न बालिशोऽप्येष जनोऽपराध्यति ॥ २ ॥
क्व सिद्धसेनस्तुतयो महार्था अशिक्षितालापकला क्व चैषा ।
तथापि यूथाधिपतेः पथस्थः स्खलद्गतिस्तस्य शिशुर्न शोच्यः ॥ ३ ॥
जिनेन्द्र यानेव विबाधसे स्म दुरन्तदोषान्विविधैरुपायैः ।
त एव चित्रं त्वदसूययेव कृताः कृतार्थाः परतीर्थनाथैः ॥ ४ ॥
यथास्थितं वस्तु दिशन्नधीश न तादृशं कौशलमाश्रितोऽसि ।
तुरंगशृङ्गाण्युपपादयद्भ्यो नमः परेभ्यो नवपण्डितेभ्यः ॥ ५ ॥
जगत्यनुध्यानबलेन शश्वत्कृतार्थयत्सु प्रसभं भवत्सु ।
किमाश्रितोऽन्यैः शरणं त्वदन्यः स्वमांसदानेन वृथा कृपालुः ॥ ६ ॥
स्वयं कुमार्गं लपतां नु नाम प्रलम्भमन्यानपि लम्भयन्ति ।
सुमार्गगं तद्विदमादिशन्तमसूययान्धा अवमन्वते च ॥ ७ ॥
प्रादेशिकेभ्यः परशासनेभ्यः पराजयो यत्तव शासनस्य ।
खद्योतपोतद्युतिडम्बरेभ्यो विडम्बनेयं हरिमण्डलस्य ॥ ८ ॥
शरण्य पुण्ये तव शासनेऽपि संदेग्धि यो विप्रतिपद्यते वा ।
स्वादौ स तथ्ये स्वहिते च पथ्ये संदेग्धि वा विप्रतिपद्यते वा ॥ ९ ॥
हिंसाद्यसत्कर्मपथोपदेशादसर्वविन्मूलतया प्रवृत्तेः ।
नृशंसदुर्बुद्धिपरिग्रहाच्च ब्रूमस्त्वदन्यागममप्रमाणम् ॥ १० ॥
हितोपदेशात्सकलज्ञक्लृप्तेर्मुमुक्षुसत्साधुपरिग्रहाच्च ।
पूर्वापरार्थेऽप्यविरोधसिद्धेस्त्वदागमा एव सतां प्रमाणम् ॥ ११ ॥
क्षिप्येत वान्यैः सदृशीक्रियेत वा तवाङ्घ्रिपीठे लुठनं सुरेशितुः ।
इदं यथावस्थितवस्तुदेशनं परैः कथंकारमपाकरिष्यते ॥ १२ ॥
तद्दुःखमाकालखलायितं वा पचेलिमं कर्म तवानुकूलम् ।
उपेक्षते यत्तव शासनार्थमयं जनो विप्रतिपद्यते वा ॥ १३ ॥
परः सहस्राः शरदस्तपांसि युगान्तरं योगमुपासतां वा ।
तथापि ते मार्गमनापतन्तो न मोक्ष्यमाणा अपि यान्ति मोक्षम् ॥ १४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनाप्तजाड्यादिविनिर्मितित्वसंभावनासंभविविप्रलम्भाः ।
परोपदेशाः परमाप्तकॢप्तपथोपदेशे किमु संरभन्ते ॥ १५ ॥
यदार्जवादुक्तमयुक्तमन्यैस्तदन्यथाकारमकारि शिष्यैः ।
न विप्लवोऽयं तव शासनेऽभूदहो अधृष्या तव शासनश्रीः ॥ १६ ॥
देहाद्ययोगेन सदाशिवत्वं शरीरयोगादुपदेशकर्म ।
परस्परस्पर्धि कथं घटेत परोपकॢप्तेष्वधिदैवतेषु ॥ १७ ॥
प्रागेव देवान्तरसंश्रितानि रागादिरूपाण्यवमान्तराणि ।
न मोहजन्यां करुणामपीश समाधिमास्थाय युगाश्रितोऽसि (?) ॥१८॥
जगन्ति भिदन्तु सृजन्तु वा पुनर्यथातथा वा पतयः प्रवादिनाम् ।
त्वदेकनिष्ठे भगवान्भवक्षयक्षमोपदेशे तु परं तपस्विनः ॥ १९ ॥
वपुश्च पर्यङ्कशयं श्लथं च दृशौ च नासानियते स्थिरे च ।
न शिक्षितेयं परतीर्थनाथैर्जिनेन्द्र मुद्रापि तवान्यदास्ताम् ॥ २० ॥
यदीयसम्यक्त्वबलात्प्रतीमो भवादृशानां परमस्वभावम् ।
कुवासनापाशविनाशनाय नमोऽस्तु तस्मै तव शासनाय ॥ २१ ॥
अपक्षपातेन परीक्षमाणा द्वयं द्वयस्याप्रतिमं प्रतीमः ।
यथास्थितार्थप्रथनं तवैतदस्थाननिर्बन्धरसं परेषाम् ॥ २२ ॥
अनाद्यविद्योपनिषन्निषण्णैर्विशृङ्खलैश्चापलमाचरद्भिः ।
अगूढलक्ष्योऽपि पराक्रिये यत्त्वत्किंकरः किं करवाणि देव ॥ २३ ॥
विमुक्तवैरव्यसनानुबन्धाः श्रयन्ति यां शाश्वतवैरिणोऽपि ।
परैरगम्यां तव योगिनाथ तां देशनाभूमिमुपाश्रयेऽहम् ॥ २४ ॥
मदेन मानेन मनोभवेन क्रोधेन लोभेन च संमदेन ।
पराजितानां प्रसभं सुराणां वृथैव साम्राज्यरुजा परेषाम् ॥ २५ ॥
स्वकण्ठपीठे कठिनं कुठारं परे किरन्तः प्रलपन्तु किंचित् ।
मनीषिणां तु त्वयि वीतराग न रागमात्रेण मनोऽनुरक्तम् ॥ २६ ॥
सुनिश्चितं मत्सरिणो जनस्य न नाथ मुद्रामतिशेरते ते ।
माध्यस्थ्यमास्थाय परीक्षका ये मणौ च काचे च समानुबन्धाः ॥२७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इमां समक्षं प्रतिपक्षसाक्षिणामुदारघोषामवघोषणां ब्रुवे ।
न वीतरागात्परमस्ति दैवतं न चाप्यनेकान्तमृते नयस्थितिः ॥ २८ ॥
न श्रद्धयैव त्वयि पक्षपातो न द्वेषमात्रादरुचिः परेषु ।
यथावदाप्तत्वपरीक्षया तु त्वामेव वीर प्रभुमाश्रिताः स्मः ॥ २९ ॥
तमःस्पृशामप्रतिभासभाजं भवन्तमप्याशु विविन्दते याः ।
महेम चन्द्रांशुदृशा (?) वदातास्तास्तर्कपुण्या जगदीश वाचः ॥ ३० ॥
यत्र तत्र समये यथा तथा योऽसि सोऽस्यभिधया यया तया ।
वीतदोषकलुषः स चेद्भवानेक एव भगवन्नमोऽस्तु ते ॥ ३१ ॥
इदं श्रद्धामात्रं तदथ परनिन्दां मृदुधियो
विगाहन्तां हन्तः प्रकृतिपरवादव्यसनिनः ।
अरक्तद्विष्टानां जिनवर परीक्षाक्षमधिया-
मयं तत्त्वालोकस्तुतिमयमुपाधिं विधृतवान् ॥ ३२ ॥

इति श्रीहेमचन्द्रसूरिविरचितमयोगव्यवच्छेदिकाद्वात्रिंशिकाख्यं श्रीमहावीरस्वामिस्तोत्रम् ।

---

## श्रीजिनप्रभसूरिविरचितः

# श्रीपार्श्वनाथस्तवः ।[1]

का मे वामेयशक्तिर्भवतु तव गुणस्तोमलेशप्रशस्तौ
न स्याद्यस्यामधीशः सुरपतिसचिवस्यापि वाणीविलासः ।
माने वा वार्धिवारां कलयति क इव प्रौढिमारूढधारां
भक्तिव्यक्तिप्रयुक्तस्तदपि किमपि ते संस्तवं प्रस्तवीमि ॥ १ ॥
संसाराम्भोधिवेला निबिडजडमतिध्वान्तविध्वंसहंसः
श्यामाश्यामाङ्गधामा (?) शठकमठतपोधर्मनिर्माथपाथः ।
स्फारस्फूर्जत्फणीन्द्र प्रगुणफणमणिज्योतिरुद्द्योतिताशा-
चक्रश्चक्रिध्वज त्वं जय जिन विजितद्रव्यभावारिवार ॥ २ ॥

---

१. पार्श्वनाथस्तवादिस्तोत्रषट्कं जिनप्रभसूरिप्रणीतमस्मभ्यं सूरतनगरवासिना केवलदासात्मजेन भगवान्दासश्रेष्ठिना प्रहितम्. पुस्तकान्तरं चास्य नोपलब्धमिति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कम्रानम्राङ्गिचेतःशिखिकुलविलसत्ताण्डवाडम्बरश्री-
हेतुः प्रेङ्खन्नखालीरुचिररुचितडिद्दामनेत्राभिरामः ।
प्रीतिं फुल्लत्फणाभाग्मणिघृणिसुमनश्चापचित्रीकृतद्यौ-
र्देयास्त्वं देशनावाक्स्तनितसुखकरो मेघवन्मेऽघहन्तः ॥ ३ ॥
भिन्दंल्लोकप्रवाहप्रबलतरसरित्पूरमुच्चैर्वहन्तं
जन्तूनां चित्तभूमौ स जयति जगति त्वद्वचोवारिकान्तः ।
मुक्त्वा गाढं गृहीतानपि विनतजनान्यत्प्रवाहाद्भयार्तो
भूयस्तन्मध्यमेव प्रविशति झटिति क्रूरमोहावतारः ॥ ४ ॥
लौल्याल्लावण्यलक्ष्मीमधुरमधुरसं त्वन्मुखाम्भोरुहोत्थं
पायंपायं भरेण प्रणतभवभृतां नेत्रपुष्पंधयाल्यः ।
नूनं हर्षप्रकर्षोद्गतनयनपयःपूरदम्भेन दूरं
मिथ्यादृग्लोचनानामसुलभ भगवन्सद्य एवोद्गिरन्ति ॥ ५ ॥
निःस्यन्दानन्दकन्दः कलिमलकदलीकाण्डखण्डीकृतौ य-
त्कक्षाकौक्षेयकस्य क्षपितभवशतं नेत्रपीयूषसत्रम् ।
श्रेयःश्रीवल्लिहल्लीसकमलयमरुद्भाग्यमारोग्यलक्ष्म्या-
दर्शः कंदर्पदर्पद्विजपतिपतनं दर्शनं तावकीनम् ॥ ६ ॥
विद्याविद्याधरीणां मणिमयमुकुरः क्रूरवैरारिजैत्रो
गात्रश्रीमैत्र्यपात्रीकृतरतिरमणः सच्चरित्रैः पवित्रः ।
सद्भोगाभोगभागी सुभगिमभवनं श्रीजिन श्रीद संप-
न्निःष्कम्पः संपनीपद्यत इह मनुजः साधु नत्वा जिन त्वा ॥ ७ ॥
देव्या वाचोऽपि वाचामविषय दिविषन्मन्दिरद्वारसेवा-
हेवाकी सर्वनाकीश्वरमुकुटतटीघृष्टपादाम्बुजस्य ।
नेतश्चैतन्यशून्यः सकलकलयितुर्भुक्तिमात्रस्य दाता
भुक्तिं मुक्तिं च दातुः कथमिव भवतः कल्पवृक्षः सदृक्षः ॥ ८ ॥
चन्द्रः प्रत्युदकाशयं प्रतिफलत्येको न चार्थक्रिया-
कारीत्येष न चास्तवांस्तव पुनर्वृत्तं जयत्यद्भुतम् ।

१. सरस्वत्याः. २. प्रतिजलाशयम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकस्त्वं प्रतिमानसं वससि यद्भव्यात्मनामेकदा
सर्वेषामथ च प्रयच्छसि फलं तेषां मनोवाञ्छितम् ॥ ९ ॥
यौष्माकीणगुणस्तुतिं विकिरती शुण्डामिवान्तर्गत-
प्रीतिं स्फीतिमतीमतीव सुरभिं दानाम्बुना बिभ्रती ।
त्रैलोक्यैकसुरद्रुम द्रुमवनानीवोन्मदा वासिता[1]
युष्मद्भक्तिरलं भनक्ति भविनामेनांसि हृद्वासिता ॥ १० ॥
आधारे स्थिरतोज्झिते किल भवत्याधेयमप्यस्थिरं
सोऽयं ज्ञानपथस्तथापि किमपि स्वार्थैकनिष्ठो ब्रुवे ।
अश्रान्तं मम चञ्चलेऽपि मनसि स्वामिन्बधान स्थितिं
त्रैलोक्याधिप शक्तिभाजि यदि वा किं नोपपन्नं त्वयि ॥ ११ ॥
विश्वेश प्रसभं त्वदीययशसा व्यालुप्यमाने प्रभा-
सर्वस्वे जगदाक्रमैकपटुना नूनं द्विजानां पतिः ।
शश्वीं लाञ्छनकैतवात्प्रतिनिशं कुक्षिप्रदेशे क्षिप-
न्कोपाटोपवशादसावुदयते बिभ्रद्वपुर्लोहितम् ॥ १२ ॥
वक्त्रेण त्वमपाहरः शशधरस्याखण्डमूर्तेः श्रियं
व्याकोशस्य कुशेशयस्य सुषमासर्वस्वमप्यग्रहीः ।
यत्तुल्यव्यसनादपि स जहितो नैतौ विरोधं मिथ-
स्तेनाकारि समानशीलविपदां सख्यप्रवादो मृषा ॥ १३ ॥
पुष्टाङ्गं व्यवहारनिश्चयनयप्रोत्तुङ्गशृङ्गं शुभं
दानाद्यङ्घ्रिचतुष्टयं च विकसज्ज्ञानक्रियालोचनम् ।
नित्यच्छेकविवेकपुच्छलतिकं स्याद्वादपर्युल्लस-
त्पीनोच्चैः ककुदं कुतीर्थतृणभुक्सूते वृषं गौस्तव ॥ १४ ॥
आकण्ठं कमठाम्बुदोज्झितपयःपूरे निमग्नाङ्कक-
स्योत्फुल्लं मुखपङ्कजं तव पपौ या कौतुकोत्कर्षतः ।
नागस्त्रैणविलोचनालिपटली संख्याय धुर्येव तां (?)
धन्यानां गणनाक्षणे न खलु सा रेखान्यतः सर्पति ॥ १५ ॥

१. करिणी.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वन्दारोः प्रियकोपितप्रणयिनीदृक्कोणशोणत्विषः
सान्द्रस्निग्धसमुच्छलत्क्रमनखश्रेणीमयूखास्तव ।
त्वद्वृत्तस्तुतिदूतिकाभिमुखितां पाणौ चिकीर्षोः शिव-
श्रीरामां नवपद्मरागमहितं बध्नन्तु मौलौ मम ॥ १६ ॥

एवं नृदेवमहितः सहितः प्रभाव-
भूत्या प्रभूततमया विनुतो मयायम् ।
पार्श्वप्रभुर्विमलचिन्मयचित्तसौध-
मुत्तंसयत्त्ववृजिनप्रभसूरिवर्ण्यः ॥ १७ ॥

इति श्रीजिनप्रभसूरिविरचितः पार्श्वनाथस्तवः ।

---

## श्रीजिनप्रभसूरिविरचितं
# गौतमस्तोत्रम् ।

श्रीमन्तं मगधेषु गोर्वर इति ग्रामोऽभिरामः श्रिया
तत्रोत्पन्नमसन्नचित्तमनिशं श्रीवीरसेवाविधौ ।
ज्योतिः संश्रयगौतमान्वयविपत्प्रद्योतनद्योमणिं
तापोत्तीर्णसुवर्णवर्णवपुषं भक्त्येन्द्रभूतिं स्तुवे ॥ १ ॥

के नाम नाभङ्गुरभाग्यसृष्टयै दृष्टयै सुराणां स्पृहयन्ति सन्तः ।
निमेषविघ्नोज्झितमाननेन्दुज्योत्स्नां मनोहत्य तवापिबद्या ॥ २ ॥

निर्जित्य नूनं निजरूपलक्ष्म्या तृणीकृतः पञ्चशरस्त्वया सः ।
इत्थं न चेत्तर्हि कुतस्त्रिनेत्रनेत्रानलस्तं सहसा ददाह ॥ ३ ॥

पीत्वा गिरं ते गलितामृतेच्छाः सुराश्चिरं चक्रुरभोज्यमिन्दुम् ।
सुधाहृदे तत्र मुनीश मन्ये लक्ष्मच्छलाच्छैवलमीक्ष्यतेऽन्तः ॥ ४ ॥

सौभाग्यभङ्ग्यापि समाधिदाने प्रत्येति लोकः कथमेतदज्ञः ।
यत्त्वां समग्रा अपि लब्धिकान्ताः समालिलिङ्गुः समकालमेव ॥ ५ ॥

त्वत्पादपीठे विलुठन्त्यमर्त्यास्त्वद्गेहभृत्याः किल कल्पवृक्षाः ।
तैरप्यमा हन्त तवोपमानोपमेयभावः कथमस्तु वस्तु ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदोर्नखाली तव रोहिणीयं मुदे न कस्याद्भुतकृच्चरित्रा ।
वन्दारुपुंसां वदनेन्दुरन्तः प्रविष्टबिम्बोऽपि शिवाय यस्याः ॥ ७ ॥
यत्केवलज्ञानमविद्यमानमथात्मनि स्वान्तिषदामदास्त्रम् (?) ।
लोकोत्तरत्वे ननु तावकानां दिङ्मात्रमेतच्चरिताद्भुतानाम् ॥ ८ ॥
भवद्गुणानां स्तुतयो गुणज्ञैर्विधीयमाना विबुधाधिपाद्यैः ।
स्तुत्यन्तरस्तोत्रकथागणस्य समाप्तये वृत्करणीभवन्ति ॥ ९ ॥ (?)
न रागवान्नो भजसेऽतिचारं नालम्बसे वक्रगतिं कदाचित् ।
पुरस्कृतेनोऽपि घनाय नासि तथापि पृथ्वीतनयोऽसि रूढः ॥ १० ॥
प्रभो महावीरमुपास्य सम्यक्त्वयार्जितं यज्ञकलारहस्यम् ।
गृहे यतित्वेऽप्यभिरूपरत्नत्रयीजुषा कीर्तिरतानि तेन ॥ ११ ॥
त्वद्वाणिमाधुर्यजिता पलाय्य सितोपला काचघटीं विवेश ।
तत्रापि भीतिं दधती शलाकाव्याजेन जग्राह तृणं तु वक्त्रे ॥ १२ ॥
श्रीवीरसेवारसलालसत्वात्तद्बाधिनीं केवलबोधलक्ष्मीम् ।
अप्याय(ग)तामादरिणीं वरीतुं तृणाय मत्वा त्वमिमन्वमंस्थाः(?) १३
अपोढपङ्के कविभिर्निषेव्ये निरस्ततापे बहुभङ्गजाले ।
विभो भवद्वाङ्मुखगाङ्गपूरे दुर्वादिपूगास्तृणवत्तरन्ति ॥ १४ ॥
राकामये दिग्वलये समन्ताद्यशःशशाङ्केन ध्रुवं कृते ते ।
कुहूध्वनिः केवलमेव कण्ठदेशं पिकानां शरणीचकार ॥ १५ ॥
जगत्त्रयोद्भासि यशस्त्वदेतत्क्व स्पर्धतां सार्धमनेन चन्द्रः ।
यस्यापरार्धेऽपि तृणस्य (?) नैव प्रभाप्रभावो लभतेऽवकाशम् ॥ १६ ॥
छत्रेन्दुपद्मादिषु रूढिमात्रं त्वन्नाम्नि तु श्रीर्वसतीति पुष्टिः ।
कुतोऽन्यथा तज्जपदीक्षितानां पुरःपुरो नृत्यति नित्यमृद्धिः ॥ १७ ॥
वसुभूतिसूतोऽपि कौतुकं वसुभूतेर्जनकः प्रणेमुषाम् ।
भगवन्नभवोऽपि वर्तसे कथमङ्गीकृतसर्वमङ्गलः ॥ १८ ॥
नाधः करोषि वृषमीश गणाधिपोऽपि
धत्से सदाशयमपाशमपि प्रचेताः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीदोऽपि सूत्रितयमालयवासकेलि-
स्त्वं पावकोऽपि हरसे हरहेतिपातम् ॥ १९ ॥
यत्तपत्यपि कलौ जिन प्रभाचार्यमन्त्रमनुशीलतां स्फुरेत् ।
हेतुतात्र खलु तत्त्वदेकताध्यानपारमितयैव गृह्यते ॥ २० ॥
मयैवं दुर्दैवं शमयितुमलंभूष्णुमहिमा
स्तुतस्त्वं लेशेन श्रुतरथधुरागोतम गुरो ।
कुरूद्द्योतं क्लीवद्दिनपतिसुधागौ तमसि मे
प्रभो विद्यामन्त्रप्रभव भवते गोतम नमः ॥ २१ ॥

इति श्रीजिनप्रभाचार्यविरचितं गोतमस्तोत्रम् ।

---

## श्रीजिनप्रभाचार्यविरचितः

# श्रीवीरस्तवः ।

कंसारिक्रमनिर्यदापगाधाराशुद्धविराट्छदच्छविम् ।
छन्दोभिर्विविधैरधीरधीस्तोष्येऽहं चरमं जिनेश्वरम् ॥ १ ॥
त्रैलोक्यनेतस्तव दुर्नयालीनिर्नाशनं शासनमाश्रितो यः ।
तस्येन्द्रवज्रायुधमाविरस्ति दुष्कर्मशैलेन्द्रभिदाविधाने ॥ २ ॥
किमेकमाश्चर्यकरं न ते यत्पुष्पंधयोऽप्येष विशेषविज्ञः ।
त्यक्तोपजातिभ्रमणाभिलाषस्त्वदङ्गसौगन्ध्यमनुप्रयाति ॥ ३ ॥
यः सृजत्यजरसौरभसारैरम्बुजैस्तव पदाम्बुजपूजाम् ।
प्रेत्य तस्य दिवि देवमृगाक्ष्यः स्वागतानि निगदन्ति सरागम् ॥४॥
वाजिवारणरथोद्धता भटैरुद्भटा सुभगभोगभङ्गिभृत् ।
राज्यऋद्धिरुपनंनमीति तं नंनमीति तव यः पदौ मुदा ॥ ५ ॥
नाकिनिकायकरप्रहतानां संप्रसरन्गगने मुरजानाम् ।
जन्ममहे तव कस्य न जज्ञे दत्तमदो धकधोंकृतिनादः ॥ ६ ॥
ये भक्त्यात्तभ्रमरविलसिता जाताः पादाम्बुरुहि तव विभो ।
तैः श्रेयश्रीर्मधुरमधुरसास्वादासादात्समजनि कृतिभिः ॥ ७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वातत्त्वारोपलोपप्रवीणां प्रह्वप्राणित्राणसंस्थाधुरीणाम् ।
आज्ञां धत्ते मौलिना भव्यजन्तुश्रेणिः श्रद्धा**शालिनी** तावकीनाम् ॥८॥
वसुधाम सुधामय वक्त्रविधो तव भाषितमाद्रियते भुवि यः ।
स सुखानि सुखानिरिवोद्भमणीन्बिभृते परि**तोऽटक**कीर्तिभरः ॥ ९ ॥
**स्रग्विणी** कुण्डलभ्राजिगण्डस्थला तारहारद्युतिद्योतिवक्षस्तटा ।
राजिराखण्डलानामखण्डादरा पादपीठेऽलुठत्तावके पावके ॥ १० ॥
क्षणादेव तेषां शिवश्री**भुजंग प्रयातं** विवृद्धिं शुभं कर्म पुंसाम् ।
भवन्नाममन्त्रस्य वर्णानुपूर्वी रसज्ञाग्रवर्तिष्णुरापादिता यैः ॥ ११ ॥
**द्रुतविलम्बित**मध्यरवध्वनद्विविधतूर्यमनेकमणीमयम् ।
कुसुमवर्षचितं तव देशनावनितलं क इवैत्य न मोदते ॥ १२ ॥
मुकुरोज्ज्वले गणभृतां हृदये **प्रमिताक्षरा**पि बत वाग्भवतः ।
अनियत्तया प्रतिपफाल जिन ध्वनितार्थतश्च जगदर्च्यधियाम् ॥ १३ ॥
जगत्प्रभो भक्तिभरादनुद्विजाद्विजातिवंशादपहृत्य कृत्यवित् ।
नरेन्द्र**वंशस्थ**मचीकरच्छचीपतिर्भवन्तं हरिनैगमेषिणा (?) ॥ १४ ॥
वाचां ते निखिलनयाविरोधिनीनां दुर्बोधद्रुमदलने कुठारिकाणाम् ।
माहात्म्यं भुवनमनः**प्रहर्षिणीनां** निर्वक्तुं क इव यथावदस्तु शक्तः ॥१५॥

सिद्धार्थराजकुलनन्दनपारिजात
न भ्राम्यति क तव कीर्तिरपारिजात ।
वर्णेन दुग्धमधुरेण मनोजनाग-
**सिंहोद्धता** स्थिरतया सुमनोजनाग ॥ १६ ॥
अतिमहति भवोर्मी**मालिनी**ह भ्रमन्तो
जननमरणवीच्याघातदोदूयमानाः ।
कथमपि पृथुपुण्याः प्राणिनः प्राप्नुवन्ति
प्रवहणमिव केचिच्छासनं तावकीनम् ॥ १७ ॥
लवणिमतर्जितस्मरपुरंध्रिरूपदर्पा
घटितकटाक्षलक्षशरविद्धकामिमर्मा ।

१. वसन्ततिलकेति नामान्तरम्.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कनकमणीमयाभरणरश्मिरञ्जिताङ्गी
व्यजयत **वाणिनी** न भवतः समाधिमुद्राम् ॥ १८ ॥

प्रबोधं भव्याम्भोरुहवनमधीशाभिगमय-
न्हरन्मोहध्वान्तं परसमयताराः कवलयन् ।
निविष्टः सिंहासन्यलममलभामण्डलयुतो[1]
भवानाभाति स्रोदयशि**खरिणी**व द्युतिपतिः ॥ १९ ॥

अमित दमितस्रोतोमाद्यत्तुरंगमसंगम
त्रिदशह**रिणी**नेत्रा नेत्रत्रिभागविलोकितैः ।
तव जिन मनः शेके कर्तुं मनागपि न स्वसा-
चलयितुमलं किं हेमाद्रिं युगान्तमहाबलाः[2] ॥ २० ॥

दारिद्यापत्परिभवजनुर्विस्रसामृत्युदुःखै-
रार्ताः के के न तव बलवद्देव सेवां प्रपन्नाः ।
किं स्याद्दोषप्रशमनपटोरौषधस्योपयुक्तौ
**मन्दाक्रान्ता** जगति जनता दुःसहेनामयेन ॥ २१ ॥

शरदुदितनिशाकरांशु**प्रभा**[3]जैत्रकीर्तिच्छटा-
धवलितनिखिलत्रिलोकीतलं श्रद्धयोपासते ।
सरभसविनमत्सुराधीशचूडामणिज्योतिषा-
मरुणितपदपीठमूर्मीभिरेष्यच्छिवास्त्वां प्रभो ॥ २२ ॥

बिभ्राणो नखविक्रियां भयकरीं धूतोल्लसद्वालधी
रौद्रं शब्दमनीचकैः प्रकटयन्भूपोऽवनीपाद्दतः ।
त्वद्भक्त्या भृतकोऽप्यवाप्यनृपतां मांसादरं वर्धय-
न्धत्तेऽनेकपराजिदर्पदलने **शार्दूलविक्रीडितम्** ॥ २३ ॥

विद्यामन्त्रैर्न कार्यं सुरतरुभिरलं वित्तेन च मृतं
पर्याप्तं राज्यलक्ष्म्या कृतममरतया ह्यास्तां **सुवदना** ।

---

१. आसनशब्दस्यासन्नादेश इति काशिका. २. वाताः. ३. महामालिकेति नामान्तरम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्फूर्जत्वेका तु भक्तिस्तव मम मनसि ध्वस्ताखिलमला
कैवल्यश्रीर्यया स्यात्करतलनिलया साह्लाय भगवन् ॥ २४ ॥
श्रीवीरः सर्वदिक्कैः कनकरुचितनूरोचिरुद्दीप्तदीपै-
र्मङ्गल्यः सोऽस्तु दीपोत्सव इव जगदानन्दसंदर्भकन्दः ।
सूक्तिर्जैनप्रभीयं मृदुविशदपदा स्रग्धराधीयमाना
भव्यानां भव्यभूत्यै भवतु भवतुदे भावनाभावितानाम् ॥ २५ ॥

इति श्रीजिनप्रभसूरिविरचितो वीरस्तवः ।

---

## श्रीजिनप्रभसूरिविरचितः
## चतुर्विंशतिजिनस्तवः ।

कनककान्तिधनुःशतपञ्चकोच्छ्रितवृषाङ्कितदेहमुपास्महे ।
रतिपतेर्जयिनं प्रथमं जिनं नृवृषभं वृषभं वृषभञ्जिनः ॥ १ ॥
द्विरदलाञ्छित वाञ्छितदायक क्रमलुठत्रिदशासुरनायक ।
स्तुतिपरः पुरुषो भवति क्षितावजित राजितरा जितराग ते ॥ २ ॥
तुरगलाञ्छन संभव संभवत्वहरिदं जिन यत्र रसादहम् ।
हृदि दधे भणितीर्गुणभूरुहां शमहिता महिता महि तावकीः ॥ ३ ॥
भवमहार्णवनिस्तरणेच्छया त्वमभिनन्दन देव निषेव्यसे ।
व्रतभृतां कुगतेः स्मरनिग्रहप्रसभया सभया सभयात्मना ॥ ४ ॥
त्रिभुवनामित कामितपूरणे सुरतरोरुपमामतिगामुकौ ।
तव विभो भजते भवतः क्रमावसुमते सुमते सुमतेर्दद ॥ ५ ॥
धरनृपात्मज षष्ठजिनेश्वर त्वयि कृतप्रणयः क्रियते पतिः ।
रभसतः प्रथितार्थि········तोपरमया रमयारमयान्वितः ॥ ६ ॥
प्रभुसुपार्श्व जगत्रितयाज्जनुःपवितकाशिपुरीक विलक्षण ।
सुकृतिनः कृतिनश्चरितं विदुः सुभवतो भवतो भवतोदनम् ॥ ७ ॥
कुनयकाननभञ्जनकुञ्जराः शशिरुचे महसेनसुत प्रभो ।
निखिलजीवनिकायदितोक्तिभिः शुभवदाभवदाभवदागमाः ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युधि विजित्य मनोभवमग्रहीन्मकरमङ्कमिषाद्ध्वजमस्य यः ।
स्तुतजनाः सुविधिं कुदृशां सुरस्तुतमसंतमसं तमसंस्तुतम् ॥ ९ ॥
दृढरथाङ्गजशीतल शीतलद्युतिकला विमला तव भारती ।
मनसि कस्य न हर्षसनाथतां जिन तता नततानततायिनी ॥ १० ॥
जयति गण्डकलक्ष्म तनुर्जिनः शशिमुखाम्बुजदृग्दशमोत्तरः ।
कनकदीप्तिरमर्षित हीरकस्तबरदो वरदो वरदोर्युगः ॥ ११ ॥
शुभमयी वसुपूज्यसुतप्रभो भुवननेत्रमहो महिषाङ्किता ।
तव तनुर्वितनोतु सुखं सतामरुचिरं रुचिरं रुचिरञ्जिता ॥ १२ ॥
सकलसत्त्वसरोजविकासने रविरुचिर्विमल त्रिजगत्पते ।
अपि शमं नयते तव गीर्जितामृतरसा तरसा तरसा तृषम् ॥ १३ ॥
निजयशोभरनिह्नुतजाह्नवीजलवलक्षितकीर्तिरनन्तजित् ।
दिशतु वः कुमतासुरनिग्रहे भृशमनःशमनः शमनश्वरम् ॥ १४ ॥
भव भयं तव धर्म धुनोतु वाक्श्रुतिपथातिथितां गमिता सती ।
किमु करोति न पित्तरजः शमं वरसिता रसिता रसिताजुषा ॥ १५ ॥
जयति शान्तिजिनः स जगन्ति या भटचमूर्युधि मोहमहीपतेः ।
रणकथामपि भक्तिभरेण ते स सहसा सहसा सहसामुचत् ॥ १६ ॥
अवति कुन्थुजिनाधिप राज्यमा हिमवतस्त्वयि चक्रहताहितम् ।
त्रिदिवतोऽप्यधिकाजनि ऋद्धिभिर्घनरसा नरसा न रसा न किम्॥१७॥
जगदधीश सुदर्शनभूमिपान्वयपयःसरिदीशशिखामणे ।
प्रणिदधेऽन्तिषदो विषदव्रता वनरता न रता नर तावकान् ॥ १८ ॥
हृदि नरस्तव मल्लिजिन स्मरन्नपि हि मूर्तिमुपैति महत्फलम् ।
निशमयन्समताकरुणाञ्चितां किमुदितामुदिता मुदितादरः ॥ १९ ॥
त्वयि न सुव्रत कच्छपलाञ्छनोऽञ्जनरुचिर्हरिवंशविभूषणः ।
शिवसुखाय तपः परशुच्छिता शुभवतो भवतो भवतो धियाम् ॥ २० ॥
विरतिवर्मतटावतिकुण्ठितस्मरशरः शरणीक्रियतां त्वया ।
गुणगणस्य नमिर्बुधबर्हणव्रजनभाजनभाजनभावभाक् ॥ २१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनुमितं खलु नेमिविभो भवभ्रमणतो मयका यदियच्चिरम् ।
महितपाद भवान्भवतः कृपाभवनमावनमावनमालिका ॥ २२ ॥
कमठशासनपार्श्व शिवंकरे रमत एव मनः प्रियधर्मणाम् ।
अपि कुतीर्थ्यजनेन दुरात्मना तव मते वमतेऽवमतेजसः ॥ २३ ॥
त्रिजगदीक्षण केसरिलक्षण क्षणमपि प्रभुवीर मनोगिरौ ।
गुणगणान्मम मा स्म विरज्यतामुदयिता दयितादयि तावकात् ॥२४॥
च्युतजनुर्व्रतकेवलनिर्वृतिक्षणदिनाददतां मुदमार्हता ।
व्यरचि यैरुपयत्रिदशैर्दृशां नवसुधा वसुधावसुधामभिः ॥ २५ ॥
इति जिनप्रभवो मयकान्तिमक्रमगतैर्यमकावयवैर्नुताः ।
बलममी वितरन्तु धुरि स्थिताः शुभवतां भवतां भवतान्ति भित् ॥२६॥
सदुपदेशकरप्रसरक्षताखिलतमस्कतया तपनोपमाः ।
ददतु तीर्थकृतो मम निर्ममा शमरमामरमा मरमानिताः ॥ २७ ॥
जयति दुर्नयपङ्कजिनीवने हिमततिर्मतिकैरवकौमुदी ।
शमयितुं तिमिराणि जने महावृजिनभाजि नभाजिनभारती ॥ २८ ॥
करकृताम्रफला पृणती जिनप्रभवतीर्थमिभारिमधिष्ठिता ।
हरतु हेमरुचिः सुदृशां सुखव्युपरमं परमं परमम्बिका ॥ २९ ॥

इति श्रीजिनप्रभसूरिप्रणीतश्चतुर्विंशतिजिनस्तवः ।

---

## श्रीजिनप्रभसूरिविरचितः

## पार्श्वस्तवः ।

अधियदुपनमन्तो यात्रिकाः प्रीतिपात्रा
अविकलफलशालि प्राणितं मन्वते स्वम् ।
स जयति फलवर्धिस्ता(स्था)नक्लृप्तावतार-
स्त्रिभुवनभवनश्रीदीपकः पार्श्वनाथः ॥ १ ॥
जिनविभुरविभाव्यं वैभवं भूरि बिभ्र-
द्भवतु भुजगभोगाभोगविभ्राजिमौलिः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुभसुभगिमभङ्गीभाजनं भक्तिभाजा-
मभिमतफलकल्पानोकहः शोकहर्ता ॥ २ ॥
शरदुडुपरुचिश्रीगर्वसर्वस्वचौरै-
र्धवलितनिखिलाशामण्डलः कीर्तिपूरैः ।
दधदलिकुलनीलं भावितानं नताना-
मुपनयतु समृद्धीराश्वसावाश्वसेनिः ॥ ३ ॥
किमपि जिन विजेतुं दुःशकानां शकानां
महिम तलिनयन्त(?)स्त्वत्प्रभावस्य लेशाः ।
प्रसृमरकलिकालक्षोणिपालप्रताप-
प्रतिहतिकृतहस्ताः स्वस्ति विस्तारयन्ति ॥ ४ ॥
सुहृदति रिपुवारः क्षीरति क्षारनीरं
तुहिनति दहनोऽहिः पद्मिनीनालति द्राक् ।
स्थलति जलधिरेणत्येणराजः करीन्द्रो
गवति भवति भक्तिं बिभ्रतामीश पुंसाम् ॥ ५ ॥
नतशखमखचूडारत्नरोचिष्णुरोचिः
कवचितचरणाम्भोजाग्रजाग्रन्नखार्चिः ।
पुलकनिचुलिताङ्गैरुत्प्रमोदैर्न कैः कै-
रमृतपदसुखाय स्तूयसे भूयसे त्वम् ॥ ६ ॥
इदमिन तव चैत्यं शैत्यकृल्लोचनानां
कलितकलिवितण्डं मण्डपाखण्डितश्रि ।
तुलितसुरविमानं मानवानाममानां
दिशति मुदमुदग्रस्तम्भपाञ्चालिकाभिः ॥ ७ ॥
तव चरणयुगेन स्पर्धिनः कल्पवृक्षाः
क इति लपतु नेतुर्युक्तिरिक्तं खलोऽपि ।
दिवि विबुधगणानां त्वत्पुरो दास्यभाजां
दधति खलु सदा यद्देहदासत्वमेते ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तव तनुरुचिसालं नम्रमूर्धा जनोऽयं
प्रतिफलितमसक्तं स्वे ललाटे विचिन्त्य ।
मरकतदलनील ध्यानसिद्धिं व्यपोढ-
श्रममुपलभते ही लोभकृद्धेर्निदानम् ॥ ९ ॥
सकलकुशलसंपद्वीरुधां वारिवाहः
प्रचितदुरितकक्षप्रक्षये हव्यवाहः ।
कमठधरणपद्मापार्श्वयक्षैश्चिराय
त्वमचिरहितपार्श्वः पार्श्वतीर्थेश नन्द्याः ॥ १० ॥
सफलय फलवर्धीचैत्यलक्ष्मीवतंस
त्रिजगदभयदातर्मङ्क्षु नः काङ्क्षितानि ।
स्तवनमवनमेतच्चेतसस्तावकीनं
विलसतु रसनाग्रे चातुरीचञ्चुवाचाम् ॥ ११ ॥
नन्दर्तुज्वलनक्षपाकर(१३६९)मिते संवत्सरे वैक्रमे
राधस्याधिशिती त्रयोदशिबुधे संघेन सार्धं सुधीः ।
यात्रायै फलवर्धिकामुपगतः स्तोत्रं तवेदं प्रभो
श्रीमत्पार्श्व जिनप्रभो मुनिपतिः संसूत्रयामासिवान् ॥ १२ ॥

इति श्रीजिनप्रभसूरिविरचितः पार्श्वस्तवः ।

---

## जिनप्रभसूरिविरचितः

# श्रीवीरनिर्वाणकल्याणकस्तवः ।

श्रीसिद्धार्थनरेन्द्रवंश कमलाशृङ्गारचूडामणे-
र्भव्यानां दुरपोहमोहतिमिर प्रोज्जासनेऽहर्मणेः ।
कुर्वे किंचन काञ्चनोज्ज्वलरुचेर्निर्वाणकल्याणक-
स्तोत्रं गोत्रभिदर्चनीयचरणाम्भोजस्य वीरप्रभोः ॥ १ ॥
प्राप्य देवशरदां द्विसप्ततिं शीतगौ पवनदैवतर्क्षगे ।
तामुपायत रसेन (?) कार्तिकामावसी निशि शिवश्रियं भवान् ॥ २ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हस्तिपालकनृपालपालिता पूर्न पूरयतु मन्मनःशुचा ।
यत्र दर्श इव चन्द्रमा भवानस्तमाप भवतापहापनः ॥ ३ ॥
ऊर्जदर्शनिशि दर्शिताद्वयास्तत्र पुर्यखिलवर्णजाः प्रजाः ।
त्वन्महोदयमहीतयाधुनाप्युत्सवं विदधतेऽनुवत्सरम् ॥ ४ ॥
यैर्ध्वनिस्तव पपे श्रवःपुटैः षोडशप्रहरदेशनाविधौ ।
तान्निवेश्य धुरि धन्यताजुषां रेखया न खलु सृप्यतेऽन्यतः ॥ ५ ॥
पुण्यपापफलपाकवर्णनामध्यमध्ययनपङ्क्ति युक्छतम् ।
व्याकृथाः स्फुटमपृष्ट षट्कृतिव्याकृतीश्च परिषत्पुरस्तदा ॥ ६ ॥
जीवति त्वयि जिनेन्द्रभूतिना त्वत्प्रणामविधिभङ्गभीरुणा ।
नूनमैष्यत न देव केवलज्ञानसंपदनुरागभागपि ॥ ७ ॥
यद्विधेयमुपदिश्य गौतमः प्रैषि भक्तिभृदपि त्वयान्यतः ।
रोगिणः कटुकजायुपानवज्ज्यायसेऽस्य चक्रपे गुणाय तत् ॥ ८ ॥
त्वद्दिदृक्षववतरत्सुरावलीयानदेहमणिभूषणांशुभिः ।
सा कुहूरजनिरस्ततामसा पूर्णिमानिशमुपाहसद्ध्रुवम् ॥ ९ ॥
निर्वृते त्वयि विलोक्य विष्टपं ध्वान्तपूरपरिपूरितोदरम् ।
रोदयन्त इव रोदसीं प्रतिश्रुद्भरेण रुरुदुः पुरंदराः ॥ १० ॥
वह्निवायुजलदेश्वरैः सुरैस्तैलपर्णिकक्तताङ्गसंस्कृतेः ।
भूतिमात्रमपि भूतिधाम ते येऽस्पृशन्बत न तान्रजोऽस्पृशत् ॥ ११ ॥
भक्तितो महितुमीश वासवास्तावकीनहनुसंग्रहं व्यधुः ।
नूनमक्षविजयेन तावकानुग्रहेण हनुमत्त्वमिच्छवः ॥ १२ ॥
कुग्रहा न तव जातु शासनं वीर बाधितुमलंभविष्णवः ।
एककः स खलु भस्मकग्रहो बाधते भवदुपेक्षितस्तदा ॥ १३ ॥
जग्मुषि त्वयि शिवं नराधिपास्तं क्षणं गृहिणीनबोधयन् (?) ।
ये बभुः कुनयकाननप्लुषस्त्वत्प्रतापशिखिनः कणा इव ॥ १४ ॥
यन्न कश्चन मुनिस्त्वया समं मुक्तिमायदितरैर्जिनैरिव ।
दुःषमासमयभावलिङ्गिनां व्याञ्जि तेन गुरुनिर्व्यपेक्षता ॥ १५ ॥

१. जायुरौषधम्. २. तैलपर्णिकं चन्दनविशेषः.

For Private and Personal Use Only

प्रस्थिते त्वयि शिवाय तत्क्षणं संमुमूर्छुरधिपृथ्वि कुन्थवः ।
क्षुद्रजीव बहुलामतः परं सूचयन्त इव भाविनीं महीम् ॥ १६ ॥
यत्र यत्र चरणौ त्वयार्पितौ तत्तदास्पदमगादपापताम् ।
एकया पुनरपापया पुरा पापयाजनि सुरोक्तिनामतः ॥ १७ ॥
यत्र मुक्तिमगमः शमद्रुमावाप पापतुदि नार्कतापतत् ।
प्रीतिमीतितनुकुञ्जभञ्जने नागनागकरणं करोतु नः ॥ १८ ॥
यः पठत्यशठधीस्तव वीर स्तोत्रमेतदवधानसमेतः ।
तत्र भावरिपुराजिरयश्रीभाजि न प्रभवति प्रबलापि ॥ १९ ॥

इति श्रीजिनप्रभसूरिविरचितः श्रीवीरनिर्वाणकल्याणकस्तवः ।

---

## श्रीविमलप्रणीता

# प्रश्नोत्तररत्नमाला ।[1]

प्रणिपत्य वर्धमानं[2] प्रश्नोत्तररत्नमालिकां[3] वक्ष्ये ।
नागनरामरवन्द्यं देवं देवाधिपं वीरम् ॥ १ ॥
कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान् ।
कण्ठस्थितया विमलप्रश्नोत्तररत्नमालिकया ॥ २ ॥
भगवन्किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ।
को गुरुरधिगततत्त्वः सत्त्वहिताभ्युद्यतः सततम् ॥ ३ ॥
त्वरितं किं कर्तव्यं विदुषा संसारसंततिच्छेदः ।
किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासहितम् ॥ ४ ॥
किं पथ्यदनं धर्मः कः शुचिरिह यस्य मानसं शुद्धम् ।
कः पण्डितो विवेकी किं विषमवधीरिता गुरवः ॥ ५ ॥
किं संसारे सारं बहुशोऽपि विचिन्त्यमानमिदमेव ।
मनुजेषु दृष्टतत्त्वं[4] स्वपरहितायोद्यतं जन्म ॥ ६ ॥

---

१. प्रश्नोत्तररत्नमालायाः पुस्तकद्वयमस्माभिरासादितम्. तत्र प्रथममेकपत्रात्मकं शुद्धं संवेगिसाधुश्रीशान्तिविजयमुनिभिर्दत्तं **क**-संज्ञकम्. द्वितीयं पत्रद्वयात्मकं शुद्धं भगवान्दासश्रेष्ठिना केवलदासात्मजेन सुरतनगरात्प्रहितं **ख**-संज्ञकं ज्ञेयम्. २. 'जिनवरेन्द्रं' **क**. ३. 'पद्धतिं' **ख**. ४. 'सत्त्वं' **क**.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मदिरेव मोहजनकः कः स्नेहः के च दस्यवो विषयाः।
का भववल्ली तृष्णा को वैरी नन्वनुद्योगः ॥ ७ ॥
कस्माद्भयमिह मरणादन्धादपि को विशिष्यते रागी।
कः शूरो यो ललनालोचनबाणैर्न च व्यथितः ॥ ८ ॥
पातुं कर्णाञ्जलिभिः किममृतमिव बुध्यते सदुपदेशः।
किं गुरुताया मूलं यदेतदप्रार्थनं नाम ॥ ९ ॥
किं गहनं स्त्रीचरितं कश्चतुरो यो न खण्डितस्तेन।
किं दारिद्र्यमसंतोष एव किं लाघवं याच्ञा ॥ १० ॥
किं जीवितमनवद्यं किं जाड्यं पाटवेऽप्यनभ्यासः।
को जागर्ति विवेकी का निद्रा मूढता जन्तोः ॥ ११ ॥
नलिनीदलगतजललवतरलं किं यौवनं धनमथायुः।
के शशधरकरनिकरानुकारिणः सज्जना एव ॥ १२ ॥
को नरकः परवशता किं सौख्यं सर्वसङ्गविरतिर्या।
किं सत्यं भूतहितं किं प्रेयः प्राणिनामसवः ॥ १३ ॥
किं दानमनाकाङ्क्षं किं मित्रं यन्निवर्तयति पापात्।
कोऽलंकारः शीलं किं वाचां मण्डनं सत्यम् ॥ १४ ॥
किमनर्थफलं मानसमसंगतं का सुखावहा मैत्री।
सर्वव्यसनविनाशे को दक्षः सर्वथा त्यागः ॥ १५ ॥
कोऽन्धो योऽकार्यरतः को बधिरो यः शृणोति न हितानि।
को मूको यः काले प्रियाणि वक्तुं न जानाति ॥ १६ ॥
किं मरणं मूर्खत्वं किं चानर्घ्यं यदवसरे दत्तम्।
आ मरणात्कि शल्यं प्रच्छन्नं यत्कृतमकार्यम् ॥ १७ ॥
कुत्र विधेयो यत्नो विद्याभ्यासे सदौषधे दाने।
अवधीरणा क्व कार्या खलपरयोषित्परधनेषु ॥ १८ ॥
काहर्निशमनुचिन्त्या संसारासारता न च प्रमदा।
का प्रेयसी विधेया करुणा दाक्षिण्यमपि मैत्री ॥ १९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कण्ठगतैरप्यसुभिः कस्यात्मा नो समर्प्यते जातु ।
मूर्खस्य विषादस्य च गर्वस्य तथा कृतघ्नस्य ॥ २० ॥

कः पूज्यः सद्वृत्तः कमधनमाचक्षते चलितवृत्तम् ।
केन जितं जगदेतत्सत्यतितिक्षावता पुंसा ॥ २१ ॥

कस्मै नमः सुरैरपि सुतरां क्रियते दयाप्रधानाय ।
कस्मादुद्विजितव्यं [1]संसारारण्यतः सुधिया ॥ २२ ॥

कस्य वशे प्राणिगणः सत्यप्रियभाषिणो विनीतस्य ।
क्व स्थातव्यं न्याय्ये पथि [2]दृष्टादृष्टलाभाय ॥ २३ ॥

विद्युद्विलसितचपलं किं दुर्जनसंगतं युवतयश्च ।
कुलशैलनिष्प्रकम्पाः के कलिकालेऽपि सत्पुरुषाः ॥ २४ ॥

किं शोच्यं कार्पण्यं सति विभवे किं प्रशस्यमौदार्यम् ।
तनुतरवित्तस्य तथा प्रभविष्णोर्यत्सहिष्णुत्वम् ॥ २५ ॥

चिन्तामणिरिव दुर्लभमिह किं कथयामि ननु चतुर्भद्रम् ।
किं तद्वदन्ति भूयो विधूततमसो विशेषेण ॥ २६ ॥

[3]दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं च वित्तं दुर्लभमेतच्चतुर्भद्रम् ॥ २७ ॥

इति कण्ठगता विमला प्रश्नोत्तररत्नमालिका येषाम् ।
ते मुक्ताभरणा अपि विभान्ति विद्वत्समाजेषु ॥ २८ ॥

[4]रचिता सितपटगुरुणा विमला विमलेन रत्नमालेव ।
प्रश्नोत्तरमालेयं कण्ठगता कं न भूषयति ॥ २९ ॥

इति श्रीविमलविरचिता प्रश्नोत्तररत्नमाला ।

---

१. 'संसारावासतः' क. २. 'दृष्टादृष्टार्थलाभाय' ख. ३. हितोपदेशेऽपीयमार्या समुद्धृतास्ति. ४. ख-पुस्तकेऽस्या आर्यायाः स्थाने 'विवेकात्त्यक्तराज्येन राज्ञेयं रत्नमालिका । रचितामोघवर्षेण सुधियां सदलंकृतिः ॥' एतत्पद्यं वर्तते.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## महाकविश्रीधनपालप्रणीता

## ऋषभपञ्चाशिका[1] ।

जय जन्तुकप्पपायव चन्दायव रामपङ्कयवणस्स ।
सयलमुणिगामगामणि तिलोअचूणामणि नमो ते ॥ १ ॥
[जय जन्तुकल्पपादप चन्द्रातप रागपङ्कजवनस्य ।
सकलमुनिग्रामग्रामणीस्त्रिलोकचूडामणे नमस्ते ॥]
जय रोसजलणजलहर कुलहर वरनाणदंसणसिरीणम् ।
मोहतिमिरोहदिणयर नयर गुणगणाण पउराणम् ॥ २ ॥
[जय रोषज्वलनजलधर कुलगृह वरज्ञानदर्शनश्रियोः ।
मोहतिमिरौघदिनकर नगर गुणगणानां पौराणाम् ॥]
दिट्ठो कहँवि विहडिए गण्ठिम्मि कवाडसंपुडघणम्मि ।
मोहन्धयारचारयगएण जिण दिणयरुव्व तुमम् ॥ ३ ॥
[दृष्टः कथमपि विघटिते ग्रन्थौ कपाटसंपुटघने ।
मोहान्धकारचारकगतेन[2] जिन दिनकर इव त्वम् ॥]
भविअकमलाणँ जिणरवि तुह दंसणपहरिसूससन्ताणम् ।
दढबद्धा इव विहडन्ति मोहतमभमरचन्दाइं ॥ ४ ॥
[भव्यकमलानां जिनरवे त्वद्दर्शनप्रहर्षोच्छ्वसताम् ।
दृढबद्धा इव विघटन्ते मोहतमोभ्रमरवृन्दानि ॥]
लद्धत्तणाभिमाणो सव्वो सव्वट्ठसुरविमाणस्स ।
एइँ नाह नाहिकुलगरघरावयारम्मुहे नट्ठो ॥ ५ ॥
[प्रधानत्वाभिमानः सर्वः सर्वार्थसुरविमानस्य ।
त्वयि नाथ नाभिकुल····गृहावतारोन्मुखे नष्टः ॥]
एइँ चिन्तादुल्लहमुक्खसुक्खफलए अउव्वकप्पदुमे ।
अवइन्ने कप्पतरू जयगुरु हित्था इव पउत्था ॥ ६ ॥

---

१. अस्या ऋषभपञ्चाशिकायाः सटीकं पुस्तकद्वयमस्माभिरधिगतम्.. तत्र प्रथमं जीर्णतरं पत्रद्वयात्मकं संवेगिसाधुवरश्रीशान्तिविजयमुनिभिर्दत्तम्. द्वितीयं भगवान्दासश्रेष्ठिना सुरतनगरात्प्रहितं नवीनं नातिशुद्धं च. २. कारागारगतेन.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[त्वयि चिन्तादुर्लभमोक्षसुखफलदेऽपूर्वकल्पद्रुमे।
अवतीर्णे कल्पतरवो जगद्गुरो द्वीस्था इव प्रोषिताः ॥]

अरएणं तइएणं इमाइ ओसप्पिणीइ तुह जम्मे।
फुरिअं कणगमएणं व कालचक्किक्कपासम्मि ॥ ७ ॥

[अरकेण तृतीयेणास्यामवसर्पिण्यां तव जन्मनि।
स्फुरितं कनकमयेनेव कालचक्रैकपार्श्वे ॥]

जम्मि तुमं अहिसित्तो जत्थ य सिवसुक्खसंपयं पत्तो।
ते अट्ठावयसेला सीसामेला गिरिकुलस्स ॥ ८ ॥

[यत्र त्वमभिषिक्तो यत्र च शिवसुखसंपदं प्राप्तः।
तावष्टापदशैलौ शीर्षापीडौ गिरिकुलस्य ॥]

धन्ना सविम्हयं जेहिँ झत्ति कयरज्जमज्जणो हरिणा।
चिरधरिअनलिणपत्ताभिसेअसलिलेहिँ दिट्ठोसि ॥ ९ ॥

[धन्याः सविस्मयं यैर्झगिति कृतराज्यमज्जनो हरिणा।
चिरधृतनलिनीपत्राभिषेकसलिलैर्दृष्टोऽसि ॥]

दाविअविज्जासिप्पो वज्जरिआसेसलोअववहारो।
जाओसि जाण सामिअ पयाउ ताओ कयत्थाओ ॥ १० ॥

[दर्शितविद्याशिल्पो व्याकृताशेषलोकव्यवहारः।
जातोऽसि यासां स्वामी प्रजास्ताः कृतार्थाः ॥]

बन्धुविहत्तवसुमई वच्छरमच्छिन्नदिन्नधणनिवहो।
जह तं तह को अन्नो निअमधुरं धीर पडिवन्नो ॥ ११ ॥

[बन्धुविभक्तवसुमतीको वत्सरमच्छिन्नदत्तधननिवहः।
यथा त्वं तथा कोऽन्यो नियमधुरां धीर प्रतिपन्नः ॥]

सोहसि पसाहिअंसो कज्जलकसिणाहिँ जयगुरु जडाहिं।
उवगूढविसज्जिअरायलच्छिबाहच्छडाहिं वा ॥ १२ ॥

[शोभसे प्रसाधितांसः कज्जलकृष्णाभिर्जगद्गुरो जटाभिः।
उपगूढविसर्जितराजलक्ष्मीबाष्पच्छटाभिरिव ॥]

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उवसामिआ अणज्जा देसेसु तुए पवन्नमोणेण ।
अभणन्तच्चिअ कज्जं परस्स साहन्ति सप्पुरिसा ॥ १३ ॥
[उपशमिता अनार्या देशेषु त्वया प्रपन्नमौनेन ।
अभणन्त एव कार्यं परस्य साधयन्ति सत्पुरुषाः ॥]
मुणिणो वि तुहल्लीणा नमिविनमी खेअराहिवा जाया ।
गुरुआण चलणसेवा न निप्फला होइ कइयावि ॥ १४ ॥
[मुनेरपि तवालीनौ नमिविनमी खेचराधिपौ जातौ ।
गुरूणां चरणसेवा न निष्फला भवति कदाचनापि ॥]
भद्दं से सेअंसस्स जेण तवसोसिओ निराहारो ।
वरिसन्ते निव्वइओ मेहेण व वणदुमो तं सि ॥ १५ ॥
[भद्रं तस्य श्रेयसो येन तपःशोषितो निराहारः ।
वर्षान्ते निर्वापितो मेघेनेव वनद्रुमस्त्वमसि ॥]
उप्पन्नविमलनाणे तुमम्मि भुवणस्स विअलिओ मोहो ।
सेलुग्गयसूरे वासरम्मि गयणस्स व तमोहो ॥ १६ ॥
[उत्पन्नविमलज्ञाने त्वयि भुवनस्य विगलितो मोहः ।
सकलोद्गतसूर्ये वासरे गगनस्येव तमओघः ॥]
पूआवसरे सरिसो दिट्ठो चक्कस्स तं पि भरहेण ।
विसमा हु विसयतिह्ना गुरुआण वि कुणइ मइमोहम् ॥ १७ ॥
[पूजावसरे सदृशो दृष्टश्चक्रस्य त्वमपि भरतेन ।
विषमा खलु विषयतृष्णा गुरूणामपि करोति मतिमोहम् ॥]
पढमसमोसरणमुहे तुह केवलसुरवहूकउज्जोआ ।
जाया अग्गेइदिसा सेवासयमागयसिहि व्व ॥ १८ ॥
[प्रथमसमवसरणमुखे तव केवलसुरवधूकृतोद्योता ।
जाता आग्नेयी दिशा सेवास्वयमागतशिखीव ॥]
गहिअवयभङ्गमलिणो नूणं दूरोणएहिँ मुहराओ ।
तइओ पढमुद्धअतावसेहिँ तुह दंसणे पढमे ॥ १९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[गृहीतव्रतभङ्गमलिनो नूनं दूरावनतैर्मुखरागः ।
स्थगितः प्रथमोत्पन्नतापसैस्तव दर्शने प्रथमे ॥]

तेहिँ परिवेढिएण य वूढा तुमए खणं कुलवइस्स ।
सोहा विअडंसत्थलघोलन्तजडाकलावेण ॥ २० ॥

[तैः परिवेष्टितेन च व्यूढा त्वया क्षणं कुलपतेः ।
शोभा विकटांसस्थलप्रेङ्खज्जटाकलापेन ॥]

तुह रूवं पेच्छन्ता न हुन्ति जे नाह हरिसपडिहत्था ।
समणावि गयमणच्चिअ ते केवलिणो जइ न हुन्ति ॥ २१ ॥

[तव रूपं पश्यन्तो न भवन्ति ये नाथ हर्षपरिपूर्णाः ।
समनस्का अपि गतमनस्का इव ते केवलिनो यदि न भवन्ति ॥]

पत्तानि असामन्नं समुन्नइं जेहिँ देवया अन्ने ।
ते दिन्ति तुम्ह गुणसंकहासु हासं गुणा मज्झ ॥ २२ ॥

[प्राप्तान्यसामान्यां समुन्नतिं यैर्दैवतान्यन्यानि ।
ते ददते तव गुणसंकथासु हासं गुणा मह्यम् ॥]

दोसरहिअस्स तुह जिण निन्दावसरम्मि भग्गपसराए ।
वायाइ वयणकुसला वि बालिसाहुन्ति मच्छरिणो ॥ २३ ॥

[दोषरहितस्य तव जिन निन्दावसरे भग्नप्रसरया ।
वाचा वचनकुशला अपि बालिशायन्ते मत्सरिणः ॥]

अणुरायपल्लविल्ले रइवल्लिफुरन्तहासकुसुमम्मि ।
तवताविओ वि न मणो सिङ्गारवणे तुहल्लीणो ॥ २४ ॥

[अनुरागपल्लववति रतिवल्लीस्फुरद्धासकुसुमे ।
तपस्तापितमपि न मनः शृङ्गारवने तव लीनम् ॥]

आणा जस्स विलइआ सीसे सेसव्व हरिहरेहिं पि ।
सो वि तुह झाणजलणे मयणो मयणं विअ विलीणो ॥ २५ ॥

[आज्ञा यस्य विलम्बिता शीर्षे शेषेव हरिहराभ्यामपि ।
सोऽपि तव ध्यानज्वलने मदनो मदन इव विलीनः ॥]

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पइँ नवरि निरभिमाणा जाया जयदप्पभज्जणुत्ताणा।
वम्महनरिन्दजोहा दिट्ठिच्छोहा मयच्छीणम्॥ २६॥

[त्वयि केवलं निरभिमाना जाता जगद्दर्पभञ्जनोत्तानाः।
मन्मथनरेन्द्रयोधा दृष्टिक्षोभा मृगाक्षीणाम्॥]

विसमा रागद्देसा निन्ता तुरयव्व उप्पहेण मणम्।
ठायन्ति धम्मसारिहि दिट्ठे तुह पवयणे नवरम्॥ २७॥

[विषमौ रागद्वेषौ नयन्तौ तुरगाविवोत्पथेन मनः।
तिष्ठतो धर्मसारथे दृष्टे तव प्रवचने निश्चितम्॥]

पच्चलकसायचोरे सइसंनिहिआसि चक्कधणुरेहा।
हुन्ति तुह च्चिअ चलणा सरणं भीआण भवरन्ने॥ २८॥

[प्रत्यलकषायचोरे सदासंनिहितासि चक्रधनूरेखौ।
भवतस्तवैव चरणौ शरणं भीतानां भवारण्ये॥]

तुह समयसरब्भट्ठा भमन्ति सयलासु रुक्खजाईसु।
सारणिजलं व जीवा ठाणट्ठाणेसु बज्झन्तो॥ २९॥

[तव समयसरोभ्रष्टा भ्रमन्ति सकलासु रु(वृ)क्षजातिषु।
सारणिजलमिव जीवा स्थानस्थानेषु बध्यमानाः॥]

सलिलिव्व पवयणे तुह गहिए उड्ढं अहो विमुक्कम्मि।
वच्चन्ति नाह कूवारहट्टघडिसंनिहा जीवा॥ ३०॥

[सलिल इव प्रवचने तव गृहीते ऊर्ध्वमधो विमुक्ते।
व्रजन्ति नाथ कूपारघट्टघटीसंनिभा जीवाः॥]

लीलाइ निन्ति सुक्खं अन्ने जह तित्थिआ तहा न तुमम्।
तह वि तुह मग्गलग्गा मग्गन्ति बुहा सिवसुहाइं॥ ३१॥

[लीलया नयन्ति सुखमन्ये यथा तीर्थिका तथा न त्वम्।
तथापि तव मार्गलग्ना मृगयन्ते बुधाः शिवसुखानि॥]

सारिव्व बन्धवहभरणभाइणो जिण ण हुन्ति पइ दिट्ठे।
अक्खहिँवि हीरन्ता जीवा संसारफलयम्मि॥ ३२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[शारय इव बन्धवधमरणभागिनो जिन न भवन्ति त्वयि दृष्टे ।
अक्षैरपि ह्रियमाणा जीवाः संसारफलके ॥]
अवहीरिआ तए पहु निन्ति निओगिकसङ्कलाबद्धा ।
कालमणन्तं सत्ता समं कयाहारनीहारा ॥ ३३ ॥
[अवधीरितास्त्वया प्रभो नयन्ति निगोदै(योगै)कशृङ्खलाबद्धाः ।
कालमनन्तं सत्त्वा समं कृताहारनीहाराः ॥]
जेहिँ तविआणँ तवनिहि जायइ परमा तुमम्मि पडिवत्ती ।
दुक्खाइँ ताइँ मन्ने न हुन्ति कम्मं अहम्मस्स ॥ ३४ ॥
[यैस्तापितानां तपोनिधे जायते परमा त्वयि प्रतिपत्तिः ।
दुःखानि तानि मन्ये न भवन्ति कर्माधर्मस्य ॥]
होही मोहच्छेउं तुह सेवाए धुवत्ति नन्दामि ।
जं पुण न वन्दिअव्वो तत्थ तुमं तेण झिज्जामि ॥ ३५ ॥
[भविष्यति मोहच्छेदस्तव सेवया ध्रुव इति नन्दामि ।
यत्पुनर्न वन्दितव्यस्तत्र त्वं तेन क्षीये ॥]
जा तुह सेवाविमुहस्स हन्तु मा ताउ मह समिद्धीओ ।
अहियारसंपया इव पेरन्तविडम्बणफलाओ ॥ ३६ ॥
[यास्तव सेवाविमुखस्य भवन्तु मा ता मम समृद्धयः ।
अधिकारसंपद इव पर्यन्तविडम्बनफलाः ॥]
भित्तूण तमं दीवो देव पयत्थे जणस्स पयडेइ ।
तुह पुण विवरीयमिणं जइक्कदीवस्स निव्वडिअम् ॥ ३७ ॥
[भित्त्वा तमो दीपो देव पदार्थाञ्जनस्य प्रकटयति ।
तव पुनर्विपरीतमिदं जगदेकदीपस्य निर्वृत्तम् ॥]
मित्थत्तविसपसुत्ता सचेयणा जिण न हुन्ति किं जीवा ।
कन्नम्मि कमइ जइ कित्तिअं पि तुह वयणमन्तस्स ॥ ३८ ॥
[मिथ्यात्वविषप्रसुप्ताः सचेतना जिन न भवन्ति किं जीवाः ।
कर्णयोः क्रामति यदि कियदपि त्वद्वचनमन्त्रस्य ॥]

१७

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आयण्णिआ खणद्धं पि पइ थिरं ते करन्ति अणुराअम् ।
परसमया तह वि मणं तुह समयज्जाण न हरन्ति ॥ ३९ ॥
[आकर्णिताः क्षणार्धं त्वयि स्थिरं ते कुर्वन्त्यनुरागम् ।
परसमयास्तथापि मनस्तव समयज्ञानां न हरन्ति ॥]
वाईहिँ परिग्गहिआ करन्ति विमुहं खणेण पडिवक्खम् ।
तुज्झ नया नाह महागयव्व अन्नुन्नसंलग्गा ॥ ४० ॥
[वादि(जि)भिः परिगृहीताः कुर्वन्ति विमुखं क्षणेन प्रतिपक्षम् ।
तव नया नाथ महागजा इवान्योन्यसंलग्नाः ॥]
पावन्ति जसं असमञ्जसा वि वयणेहिँ जेहिँ परसमया ।
तुह समयमहोअहिणो ते मन्दा बिन्दुनिस्सन्दा ॥ ४१ ॥
[प्राप्नुवन्ति यशोऽसमञ्जसा अपि वचनैर्यैः परसमयाः ।
तव समयमहोदधेस्तानि मन्दा बिन्दुनिस्यन्दाः ॥]
पइ मुक्के पोअम्मिव जीवेहिँ भवन्नवम्मि पत्ताओ ।
अणुवेलमावयामुहपडिएहिँ विडम्बणा विविहा ॥ ४२ ॥
[त्वयि मुक्ते पोत इव जीवैर्भवार्णवे प्राप्ताः ।
अनुवेलमापदा(गा)मुखपतितैर्विडम्बना विविधाः ॥]
बुत्थं अपत्थिआगयमत्थभवन्तो मुहुत्तवसिएण ।
छावट्ठीअयराइं निरन्तरं अप्पइट्ठाणे ॥ ४३ ॥
[उषितमप्रार्थितागतमत्स्यभवान्तर्मुहूर्तमुषितेन ।
षट्षष्टिसागरोपमानि (?) निरन्तरमप्रतिष्ठाने ॥]
सीउह्नवासधारानिवायदुक्खं सुतिक्खमणुभूअम् ।
तिरिअत्तणम्मि नाणावरणसमुच्छाइएणावि ॥ ४४ ॥
[शीतोष्णवर्षधारानिपातदुःखं सुतीक्ष्णमनुभूतम् ।
तिर्यक्त्वेऽपि ज्ञानावरणसमवच्छादितेनापि ॥]
अन्तोनिक्खन्तेहिं पत्तेहिं पिअकलत्तपुत्तेहिं ।
सुन्ना मणुस्सभवणाडएसु निब्भाइआ अङ्का ॥ ४५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[अन्तेनिष्क्रान्तै प्रात्रैः(पात्रैः) प्रियकलत्रपुत्रैः ।
शून्या मनुष्यभवनाटकेषु निभालिता अङ्काः ॥]

दिट्ठा रिउरिद्धीओ आणाउ कया महड्ढिअसुराणम् ।
सहियावहीणदेवत्तणेसु दोगच्चसंतावा ॥ ४६ ॥

[दृष्टा रिपुऋद्धय आज्ञा कृता महर्द्धिकसुराणाम् ।
सोढावंवहीनदेवत्वेषु दौर्गत्यसंतापौ ॥]

सिञ्चन्तेण भववणं पल्लट्टा पल्लिआ रहट्टव्व ।
घडिसंठाणोसप्पिणिओसप्पिणिपरिगया बहुसो ॥ ४७ ॥

[सिञ्चता भववनं परिवर्ताः प्रेरिता अरघट्ट इव ।
घटीसंस्थानावसर्पिण्युत्सर्पिणीपरिगता बहुशः ॥]

भमिओ कालमणन्तं भवम्मि भीओ न नाह दुक्खाणम् ।
दिट्ठे तुमम्मि संपइ जायं च भयं पलायं च ॥ ४८ ॥

[भ्रान्तः कालमनन्तं भवे भीतो न नाथ दुःखानाम् ।
दृष्टे त्वयि संप्राति जातं च भयं पलायितं च ॥]

जइ वि कयत्थो जगगुरु मज्झत्थो जइ वि तह वि पत्थेमि ।
दाविज्जसु अप्पाणं पुणो वि कइयावि अह्माणम् ॥ ४९ ॥

[यद्यपि कृतार्थो जगद्गुरो मध्यस्थो यद्यपि तथापि प्रार्थये ।
दर्शयेरात्मानं पुनरपि कदाचिदप्यस्माकम् ॥]

इअ झाणग्गिपलीविअकम्मिन्धण बालबुद्धिणा वि मए ।
भत्तीइ थुओ भवभयसमुद्दबोहित्थबोहिफलो ॥ ५० ॥

[इति ध्यानाग्निप्रदीपितकर्मेन्धन बालबुद्धिनापि मया ।
भक्त्या स्तुतो भवभयसमुद्रयानपात्रबोधिफलः ॥]

इति महाकविश्रीधनपालविरचिता ऋषभपञ्चाशिका ।

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# महाकविशोभनमुनिप्रणीता चतुर्विंशतिजिनस्तुतिः ।

टिप्पणसमेता ।

धनपालपण्डितबान्धवेन शोभनाभिधानेन मुनिचक्रवर्तिना विरचितानां प्रतिजिनं चतुष्कभावा षण्णवति(?)संख्यानां शोभनस्तुतीनामवचूरिः किंचिल्लिख्यते । तत्रादौ युगादिस्तुतिमाह—

भव्याम्भोजविबोधनैकतरणे विस्तारिकर्मावली-
रम्भासामज नाभिनन्दन महानष्टापदाभासुरैः ।
भक्त्या वन्दितपादपद्म विदुषां संपादय प्रोज्झिता-
रम्भासान जनाभिनन्दन महानष्टापदाभासुरैः ॥ १ ॥

हे नाभिनन्दन नाभिनरेन्द्रपुत्र, त्वं महानुत्सवान्विदुषां संपादयेति संबन्धः । भव्या एवाम्भोजानि कमलानि तेषां विबोधन एकोऽद्वितीयस्तरणिः सूर्यस्तस्य संबोधनं हे भव्याम्भोजविबोधनैकतरणे । सूर्यो यथा स्वगोसंभारैस्तमो विधूय पद्मखण्डानि विकासयत्येवं भगवानपि मिथ्यात्वादितमस्तोमं ध्वंसयित्वा निजगोसंभारैर्भव्यजन्तूनां बोधं विधत्ते । ननु भव्यानामेव स प्रबोधं विधत्ते न त्वभव्यानां तर्हि तस्य तद्बोधनेऽसामर्थ्यमायातमिति नैवम् । नहि भानवीया भानवो विश्वं विश्वमवभासयन्तोऽपि कौशिककुले आलोकमकुर्वाणा उपलम्भास्पदं स्युः । एवं भगवतो वाणी विश्वविश्वस्य प्रमोदविधायिन्यपि यद्यभव्यानां केषांचिन्निबिडकर्मनिगडनियन्त्रितानां प्रबोधाय न प्रभवति तर्हि तस्या न ह्यसामर्थ्यम् । किं तु तेषामेवाभाग्यं येषां ता न रोचयन्ते (सा न रोचते) नहि जलदो जलं प्रयच्छन्नूषरक्षेत्रे तृणान्यनुत्पादयन्नुपालम्भसंभावनामर्हतीत्यलं विस्तरेण । विस्तारिणी विस्तारवती कर्मणां ज्ञानावरणादिभेदभिन्नानामावली माला सैव रम्भा कदली तस्याः प्रमर्दहेतुत्वात्सामजो हस्ती । तस्य संबोधनम् । हे नाभिनन्दन । तथा महत्यो नष्टा आपदा यस्य स महानष्टापत् । संबोधनं वा । तथा आभासुरैः कान्तिसंभारेण समन्ताद्देदीप्यमानैरासुरैर्देवविशेषैर्भक्त्या आन्तर चित्तप्रतिबन्धेन हे वन्दितपादपद्म हे स्तुतचरणकमल । प्रोज्झिताः प्रकर्षेण त्यक्ता आरम्भाः सावद्यव्यापारा

१. एतस्या जिनस्तुतेः पुस्तकत्रयमवचूरिसमेतं केवलदासात्मजेन भगवान्दासश्रेष्ठिनास्मदर्थं प्रहितम्. तत्र प्रथमं शुद्धं सुन्दरं पञ्चपत्रात्मकं १५०५ मिते विक्रमाब्दे लिखितम्. द्वितीयमपि तादृशमेवैकादशपत्रात्मकं १६१४ मिते विक्रमाब्दे लिखितम्. तृतीयं नातिशुद्धं त्रयोदशपत्रात्मकं १६१५ मिते विक्रमाब्दे लिखितमस्ति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येन तस्य संबोधनम् । तथा सह आमै रोगैर्वर्तते सामः । न तथा असामोऽरोगस्तस्य संबोधनम् । जनानभिनन्दयति तस्य संबोधनम् । तथा अष्टापदं सुवर्णं तद्वदासमन्ताद्भा दीप्तिर्यस्य तस्य संबोधनम् । तप्तजात्यतपनीयसमवर्णत्वाद्भगवतः ॥

ते वः पान्तु जिनोत्तमाः क्षतरुजो नाचिक्षिपुर्यन्मनो
दारा विभ्रमरोचिताः सुमनसो मन्दारवा राजिताः ।
यत्पादौ च सुरोज्झिताः सुरभयांचक्रुः पतन्त्योऽम्बरा-
दाराविभ्रमरोचिताः सुमनसो मन्दारवाराजिताः ॥ २ ॥

ते जिनोत्तमा जिनेन्द्रा वो युष्मान्पान्तु रक्षन्तु । किंभूताः । क्षताः क्षीणा रुजो रोगा येषां येभ्यो वा ते । तथा येषां जिनानां मनो मानसं कर्मतापन्नं दाराः कलत्राणि कर्तृरूपाणि नाचिक्षुपुर्न क्षोभयामासुः । 'दाराः प्राणास्तु वलजाः' इति वचनाद्दारशब्दो बहुवचनान्तः पुंलिङ्गश्च । ते दाराः किंभूताः । विभ्रमैर्विलासै रोचिताः संशोभिताः । सुमनसः सुन्दरहृदयाः । मन्दारवा मृदुरवाः सन्तो राजिताः शोभिताः । सुमनसः पुष्पाणि कर्तॄणि यत्पादौ यच्चरणौ सुरभयामासुः । किंभूताः सुमनसः । सुरोज्झिता देवमुक्ताः । अम्बरादाकाशात्पतन्त्यः । समवसरणभुवि संगच्छमानाः । आराविणः शब्दायमाना भ्रमरास्तेषामुचिता योग्याः । मन्दारकुसुमव्रातैराजिताः ॥

शान्तिं वस्तनुतान्मिथोऽनुगमनाद्यन्नैगमाद्यैर्नयै-
रक्षोभं जन हेऽतुलां छितमदोदीर्णाङ्गजालं कृतम् ।
तत्पूज्यैर्जगतां जिनैः प्रवचनं दृप्यत्कुवाद्यावली-
रक्षोभञ्जनहेतुलाञ्छितमदो दीर्णाङ्गजालंकृतम् ॥ ३ ॥

तज्जगतां पूज्यैर्जिनैः कृतं प्रवचनं गणिपिटकरूपं वो युष्माकं शान्तिं मोक्षमुपशमं वा तनुतात्कुरुतात् । यन्मिथोऽनुगमनादनुवर्तनाद्धेतोर्नैगमादिभिर्नयैरक्षोभं परवादिभिरजेयं वर्तते । हे जन भव्यलोक । शान्तिं किंभूताम् । अतुलां निरुपमाम् । मतं किंभूतम् । छिदमदं छिन्नदर्पमुदीर्णमुच्छ्रितमङ्गानामाचारादीनां जालं समूहो यत्र तत् । तथा माद्यत्कुवादिश्रेणिः सैव क्रूरात्मकत्वाद्रक्षो राक्षसस्तस्य भञ्जनैर्भङ्गकारिभिर्हेतुभिर्लाञ्छितं मण्डितम् । अदः प्रत्यक्षदृश्यम् । शीर्णमदनैः श्रमणादिभिरलंकृतम् । मिथोऽनुगमनादित्यत्र 'गुणादस्त्रियां न च' इति पञ्चमी ॥

शीतांशुत्विषि यत्र नित्यमदधद्गन्धाढ्यधूलीकणा-
नाली केसरलालसा समुदिताशु भ्रामरीभासिता ।
पायाद्वः श्रुतदेवता निदधती तत्राब्जकान्ती क्रमौ
नालीके सरलालसा समुदिता शुभ्रामरीभासिता ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्र नालीके चन्द्रतुल्यरुचि भ्रामरी भ्रमरसंबन्धिनी आली श्रेणिर्गन्धाढ्यजिंकल्कबिन्दूनदधत्पपौ । किंभूता । केसरेषु लालसा लम्पटा । समुदिता मिलिता । आशु शीघ्रम् । इभेषु मदलौल्यादासिता विश्रब्धा । तत्र नालीके क्रमौ निदधती श्रुतदेवता वः पातु । किंभूता । समुदिता सहर्षा । शुभ्रा शुक्ला छवियासां ताश्च ता अमर्यश्च ताभिः शोभिता । (सरला अलसा च) ॥

तमजितमभिनौमि यो विराजद्वनघनमेरुपरागमस्तकान्तम् ।
निजजननमहोत्सवेऽधितष्ठावनघनमेरु परागमस्तकान्तम् ॥ ५ ॥

यः स्वामी निजजन्मोत्सवेऽधितष्ठौ । किं कर्म । विराजद्भिर्वनैर्घनो निरन्तरः अथवा शोभमानाम्भसो घना यत्र स चासौ मेरुपरागो मेरुपरमपर्वतस्तस्य शिखराग्रम् । किंभूतम् । अनघा नमेरवो देववृक्षविशेषास्तेषां रेणुर्यत्र तत्तथा । किंभूतं शिखराग्रम् । अस्तोऽस्तगिरिस्तद्वत्कान्तं कमनीयम् । अथवा जिनविशेषणम् । अस्ता कान्ता येन तम् ॥

स्तुत जिननिवहं तमर्तितप्ताध्वनदसुरामरवेण वस्तुवन्ति ।
यममरपतयः प्रगाय पार्श्वध्वनदसुरामरवेणव स्तुवन्ति ॥ ६ ॥

हे लोकाः । तं जिनवृन्दं स्तुत । यं जिनव्रजममरेन्द्राः स्तुवन्तीति संबन्धः । किं कृत्वा । अर्त्या पीडया तप्तानां शैत्याधायकतया साक्षाद्ध्वनदो मार्गह्रदः सुरामः सुष्ठु रमणीयो यो रवः शब्दस्तेन करणभूतेन । वस्तुवन्ति च्छन्दोजातिविशेषवन्ति गीतानि प्रगाय गीत्वा । किंभूताः । पार्श्वे समीपे ध्वनन्तोऽसुरामराणां वेणवो वंशा येषां ते तथा । 'वत्यये(?) लुग्वा' इति रेफस्य लुक् ॥

प्रवितर वसतिं त्रिलोकबन्धो गम नययोगततान्तिमे पदे हे ।
जिनमत विततापवर्गवीथीगमनययो गततान्ति मेऽपदेहे ॥ ७ ॥

अन्तिमे मोक्षलक्षणे पदे हे जिनमत । मे मम वासं देहि । हे गम हे सदृशपाठ, नया निगमादयस्तैर्योगः संबन्धस्तेन विस्तीर्ण विपुलशिवमार्गगमने ययो अश्व । 'ययुरश्वोऽश्वमेधीयः' इति वचनात् । 'तमोऽवग्लानौ' इति धातोस्तान्तिर्ग्लानिः । आपदित्यर्थः । गततान्ति अपगतग्लानि यथा स्यात् । किंभूते पदे अपदेहे देहमुक्ते ॥

सितशकुनिगताशु मानसीद्धात्ततातिमिरंमदभा सुराजिताशम् ।
वितरतु दधती पविं क्षतोद्यत्तततिमिरं मदभासुराजिता शम् ॥ ८ ॥

हंसारूढा मानसी देवी पविं वज्रं दधती शं सुखं प्रवितरतु । पविं किंभूतम् । इद्धा दीप्ता आत्ता गृहीता ततिर्विस्तारो येन तत्तथा । इरंमदो जलदाग्निस्तद्वत्कान्तिर्यस्याः सा सुष्ठु शोभिता आशा दिशो येन । क्षतं विनष्टमुद्यदुद्गच्छत्ततं विस्तीर्णं ध्वान्तं यस्मात्तत्तथा । देवी दर्पोद्धुरैरपराभूता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्भिन्नशत्रुभवभय शं भवकान्तारतार तार ममारम् ।
वितर त्रातजगत्त्रय शंभव कान्तारतारतारममारम् ॥ ९ ॥

हे निर्भिन्नशत्रुसंभूतभय, हे संसारकान्तारतारक, हे तार उज्ज्वल, अरं शीघ्रं मम शं सुखं देहि । हे रक्षितजगत्त्रय, शंभव जिन, योषित्सुरतेष्वरत अनासक्त, न रमत इत्यरमोऽरममाणोऽक्रीडन्मारः कामो यत्र ॥

आश्रयतु तव प्रणतं विभया परमा रमारमानमदमरैः ।
स्तुत रहित जिनकदम्बक विभयापरमार मारमानमदमरैः ॥ १० ॥

हे जिनकदम्बक जिनसमूह, रमा लक्ष्मीस्तव प्रणतं नरमाश्रयतु । किंभूता । विभया रोचिषा परमा प्रकृष्टा । अरं शीघ्रमानमन्तश्च ते सुराश्च तैः स्तुत वन्दित । हे विगतभय । हे न परान्मारयतीत्यपरमार । सर्वजन्तुरक्षक । हे रहित त्यक्त । कैः । काममानमदमरणैः ॥

जिनराज्या रचितं स्तादसमाननयानया नयायतमानम् ।
शिवशर्मणे मतं दधदसमाननयानयानया यतमानम् ॥ ११ ॥

जिनानां राज्या श्रेण्या रचितं अर्थस्य तदुक्तत्वात्कृतं मतं शासनं नोऽस्माकं शिवसुखाय स्तात् भूयात् । किंभूतया । असमे निरुपमे आननयाने मुखगमने यस्यास्तया नः इत्यत्र 'रोर्यः' इति रस्य यः । 'स्वरे वा' इति विकल्पत्वात्तस्यात्र न लुक् । आयतौ विपुलो मानः पूजा प्रमाणं वा यस्य तत्तथा । दधत् धारयत् । कान् । असमाननयान् असदृशनयान् । किंभूतया जिनराज्या । अयानया अवाहनया । मतं किंभूतम् । यतमानं प्रयत्नं कुर्वाणम् ॥

शृङ्खलभृत्कनकनिभा यातामसमानमानमानवमहिताम् ।
श्रीवज्रशृङ्खलां कजयातामसमानमानमानवमहिताम् ॥ १२ ॥

या देवी शृङ्खलाभरणभृत्सुवर्णवर्णा चास्ति तां श्रीवज्रशृङ्खलां वज्रशृङ्खलाभिधानामानम । किंभूताम् । असमानोऽसाधारणो मानः पूजा बोधो वा येषाम् । अथवा असदृशौ अनमानौ प्राणाहंकारौ येषां ते असमानमानाः । ते च मानवाश्च तैर्महिता पूजिता ताम् । कजयातां पङ्कजगताम् । असमानं निरहंकारं यथा स्यात् एवमानम नमस्कुरु । अवमं पापं तन्न विद्यते येषां तेऽनवमास्तेभ्यो हिताम् ॥

त्वमशुभान्यभिनन्दन नन्दितासुरवधूनयनः परमोदरः ।
स्मरकरीन्द्रविदारणकेसरिन्सुरव धूनय नः परमोऽदरः ॥ १३ ॥

हे अभिनन्दन जिन, त्वमशुभान्यशिवान्यकल्याणान्यपुण्यानि वा नोऽस्माकं धूनय कम्पय विनाशय । किंभूतः । नन्दिता असवः प्राणाः प्राणिनां येन । अथवा धर्मधर्मिणोः कथंचिदभेदादसुशब्देनासुमन्त एवोच्यन्ते । तथा न वधूषु नयने यस्य स तथा । यद्वा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नन्दितानि असुरवधूनयनानि येन सः । तथा परेभ्यो मोदं राति ददाति यः । यद्वा परमुदरं यस्य । हे सुरव, जगदाह्लादित्वात्·········। परमः प्रधानोऽदरो निर्भयश्च ॥

जितवराः प्रयतध्वमितामया मम तमोहरणाय महारिणः ।
प्रदधतो भुवि विश्वजनीनताममतमोहरणा यमहारिणः ॥ १४ ॥

हे जिनवराः, मम तमोहरणायाज्ञानापगाय यूयं प्रयतध्वं प्रयत्नं कुरुध्वम् । किंभूताः । इतामया गतरोगाः । पुनः किंभूताः । महान्ति अरीणि चक्राणि धर्मचक्रलक्षणानि येषां ते । किं कुर्वाणाः । दधानाः पृथिव्यां विष्टपजनहितत्वम् । अमतावनभिप्रेतौ मोहसङ्ग्रामौ येषां ते । यमहारिणो मृत्युहरणशीलाः । यद्वा यमानि महाव्रतानि तैर्मनोहराः ॥

असुमतां मृतिजात्यहिताय यो जिनवरागम नो भवमायतम् ।
प्रलघुतां नय निर्मथितोद्धताजिनवरागमनोभवमाय तम् ॥ १५ ॥

यो भवोऽसुमतां मृतिजाती मरणजन्मनी ते एवाहितमपथ्यं तस्मै मरणजन्माहिताय स्यात् । हे जिनेन्द्रसिद्धान्त, नोऽस्माकं तं भवं संसारमायतं प्रबलं लघीयस्त्वं प्रापय । आजिः सङ्ग्रामः नवरागो द्रव्यादौ नूतनोऽभिलाषः । यद्वा उद्धताजी नवरागो यस्य तच्च तन्मनस्तत्र भवा या माया सा निराकृता येन । यद्वा मुक्तसङ्ग्रामनूतनरागकाममाय ॥

विशिखशङ्खजुषा धनुषास्तसत्सुरभिया ततनुन्नमहारिणा ।
परिगतां विशदामिह रोहिणीं सुरभियाततनुं नम हारिणा ॥ १६ ॥

धनुषा मण्डितहस्तां रोहिणीं देवीं नम । किंभूतेन । शरशङ्खसहितेन । अस्ता ध्वस्ता सत्सुराणां प्रकृष्टदेवानां भीर्येन । ततः प्रसृता नुन्नाः प्रेरिता महान्तोऽरयो येन । परिगतां परिवारिताम् । विशदां शुक्लवर्णाम् । इहात्र जगति रोहिणीं रोहिण्यभिधानाम् । सुरभिर्गौस्तत्र याता प्राप्ता तनुर्यस्यास्तां देवीं नम प्रणिपत । धनुषा किंभूतेन । हारिणा मनोहरेण ॥

मदमदनरहित नरहित सुमते सुमतेन कनकतारेतारे ।
दम दमपालय पालय दरादरातिक्षतिक्षपातः पातः ॥ १७ ॥

हे मदकामाभ्यां त्यक्त, हे नरेभ्यो हित, हे सुमतिजिन, दमदं प्रशमदं नरं दरादिहलोकादिभेदभिन्नसाध्वसात्पालय रक्ष । हे सुमतेन सुसिद्धान्तस्वामिन् । यद्वा सुमतेन करणभूतेन । हे अपालय अपगतनिलय । हे कनकतार तपनीयोज्ज्वल । हे इतारे गतशात्रव । हे पातस्त्रायक । अरातिक्षतिः शत्रुभ्य उपमर्दः सैव रौद्रात्मकत्वात्क्षपा रात्रिस्तस्याः ॥

विधुतारा विधुताराः सदा सदाना जिना जिताघाताघाः ।
तनुतापातनुतापा हितमाहितमानवनवविभवा विभवाः ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधुतारा हे जिनाः, हितं तनुत कुरुत । विधुतमारमरीणां समूहोऽरणं वा अरो भ्रमणमर्थात्संसारो यैस्ते । तथा विधुश्चन्द्रस्तद्वदुज्ज्वलाः । सदानाः सत्यागाः । जितमघातं घातवर्जितमघं पापं यैस्ते । अपगतमहातापाः । आहितो विस्तीर्णो मानवानां नवविभवो नवः प्रत्यग्रो विभव ऐश्वर्यं यैस्ते । तथा विगतसंसाराः ॥

मतिमति जिनराजि नराहितेहिते रुचितरुचि तमोहे मोहे ।
मतमत नूनं नूनं स्मरास्मराधीरधीरसुमतः सुमतः ॥ १९ ॥

जिनराजि सर्वज्ञे, मतं त्वं स्मरेति संबन्धः । किंभूते । मतिमति सातिशयज्ञानयुक्ते । नराणामाहितं पूरितमीहितं वाञ्छितं येन तस्मिन् । रुचिता परेषां प्रमोदकारित्वादभीष्टा रुक्कान्तिर्यस्य तस्मिन् । तमोहे अज्ञानघातिनि । मोहे ममत्वमुक्ते । मतं किंभूतम् । तनु तुच्छमूनमपूर्णं च तनूनं न एवंविधमतनूनम् । नूनं निश्चितम् । न स्मरेणाधीरा धीर्यस्य सः । असुमतः प्राणिनः । जातावेकत्वम् । सुमतो रक्षाक्रियायां सुष्ठु अभिप्रेतः ॥

नगदामानगदा मामहो महो राजिराजितरसा तरसा ।
घनघनकाली काली बतावतादूनदूनसत्रासत्रा ॥ २० ॥

अहो इति संबोधने विस्मये वा । काली देवी मामवताद्रक्षतात् । किंभूता । नगदा 'दो अवच्छेदने' इति धातोः पर्वतभेत्री अमाना अप्रमाणा गदा प्रहरणविशेषो यस्याः सा । कान्तिराज्या राजिता शोभिता रसा भूमिर्यया सा । तरसा बलेन शीघ्रं वा । घनो मेघस्तद्वद्घनकाली प्रभूतकालवर्णा । बतेति विस्मये । ऊना अपूर्णाः । दूना विपक्षैः । सत्रासाः सभयास्तांस्त्रायते रक्षति या ॥

पादद्वयी दलितपद्ममृदुः प्रमोद-
मुन्मुद्रतामरसदामलतान्तपात्री ।
पाद्मप्रभी प्रविदधातु सतां वितीर्ण-
मुन्मुद्रतामरसदा मलतान्तपात्री ॥ २१ ॥

पद्मप्रभसंबन्धिनी पादद्वयी प्रमोदं प्रविदधातु । किंभूता । दलितं विकसितं यदब्जं तद्वत्कोमला । उन्मुद्राणि विकसितानि तामरसदामानि कमलमाला लतान्तानि कुसुमानि तेषां पात्रीव पात्री भाजनम् । यद्वा उन्मुद्रतामरसदामान्येव लम्बत्वाल्लतास्तासामन्तपात्री समीपभाजनम् । सतां वितीर्णमुद्दत्तप्रीतिः । मुदि मुदा वा रता अमरसदा देवसभा यस्याः सा । मलेन कर्मणा तान्तान्ग्लानान्पातीति मलतान्तपात्री ॥

सा मे मतिं वितनुताज्जिनपङ्क्तिरस्त-
मुद्रा गतामरसभासुरमध्यगाद्याम् ।
रत्नांशुभिर्विदधती गगनान्तराल-
मुद्रागतामरसभासुरमध्यगाद्याम् ॥ २२ ॥

१८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा जिनश्रेणी मम मतिं दद्यात्। अस्तमुद्रा मुक्तप्रमाणा। गता प्राप्ता अमरसभा देवपर्षद्यां जिनपङ्क्तिं अध्यगात्प्राप्तवती। आद्यां प्रथमाम्। किंभूता। असुरमध्यगा असुरमध्ये गच्छतीति। किं कुर्वती। रत्नांशुभिर्भूषणमणिकान्तिभिर्गगनमध्यं उद्गतरागं यत्तामरसं पद्मं तद्वद्भासुरं कुर्वाणा॥

श्रान्तिच्छिदं जिनवरागममाश्रयार्थ-
मारामं मा नम लसन्तमसंगमानाम्।
धामाग्रिमं भवसरित्पतिसेतुमस्त-
मारममानमलसंतमसं गमानाम्॥ २३॥

हे लोक, जिनेन्द्रागममानम। किंभूतम्। श्रमभेदकम्। आश्रयहेतोरारामिवारामम्। लसन्तं शोभमानम्। केषाम्। असंगमानाम्। निःसङ्गानां मुनीनामित्यर्थः। अग्रिमं प्रकृष्टं धाम गृहम्। केषाम्। गमानां सदृशपाठानाम्। संसारसमुद्रसेतुम्। अस्ताः कामरोगाहंकारपापाज्ञानानि येन॥

गान्धारि वज्रमुसले जयतः समीर-
पातालसत्कुवलयावलिनीलभे ते।
कीर्तीः करप्रणयिनी तव ये निरुद्ध-
पातालसत्कुवलया बलिनी लभेते॥ २४॥

हे गान्धारि देवि, ते वज्रमुसले आयुधे जयतः। किंभूते। वातप्रेङ्खोलनेनालसन्ती या कुवलयमाला तद्वन्नीला भा कान्तिर्ययोः। ये वज्रमुसले कीर्तीर्यशांसि लभेते। किंभूते। तव हस्तस्नेहले। बलिनी बलवती। कीर्तीः किंभूताः। निरुद्धमावृतं पातालं सत्पृथ्वीवलयं च याभिः॥

कृतनति कृतवान्यो जन्तुजातं निरस्त-
स्मरपरमदमायामानबाधायशस्तम्।
सुचिरमविचलत्वं चित्तवृत्तेः सुपार्श्वं
स्मर परमदमाया मानवाधाय शस्तम्॥ २५॥

यः स्वामी जन्तुजातं कृतप्रणामं विहितवान्। किंभूतम्। निरस्तानि कंदर्पवैरिमदमाया मानपीडायशांसि येन तत्। तं सुपार्श्वं देवं हे मानव, नर, त्वं स्मर। किं कृत्वा। निश्चलत्वमाधाय। कस्याः। चित्तवृत्तेर्मनोव्यापारस्य। सुचिरं प्रभूतकालम्। परमो दमो यस्याः। शस्तं शोभनम्॥

व्रजतु जिनततिः सा गोचरं चित्तवृत्तेः
सदमरसहिताया वोऽधिका मानवानाम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदमुपरि दधाना वारिजानां व्यहार्षी-
त्सदमरसहिता या बोधिकामा नवानाम् ॥ २६ ॥

सा जिनानां ततिर्वो युष्माकं मनोवृत्तेर्गोचरं व्रजतु गच्छतु । किंभूतायाः । सह दमरसेन वर्तन्ते ये तेषां हितायाः । जिनततिः किंभूता । मानवानां नराणामधिका उत्कृष्टा । या जिनश्रेणिर्व्यहार्षीद्विहारं कृतवती । किंभूता । नवानां नवसंख्यानां नूतनानां वारिजानां स्वर्णकमलानामुपरिष्टात्पदं स्थापयन्ती । सद्देवयुक्ता । बोधिकामा स्वयमवाप्तबोधित्वात्परेषां बोधिधर्मप्राप्तिस्तत्र कामो यस्याः सा ॥

दिशादुपशमसौख्यं संयतानां सदैवो-
रु जिनमतमुदारं काममायामहारि ।
जननमरणरीणान्वासयन्सिद्धवासे-
ऽरुजि नमत मुदारं काममायामहारि ॥ २७ ॥

हे जना जिनमतं नमत प्रणमत । किंभूतम् । उरु प्रौढं प्रशमसुखं ददत् । केषाम् । संयतानां मुनीनाम् । सदैव सर्वदा । उदारमुदात्तम् । काममत्यर्थमायामहारि दैर्घ्यशोभि । अरुजि रोगरहिते सिद्धवासे वासं कारयन् । कान् । जन्ममरणखिन्नान् । मुदा हर्षेण । अरं शीघ्रम् । काममाययोर्महारि महावैरिभूतम् ॥

दधति रविसपत्नं रत्नमाभास्तभास्व-
न्नवघनतरवारिं वा रणारावरीणाम् ।
गतवति विकरत्यालीं महामानसीष्टा-
न्नव घनतरवारिं वारणारावरीणाम् ॥ २८ ॥

हे महामानसि देवि, इष्टानभिमतान्नरादीनव रक्ष । हे गतवति प्रापुषि । कस्मिन्वारणारौ सिंहे । हे दधति धारयन्ति । किम् । रत्नं मणिम् । किंभूतम् । रविसपत्नं रविप्रतिपक्षं प्रभाधिक्यात् । आभया कान्त्या अस्तो भास्वान्सूर्यो येन स चासौ नवो नूतनो घनो निबिडस्तरवारिः खड्गश्च तम् । वा समुच्चये । सिंहे किं कुर्वति । अरीणां वैरिणामालीं श्रेणिं विकिरति क्षिपति । किंभूतामालीम् । रणस्यारावेण रीणां क्षीणाम् । खड्गं किंभूतम् । घनतरवारिं सान्द्रतरपानीयम् । रत्नविशेषणं वा ।

तुभ्यं चन्द्रप्रभ जिन नमस्तामसोज्जृम्भितानां
हाने कान्तानलसम दयावन्दितायासमान ।
विद्वत्पङ्क्त्या प्रकटितपृथुस्पष्टदृष्टान्तहेतू-
हानेकान्तानलसमदया वन्दितायासमान ॥२९ ॥

हे चन्द्रप्रभ जिन, हे दयावन्, तुभ्यं नमोऽस्तु । तमःसंबन्धिविस्फूर्जितानां हाने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यागे मनोहरवह्निसमान । दितौ छिन्नावायासमानौ येन । तुभ्यं किंभूताय । विद्वत्पङ्क्त्या वन्दिताय । प्रकटिताः पृथवो वितताः स्पष्टा दृष्टान्ता निदर्शनानि हेतवः करणानि ऊहो वितर्कः अनेकान्तः स्याद्वादो येन तत्संबोधनम् । विद्वत्पङ्क्त्या किंभूतया । न विद्येते अलसमदौ तन्द्राहंकारौ यस्यास्तया । हे असमान निरुपमान ॥

जीयाद्राजिर्जनितजननज्यानिहानिर्जिनानां
सत्यागारं जयदमितरुक्सारविन्दावतारम् ।
भव्योद्धृत्या भुवि कृतवती या वहद्धर्मचक्रं
सत्यागा रञ्जयदमितरुक् सा रविं दावतारम् ॥ ३० ॥

जिनानां राजिर्जयतात् । किंभूता । विहितजराजन्मक्षया । सत्यस्यागारं गृहम् । जयदमभ्युदयावहम् । इतरुग्गतरोगा । सारविन्दा सहारविन्दैः पदाधस्तनैः पूजाकमलैर्वर्तते या । या भव्योद्धृत्या भव्यानामुद्धतिर्भवोत्ताररूपा तया हेतुभूतया भुवि पृथिव्यामवतारं कृतवती । या धर्मचक्रमवहदुवाह । सत्यागा सदाना । धर्मचक्रं कथंभूतम् । रञ्जयद्रक्तीकुर्वत् । रविं सूर्यम् । दावतारम् दावोज्ज्वलम् । अमिता अप्रमाणा रुक्कान्तिर्यस्य ॥

सिद्धान्तस्तादहितहतयेऽख्यापयद्यं जिनेन्द्रः
सद्राजीवः स कविधिषणापादनेऽकोपमानः ।
दक्षः साक्षाच्छ्रवणचुलकैर्यं च मोदाद्विहायः-
सद्राजीवः सकविधिषणापादनेकोपमानः ॥ ३१ ॥

स सिद्धान्तो वो युष्माकमहितक्षयाय भूयात् । यं सिद्धान्तं सन्ति शोभनानि कमलानि यस्य स जिनेन्द्रः प्रधानकमलोऽख्यापयदूचिवान् । कवयः शास्त्रज्ञास्तेषां बुद्धिजनने दक्षो विचक्षणः । न विद्येते कोपमानौ यस्य यत्र वा । विहायःसदो देवास्तेषां राजी श्रेणिः कर्णचुलकैः श्रोत्राञ्जलिभिर्मोदाद्धर्षाद्यं च सिद्धान्तमपात् पीतवती । श्रेणी किंभूता । सह कविधिषणाभ्यां शुक्रगुरुभ्यां वर्तते या । अनेकानि चन्द्रसमुद्रादीन्युपमानानि यस्याः । प्रथमान्तविशेषणानि जिनस्यागमस्य वा योज्यानि 'सद्राजीवः' इति मुक्त्वा ॥

वज्राङ्कुश्यङ्कुशकुलिशभृत्त्वं विधत्स्व प्रयत्नं
स्वायत्यागे तनुमदवने हेमतारातिमत्ते ।
अध्यारूढे शशधरकरश्वेतभासि द्विपेन्द्रे
स्वायत्यागेऽतनुमदवने हेऽमतारातिमत्ते ॥ ३२ ॥

हे वज्राङ्कुशि देवि, तनुमदवने जन्तुरक्षणे प्रयत्नं विधेहि । हे सृणिवज्रधारिणि । स्वायत्यागे शोभन आयोऽर्थागमो दानं च यस्याः । त्वं कथंभूता । हेमतारा कनको-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ज्वला । हे अध्यारूढे । क । द्विपेन्द्रे । किंभूते । अतिमत्ते मदोद्धते । चन्द्रकरा इव श्वेता भा यस्य तस्मिन् । स्वायत्या निजायामेन अगे पर्वत इव । अतनु प्रचुरं मदवनं मदवारि यस्य तस्मिन् । अरातिर्वैरी सोऽस्यास्तीत्यरातिमान् तस्य भावोऽरातिमत्ता सा न मता यस्यास्तस्याः संबोधनम् ॥

तवाभिवृद्धिं सुविधिर्विधेयात्स भासुरालीनतपा दयावन् ।
यो योगिपङ्क्त्या प्रणतो नभःसत्सभासुरालीनतपादयावन् ॥ ३३ ॥

स सुविधिर्जिनो हे दयावन् जन, तव समृद्धिं क्रियात् । भासुरं घोरमालीनमाश्रितं तपोऽनशनादिरूपं यस्य सः । यःस्वामी अवन्रक्षन् योगिवृन्देन प्रकर्षेण नतः । योगिपङ्क्त्या कथंभूतया । नभःसदो देवास्तेषां सभा पर्षत् असुरावली असुरश्रेणिश्च ताभ्यां नतौ पादौ यस्यास्तया ॥

या जन्तुजाताय हितानि राजी सारा जिनानामलपद्ममालम् ।
दिश्यान्मुदं पादयुगं दधाना साराजिनानामलपद्ममालम् ॥ ३४ ॥

या सारा श्रेष्ठा जिनानां ततिर्जन्तुजाताय हितानि अलपत् गदितवती सा मम अलमत्यर्थं मुदं प्रीतिं दिश्याद्दद्यात् । कथंभूता । पादयुग्मं धारयन्ती । राजिनी राजनशीलाः नाना बहुविधाः अमलाः पद्ममाला यस्य तत्पादयुगम् ॥

जिनेन्द्र भङ्गैः प्रसभं गभीराशु भारती शस्यतमस्तवेन ।
निर्नाशयन्ती मम शर्म दिश्यात् शुभारतीशस्य तमस्तवेन ॥ ३५ ॥

हे जिनेन्द्र, तव भारती मम शर्म सुखं देयात् । किंभूता । भङ्गैरर्थविकल्पैर्गभीरा तथा आशु शीघ्रं तमोऽज्ञानं निर्नाशयन्ती । केन । शस्यतमश्चारुतमो यस्तवस्तेन हेतुभूतेन शुभा प्रकृष्टा । तव कीदृशस्य । अरतीशस्याकामस्य । हे इन स्वामिन् ॥

दिश्यात्तवाशु ज्वलनायुधाल्पमध्या सिता कं प्रवरालकस्य ।
अस्तेन्दुरास्यस्य रुचोरुपृष्ठमध्यासिताकम्प्रवरालकस्य ॥ ३६ ॥

तव ज्वलनायुधा देवी कं सुखं दिश्यात्करोतु । किंभूता । अल्पं तुच्छं मध्यं मध्यभागो यस्याः सा । कृशोदरीत्यर्थः । सिता शुभ्रा । प्रवरालकस्य प्रवरकुन्तलस्य । अस्तेन्दुर्न्यक्कृतमृगाङ्का । कया । आस्यस्य मुखस्य रुचा कान्त्या । उरु विस्तीर्णं पृष्ठमध्यासिताध्यारूढा । कस्य । अकम्प्रः स्थिरो यो वरालको देववाहनविशेषस्तस्य ॥

जयति शीतलतीर्थकृतः सदा चलनतामरसं सदलं घनम् ।
नवकमम्बुरुहां पथि संस्पृशच्चलनतामरसंसदलङ्घनम् ॥ ३७ ॥

शीतलतीर्थकरस्य चलनतामरसं पादपद्मं जगति । किंभूतम् । अम्बुरुहां कमलानां नवकं पथि मार्गे संस्पृशत् । नवकं किंभूतम् । सदलं सपत्रम् । घनं सारम् । चलनतामरसं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किंभूतम् । चला नता च अमराणां संसद् यस्य तत् । नास्ति लङ्घनमधःकरणं कुतश्चिद्यस्य तदलङ्घनम् ॥

सर जिनान्परिनुन्नजराजोजननतानवतोदयमानतः ।
परमनिर्वृतिशर्मकृतो यतो जन नतानवतोऽदयमानतः ॥ ३८ ॥

हे जन, भव्यलोक, अतोऽस्मात्कारणाज्जिनान् स्मर । किंविशिष्टान् । परिनुन्ना परिक्षिप्ता जरा वयोहानिरूपा, रजः कर्म, जननं जन्म, तनोर्दुर्बलस्य भावस्तानवं कार्श्यं, तोदो बाधा, यमो मृत्युर्यैस्तान् । यतः कारणात् परममुक्तिसुखकर्तॄन् । नहि जिनस्मरणमन्तरेण जन्तोस्तात्त्विकी सिद्धिः । नतान् जन्तूनवतो रक्षतः । अदयं शरीरावयवनिरपेक्षं यथा स्यात्तथा आनतः प्रणतः सन् त्वम् ॥

जयति कल्पितकल्पतरूपमं मतमसारतरागमदारिणा ।
प्रथितमत्र जिनेन मनीषिणामतमसा रतरागमदारिणा ॥ ३९ ॥

जिनेन मनीषिणां गणभृतां प्रथितं प्रोक्तं मतं जयति । किंभूतम् । कल्पिता समर्पिता सकलमनोरथपूरणात्कल्पतरुणा उपमा साम्यं यस्य तत् । असारतरान्मिथ्यारूपानागमान् दृणातीत्येवंशीलः । जिनविशेषणमिदम् । पुनः किंभूतेन । अतमसा अज्ञानरहितेन । रते मैथुने रागो रतरागः । मदश्च जात्याद्युत्थोऽभिनिवेशः । यद्वा रतं मैथुनं, रागो द्रव्यादावभिलाषः, मदः पूर्वोक्त एव, तेषामरिणा वैरिणा ॥

घनरुचिर्जयताद्भुवि मानवी गुरुतरा विहतामरसंगता ।
कृतकरास्त्रवरे फलपत्रभागुरुतराविहतामरसं गता ॥ ४० ॥

मानवी देवी जयतात् । किंभूता । घना सान्द्रा रुचिः कान्तिर्यस्याः सा । गुरुतरा अतिमहान्तोऽविहता अपरिक्षता येऽमरास्तैः संगता सहिता । अस्त्रवरे प्रधानायुधे कृतपाणिः । फलपत्रे भजते फलपत्रभाक् । तरोर्विशेषणमेतत् । स चासौ उरुतरुश्च विशालद्रुमश्च तत्र । तामरसं पद्मं गता प्राप्ता ॥

कुसुमधनुषा यस्मादन्यं न मोहवशं व्यधुः
कमलसदृशां गीतारावा बलादयि तापितम् ।
प्रणमततमां द्राक् श्रेयांसं न चाहृत यन्मनः
कमलसदृशाङ्गी तारा वाबला दयितापि तम् ॥ ४१ ॥

अलसदृशामलसेक्षणानां स्त्रीणां नृणां वा गीतारावा गीतध्वनयो यस्माज्जिनात्कमन्यं जनं मोहवशवर्तिनं न व्यधुः । अपि तु सर्वमप्यकार्षुः । किंविशिष्टम् । बलात्प्रसभम् । अयि संबोधने । तापितं पीडितम् । केन । कुसुमधनुषा कामेन । हे जनाः, तं श्रेयांसं प्रणमततमाम् । द्राक् शीघ्रम् । अबला स्त्री दयितापि कान्तापि यन्मनो यन्मा-

१. 'मानसी' इति पुस्तकान्तरे पाठः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नसं च नाहृत नाक्षिप्तवती । किंभूता । कमलसदृशं कोमलत्वादङ्गं यस्याः सा कमलसदृशाङ्गी । तारा मनोहरा । वा समुच्चये ॥

जिनवरततिर्जीवालीनामकारणवत्सला-
समदमहितामारादिष्टा समानवराजया ।
नमदमृतभुक्पङ्क्त्या नूता तनोतु मतिं ममा-
समदमहितामारादिष्टा समानवराजया ॥ ४२ ॥

जिनेन्द्रराजिर्मम मतिं ददातु । किंभूता । प्राणिगणानां निर्निमित्तवत्सला । असमो दमो येषां निरुपमदमस्य वा हिताभिप्रेता । अमारा अकामा अमरणा वा । आदिष्टो दत्तोऽसमानोऽपूर्वो वरो वाञ्छितार्थप्राप्तिर्यया सा । अजया अपरिभूता । यद्वा न जायते इत्यजा तया नमन्तो नम्रा येऽमृतभुजो देवास्तेषां पङ्क्त्या नूता स्तुता । मतिं किंभूताम् । असमदैर्निरहंकारैर्महितां पूजिताम् । आरात् शीघ्रमिष्टा पूजिता अभिमता वा । देवपङ्क्त्या किंभूतया, सह मानवराजैर्नरेन्द्रैर्वर्तते या तया ॥

भवजलनिधिभ्राम्यज्जन्तुव्रजायतपोत हे
तनु मतिमतां सन्नाशानां सदा नरसंपदम् ।
समभिलषतामर्हन्नाथागमानतभूपतिं
तनुमति मतां सन्नाशानां सदानरसं पदम् ॥ ४३ ॥

हे संसारार्णवभ्रमज्जन्तुजातविपुलयानपात्र जिनेन्द्रसमय मतिमतां पुरुषाणां नरसंपदं मानववृद्धिं समभिलषतां वाञ्छतां सह दाने रसेन वर्तते सदानरसं पदं तनु विधेहि । इति सटङ्कः (?) । नरसंपदं किंभूताम् । तनुमति प्राणिनि मतामभीष्टामभिमताम् । किंविशिष्टानाम् । सन्नाः क्षीणा आशा मनोरथा येषाम् । नरसंपदं किंभूताम् । आनता भूपतयो यस्यां सा ताम् । सन् विद्यमानो नाशो मरणं येषां ते । अल्पायुषामित्यर्थः ॥

धृतपविफलाक्षालीघण्टैः करैः कृतबोधित
प्रजयतिमहा कालीमर्त्याधिपङ्कजराजिभिः ।
निजतनुलतामध्यासीनां दधत्यपरिक्षतां
प्रजयति महाकाली मर्त्याधिपं कजराजिभिः ॥ ४४ ॥

महाकाली देवी प्रजयति प्रकर्षेण वैरिजयेन सर्वोत्कृष्टा वर्तते । करैर्हस्तैरुपलक्षिता । किंभूतैः । धृता वज्र-फल-जपमाला-घण्टा यैस्ते तथा । देवी किंभूता । बोधिता प्रजा लोको यैस्ते बोधितप्रजास्ते च ते यतयश्च साधवः । ततः कृतो बोधितप्रजयतीनां महः पूजा उत्सवो वा यया सा । तथा कालीं श्यामां दधती धारयन्ती । काम् । स्ववपुर्लताम् । किंभूताम् । अपरिक्षतामदूषिताम् । कैः । आर्तिः पीडा, आधिर्मानसी व्यथा,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पङ्ककर्दमः कालुष्यं, जरा विस्रसा, आजिः प्रधनं तैः। पुनः किंभूताम्, अध्यासीनाम्। कम्। मर्त्याधिपं पुरुषप्रकाण्डम्। करैः किंविशिष्टैः। कजं पद्मं तद्वद्भ्राजिभी राजनशीलैः॥

पूज्य श्रीवासुपूज्यावृजिन जिनपते नूतनादित्यकान्ते-
ऽमायासंसारवासावन वर तरसाली नवालानबाहो।
आनम्रा त्रायतां श्रीप्रभवभवभयाद्बिभ्रती भक्तिभाजा-
मायासं सारवासावनवरतरसालीनवालानबाहो॥ ४५॥

हे पूजनीय, हे श्रीवासुपूज्य, हे अवृजिन, हे जिनपते, भक्तिभाजां जनानामाली श्रेणिस्त्वया त्रायतां रक्षताम्। नूतनो विभातसमये उद्गच्छन् य आदित्यस्तद्वद्रक्ता कान्तिर्यस्य तस्य संबोधनम्। हे अमाय अदम्भ। हे असंसारवास, मुक्तौ प्राप्तत्वात्। हे अवन रक्षक, हे वर प्रधान। केन। तरसा बलेन वेगेन वा। यद्वा मायासंसारवासाभ्यां सकाशादवति रक्षतीति। नवालानवद्बाहू भुजौ यस्य तस्य संबोधनम्। आली किंभूता। आनम्रा कृतप्रणामा। कस्मात्त्रायताम्। श्रीप्रभवः कामस्तद्भवं यद्भयं तस्मात्। हे श्रीभव लक्ष्मीसमुत्पत्तिस्थानेति पृथग्जिनामन्त्रणं वा। आली किं कुर्वाणा। दधती। कम्। आयासं दुःखं श्रमं वा। सारवा प्रारब्धस्तुतित्वात्सशब्दा। असौ प्रत्यक्षा। अनवरतमजस्रं रसायां पृथिव्यां लीना वालाः केशा यस्याः सा। एतेन भक्त्याधिक्यं सूचितम्। नवा कतिपयदिनप्राप्तबोधिः अस्मदादिवत्। अहो इत्यामन्त्रणे॥

पूतो यत्पादपांशुः शिरसि सुरततेराचरच्चूर्णशोभां
या तापत्रासमाना प्रतिमदमवतीहार ताराजयन्ती।
कीर्तेः कान्त्या ततिः सा प्रविकिरतुतरां जैनराजी रजस्ते
यातापत्रासमानाप्रतिमदमवती हारतारा जयन्ती॥ ४६॥

पूतः पवित्रो यत्पादपांशुश्चरणरेणुः सुरसमूहस्य मस्तके चूर्णशोभां वासक्षोदलक्ष्मीं प्राप्तवान्। या ततिस्तापत्रा तापभेत्त्री। असमाना गुणैरनन्यसदृशी। प्रतिमदं प्रतिगतमदं निर्मदमवति रक्षति। इह अरता अप्रतिबद्धा। राजयन्ती शोभां लम्भयन्ती। सा तती रजः कर्म ते तव प्रविकिरतु क्षपयतु। किंविशिष्टा। जिनराजानामियं जैनराजी तीर्थंकरसंबन्धिनी। अप्रतिमो दमो यस्याः सा अप्रतिमदमवती। याता गता आपद्विपत्, त्रासस्त्वाकस्मिकं भयं, मानो गर्वो यस्याः सा। कीर्तेः कान्त्या जयन्ती अभिभवन्ती। काः। हारताराः मुक्तावलीनक्षत्राणि॥

नित्यं हेतूपपत्तिप्रतिहतकुमतप्रोद्धतध्वान्तबन्धा-
पायायासाद्यमानामदन तव सुधासारहृद्या हितानि।
वाणी निर्वाणमार्गप्रणयिपरिगता तीर्थनाथ क्रियान्मे
पापायासाद्यमानामदनत वसुधासार हृद्याहितानि॥ ४७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नित्यं सर्वदा हे तीर्थनाथ, तव वाणी मम हितानि क्रियात् । कथंभूता, हेतवो वस्तुगमकलिङ्गानि । उपपत्तयो युक्तयः । यद्वा हेतूनामुपपत्तयस्ताभिर्विध्वस्तः कुशासनप्रोद्दामतमोग्रन्थिर्यया । अपगता अपाया अनर्था यस्याः सा । आसाद्यमाना प्राप्यमाणा । अपापायैरासाद्यमाना वा । हे अमदन अकाम । सुधाया अमृतस्यासारो वेगवान्वर्षस्तद्वन्मनोहरा । श्रूयमाणामृतमिव हृदयंगमेत्यर्थः । मोक्षपथस्नेहलैः स्वीकृता । न विद्यते पापं चायासश्चादिर्येषां ते पापायासादयस्ते च तेऽमानाश्च । मदाश्च नरास्तैर्वन्दित । हे वसुधासार पृथिव्युत्कृष्ट । आहितानि स्थापितानि । क । हृदि मनसि ॥

रक्षःक्षुद्रग्रहादिप्रतिहतिशमनी वाहितश्वेतभास्व-
त्सन्नालीका सदा सापरिकरमुदिता साक्षमाला भवन्तम् ।
शुभ्रा श्रीशान्तिदेवी जगति जनयतात्कुण्डिका भाति यस्याः
सन्नालीका सदाप्ता परिकरमुदिता सा क्षमालाभवन्तम् ॥ ४८ ॥

श्रीशान्तिदेवी भवन्तं त्वां क्षमा उपशमस्तस्या लाभः सोऽस्यास्तीति तं क्षमालाभवन्तं क्रियात् । कीदृशा । रक्षांसि पलादाः, क्षुद्राः शाकिनीप्रमुखाः, ग्रहाः शनैश्चरादयः । आदिशब्दाद्भूपालव्यालादयः । तेभ्यः प्रतिहतिरुपघातस्तस्याः शमनी नाशिका । वाहितं वाहनीकृतं श्वेतं सितं भास्वद्दीप्यमानं सत् शोभनं नालीकं कमलं यया सा । सतां साधूनामाप्ता अविप्रतारिका । सापरिकरं जटामण्डलं तेन मुदिता प्रीता । सन्नं क्षीणमलीकमसत्यं यस्याः सा । सहाक्षमालया जपमालया वर्तते । इदं देव्याः कुण्डिकाया वा विशेषणम् । यस्या देव्याः कुण्डिका कमण्डलुर्भाति । कथंभूता । करं हस्तं परि लक्षीकृत्य उदिता उदयं प्राप्ता ॥

अपापदमलं घनं शमितमानमामो हितं
नतामरसभासुरं विमलमालयामोदितम् ।
अपापदमलङ्घनं शमितमानमामो हितं
न तामरसभासुरं विमलमालयामोदितम् ॥ ४९ ॥

विमलं जिनं वयमानयामः । पापं ददातीति पापदः । न पापदमपापदम् । पुण्यप्रदमित्यर्थः । अलमत्यर्थम् । यद्वा अपापो यो दम उपशमस्तं लातीति अपापदमलम् । घनं निश्छिद्रं अशेषमलक्षयोत्थं शं सुखमितं प्राप्तम् । हितं प्राणिगणस्य । नता नम्रीभूता अमरसभा देवपर्षदसुराश्च यस्य । विमला या माला पुष्पस्रक् तयामोदितं सुरभीकृतम् । अपगता आपदो यस्मात्तम् । अलङ्घनं केनाप्यपराभूतम् । शमितो मानो येन तम् । आमोहितं न मोहेन समन्तान्न वशीकृतम् । तामरसं कमलं तद्वद्भासुरं दीप्यमानम् । (विमलं निर्दोषम्) । आलये गृहविषये । अमोदितमहृष्टम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सदानवसुराजिता असमरा जिना भीरदाः
क्रियासु रुचितासु ते सकलभा रतीरायताः ।
सदानवसुराजिता असमराजिनाभीरदा
क्रियासुरुचितासु ते सकलभारतीरा यताः ॥ ९० ॥

ते जिनास्ते तव आयता विपुला रतीर्मुदः क्रियासु कर्तव्येषु क्रियासुर्देयासुः । किंभूतासु । रुचितासु इष्टासु । उचितासु योग्यासु । पुण्यरूपास्वित्यर्थः । जिनाः किंविशिष्टाः । सदानवैः सासुरैः सुरैरुपसर्गादिभिरजिताः । असमरा अरणाः । भियं भीतिं रदन्ति भिन्दन्तीति भीरदाः । 'रद विलेखने' । सकलाः सदोषाः संसारकृत्यरूपा ये भारास्तेषां पर्यन्ते स्थितत्वात्तीराः । यद्वा असदोषा भारतीरीरयन्ति रान्ति वा । यताः प्रयत्नवन्तः । सदानं सत्यागं यद्वसु सुवर्णं तेन राजिताः शोभिताः । असमाः शोभमानाश्च नाभीरदा येषां ते । सकला समस्ता भा दीप्तिर्येषां येषु वा । यद्वा सह कलभया रुचिररुचा वर्तन्ते ॥

सदा यतिगुरोरहो नमत मानवैरञ्चितं
मतं वरदमेनसा रहितमायताभावतः ।
सदायति गुरोरहो न मतमानवैरं चितं
मतं वरदमेन सारहितमायता भावतः ॥ ९१ ॥

अहो लोकाः, यतिगुरोः सर्वज्ञस्य भावतो भक्त्या मतं शासनं नमत । सदा सर्वकालम् । कथंभूतम् । मानवैर्मानुषैरञ्चितं पूजितम् । वरमभीष्टार्थं ददाति वरदम् । एनसा पापेन रहितं त्यक्तम् । यतिगुरोः किंभूतस्य । आयताभावतः आयता विपुला भा अस्यास्तीति मतुप् । मतं किंभूतम् । सदायति सती शोभना आयतिरागामिकालः प्रभुता वा यस्य तत् । गुरोरर्हतो रहो रहस्यभूतम् । न मतेऽभीष्टे मानवैरे यस्य । चितं व्याप्तम् । केन । वरदमेन प्रधानोपशमेन । किंभूतेन । आयता आगच्छता । मतं कथंभूतम् । मतं सर्वस्याभिप्रेतम् । सारं च तद्धितं च । यद्वा सारं हितं यस्मिन् ॥

प्रभाजि तनुतामलं परमचापला रोहिणी
सुधावसुरभीमना मयि सभाक्षमालेहितम् ।
प्रभाजितनुतामलं परमचापलारोहिणी
सुधावसुरभीमनामयिसभा क्षमाले हितम् ॥ ९२ ॥

रोहिणी देवी मयि विषये ईहितममलमनवद्यं हितं शुभोदर्कं तनुतां कुरुताम् । मयि कथंभूते । प्रभाजि प्रकर्षेण भजत इति तच्छीले । अलमत्यर्थम् । परं प्रकृष्टम् । देवी किंविशिष्टा । अचापला चापल्यमुक्ता । सुधा प्रासादलेपनद्रव्यं तद्वद्वसु तेजो यस्याः । यद्वा अमृतमेव द्रव्यं यस्याः । न भीर्भयं मनसि यस्याः सा अभीमनाः । सभा सका-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्तिका अक्षमाला यस्याः । प्रभाजितैस्तेजस्तिरस्कृतैर्नुता स्तुता । परमं चापं धनुर्लातीति । आरोहणशीला । काम् । सुष्ठु धावतीति सुधावा सुवेगा या सुरभी गौस्ताम् । अनामयनी नीरोगा सभा यस्याः सा । क्षमां लातीति क्षमाले मयि ॥

सकलधौतसहासनमेरवस्तव दिशन्त्वभिषेकजलप्लवाः ।
मतमनन्तजितः स्नपितोल्लसत्सकलधौतसहासनमेरवः ॥ ९३ ॥

सकलाः समस्ता धौताः क्षालिताः सहासाः सविकासा न मेरवो वृक्षविशेषा यैस्ते । मतमभिप्रेतम् । हे अनन्तजिन । चतुर्दशस्य तीर्थकृतो द्वे नाम्नी अनन्तोऽनन्तजिच्च । सहासनेन स्नानपीठेन असनैर्वा वृक्षविशेषैर्वर्तते ततः स्नपितः स्नानं कारितः उल्लसञ्शोभमानः सकलधौतः सहेमा सहासनो मेरुर्यैस्ते । यद्वा सकलधौतं ससुवर्णं सहं समर्थं दृढमासनं यस्मिन् । ततः स्नपित उल्लसन् सकलधौतसहासनमेरुर्यैस्ते । हे अनन्तजित्, तव स्नानजलप्रवाहा मतं हितं दिशन्त्विति संबन्धः ॥

मम रतामरसेवित ते क्षणप्रद निहन्तु जिनेन्द्रकदम्बक ।
वरद पादयुगं गतमङ्गताममरतामरसे विततेक्षण ॥ ९४ ॥

हे जिनेन्द्रपटल, ते तव पादयुगं ममाङ्गतां जाड्यं निहन्तु । रताः सक्तचित्ता येऽमरास्तैः सेवित । हे क्षणप्रद उत्सवदायक । वरं ददातीति वरद । पादयुगं किंभूतम् । गतं प्राप्तम् । क्व । अमरतामरसे सुरकृतनवकमलेषु । जातित्वादेकवचनम् । वितते विस्तीर्णे लोचने यस्य तस्य संबोधनम् ॥

परमतापदमानसजन्मनःप्रियपदं भवतो भवतोऽवतात् ।
जिनपतेर्मतमस्तजगत्त्रयीपरमतापदमानसजन्मनः ॥ ९५ ॥

हे भव्यलोकाः, जिनेन्द्रमतं भवतो युष्मान् भवतः संसारात् अवताद्रक्षताम् । किंविशिष्टम् । परमतानां बौद्धादिशासनानामापदां हेतुत्वादापद्व्यसनम् । अमानान्यसंख्यानि सजन्ति संबध्यमानानि मनःप्रियाणि चित्तप्रीतिकराणि पदानि स्याद्यन्तानि यस्मिंस्तत् । जिनपतेः कथंभूतस्य । अस्तो ध्वस्तो जगत्त्रय्याः परमतापदो महासंतापकारी मानसजन्मा कामो येन तस्य ॥

रसितमुच्चतुरङ्गमनायकं दिशतु काञ्चनकान्तिरिताच्युता ।
धृतधनुःफलकासिशरा करै रसितमुच्चतुरं गमनाय कम् ॥ ९६ ॥

अच्युता अलुप्ता देवी कं सुखं देयात् । कथंभूता । इता प्राप्ता । कम् । उच्चतुरङ्गमनायकं तुङ्गाश्वप्रकाण्डम् । किंविशिष्टम् । रसितं शब्दायमानम् । उत्प्राबल्येन चतुरं दक्षम् । असितं नीलवर्णम् । यद्वा रसिते मुत्प्रमोदो यस्य स चासौ चतुरश्च तम् । गमनाय गत्यर्थम् । देवी कथंभूता । काञ्चनवत्कान्तिर्यस्याः सा । करैः शयैर्धृता चापावरणखड्गबाणा यया सा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमः श्रीधर्म निष्कर्मोदयाय महितायते ।
मर्त्यामरेन्द्रनागेन्द्रैर्दयायमहिताय ते ॥ ९७ ॥

हे धर्मनाथ जिन, ते तुभ्यं नमोऽस्तु । कथंभूताय । निर्गतः कर्मोदयो मलोत्पादो यस्य स तस्मै निर्गतकर्मोदयाय । महिता पूजिता आयतिरुत्तरकालः प्रभुता वा यस्य । यद्वा महिता आसमन्तायतयः साधवो यस्य तत्संबोधनम् । कैर्मर्त्यामरेन्द्रनागेन्द्रैर्मर्त्याश्चामराश्च तेषामिन्द्रा नागेन्द्राश्च । नागेन्द्रस्योपलक्षणात्पातालवासिदेवैः । दया च यमाश्च व्रतानि तेषां हिताय ते तुभ्यम् ॥

जीयाज्जिनौघो ध्वान्तान्तं ततान लसमानया ।
भामण्डलत्विषा यः स ततानलसमानया ॥ ९८ ॥

स जिनौघो जीयात् । भामण्डलकान्त्या यो ध्वान्तध्वंसं ततानाकृत । किंभूतया । ततो विपुलो योऽनलो वह्निस्तत्सदृशया लसमानया वर्धमानया ॥

भारति द्राग्जिनेन्द्राणां नवनौ रक्षतारिके ।
संसाराम्भोनिधावस्मानवनौ रक्ष तारिके ॥ ९९ ॥

हे जिनवराणां वाणि, अस्मानवनौ पृथिव्यां रक्ष । किंविशिष्टा । नवा प्रत्यग्रा नौर्भ-ङ्गिनी(?) संबोधनं वा । कस्मिन् । संसाराम्भोनिधौ भवसागरे । अक्षतानुपहता अरयः शत्रवः कं जलं यत्र । हे तारिके निर्वाहिके ॥

केकिस्था वः क्रियाच्छक्तिकरा लाभानयाचिता ।
प्रज्ञप्तिर्नूतनाम्भोजकरालाभा नयाचिता ॥ ६० ॥

प्रज्ञप्तिर्देवी वो युष्माकमयाचिता अप्रार्थिता लाभान् दद्यात् । किंभूता । केकिनि मयूरे तिष्ठतीति केकिस्था । शक्तिः प्रहरणविशेषः करे यस्याः । नवकमलवत्कराला अत्युल्बणा भा यस्याः सा नयेन नीत्या आचिता व्याप्ता ॥

राजन्त्या नवपद्मरागरुचिरैः पादैर्जिताष्टापदा-
द्रेऽकोपद्रुत जातरूपविभया तन्वार्य धीर क्षमाम् ।
बिभ्रत्यामरसेव्यया जिनपते श्रीशान्तिनाथास्मरो-
द्रेकोपद्रुत जातरूप विभयातन्वार्यधी रक्ष माम् ॥ ६१ ॥

हे श्रीशान्तिदेव, मां रक्ष पालय । जितोऽष्टापदाद्रिर्मेरुर्येन तस्य संबोधनम् । कया । तन्वा शरीरेण । किंभूतया । पादैश्चरणै राजन्त्या शोभमानया । किंभूतैः । नवपद्मरागो नूतनकमलरक्तता तद्वद्रुचिरैश्चारुभिः । हे अकोप अक्रोध । पुनस्तन्वा किंभूतया । द्रुत-मुत्तप्तं यज्जातरूपं तपनीयं तद्वद्विभा कान्तिर्यस्यास्तया । हे अर्य स्वामिन् । हे धीर प-रीषहाद्यक्षोभ्य । तन्वा किं कुर्वत्या । क्षमां क्षान्तिं बिभ्रत्या धारयन्त्या । अमरसेव्यया

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवसेवनीयया । हे अस्मरोद्रेकोपद्रुत न कामवेगपीडित । जातं प्रादुर्भूतं विश्वातिशायि रूपं सौन्दर्यं यस्य । हे विभय गतभय । अतनुरकृशा आर्या प्रशस्या धीर्यस्य तस्य संबोधनम् । त्वमित्यस्यानुक्तस्यापि रक्षेति क्रिययोपलब्धस्य विशेषणं वा । अत्र तनोर्मेरुणा श्लेषः । सोऽपि पद्मरागमणिमयैः पादैर्मूले राजते स्वर्णवर्णश्च । क्षमां भुवं बिभर्ति । अमरसेव्यश्च स्यात् ॥

ते जीयासुरविद्विषो जिनवृषा मालां दधाना रजो-
राज्या मेदुरपारिजातसुमनःसंतानकान्तां चिताः ।
कीर्त्या कुन्दसमत्विषेषदपि ये न प्राप्तलोकत्रयी-
राज्या मेदुरपारिजातसुमनःसंतानकान्ताञ्चिताः ॥ ६२ ॥

ते जिनोत्तमा जयन्तु । ये प्राप्तत्रैलोक्यैश्वर्या अपि ईषदपि न मेदुर्मदं चक्रुरिति संबन्धः । किंविशिष्टाः । अविद्विषः शत्रुरहिताः । मालां स्रजं धारयन्तः । मालां किंभूताम् । रजोराज्या परागपूरेण मेदुरा पारिजातकुसुमानि संतानकानि संतानककुसुमानि च तेषामन्ता अवयवा यस्यां ताम् । चिता व्याप्ताः । कया । कीर्त्या । कथंभूतया । कुन्दपुष्पोज्ज्वलया । अपारिजाता अपगतवैरिवृन्दा ये सुमनःसंताना विद्वत्समूहा देवसमूहा वा तेषां कान्ताः शिरःप्रान्ता प्रणामपराः स्त्रियो वा तैरञ्चिताः पूजिताः ॥

जैनेन्द्रं मतमातनोतु सततं सम्यग्दृशां सद्गुणा-
लीलाभं गमहारि भिन्नमदनं तापापहृद्यामरम् ।
दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि पर्युल्लस-
ल्लीलाभङ्गमहारिभिन्नमदनन्तापापहृद्यामरम् ॥ ६३ ॥

जैनेन्द्रं जिनेन्द्रप्रोक्तं मतं सद्गुणश्रेणिलाभं सम्यग्दृष्टीनां वितनोतु । किंविशिष्टम् । गमाः सदृशपाठास्तैर्हारि मनोहरम् । भिन्नो विदीर्णो मदनोऽनङ्गो येन । तापं संसारभ्रमणजमपहरतीति । यामानि व्रतानि रातीति । दुर्निर्भेदं दुःखभेद्यं निरन्तरं निर्विवरमान्तरमन्तर्भवं तमो मोहं निर्नाशयतीत्येवंशीलम् । पर्युल्लसल्लीलान्प्रोद्यद्विलासान् अभङ्गानजेयान् महारीन्महावैरिणो भिनत्तीति । नमन्तोऽनन्ता अप्रमाणाः अपापहृद्या अमरा यस्य ॥

दण्डच्छत्रकमण्डलूनि कलयन्स ब्रह्मशान्तिः क्रिया-
त्संत्यज्यानि शमी क्षणेन शमिनो मुक्ताक्षमाली हितम् ।
तप्ताष्टापदपिण्डपिङ्गलरुचिर्योऽधारयन्मूढतां
संत्यज्यानिशमीक्षणेन शमिनो मुक्ताक्षमालीहितम् ॥ ६४ ॥

स ब्रह्मशान्तिनामा यक्षः शं सुखं कुरुतात् । किं कुर्वन् । दण्डच्छत्रकमण्डलूनि क-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लयन्नुद्वहन् । किंभूतानि । सन्ति शोभनानि । अज्यानि अहीनानि । शमी प्रशमवान् । क्षणेन वेगेन । मुक्ताक्षमाला अस्यास्तीति । तप्तस्वर्णपिण्डपीतरुचिः । यो यक्षः कस्यापि शमिनो मुनेरनिशं निरन्तरमीक्षणेन विलोकनेनाज्ञतां मूढतां संत्यज्य हितं परिणतिसुखमधारयत् । हितं किंभूतम् । मुक्ता अक्षमा यैस्ते मुनयस्तेषामाली श्रेणिस्तस्या ईहितं चेष्टितम् ॥

भवतु मम मनः श्रीकुन्थुनाथाय तस्मा-
यमितशमितमोहायामितापाय हृद्यः ।
सकलभरतभर्ताभूज्जिनोऽप्यक्षपाशा-
यमितशमितमोहयामितापायहृद्यः ॥ ६५ ॥

तस्यै श्रीकुन्थुनाथाय जिनाय नमोऽस्तु । अमितः शमितो मोहस्यायामितापो दीर्घदवथुर्येन तस्मै । यः स्वामी हृद्यो हृदयहारी । संपूर्णभरतक्षेत्राधिपश्चक्रवर्ती जिनोऽप्यभूत् । किंभूतः । अमितानपायान्हरतीति । तस्मै किंभूताय । अक्षपाशा इन्द्रियरज्जवस्तैरयमिता अबद्धा ये शमिनो मुनयस्तेषां तमोहायाज्ञानघातिने ॥

सकलजिनपतिभ्यः पावनेभ्यो नमः स-
न्नयनरवरदेभ्यः सारवादस्तुतेभ्यः ।
समधिगतनुतिभ्यो देवबृन्दाद्गरीयो-
नयनरवरदेभ्यः सारवादस्तु तेभ्यः ॥ ६६ ॥

तेभ्यः सर्वजिनेन्द्रेभ्यो नमोऽस्तु । किंभूतेभ्यः । पावनेभ्यः पवित्रताजनकेभ्यः । सन्तः शोभमाना नयनानि लोचनानि रवो देशनाध्वनिः रदा दन्ताश्च येषां तेभ्यः । सारोऽर्थप्रधानो वाद उक्तिर्येषां तैः स्तुताः । यद्वा सारश्चासौ वादश्च तेन स्तुता तेभ्यः । समधिगता प्राप्ता नुतिर्यैस्तेभ्यः । कस्माद्देवसमूहात् । किंविशिष्टात् । सारवात् प्रस्तुतस्तुतिकात् । गरीयांसो गरिष्ठा नया नीतयो येषु ते च ते नराश्च तेषां वरदेभ्यः । इत्थंभूतेभ्यो जिनेभ्यो नमोऽस्तु भवतु ॥

स्मरत विगतमुद्रं जैनचन्द्रं चकास-
त्कविपदगमभङ्गं हेतुदन्तं कृतान्तम् ।
द्विरदमिव समुद्यद्दानमार्गं धुतावे-
कविपदगमभङ्गं हे तुदन्तं कृतान्तम् ॥ ६७ ॥

हे लोकाः, जिनचन्द्रसंबन्धिनं कृतान्तं सिद्धान्तं यूयं स्मरत । हस्तिनमिव । किंभूतम् । विगतमुद्रं गतप्रमाणम् । चकासन्तः शोभमानाः कविपदानि कवियोग्याः शब्दाः गमा भङ्गाश्च यस्मिन् । हेतुदन्तं हेतव एव दन्तो विपक्षभेदकत्वाद्विषाणो यस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तम् । कृतान्तं यमम् । तुदन्तं व्यथमानम् । समुद्यन्समुल्लसन्दानमार्गो ज्ञानादीनां वितरणक्रमो यस्मिन् । अघैकविपदः पापैकविपद एवागा वृक्षास्ते धुता येन । अभङ्गमजेयम् । अत्र द्विरदेन श्लेषः । सोऽप्यपेतमर्यादः । तस्यापि पदगमनभङ्गाः शोभन्ते । दानमार्गो मदप्रवाहश्च स्यात् । स च कृतविनाशं च तुदति ॥

प्रचलदचिररोचिश्चारुगात्रे समुद्य-
त्सदसिफलकरामेऽभीमहासेऽरिभीते ।
सपदि पुरुषदत्ते ते भवन्तु प्रसादाः
सदसि फलकरा मेऽभीमहासेरिभीते ॥ ६८ ॥

हे पुरुषदत्ते, ते तव प्रसादाः सदसि सभायां फलकराः कार्यसिद्धिकारिणो भवन्तु मे मम । प्रचलन्ती स्फुरन्ती या विद्युत्तद्वच्चारु गात्रं यस्याः सा तस्याः संबोधनम् । विलसद्भ्यामसिफलकाभ्यां खड्गखेटकाभ्यां रामा रमणीया तस्याः संबोधनम् । अभीमोऽरौद्रो हासो हसनं यस्याः । अरिभ्यो भीर्भयं तस्या ईतिभूते । अभीर्निर्भया या महासेरिभी प्रौढमहिषी तामिता गता तस्याः संबोधनम् ॥

व्यमुचच्चक्रवर्तिलक्ष्मीमिह तृणमिव यः क्षणेन तं
सन्नमदमरमानसंसारमनेकपराजितामरम् ।
द्रुतकलधौतकान्तमानमतानन्दितभूरिभक्तिभा-
क्संनमदमरमानसं सारमनेकपराजितामरम् ॥ ६९ ॥

यश्चक्रवर्तिलक्ष्मीं क्षणेन वेगेन तृणवदत्याक्षीत् तं अरं अरनामानं जिनं हे जनाः, आनमत । किंभूतम् । सन्ना क्षीणा मदमरणमानसंसारा यस्य तम् । लक्ष्मीं किंभूताम् । अनेकपा गजास्तै राजितां शोभिताम् । जिनं किंभूतम् । द्रुतं विलीनं यत्सुवर्णं तद्वत्कान्तं कमनीयम् । आनन्दितं भूरिभक्तिभाजां संनमतां प्रणामकारकाणाममराणां मानसं चित्तं येन । तथा सारं श्रेष्ठम् । दिग्विजयादिप्रक्रमेऽनेके बहवः पराजिता अमरा मागधादिदेवा येन तम् । यद्वा लक्ष्मीं कथंभूताम् । अनेकैः परैरजिताम् । अरं शीघ्रम् ॥

स्तौति समन्ततः स समवसरणभूमौ यं सुरावलिः
सकलकलाकलापकलितापमदारुणकरमपापदम् ।
तं जिनराजविसरमुज्जासितजन्मजरं नमाम्यहं
सकलकला कलापकलितापमदारुणकरमपापदम् ॥ ७० ॥

सुरेन्द्रश्रेणी यं जिनेन्द्रव्यूहं स्तौति । समन्ततः सर्वतः । स्मेत्यतीतार्थकम् । समवसरणभूमौ । किंभूता । सकलाः समस्ताः कला विज्ञानानि तासां कलापेन समूहेन कलिता सहिता । अपमदा अपगतमदा । सह कलकलेन कोलाहलेन वर्तते । कला म-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धुरा। तं जिनेन्द्रविसरमहं नमामि। किंविशिष्टम्। अरुणावारक्तौ करौ हस्तौ यस्य। अपगता आपदो यस्मात्तम्। विनाशितजन्मजरम्। अपकलितापमपगतकलहसंतापम्। अदारुणमरौद्रं करोतीति तम्। अपापं पुण्यं ददातीति तम्॥

भीममहाभवाब्धिभवभीतिविभेदि परास्तविस्फुर-
त्परमतमोहमानमतनूनमलं घनमघवतेऽहितम्।
जिनपतिमतमपारमर्त्यामरनिर्वृतिशर्मकारणं
परमतमोहमानमतनूनमलङ्घनमघवतेहितम्॥ ७१॥

भीषणमहासंसारसमुद्रोत्पन्नभयविदारकम्। परास्ताः परिक्षिप्ता विस्फुरन्तः परमतमोहमाना येन। यद्वा मोहादज्ञानान्मानो मिथ्याभिनिवेशः। परमतानां मोहमानौ वा। तनु तुच्छमूनमपूर्णं च न। अलमत्यर्थं घनं निबिडं प्रमेयगाढम्। अघवते पापिने अहितं न श्रेयस्कारि। अपाराण्यपर्यन्तानि मर्त्यानाममराणां निर्वाणस्य शर्माणि तेषां कारणम्। परमं तमो हन्ति। यद्वा परमतमा ऊहा यस्मिन्। आनमत प्रणमत। नूनं निश्चितम्। न लङ्घनमभिभवो यस्य स चासौ मघवा च तेन सामर्थ्यादच्युतनाथेन ईहितमभिलषितम्॥

यात्र विचित्रवर्णविनतात्मजपृष्ठमधिष्ठिता हुता-
त्समतनुभागविकृतधीरसमदवैरिव धामहारिभिः।
तडिदिव भाति सांध्यघनमूर्धनि चक्रधरास्तु सा मुदे-
ऽसमतनुभा गवि कृतधीरसमदवैरिवधा महारिभिः॥ ७२॥

अरा एषां सन्तीत्यरीणि चक्राणि। महान्ति च तान्यरीणि च तैर्महारिभिर्महाचक्रैः यात्र जगति चक्रधरा देवी अप्रतिचक्रा देवी भाति शोभते। कथंभूता। विविधवर्णगरुडपृष्ठमधिरूढा। हुतमत्तीति हुताद्वह्निस्तत्तुल्यां तनुं भजते। अविकृता अविकारिणी धीर्यस्याः सा। महारिभिः किंभूतैः। असमानदवानलैरिव। धाम तेजस्तेन हारिभिर्मनोहरैः। यथा विद्युत्संध्याभवमेघमस्तके भाति तद्वत्। सा देवी मुदेऽस्तु भवतु। समा च तनुश्च समतनुः न समतनुरसमतनुः एवंविधा भा यस्याः। गवि पृथिव्यां स्वर्गे वा कृतो धीराणां समदानां वैरिणां वधो यया॥

नुदंस्तनुं प्रवितर मल्लिनाथ मे प्रियंगुरोचिररुचिरोचितां वरम्।
विडम्बयन्वररुचिमण्डलोज्ज्वलः प्रिये गुरोऽचिररुचिरोचिताम्बरम्॥ ७३॥

नुदन् क्षिपन्। तनुं शरीरम्। प्रियंगुः श्यामो वृक्षविशेषस्तद्वद्रोचिर्यस्य। तनुं कथंभूताम्। रुचिरां उचितां च न एवंविधाम्। रुचिमण्डलं भामण्डलं तेनोज्ज्वलः कान्तः। अचिररुच्या रोचितं विद्युच्छोभितमम्बरमाकाशं विडम्बयन्। हे मल्ले (मल्लि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाथ) हे गुरो, अरुचिरोचितां तनुं नुदन् प्रियंगुवर्णः भामण्डलशोभितः विद्युत्सहितमाकाशं पराभवन् मम वरं प्रवितर ॥

जवाद्गतं जगदवतो वपुर्व्यथाकदम्बकैरवशातपत्रसं पदम् ।
जिनोत्तमान्स्तुत दधतः स्रजं स्फुरत्कदम्बकैरवशातपत्रसंपदम् ॥ ७४ ॥

जवाद्वेगाज्जगद्विश्वमवतो रक्षतो जिनोत्तमान् हे भव्यजनाः, स्तुत नुत । जगत्किंविशिष्टम् । पदं स्थानं नरकादिलक्षणं गतं प्राप्तम् । पदं किंभूतम् । वपुः पीडोत्पीडैरवशाः परतन्त्रास्तपन्तस्तापमनुभवन्तस्त्रसाः प्राणिनो यत्र तत् । जिनोत्तमान्कथंभूतान् । स्रजं पुष्पमालां दधतः । मालां कथंभूताम् । स्फुरन्ती कदम्बानां कैरवाणां शतपत्राणां च संपद्यत्र ॥

स संपदं दिशतु जिनोत्तमागमः शमावहन्नतनुतमोहरोऽदिते ।
स चित्तभूः क्षत इह येन यस्तपःशमा वहन्नतनुत मोहरोदिते ॥ ७५ ॥

स जिनेन्द्रागमः संपदं दद्यात् । कथंभूतः । शं सुखमावहन्कुर्वन् अतनु प्रौढं तमो हरतीति । यद्वा अतनुतमानूहान् राति ददातीति । स चित्तभूः कामो येन क्षतो हतः । यः कंदर्पस्तपःशमौ अहन् जघान । अदिते अखण्डिते मोहश्च रोदितं च मोहरोदिते च योऽतनुताप्रथयत् ॥

द्विपं गतो हृदि रमतां दमश्रिया प्रभाति मे चकितहरिद्विपं नगे ।
वटाह्वये कृतवसतिश्च यक्षराट् प्रभातिमेचकितहरिद्विपन्नगे ॥ ७६ ॥

यक्षराट् कपर्दिनामा मम मनसि रमतां परिक्रीडताम् । हृदि कथंभूते । उपशमलक्ष्म्या प्रभाति प्रकर्षेण शोभमाने । यक्षराट् किंविशिष्टः । चकितस्त्रस्तो हरिद्विप ऐरावणो यस्मात्तं द्विपं वारणं गतः प्राप्तः । विपन्नगे विगतसर्पे नगे वृक्षे वटाभिधाने कृता वसतिरालयो येन । प्रभया कान्त्या अतिमेचकिता श्यामलीकृता हरितो दिशो येन सः ॥

जिनमुनिसुव्रतः समवताज्जनतावनतः
समुदितमानवा धनमलोभवतो भवतः ।
अवनिविकीर्णमादिषत यस्य निरस्तमनः-
समुदितमानबाधनमलो भवतो भवतः ॥ ७७ ॥

जिनमुनिसुव्रतो भवतो युष्मान् भवतः संसारात्समवतात्संरक्षतु । कथंभूतः । जनतया जनसमूहेनावनतः । समुदिताः सहर्षा ये मानवा मनुष्या अवनिविकीर्णं भूमौ राशीकृतं धनं कनकादिकं यस्यालोभवतोऽलोभिनो भवतः सतः । दीक्षां ग्रहीतुकामस्येत्यर्थः । आदिषताददत । जिनः कथंभूतः । निरस्ता अपकीर्णा मनःसमुदिता हृदि समुत्पन्ना संहता वा मानो बाधनं पीडा मलः कर्म च येन ॥

२०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रणमत तं जिनव्रजमपारविसारिरजो
दलकमलानना महिमधाम भयासमरुक् ।
यमतितरां सुरेन्द्रवरयोषिदिलामिलनो-
दलकमला ननाम हिमधामभया समरुक् ॥ ७८ ॥

प्रणमत नमत तं जिनव्रजमर्हत्संदोहम् । कथंभूतम् । भयासं भयक्षयकारकम् । सुरेन्द्रवरयोषिदिन्द्राणी यं ननाम अनंसीत् । कथंभूता । अपाराण्यपर्यन्तानि प्रसरणशीलानि रजांसि दलानि च यस्य तच्च तत्कमलं च तद्वत्सुगन्धमाननं मुखं यस्याः । महिम्नो धाम गृहम् । जिनव्रजविशेषणमेतत् । हिमधामा चन्द्रस्तस्य भया कान्त्या समाना रुग्रुचिर्यस्याः सा । इलामिलनेन क्षितिघट्टनेन उद्गतोऽलकेषु केशेषु मलो यस्याः सा ॥

त्वमवनताञ्जिनोत्तमकृतान्त भवाद्विदुषो-
ऽव सदनुमानसंगमन याततमोदयितः ।
शिवसुखसाधकं स्वभिदधत्सुधियां चरणं
वसदनु मानसं गमनयातत मोदयितः ॥ ७९ ॥

हे जिनोत्तमसमय, त्वमवनतान् प्रणमतो विदुषोऽव रक्ष भवात्संसारात् । सत् शोभमानं विद्यमानं वा अनुमानस्य प्रमाणस्य संगमनं संगतिर्यस्य तस्य संबोधनम् । त्वं किंविशिष्टः । यातं तमो येभ्यस्ते याततमसो मुनयस्तेषां दयितोऽभीष्टः । मोक्षसुखप्रापकं चरणं चारित्रं स्वभिदधत्स्वाख्यन् । किंभूतम् । सुधियां मानसमनु लक्ष्यीकृत्य वसत्तिष्ठत् । हे गमनयातत गमा सदृशपाठाः नयाश्च नैगमादयस्तैराततं विस्तीर्ण । हे मोदयितः प्रमोदकारक ॥

अधिगतगोधिका कनकरुक्तव गौर्युचिता-
ङ्कमलकराजि तामरसभास्यतुलोपकृतम् ।
मृगमदपत्रभङ्गतिलकैर्वदनं दधती
कमलकरा जितामरसभास्यतु लोपकृतम् ॥ ८० ॥

गौरी देवी तव लोपकृतं विनाशकारकमस्यतु क्षिपतु । किंभूता । अधिगता प्राप्ता गोधिका देववाहनविशेषो यया सा । कनकवद्रुग्दीप्तिर्यस्य । वदनं मुखं दधती । किंभूतम् । मृगमदस्य कस्तूरिकाया ये पत्रभङ्गाः पत्रच्छेदास्तैरुपलक्षिता ये तिलकास्तैरुचिता योग्या अङ्का लाञ्छनानि यस्य तदुचिताङ्कम् । अलकैश्चिकुरै राजते इत्येवंशीलमलकराजि तामरसभासि । अतुलमुपकृतं स्वकान्तिसंविभागादिना उपकारो यस्य तत् । कमलं करे यस्याः कमलवद्वा करो यस्याः सा । जिता निष्प्रभीकृता रूपनेपथ्यप्रागल्भ्यादिभिरमराणां सभा यया सा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्फुरद्विद्युत्कान्ते प्रविकिर वितन्वन्ति सततं
ममायासं चारो दितमद नमेऽघानि लपितः।
नमद्भव्यश्रेणीभवभयभिदां हृद्यवचसा-
ममायासंचारोदितमदनमेघानिल पितः॥ ८१॥

हे नमे नमिजिन, ममायासं वितन्वन्ति अघानि पापानि प्रविकिर निरस्य। स्फुरन्ती या विद्युत् तद्वत्कान्तिर्यस्य तस्य संबोधनम्। हे चारो दर्शनीय। हे दितमद च्छिन्नमद। हे लपितः वादक। केषाम्। हृद्यवचसाम्। कथंभूतानाम्। नमद्भव्यश्रेणीभवभयभिदाम्। मायाया दम्भस्य संचारो यस्य स नैवंविधस्तस्य संबोधनम्। उदित उदयं प्राप्तो मदनः काम एव मेघो जीमूतस्तस्य संहारकत्वादनिलो वात इव तस्य संबोधनम्। हे पितः जनक इव हितकारक॥

नखांशुश्रेणीभिः कपिशितनमन्नाकिमुकुटः
सदा नोदी नानामयमलमदारेरित तमः।
प्रचक्रे विश्वं यः स जयति जिनाधीशनिवहः
सदा नो दीनानामयमलमदारेरिततमः॥ ८२॥

यो विश्वं इततमो गतमोहं प्रचक्रे स जिनेन्द्रसमूहो जयति। कथंभूतः। नखांशुश्रेणीभिर्नखमयूखसंततिभिः कपिशितनमन्नाकिमुकुटः पीतीकृतनमद्देवकिरीटः। सदा शश्वत् नोदी प्रेरणशीलः। कस्य। नाना अनेकरूपा आमयाश्च मलाश्च मदाश्च। समाहारद्वन्द्वः। तदेवारिस्तस्य। सदानो दानसहितः। दीनानां कृपणानाम्। अयमेषः। अलमतिमात्रम्। अतिशयेन दारैः कलत्रैरीरितो धैर्याच्चालितो दारेरिततमः। न एवंविधः अदारेरिततमः॥

जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधो
गुरुर्वाहोऽपातापदघनगरीयानसुमतः।
कृतान्तस्त्रासीष्ट स्फुटविकटहेतुप्रमितिभा-
गुरुर्वाहो पाता पदघनगरीयानसुमतः॥ ८३॥

कृतान्तः सिद्धान्तोऽसुमतः प्राणिनस्त्रासीष्ट रक्षतात्। कस्मात्। जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः। व्यालः सर्पः। रुजो जलोदरादिरोगाः। बन्धनं कारानिरोधादि। युत्सङ्ग्रामः। जलादीनां सकाशादित्यर्थः। किंभूतः। गुरुर्महान्। वाहोऽश्वः। न विद्यते पातश्च्यवनं आपद्विपत् अघं पापं च यस्यां सा चासौ नगरी च युक्त्या मुक्तिरेव तस्या याने गमने सुष्ठु मतोऽभिप्रेतः। स्फुटा अविसंवादिन्यो विकटा विस्तृता हेतुप्रमितयः हेतवः प्रमाणानि च भजते यः स्फुटविकटहेतुप्रमितिभाक्। उरुर्विशालः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाशब्दश्चकारार्थे। अहो इत्यामन्त्रणे। पाता त्रायकः। पदघनगरीयान् पदघनोऽर्थनिबिडः गरीयांश्च महत्त्वयुक्तः। यद्वा पदेषु वाक्यावयवेषु घनश्च गरीयांश्च॥

विपक्षव्यूहं वो दलयतु गदाक्षावलिधरा-
समा नालीकालीविशदचलना नालिकवरम्।
समध्यासीनाम्भोभृतघननिभाम्भोधितनया-
समानाली काली विशदचलनानालिकबरम्॥ ८४॥

काली देवी वो युष्माकं विपक्षव्यूहं प्रतीपपटलं दलयतु पिनष्टु। किंविशिष्टा। गदा आयुधविशेषः अक्षावलिरक्षमाला च ते धरतीति। असमा रूपैश्वर्यादिना अनन्यसदृक्। नालीकानां कमलानामाली श्रेणी तद्वद्विशदौ निर्मलौ चलनौ पादौ यस्याः सा। नालिकवरं प्रधानकमलं समध्यासीना अधिरोहन्ती अधिरूढा वा। अम्भोभृतः पयःपूर्णो यो घनो मेघस्तस्य निभा कृष्णवर्णत्वात्समा। अम्भोधितनयासमाना लक्ष्मीतुल्या आल्यः सख्यो यस्याः। विशन्तो लीयमाना अचलाः स्थिरा नाना बहुविधा येऽलयो भ्रमरास्तैः कबरं मिश्रम्। खचितमित्यर्थः। इदं नालिकवरस्य विशेषणम्॥

चिक्षेपोर्जितराजकं रणमुखे यो लक्षसंख्यं क्षणा-
दक्षामं जन भासमानमहसं राजीमतीतापदम्।
तं नेमिं नम नम्रनिर्वृतिकरं चक्रे यदूनां च यो
दक्षामञ्जनभासमानमहसं राजीमतीतापदम्॥ ८५॥

यो नेमिजिनो लक्षसंख्यं लक्षप्रमाणमूर्जितराजकं बलवद्राजवृन्दं रणमुखे चिक्षेप बभञ्ज। क्षणाद्वेगेन। राजकं किंभूतम्। अक्षाममुपचितम्। हे जन, तं नेमिं नम। किंभूतम्। भासमानं कान्तिकदम्बेन दीप्यमानं जनैर्भासमानं वा। अहसं हास्यमुक्तम्। राजीमत्या राजकन्यायाः प्रव्रज्याग्रहणेन मनोरथविफलीकरणात्तापदम् पश्चात्तु मुक्तिसुखप्रदम्। नम्राणां निर्वृतिं मुक्तिं सुखं वा करोतीति। यश्च स्वामी यदूनां यादवानां दक्षां राजीं श्रेणिं अतीता अतिक्रान्ता आपदो यया सा तामतीतापदं चक्रे कृतवान्। नेमिं किंभूतम्। अञ्जनस्य भया कान्त्या समानं तुल्यं महस्तेजो यस्य॥

प्राव्राजीज्जितराजका रज इव ज्यायोऽपि राज्यं जवा-
द्या संसारमहोदधावपि हिता शास्त्री विहायोदितम्।
यस्याः सर्वत एव सा हरतु नो राजी जिनानां भवा-
यासं सारमहो दधाव पिहिताशास्त्रीविहायोऽदितम्॥ ८६॥

या उदितमुदयं प्राप्तं ज्यायोऽपि अतिप्रौढमपि राज्यं रज इव विहाय प्राव्राजीत् प्रव्रज्यामग्रहीत्। किंभूता। जितं राजकं राजसमूहो यया सा। संसारमहोदधौ भवम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्यर्णवेऽपि हिता सुखकारिणी । शास्त्री शिक्षयित्री । यस्याश्च सर्वतः सर्वासु दिक्षु सारमहो सारतेजो दधाव प्रससार । किंभूतम् । पिहिता आच्छादिता आशास्त्रियो दिग्वनिता विहाय आकाशं च येन । तत् । अदितमखण्डितम् । सा जिनानां राजी भवायासं संसारक्लेशं नोऽस्माकं हरतु ॥

कुर्वाणाणुपदार्थदर्शनवशाद्भास्वत्प्रभायास्त्रपा-
मानत्या जनकृत्तमोहरत मे शस्तादरिद्रोहिका ।
अक्षोभ्या तव भारती जिनपते प्रोन्मादिनां वादिनां
मानत्याजनकृत्तमोहरतमेश स्तादरिद्रोहिका ॥ ८७ ॥

हे जिनपते, तव भारती वाणी मे मम अरिद्रोहिका बाह्याभ्यन्तरशत्रुजयकारिणी स्ताद्भूयात् । किंविशिष्टा । अणवः सूक्ष्माः पदार्था जीवाजीवादयस्तेषां दर्शनवशात्प्रकाशनात् भास्वत्प्रभायाः सूर्यकान्तेस्त्रपां लज्जां कुर्वाणा । आनत्या प्रणामेन हेतुभूतया जनानां कृत्तश्छिन्नो मोहो रतं च येन तस्य संबोधनम् । शस्ता प्रकृष्टा । अदरिद्रा आढ्या ऊहास्तर्का यस्याः सा अदरिद्रोहिका । अक्षोभ्या अपराभवनीया । प्रोन्मादिनां दर्पवतां परवादिनां मानस्याहंकारस्य त्याजनं मोक्षणं करोतीति । अतिशयेन तमो हरतीति तमोहरतमा । हे ईश नेतः ॥

हस्तालम्बितचूतलुम्बिलतिका यस्या जनोऽभ्यागम-
द्विश्वासेविततास्रपादपरतां वाचा रिपुत्रासकृत् ।
सा भूतिं वितनोतु नोऽर्जुनरुचिः सिंहेऽधिरूढोल्लस-
द्विश्वासे वितताम्रपादपरताम्बा चारिपुत्रासकृत् ॥ ८८ ॥

यस्या अम्बाया जनो लोको विश्वेन जगता सेवितयोस्ताम्रयो रक्तयोः पादयोश्चरणयोः परतां तदेकशरणतामभ्यागमज्जगाम साम्बा नोऽस्माकं भूतिं संपदं वितनोतु । किंभूता । हस्ते आलम्बिता चूतलुम्बिरेव लतिका यया सा । वाचा वाण्या रिपूणां त्रासं करोतीति । अर्जुनं काञ्चनं तद्वद्रुचिः कान्तिर्यस्याः सा । सिंहे कण्ठीरवेऽधिरूढा आसीना । उल्लसन् प्रसरन् विश्वासो यस्मायस्य वा । विततो विपुलो य आम्रपादपश्चूतवृक्षस्तत्र रता । चारिणौ विहरणशीलौ पुत्रौ यस्याः सा । असकृन्निरन्तरम् ॥

मालामालानबाहुर्दधदधदरं यामुदारा मुदारा-
लीनालीनामिहाली मधुरमधुरसां सूचितोमाचितो मा ।
पातात्पातात्स पार्श्वो रुचिररुचिरदो देवराजीवराजी-
पत्रापत्रा यदीया तनुरतनुरवो नन्दको नोदको नो ॥ ८९ ॥

मा मां पातात् नरकादिपतनात्पाताद्रक्षतात् । स पार्श्वस्त्रयोविंशो जिनः । किंवि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिष्टः । मालां स्रजं दधत् दधानः । यां मालामलीनां भ्रमराणामाली पटली उदारा प्रचुरा मुदा हर्षेण आरात् अन्तिके अरमत्यर्थं लीना श्लिष्टा सती अदधत्पीतवती । किंभूताम् । मधुरो मधुर्मकरन्दरसो यस्याः सा ताम् । पार्श्वः किंभूतः । आलानवद्बाहू यस्य सः । सुष्ठु उचिता या उमा कीर्तिस्तया चितो व्याप्तः । रुचिररुचयो रम्यकान्तयो रदा दन्ता यस्य सः । तथा यस्येयं यदीया तनुः शरीरं आपन्ना विपदो रक्षिका । किंभूता । देवानां संबन्धिनी या राजीवराजी स्वर्णाम्बुजश्रेणी सैव पत्रं वाहनं यस्याः सा । पार्श्वः किंभूतः । अतनुर्योजनप्रमाणभूमौ श्रूयमाणत्वात्प्रौढो रवो देशनाध्वनिर्यस्य सः । नन्दकः समृद्धिजनकः नन्दयिता वा । नोदको नो प्रेरको न भवतीत्यर्थः ॥

राजी राजीववक्त्रा तरलतरलसत्केतुरङ्गत्तुरङ्ग-
व्यालव्यालग्नयोधाचितरचितरणे भीतिहृद्यातिहृद्या ।
सारा साराज्जिनानामलममलमतेर्बोधिका माधिकामा-
द्व्याद्व्याधिकालाननजननजरात्रासमानासमाना ॥ ९० ॥

राजी श्रेणी राजीववत्कमलवद्वक्त्रं यस्याः सा । तथा तरलतरलसत्केतवः कम्प्रविराजमानध्वजा रङ्गतां चलतां तुरङ्गाणां व्यालानां दुष्टदन्तिनां व्यालग्ना अभिघटिताः कृताधिरोहणा वा ये योधाः सुभटास्तैराचित आकीर्णो रचितः कृतश्च यो रणः सङ्ग्रामस्तत्र या भीतिर्भयं तां हरतीति सा । या अतिहृद्या अत्यन्तहृदयंगमा । सारा उत्कृष्टा । सा यच्छब्दनिर्दिष्टा । आराद्दूरादन्तिकाद्वा । जिनानां सर्वज्ञानाम् । अलमत्यर्थम् । अमला मतिर्यस्य तस्य बोधिका बोधजनका । मा माम् अधिको यो आमो रोगस्तस्मात् यद्वा आधिश्च कामश्च तस्मात् । व्याधिश्च कालाननं यममुखं मरणं च जननं च जरा च त्रासश्च मानश्च न विद्यन्ते व्याध्यादयो यस्यां सा । असमाना गुणैरसदृशा । या जिनानां राजी रणे भीतिहृत्सा अव्यादिति संबन्धः ॥

सद्योऽसद्योगभिद्वागमलगमलया जैनराजीनराजी-
नूता नूतार्थधात्रीह ततहततमःपातकापातकामा ।
शास्त्री शास्त्री नराणां हृदयहृदयशोरोधिकाबाधिका वा-
देया देयान्मुदं ते मनुजमनुजरां त्याजयन्ती जयन्ती ॥ ९१ ॥

जिनराजानां संबन्धिनी जैनराजी वाग्वाणी ते तुभ्यं मुदं देयात् । किंविशिष्टा । सद्यः शीघ्रं असन्तो ये योगा मनोवाक्कायव्यापारास्तान् भिनत्तीति सा । अमलानां गमानां लयो यत्र सा । इना इभ्याः सूर्या वा तेषां राज्या नूता स्तुता । नूतान्नवीनानर्थान् दधातीति सा । इह पृथिव्याम् । ततं विपुलं हतं ध्वस्तं तमोऽज्ञानं पातकं पाप्मा यया सा । अपातः पतनरहितः कामश्च यया । यद्वा पृथग्विशेषणम् न विद्येते पातकामौ यस्याः सा । शास्त्री शास्त्रसंबन्धिनी । नराणां शास्त्री शासिका । यद्वा शास्त्रीणामीशा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वामिनी । स्त्रियो नार्यो नरा मर्त्यास्तेषां हृदयं हरतीति । अयशो रुणद्धीति । न बाधते इत्यबाधिका । वा समुच्चये । आदेया ग्राह्या । मनुजं मानवमनु लक्ष्यीकृत्य जरां विस्रसां त्याजयन्ती विनाशयन्ती । जयन्ती केनाप्यपरिभूतत्वात् ॥

याता या तारतेजाः सदसि सदसिभृत्कालकान्तालकान्ता-
पारिं पारिन्द्रराजं सुरवसुरवधूपूजितारं जितारम् ।
सा त्रासात्त्रायतां त्वामविषमविषभृद्भूषणाभीषणा भी-
हीनाहीनाग्र्यपत्नी कुवलयवलयश्यामदेहामदेहा ॥ ९२ ॥

याता प्राप्ता देवी । तारमुज्ज्वलं तेजो यस्याः सा । सदसि सभायाम् । सन्तं शोभनमसिं बिभर्ति सा । कालाः कृष्णाः कान्ता रुचिरा अलकानामन्ताः प्रान्ता यस्याः सा । अपगता अरयो यस्मात् तमपारिं पारिन्द्रराजमजगरेन्द्रम् । सुरवाः सुशब्दा या सुरवध्वो देवकान्तास्ताभिः पूजिता । अरं शीघ्रं जितमारमरिसमूहो येन । सा यच्छब्दादिष्टा त्रासाद्भयात्त्रायतां रक्षताम् । त्वां भवन्तम् । अविषमाः सौम्या विषभृतः सर्पा भूषणं यस्याः सा । तथा अभीषणा अरौद्राकारा भिया भयेन हीना त्यक्ता । अहीनो नागपतिस्तस्याग्र्या प्रधाना पत्नी अग्र्यमहिषी । विरोटेत्यर्थः । कुवलयानां वलयं समूहस्तद्वच्छ्यामो देहो यस्याः सा । अमदा मदरहिता ईहा चेष्टा यस्याः सा । या सदसिः पारिन्द्रराजं प्राप्ता सा अहीनाग्र्यपत्नी त्रासात्त्रायतामिति संबन्धः ॥

नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रे धरित्रीकृता-
वन वरतम संगमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षो भवान् ।
मम वितरतु वीर निर्वाणशर्माणि जातावतारो धराधीशसिद्धार्थधाम्नि
क्षमालंकृता-
वनवरतमसङ्गमोदारतारोदितानङ्गनार्याव लीलापदे हे क्षितामो हिताक्षो-
भवान् ॥ ९३ ॥

नमताममराणां शिरोरुहेभ्यः केशेभ्यः स्रस्ताः सामोदानां निर्निद्राणां विकसितानां मन्दाराणां या मालास्तासां रजसा परागेण रञ्जितांह्रे पाटलितचरण । धरित्र्या भुवः कृतावन विहितरक्षण । वरतम प्रधानतम । संगमनाम्नो देवस्य संबन्धिनी उदारा तारा उदितानङ्गा उद्गतस्मरा अथवा वरतमः संगमः समागमो यस्याः सा वरतमसंगमा उदारतारा अदीनकनीनिका उदितानङ्गा उद्गतस्मरा या नार्यावली नारीणां पङ्क्तिस्तस्या लापेन जल्पितेन देहेन ईक्षितेन च न मोहितानि अक्षाणि इन्द्रियाणि यस्य स भवान् त्वम् मम वितरतु हे वीर जिन । निर्वाणशर्माणि मोक्षसुखानि । जातावतारोऽवतीर्णः । उत्पन्न इत्यर्थः । धराधीशः क्षितिपतिर्यः सिद्धार्थस्तस्य धाम्नि गृहे । कथंभूते । क्षमालंकृतौ भुवोऽलंकारभूते । अनवरतमजस्रम् । हे असङ्गमोद सङ्गमोदाभ्यां रहित । यद्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सङ्गाद्यो मोदः स नास्ति यस्यासौ असङ्गमोदः । स्वतन्त्रसुख इत्यर्थः । हे अरत अनासक्त । हे अरोदित रोदनहीन । शोकरहितेत्यर्थः । हे अनङ्गन अङ्गनारहित । हे आर्याव आर्यानवति यस्तदामन्त्रणम् । धाम्नि कथंभूते । लीलानां विलासानां पदे स्थाने । हे इत्यामन्त्रणे । भवान् कथंभूतः । क्षितामः क्षपितरोगः । हे हित हितकारिन् । पुनः कथंभूतः । अक्षोभवान् न भयान्वितः । हे वीर, भवान्मम निर्वाणशर्माणि वितरत्विति संबन्धः ॥

समवसरणमत्र यस्याः स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयी-
सदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुर्वराराट् परेताहितारोचितम् ।
प्रवितरतु समीहितं सार्हतां संहतिर्भक्तिभाजां भवाम्भोधिसंभ्रान्तभव्या-
वलीसेविता-
सदवनमदशोकपृथ्वीक्षणप्रा यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितम् ॥

समवसरणं धर्मदेशनास्थानं यस्याः अत्र अस्मिन् अराराट् भृशमराजत सा अर्हतां ततिर्भक्तिभाजां समीहितं वितरतु । समवसरणं कथंभूतम् । स्फुरत् केतुर्धर्मध्वजश्चक्रं धर्मचक्रं आनको देवदुन्दुभिः अनेकपद्मानि सुरकृतकमलानि इन्दुरुक्चामराणि चन्द्रावदातप्रकीर्णकानि उत्सर्पिणी सालत्रयी प्राकारत्रयं प्रधानावनमदशोकद्रुमः पृथिव्युत्सवभूतच्छायातपत्रत्रयं तस्य प्रभा कान्तिस्तया गुरु महार्हम् । पुनः किंभूतम् । परेता अपगता अहिताः शत्रवो येषां तैरारोचितं शोभितम् । अथ वा परा प्रधाना इताहिता गतशत्रुरित्यर्हतां संहतेर्विशेषणे । आरोचितं शोभितम् । संहतिः कथंभूता । भवाम्भोधौ संसारसमुद्रे संभ्रान्ता आकुलीभूता या भव्यावली तया सेविता । पुनः कथंभूता । सदवना सोपतापा च मदशोकाभ्यां पृथ्वी वितता च या न भवति । ईक्षणानि चक्षूंषि ज्ञानानि वा प्राति पूरयति सा । यशसा भातानि शोभितानि पत्राणि वाहनानि प्रभजन्ते ये उर्वराराजः पृथ्वीपतयः परेताः पिशाचा अहयो नागास्तारा ज्योतिष्कास्तेषामुचितं योग्यम् । समवसरणविशेषणमिदम् ॥

परमततिमिरोग्रभानुप्रभा भूरिभङ्गैर्गभीरा भृशं विश्ववर्ये निकाय्ये वितीर्यात्तरा-
महति मतिमते हि ते शस्यमानस्य वासं सदा तन्वतीतापदानन्दधानस्य
सामानिनः ।
जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौर्भारतीतीर्थकृत्
महति मतिमतेहितेशस्य मानस्य वा संसदातन्वती तापदानं दधानस्य सा
मानि नः ॥ ९९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हे तीर्थकृत्, ते तव मते शासने भारती विश्ववर्यं निकाय्ये वासमाश्रयम् । मोक्षमित्यर्थः । वितीर्यात्तरामिति संबन्धः । भारती कथंभूता । परशासनध्वान्तसूर्यसमा । भूरिभङ्गैरर्थविकल्पैर्गभीरा । निकाय्ये कथंभूते । अहतिमति अविद्यमानहनने । मते शासने आधारभूते । यद्वा अहतिं अविद्यमानघातम् । एतद्वासस्य विशेषणम् । अतिमते अतिशयेनाभिप्रेते । हि स्फुटम् । ते तव । शस्यमानस्य स्तूयमानस्य । सदा नित्यम् । अतनवो बहुतरा अतीता आपदो यस्य तस्यामन्त्रणं अतन्वतीतापत् । आनन्दधानस्य प्रमोदस्थानस्य । सा इत्थंभूता । अमानिनो निरहंकारस्य । नौस्तरणिः । महति विस्तीर्णे । हे हित प्रियकारिन् । यद्वा मतिमता मनीषिणा ईहिता । ईशस्य स्वामिनः । वा इवार्थे भिन्नक्रमश्च । मानस्य पूजायाः संसद् वा सभेव । तापदानं संतापखण्डनमातन्वती । मामानि प्रियाणि दधानस्य । नोऽस्माकम् ॥

सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे
परमवसुताङ्गजा रावसन्नाशितारातिभाराजिते भासिनी हारतारा बलक्षेमदा ।
क्षणरुचिरुचिरोरुचञ्चत्सटासंकटोत्कृष्टकण्ठोद्भटे संस्थिते भव्यलोकं त्वमम्बाम्बिके
परमव सुतरां गजारावसन्ना शितारातिभा राजिते भासिनीहारताराबलक्षेऽमदा ॥ ९६ ॥

हे सवेगनतदेववधूजनस्तनपीठीषु लुठतां तारहाराणां स्फुरद्रश्मिभिः सारे कर्बुरे क्रमाम्भोरुहे चरणकमले यस्यास्तस्याः संबोधनम् । परमवसुताङ्गजा अतिशयेन परमवसू परमतेजसौ अङ्गजौ पुत्रौ यस्याः सा । रावेण ध्वनिना सम्यग् नाशितोऽदर्शनं नीतो अरातिभारः शत्रुवर्गो यया सा । अजितेऽपराभूते । भासिनी भासनशीला । हारतारा हारोज्ज्वला । बलं क्षेमं च ददाति या । सिंहे कथंभूते । क्षणरुचिरुचिराभिर्विद्युद्दीप्तिभिरिव रुचिराभिः उर्वीभिः चञ्चन्तीभिः सटाभिः संकट उत्कृष्टो यः कण्ठस्तेनोद्भटे । हे अम्ब मातः । हे अम्बिके देवि । परमुत्कृष्टमव रक्ष । सुतरामत्यर्थम् । गजारौ सिंहे । असन्ना अखिन्ना । संस्थिता । शितस्य तनूकृतस्य आरस्येव पित्तलस्येव अतिशयेन भा यस्याः सा । राजिते भ्राजिते । भासमानहिमनक्षत्रधवले । अमदा मदरहिता । हे अम्बिके सिंहे संस्थिते सुतरां त्वं भव्यलोकमवेति संबन्धः ॥

इति श्रीमहाकविशोभनमुनिप्रणीता सावचूरिश्चतुर्विंशतिजिनस्तुतिः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

Serving JinShasan
027632
gyanmandir@kobatirth.org

For Private and Personal Use Only